मदन पारिजात

مدن پارجات

जिसमें

ब्राह्मणादि चारों वर्णों के यथोचित धर्म कर्मादि
राजाओं का प्रजापालने में यथोचित नीत्यनुसार
दण्डादि व गृहस्थादि चारों आश्रमियों का यथायो-
ग्य निज निज धर्म कर्मादि करण नाना प्रकार के
सुललित श्लोकों में नीति शास्त्र वर्णित है

जिसको

श्री पण्डित पारिजातकहार मल्लेत्यादि विरुदराजी विराजमानादिकों ने
नीति शास्त्रानुरागियों के उपकार के लिये अत्यन्त परिश्रम से रचना किया

पहिली बार

स्थान लखनऊ

मुन्शी नवलकिशोर के छापेखाने में छपा

अप्रिल सन् १८८६ ईसवी

श्रीगणेशायनमः

अथ

मदनपारिजातः

प्रवालाद्रिप्रस्थद्युतिनिचयपर्यायवपुषे नमोविघ्नध्वा
न्तराशिविघटनवरिष्ठायमहसे। जगत्प्रादुर्भावस्थितिलयनि
शायासरचना विनोदासक्तायप्रणतफलसिद्धिप्रतिभुवे
॥ १ ॥ प्रक्वणद्वल्लकुंडलस्तबकघृष्टगंडस्थलं महार्ह
मणिमेखलंमरकतांकुरश्यामलं। करोतु करुणां सदा
कलितपंचपाब्दक्रमं। महः किमपि मोहनं कपटशैशवं
केशवं ॥ २ ॥ कांतेकृतागसिरुषापरुषंब्रुवाणा कुंठी
कृताधरसनाद्दृनियंत्रणेन। मौनेनमानमधिगच्छतिया
ददातु। सापार्वती हरविभक्ततनुः शिवं वः ॥ ३ ॥ अस्ति
प्रशस्तविभवोपगतप्रशस्ति विस्तारिणी भुवि शकाधि
पराजधानी। ढिल्लीतिविश्वविदितानगरीमतल्ली पल्ली
व भातिपुरतस्त्रिदिवोपि यस्याः ॥ ४ ॥ तामुत्तरेण यमुना
तटदेशनिष्ठा काष्ठेत्यभूदनुपमानगरी गरिष्ठा ॥ यस्या

मनल्पविभवोपचिता बभूवुः शाकान्वये महितकीर्त्ति
युषो महीशाः ॥ ५ ॥ तस्मिन्नभूद्विमलशाककुलांबुरा
शौ बुद्बुदभूतशुभकीर्त्तिघनप्रकाशः । लोकैः सदा
हृदि धृतो गुणसन्निविष्टः । श्रीरत्नपालनृपतिर्भुवनै
करत्नं ॥ ६ ॥ तस्यात्मजोभरहपाल इति प्रसिद्धः सि
द्धांगनाजनसमाजसमिद्धकीर्त्तिः । दानेन यः सुकृतिनां
क्षितिपतिस्सदैन्यं सैन्यं च दैन्यमदृशः प्रति भूपतीनां ॥ ७
॥ सूनोऽस्य जातः सुकृतोन्नतस्य न तस्य कश्चित्सदृशो
बभूव । मल्लुस्तथात्तस्य प्रभवेक्ष्यतातोना स्माहरिश्चंद्र इति त्रि
धन ॥ ८ ॥ तस्यात्मजो भूदतुलप्रतापः साधारणो भू
मिपतिर्वदान्यः । अभूतपूर्व्वा प्रतनी स्वराणा मजीग
पद्यो जगति स्वकीर्त्तिं ॥ ९ ॥ यस्मिन्न साधारणधैर्यशौ
र्यं गांभीर्यसौंदर्यगुणैकधुर्ये । गिरींद्रश्रीनानुजसिंधु
राजा स्मरान्पसाधारणतां भजंते ॥ १० ॥ लक्ष्मीलक्ष्म
वतीं विधाय विबुधाहारस्य हारस्य च ज्योतिर्गर्व्वमपास्य
पार्व्वणशरच्चंद्रस्य चंद्रस्य च उन्मीलन्नवसौरसैंधवलसत्पिं
डीरपिंडोपमा यस्यैता भुवि नर्त्तनत्यनुदिनं सन्मूर्त्तयः
कीर्त्तयः ॥ ११ ॥ बंधच्छिदा विरुदकीर्त्तिमिहान्वितार्थी
कृत्वा परत्र च तथैव विधातुमिच्छुः । कीनाशपाश ब
धबद्धविमोचनार्थं तीर्थत्रयीकरमिमुक्तिमचीकरद्यः
॥ १२ ॥ महीपतेस्तस्य महानुभावो सुतावभूतां सुकृतो

न्नतस्य ज्यायोमहौजाः सहजेंद्रनामा। सदाग्रजः श्रीमद
नो द्वितीयः॥ १३॥ अपारदःसिद्धरसोंजनाना मनश्वर
श्चिर्दिमवौषधीनां। अनंतकोमृत्युरहोरिपूणा मासीत्प्र
भुः श्रीसहजाधिनाथः॥ १४॥ अस्यानुजः श्रीमदनोन
नाम्ना धाम्नाच रूपेण च संगतार्थः। शेषाहरीच सुवि
पद्विपक्षो नितांतकांतारसमाश्रितोऽभूत्॥ १५॥ विद्या
गानेनुव्यसनं यदीयं वियाप्रसंगेषु विनोदसौख्यं। य
स्यावदातं च यशोपितानं दिग्मंडलीमंडनमेकमास्ते॥
१६॥ परिशीलयता कलाकलापं विदधानेन च भूरिशः
प्रबंधात्। मदनेव महीभृतायथेन प्रथितानूतनभोज
राजकीर्त्तिः॥ १७॥ यः कूपारामानधर्मायतनानि
सन्निबंधांश्च। कृत्वा स्वकीर्त्तिमेकामदीदृशन्मूर्त्तिभेदेन
॥ १८॥ श्रीमानयं मदनपूर्वकपारिजात नामांकितं
स्मृतियथानुगतं निबंधं। वर्णाश्रमप्रमुखधर्मविवेच
नाय विद्वत्सुखेन सुकृतीमितमातनोति॥ १९॥ मति
र्येषां शास्त्रे प्रकृतिरमणीया व्यवहृतिः परार्थीसंभ्ना
व्यंजगति कतिपये। चिरं चित्तेतेषां मुकुरत
लभूते स्थितिमिया दियं व्यासारायप्रवरमुनिशिष्य
स्य भणितिः॥ २०॥ माता पुण्यचरित्रकीर्त्तिविभवा
यस्यांबिकानामतः प्रागकल्पापरमूर्त्तिरार्यचरितः श्री
ये द्विभट्टः पिता। सोयं कौशिकवंशभूषणमणिः

स्मिन्नेवं प्रकरणानि तु । गर्भाधानादिसंस्कारस्तबके दश पंच च । शावाशौचं तु पूर्वं स्यात्सूतकाशौचमेव च । आशौचमनुपेतस्य दशाहप्रमुखास्ततः । अनुलोमसपिंडस्य त्वाशौचं स्यादतः परं । समानसलिलानां च प्रोषितोपरतौ तथा । मृतस्य प्रोषितस्यैवं दाहे विधिरतः परं । उपाध्यायाद्युपरतौ क्षेत्रजादिमृतौ तथा । अनुगच्छत्सु चाशौचमाशौचानां परस्परं । संकरे निर्णयो दाहकाले च विरते विधिः । दशाहमध्ये दर्शस्य संपाते कृत्यनिर्णयः । देशांतरगते जीवच्छ्राद्धानाकरणे विधिः । एवं प्रकरणान्यत्र स्तबके दश पंच च । पंचमे तु विनिर्दिष्टान्याशौचपदसंज्ञिते ॥ ५ ॥ शुद्धिःसौवर्णपात्रादेर्वस्त्रादेस्तदनंतरं । धान्यादेश्चापि शुद्धिः स्यात्सिद्धान्नादेस्ततः परं । भूम्यादेश्च ततः शुद्धेरश्रवादस्तथेति षट् । षष्ठेस्मिंस्तबके द्रव्यशुद्धौ प्रकरणानि तु ॥ ६ ॥ आदौ श्राद्धस्य महिमा तत्स्वरूपं च तद्भिदा तत्राधिकारिणस्तद्वदामश्राद्धाधिकारिणः । श्राद्धे देशास्तथा काला अन्वाधानस्य चैव हि । अन्वाधानस्य पिंडादिपितृयज्ञस्य चाप्यथ । दर्शश्राद्धस्य चेत्येषामेकस्मिन्वासरे कृतिः । अपराह्णस्य समय अमावास्याविनिर्णयः । मृताहकालस्तस्यैवाज्ञाने कालविनिर्णयः । आमश्राद्धस्यकालश्च नित्यनैमित्तिके तथा ।

प्रत्याब्दिकश्राद्धयोश्च ततस्त्वापरपक्षिकं। काम्यका-
लाश्च संक्रांतिकाला राहुग्रहे तथा। काला युगादिम-
न्वाद्याः श्राद्धे जीवत्पितुस्तथा। विहितानि निषिद्धानि-
मलमासे ततः पुनः। हविर्विशेषा वर्ज्यानि ब्राह्मणा-
नां परीक्षणं। पंक्तिदूषकब्राह्मणास्तेषामनुकल्पस्त-
तःपरं। वर्ज्याविप्रब्राह्मणानामामंत्रणविधिस्ततः
दिने श्राद्धस्य पूर्वाह्नकृत्यं यच्चापराह्णिकं। अग्नौ
करणाग्निमीमांसा तथाग्नौकरणे विधिः। परिवेषणाक-
र्मादि श्राद्धे द्विपितृकस्य च। संकल्पमन्त्रकं श्राद्धमे-
कोद्दिष्टमतःपरं। नवश्राद्धानि तद्वच्च सपिंडीकरणं त-
तः। वृद्धिश्राद्धविधानं च जीवच्छ्राद्धमतःपरं। इत्थं प्र-
करणान्येकचत्वारिंशदनुक्रमात्। श्राद्धाख्ये सप्तमे-
स्मिंस्तवके तु समासतः। आदौ विभागकालाः स्युर्मु-
ख्यगौणासुतास्ततः। विजातीयसुतानां च विभाग-
स्तदनंतरं। पैतामहधने पौत्रभागो मात्रंशसंमितिः।
असूतस्त्रीधनग्राहे त्वधिकारिनिरूपणं। तथापुत्र
धनग्राहे भागः संसृष्टिनां ततः। अंशानर्हास्ततो द्रव्य-
मविभाज्यमतःपरं। शेषः सर्वविभागस्येत्येवं प्रक-
रणानि च। एकादशास्मिंस्तवके दायभागपदेष्टमे॥
८॥ पूर्वपापफलोद्देशे नरकास्तदनंतरं। विपाकः
कर्मणां प्रायश्चित्तकर्त्तव्यनिश्चयः। कामाकामसमहा

पापप्रायश्चित्तविकल्पनं । कृच्छ्रचांद्रायणादीनां ल-
क्षणानि पृथक् पृथक् । इति कर्त्तव्यता तेषां प्रत्या-
म्नायस्तथैव च । सामान्येन तथा सर्वपापनिष्कृतिहे-
तवः । पर्षत्पर्षदुपस्थानं प्रायश्चित्तविनिर्णयः ।
व्रतस्यग्रहणे कालो विप्रशास्त्रग्रहे तथा । उद्देशः पा-
तकानांच ब्रह्महत्यादिनिष्कृतिः । उपपातकनि-
र्देशस्तन्निष्कृतिरतः परं । असत्प्रतिग्रहादीनां
निष्कृतिस्तदनंतरं । जातिभ्रंशकरादीनां निष्कृ-
तिश्च ततः परं । प्रकीर्णकेषु पापेषु प्रायश्चित्तमिति
क्रमात् ॥ एवं प्रकरणान्येकविंशतिर्नवके पुनः ।
प्रायश्चित्ताभिधानेस्मिं स्तवके तु समासतः ॥ इह
हि धर्मशास्त्रे प्रवृत्तानां तदधिगमोपायतया तच्छा-
स्त्रप्रणेतारः प्रदर्शनीयाः । तत्र यद्वै किंच मनु-
रवदत्तद्भेषजमिति मुनेर्विद् कृतत्वेन तत्प्रमुखा ध-
र्मशास्त्रप्रणेतारः प्रथमं प्रदर्श्यंते ॥ तत्र याज्ञव-
ल्क्यः ॥ मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोंगिराः
। यमापस्तंबसंवर्त्ताः कात्यायनबृहस्पती । पराश-
रव्यासशंखलिखिता दक्षगौतमौ । शातातपोव-
सिष्ठश्च धर्मशास्त्रप्रयोजका इति । नेयं परिसं-
ख्या किंतु प्रदर्शनार्थमेतत् । यतो बौधायनादयो-
पि धर्मशास्त्रप्रयोजका भवंति । नन्वेतेषां मन्वादि-

धर्मशास्त्राणां वेदमूलत्वेन परस्परमनपेक्षप्रमाणत्वात
नान्योन्यमाकांक्षा तत्र क्वचिदधिकांगकर्म्मविधिः क्वचि
न्न्यूनांगकर्म्मविधिरिति विरोधादप्रामाण्यप्रसंग इति चे
न्नैवं सर्वशाखाप्रत्ययमेकं कर्म्मेति न्यायेन सर्वत्र विधे
यस्य कर्म्मण एकत्वेन प्रधानविरोधाभावादंगेषु प्रातीति
कोयः परस्परविरोधः तत्परिहारो मृग्यः स च परिहार आ
कांक्षावशात्। आकांक्षा चेति कर्त्तव्यतायां सा चेति कर्त्त
व्यता यस्मिन् शास्त्रे न्यूनातच्छास्त्रांतरावगतार्थेऽनपेक्ष
प्रमाणमपि अनवगतांशे शास्त्रांतरमपेक्षत इति नात्यं
तमनपेक्षा अत एवाविरोधान्नाप्रामाण्यं। एवं समग्रां-
गे कर्म्मण्यनुष्ठिते धर्मोपि समग्रो भवेत्। धर्माच्चेष्टसिद्धिः
धर्मश्चाचारायत्तः। तथा च मनुः॥ आचारः परमो धर्मो
विद्वद्भिः परिकीर्त्तित इति। अत्र कार्यकारणयोरभेदोप
चारः। धर्मलक्षणं सुकृता पूर्वं। तथा। श्रुतिस्मृत्युदि
तः सम्यक् साधुभिर्यश्च सेवितः। तमाचारं निषेवेत ध-
र्म्मकामो जितेंद्रिय इति। आचारश्च मध्यदेशादिप्रश
स्तेभ्यो विज्ञेयः॥ यथाह मनुः॥ सरस्वतीदृषद्वत्योर्दे
वनद्योर्यदंतरं। तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते
तस्मिन्देशे य आचारः पारंपर्यक्रमागतः। वर्णानां
सांतरालानां स सदाचार उच्यते। हिमवद्विंध्ययोर्म
ध्ये यत्प्राग्विनशनादपि। विनशनं सरस्वत्यांत

द्धीन देशः। प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः।
आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात्। तयोरेवां
तरं गिर्योरार्यावर्त्तं विदुर्बुधा इति। प्रंचस्तु प्रकारांत
रेणार्यावर्त्तमाह। कृष्णमृगो विचरतीति। अन्यच्च
मनुरेवाह। कुरुक्षेत्रं च मत्स्याश्च पांचालाः शूरसेनजाः
। एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनंतरः। अनंतरः ई
षन्न्यून इत्यर्थः। एतद्देशप्रसूतस्य सकाशादग्रजन्मनः
। स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः। आचा
राद्विच्युतो विप्रो न वेदफलमश्नुते। आचारेण तु सं
युक्तः संपूर्णफलभाग्भवेत्। तथा। एवमाचारतो दृ
ष्ट्वा धर्मस्य मुनयो गतिं। सर्वस्य तपसो मूलमाचारं
जगृहुः परमिति॥ अथ कर्मप्रशंसा॥ तत्र मत्स्य
पुराणे। ज्ञानयोगसहस्राद्धि कर्मयोगः प्रशस्यते।
कर्मयोगोद्भवं ज्ञानं तस्मात्तत्परमं पदं॥ कर्मज्ञा-
नोद्भवं ब्रह्म न च ज्ञानमकर्मणः। तस्मात्कर्मणि
युक्तात्मा तत्त्वं प्राप्नोति शाश्वतं। वेदोऽखिलो धर्म-
मूलं आचारश्चैव तद्विदां। अष्टावात्मगुणास्तस्मि-
न्प्राधान्येन संस्थिताः। दया सर्वेषु भूतेषु क्षांती रक्षा
तुरस्य च। अनसूया तथा लोके शौचमंतर्बहिर्द्विजाः
अनायासमसु कार्येषु मंगलाचारसेवनं। न च द्रव्ये
षु कार्पण्यमन्येषूपार्जितेषु च। तथा स्पृहा परस्त्रीषु

परार्थं च सर्वदा। अष्टावात्मगुणाः प्रोक्ताः पुराणे चैव कोविदैः। अयमेव क्रियायोगो ज्ञानयोगस्य साधकः। कर्म्मयोगं विना ज्ञानं कुत्र चिन्नेह दृश्यते। देवानां च मनुष्याणां पितॄणां चैव सर्वदा। तुष्टिं करोति विपुलां कर्म्म कुर्व्वन् यथोदितं॥ अथ साधारणधर्म्माः॥ तत्र मनुः॥ यद्यत्परवशं कर्म्म तत्तद्यत्नेन वर्ज्जयेत्। यद्यदात्मवशं कर्म्म तत्तत्सेवेत यत्नतः। सर्वं परवशं दुःखं सर्वमात्मवशं सुखं। एतद्विद्यात्समासेन लक्षणं सुखदुःखयोः। यत्कर्म कुर्वतोस्य स्यात्परितोषोन्तरात्मनः। तत्प्रयत्नेन कुर्वीत विपरीतं तु वर्ज्जयेत्। यत्कर्म कुर्व्वत इति शास्त्रविरुद्धमित्यर्थः। शास्त्राविरुद्धेपि कचिदपवादो दृश्यते। यथाह याज्ञवल्क्यः॥ कर्म्मणा मनसा वाचा यत्नाद्धर्म्मं समाचरेत्। अस्वर्ग्यं लोकविद्विष्टं धर्म्ममप्याचरेन्न तु। तत्र कर्म्म कथं कार्यमित्याकांक्षायां सारसंग्रहे। यज्ञोपवीतिना कार्यं सर्वं कर्म्म प्रदक्षिणं। मनःप्रमोदात्सत्योक्त्या तपसा ज्ञानकर्म्मणि। आचांतोप्याचमेत्शुद्धिं कृत्वा कर्म्म समारभेत्। कर्म्मायद्यकृतं। ज्ञात्वा तावदेव पुनश्चरेत्। प्रधानस्याक्रियायां तु सांगं तत्क्रियते पुनः। तदंगीकरणं कुर्य्यात्प्राय। श्चित्तं न कर्म्म तत्। आचारादिष्वा मनुनैव स्याद्दुर्दीदी

ण्या न दित्तया । तिष्ठस्य महतानुक्त्वा वासीनत्वं च कर्म्मसु
। कर्त्रे गानामनुक्तौ तु दक्षिणांगं भवेत्तथा । कुत्सिते वा
महत्तः स्याद्दक्षिणः स्यादकुत्सिते । प्रभुः प्रथमकल्पस्य
योऽनुकल्पेतु वर्त्तते । स नाप्नोति फलं तस्य परत्रेति
श्रुति स्मृतिः । बहल्पं वा स्वगृह्योक्तं यस्य यत्कर्म्म चो·
दितं । तस्य तावति शास्त्रार्थे कृते सर्वं कृतं भवेत् ।
श्रौतेषु सर्वशाखोक्तं सर्वस्यैव यथोचितं ॥ स्मार्त्ते सा
धारणं तेषु ग्राह्यं श्रौतेषु कर्म्मसु । सामयाचारका ध
र्म्मा देशजातिकुलोद्भवाः । ग्रामाचाराः परिग्राह्या ये
त्वविध्यविरोधिनः । युगधर्माः परिग्राह्याः सर्वैरेव
यथोचितं । देवरेण सुतोत्पत्तिर्वानप्रस्थाश्रमग्रहः ।
दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य वै । समुद्रया-
तुः स्वीकारः कमंडलुविधारणं । कमंडलुविधारण
मिति नैष्ठिकब्रह्मचारी गृह्यते । महाप्रस्थानगमनं
गोपशुश्च सुराग्रहः । सुराग्रह इति सौत्रामणीनाम
यज्ञः अग्निहोत्रहवण्याश्च लेहो लीढा परिग्रहः । अ-
ग्निहोत्रीहवणी यज्ञपात्रविशेषः ॥ तत्र स्थितस्य हवि·
षो लेहः आस्वादनं चमसस्थितसोमवत् । लीढाया अ
ग्निहोत्रहवण्याः परिग्रहः स्वीकारः ॥ असवर्णासु कन्या
सु विवाहश्च द्विजातिषु । वृत्तस्वाध्यायसापेक्षमघसंको
चनं तथा । वृत्तं यायावरत्वस्य आचारः स्वाध्यायो ।

वेदः। अच्चमाशौचं। प्रायश्चित्तविधानं च विप्राणां मरणान्ति
कं। संसर्गदोषः पापेषु मधुपर्के पशोर्वधः। दत्तौरसेतरेषां
तु पुत्रत्वेन परिग्रहः। शामित्रं चैव विप्राणां सोमविक्रयणं
तथा। शामिता यज्ञपशुहिंसकः तस्य कर्म्म शामित्रं च।
दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ। कलौयुगे त्विमा
न्धर्म्मान् वर्ज्यानाहुर्मनीषिणः। इज्याचारदयाहिंसादान
स्वाध्यायकर्म्मणां। अयंतु परमो धर्म्मो यद्योगेनात्मदर्शनं
। अहिंसासत्यमस्तेयं शौचमिन्द्रियनिग्रहः। दानं दमो द
याक्षान्तिः सर्वेषां धर्म्मसाधनं॥ अथोपनयनकालादयः
। द्विजन्मनामुपनीतानामेव श्रौतस्मार्त्तकर्म्माधिकारा
त्साधारणधर्म्मानन्तरमुपनयनकालो निरूप्यते॥ तत्र म-
नुः। गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनं। गर्भादेकाद
शे राज्ञां गर्भात्तु द्वादशे विशः॥ अथ काम्यकालाः॥
ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पंचमइति। तथा सप्तमे
ब्रह्मवर्च्चसकाममष्टम आयुःकामं नवमे तेजस्कामं दश
मे अन्नाद्यकाममेकादशे इन्द्रियकामं द्वादशे पशुकाममु
पनयेदिति। तथा च वसंते ब्राह्मणमुपनयेत् ग्रीष्मे राज
न्यं शरदि वैश्यमिति। पारस्करेऽपि। ब्राह्मणस्याष्टवा-
र्षिकस्य गर्भाष्टवर्षस्य वा क्षत्रियस्यैकादशवार्षिकस्य
वैश्यस्य द्वादशवार्षिकस्य उपनयनं कुर्यात्। यथामं
गलं वा सर्वेषामुपनयनमिति। यथामंगलं पूर्वोक्त।

ब्रह्मवर्च्चसादिकामानतिक्रमेण। तथा मासविशेषादपि
फलविशेषः। तत्र सुरेश्वरः। माघे मासि महाधनो धनपतिः
माह्नो बली फाल्गुने मेधावी भवति व्रतोपनयने चैत्रे च
वेदान्वितः। वैशाखे सुभगः सुखी पटुमतिर्ज्येष्ठे बलि
ष्ठो बुधो ह्याषाढेऽपि महाविपक्षविजयी ख्यातो महापंडितः
तथा नक्षत्रादिविशेषा अपि। हस्तत्रये दैत्यरिपुत्रये च
सुरेंद्रपुष्याश्विनिरेवतीषु। वारेषु शुक्रार्कबृहस्पती
नां हितानुबंधी द्विजमुंजबंधः। तृतीयैकादशी ग्राह्या पं
चमी द्वादशी तथा। द्वितीयायां च मेधावी भवेदर्थबला
न्वितः। रिक्तायामर्थहानिः स्यात्सौरीमास्यां तथैव च। प्र
तिपद्यपि चाष्टम्यां कुलवुद्धिविनाशकृत्। सप्तम्यामष्ट
म्यां षष्ठि यदि रिक्ता चतुर्दश्यां। आयुर्विद्यानाशौ व्रतबं
धे पंचदश्यां वा। न च षष्ठ्याम् यष्टम्यां पंचदश्यां न पर्व
णि। प्रतिपत्सु न कर्त्तव्यो न विष्टिकरणे तथा। रिक्तासु
च न कर्त्तव्य स्त्र्यहस्पृग्दिवसे तथा। न विपज्जन्मतारासु
नैधनप्रत्यरासु च। संपत्करे तथा क्षेम्यां साधके मैत्र सं
ज्ञके। परमे प्यथ मैत्रे च ताराः सर्वत्र शोभनाः। मेषे भ
वति सुरपोः धीमान्गतविरोगशोककपरिहीनाः। गद्या
न्मन्मथलग्ने विधुरो धीत कुलीरे च। करिकुलवैरिणि
बलवान्पापात्मैव यो बिति क्रूरः। सुभगः सुखोप
भोक्ता नौलिनि कीटे विनाशमुपयाति। धनुषि धनाढ्यः

श्रेयान्यद्दसिसघटे धनैः परित्यक्तः। षट्कर्म्माभिरतः
स्यान्मीने धनवान्भवक्ता च। वृषभश्च तुला कन्या ब्र
ह्मणानामुदाहृतः। सिंहो धन्वा तथा मीनः क्षत्रिया
णां प्रकीर्त्तितः। मेषो युग्मस्तथा कर्की वैश्यानां परि-
कीर्त्तितः। कुर्यान्मासाकाल वर्षे च व्रतोपनयनं द्विजः।
नानाध्यायेन भूकंपे निर्घाते न गलग्रहे। एवं विधेषु
वोक्तविशिष्टकाले आचार्यो माणवकं पूर्वं भोजयित्वा
कर्म्म समारभेत। तथा च गोभिलः॥ प्रातरेवैनं तद्दह-
र्भोजयंतीति। अत्रोपनातः पूर्वमित्यर्थः। पूर्वता च स्वस्वगृ
ह्योक्ता विज्ञेया। अपरो विशेषः शौनकेनोक्तः। अलंकृ
तं कुमारं कुशलीकृतशिरसमहतेन वाससा संवीतमि-
ति। कुशलीकृतशिरसं कृतशिरोवपनं। वस्त्रधारणा
दिकर्म्मक्रमस्तु स्वस्वगृह्योक्तो विज्ञेयः। वासांसि च मनु
नोक्तानि। वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि चे
ति। आनुपूर्व्येणावर्णानुपूर्व्येण॥ गौतमः। वासांसि
शाणक्षौमचीरकुतपाः सर्वेषां कार्पासं चाविकृतमि
ति। चीरं वस्त्रखंडः। वसिष्ठः। शुक्लमहतं वासो ब्राह्म
णस्य। मांजिष्ठं क्षौमं च क्षत्रियस्य। पीतं कौशेयं वैश्य
स्येति। कौशेयं पट्टविशेषः। मौंजीलक्षणं च मनुराह।
मौंजी त्रिवृत्समश्लक्ष्णा कार्या विप्रस्य मेखला। क्षत्रि
यस्य तु मौर्वी ज्या वैश्यस्य शणतांतवी। मुंजालाभे तु कर्त्तव्या।

कुशाश्मंतकबल्वजैः। त्रिवृता ग्रंथिनैकेन त्रिभिः पंच
भिरेव चेति। मौर्वी मूर्वातंच नी तन्मयी। ज्या धनुर्गुणः
। अत्र च त्रिवृत्त्वं नास्ति। ज्यात्व विनाशप्रसंगात्। मुंजा
द्यभावे वर्णक्रमेण कुशाद्या ग्राह्याः। अश्मंतकाख्यं
तृणं। तथा बल्वजमिति। ग्रंथिभेदस्तु मुख्यामुगौणी
षु च। यज्ञोपवीतलक्षणं छंदोगपरिशिष्टे। त्रिवृदूर्ध्ववृ
तं कार्यं तंतुत्रयमधोवृत्तं। त्रिवृद्यज्ञोपवीतं स्यात्तस्यै
को ग्रंथिरिष्यते। तथा। पृष्ठवंशे च नाभिं च धृतं यद्विंद
ते कटिः। तद्धार्यमुपवीतं स्यान्नातिलंबं न चोच्छ्रितं।
मनुः। कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत्।
शणसूत्रमयं राज्ञो वैश्यस्याविकसूत्रजं। ऊर्ध्ववृतलक्ष
णमाह संग्रहकारः। करेण दक्षिणेनोर्ध्वगतेन त्रिगुणीकृ
तं। वलितं मानवे सूत्रं शास्त्रे ऊर्ध्ववृतं स्मृतं। ऊर्ध्वंगतेनोर्ध्वस्थि
तेन दक्षिणकरेणाथ वलितं तदूर्ध्ववृतमित्यर्थः। यज्ञोप
वीताभावे देवलः॥ कार्पासक्षौमगोवालशणवल्क-
तृणोद्भवं। सदा संभवतो धार्यमुपवीतं द्विजातिभिः। क्षु-
माऽतसी। वल्कं तरुत्वक्। असंभवतः सार्वविभक्ति
कस्तसिल्। मुख्यासंभव इत्यर्थः। तथा शुचौ देशे शु-
चिः सूत्रं संहतांगुलिमूलके। आवेष्ट्य षण्णवत्या च।
त्रिगुणीकृत्य यत्नतः। अब्लिंगकैस्त्रिभिः सम्यक्प्र-
क्षाल्योर्ध्ववृतं त्रिवृत्। सप्रदक्षिणमावर्त्य सावित्र्या

त्रिगुणीकृतं। ततः प्रदक्षिणावर्त्तं समंस्यान्त्रवसूत्रकं। त्रिरावेष्ट्य दृढं बध्वा ब्रह्मविष्णुश्वरान्स्मरेत्। अजिनान्याह मनुः। कार्ष्णरौरवबास्तानि चर्माणि ब्रह्मचारिणः। तथा दंडानपि। ब्राह्मणो विल्वपालाशौ क्षत्रियो वटखादिरे। पैलवौदुंबरौ वैश्यो दंडानर्हंति धर्मतः। तथा-केशांतिको ब्राह्मणस्य दंडः कार्यः प्रमाणतः। ललाटसंमितो राज्ञां तथा नासांतिको विशः। ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः। अनुद्वेगकरान्नॄणां सत्वचो नाग्निदूषिता इति। यथा समर्च्य च गायत्रीमुपदिशेत्। तां च प्रणवव्याहृतिपूर्वकां पच्छोऽर्द्धर्चशस्ततः सर्वामिति। गायत्रीछंदस्कां वेदमातरं सूर्यदेवतां महाव्याहृतिपूर्विकां वा ह्मां ब्राह्मणाय ब्रह्मचारिणे। क्षत्रियाय त्रिष्टुप्छंदस्कां बृहस्पतिदृष्टां सवितृदेवतां देव सवितरित्यादिकां वा जपेये विनियुक्तां वैश्याय प्रजापतिदृष्टां जगतीछंदस्कां सवितृदेवतां रुक्मपाशप्रमोचने उखासंभरणे विनियुक्तां विश्वारूपाणि प्रतिमुंचत इति मंत्रं च ब्रूयात्। सर्वेषां वा ब्रह्मक्षत्रविशां गायत्रीमेव ब्रूयात। गायत्रीछंदस्कां सावित्रीं उक्तलक्षणां॥ आह शातातपः॥ तत्सवितुर्वरेण्यमिति सावित्री ब्राह्मणस्य देव सवितुरिति। राजन्यस्य विश्वा रूपाणीति वैश्यस्येति। कात्यायनोपिसावित्र्या ब्राह्मणमुपनयेत त्रिष्टुभा राजन्यं। जगत्यावै-

एवं सर्वेषां सावित्रीति। आह लौगाक्षिः। ॐ भूर्भुवः स्व
रित्युक्त्वा तत्सवितुरिति सावित्रीं त्रिरन्वाह पच्छोऽर्द्धर्चशः
सर्वामंततइति। अथ समिदाधानमुपनयनांगभूतं कर्त्त
व्यं स्वस्वगृह्योक्तविधिना। एवं प्रतिदिनमपि। अग्निका
र्यं च कुर्वीत मेधावी तदनंतरमिति संवर्त्तस्मरणात्। तद
नंतरं संध्योपासनादनंतरं। एतच्च कालद्वयेपि कार्यं। आह
याज्ञवल्क्यः॥ अग्निकार्यं ततः कुर्यात्संध्ययोरुभयोरपी
ति। केचित्सायमेवेच्छंति। तथा च लौगाक्षिः॥ सायमेवा
ग्निमिंधनमित्येक इति। मनुस्तु। दूरादाहृत्य समिधः संनिद-
ध्याद्विहायसि। सायंप्रातश्च जुहुयात्ताभिरग्निमतंद्रितः।
दूरात् अन्यापरिगृहीतदेशादित्यर्थः। विहायसि मंडपादौ
अन्यपरिगृहीतनिषेधमाहापस्तंबः। यथा कथं चित्प
रपरिग्रहमभिमन्यते स्तेनो हि भवतीति। अत्र विशेषः।
स्मृत्यंतरे। पुरास्तमयात्प्रागुदीचीं दिशं गत्वा समिध आ
हरेदिति। पुरास्तमयादित्यभिधानादस्तमिते निषेधः।
अत एवापस्तंबः। नास्तमिते समिद्धारो गच्छेदिति। स
मिन्नियमो वायुपुराणे। पालाशः समिधः कार्याः खा
दिर्यस्तदलाभतः। शमीरोहितकाश्वत्थास्तदभावे के
वेतसाविति। समिल्लक्षणं कात्यायन आह। नांगुष्ठा
दधिका कार्या समित्स्थूलतया क्वचित्। न वियुक्ता त्व
चा चैव न सकीटा न पाटिता। प्रादेशान्नाधिका नोना

तथाग्नेर्वह्निशालिकेति ॥ अथाभिवादनं ॥ तत्र या-
ज्ञवल्क्यः ॥ ततोभिवादयेद्वृद्धानसावहमिति ब्रुवन्।
ततः अग्निकार्यानंतरमित्यर्थः ब्रह्मपुराणे। उत्थाय मा-
तापितरौ पूर्वमेवाभिवादयेत्। आचार्यश्च ततो नित्यम-
भिवाद्यो विजानता ॥ मनुः ॥ लौकिकं वैदिकं वापि त-
थाध्यात्मिकमेव वा। आददीत यतो ज्ञानं तं पूर्वमभि-
वादयेत्। अभिवादात्परं विप्रो ज्यायांसमभिवादयेत्
असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत् ॥ अभि-
वादय इत्यस्माच्छब्दात्परममुकनामाहमस्मीति स्वं
नाम परिकीर्तयेत्। विप्रग्रहणं द्विजात्युपलक्षणार्थं।
आपस्तंबः। स्वदक्षिणं बाहुं श्रोत्रसमं प्रसार्य ब्राह्मणो-
भिवादयेत्। उरःसमं राजन्यो मध्यसमं वैश्यो नीचैः शू-
द्रः प्रांजलिः सर्वत्र। मनुः ॥ भोःशब्दं कीर्तयेदंते स्वस्य
नाम्नोभिवादने। नाम्नां स्वरूपभावो हि भोःशब्द ऋषि-
भिः स्मृतः। आयुष्मान् भव सौम्येति वाच्यो विप्रोभिवा-
दने। अकारश्चास्य नाम्नोंते वाच्यः पूर्वाक्षरः प्लुतः।
भोःशब्दो नाम्नां स्वकीयानां स्वरूपभावः। स्वरूपस्य
संबोध्यं प्रति प्राप्तिहेतुः। अयमर्थः भोःशब्दे नहि बो-
धितो सावस्य नाम बुध्यत इति। अत्र भूधातुः प्राप्त्य-
र्थः। भो भाव इति पाठे भोःशब्दस्य भावः सत्ता आ-
युष्मान् भव सौम्येति वाक्यस्यांते अस्याभिवादकस्य

नामवाच्यं विष्णुशर्म्मान्निति तस्य वान्ते अकारो वाच्यः त-
स्य चाकारस्य पूर्वाक्षरः प्लुतः पूर्व्वाक्षरं प्लुतं छांदसो लिंग
व्यत्ययः। यद्यपि पूर्व्वाक्षरं प्लुतं छांदसो लिंग व्यत्ययः।
यद्यपि पूर्वाक्षरं नकारस्तथापि तस्य व्यंजनत्वेन प्लुतत्वा
योगात् शर्म्मन्नित्यत्र योयमकारः स एव पूर्वं पदाभिधेय
इति तस्यैव प्लुतता। पूर्वाक्षरप्लुत इत्यपि पाठः। तत्र पूर्वम-
क्षरं प्लुतमस्येति चतुरस्त्रं। अथवा। अकारश्चास्य नाम्नो
न्त इत्यस्यायमर्थः अस्याभिवादकस्य नाम्नोंते योयमका-
रः अकार इति स्वरमात्रोपलक्षणं। सर्वेषां नाम्नामकारांत
त्वनियमाभावात्। स एवांत्यस्वरः पूर्वाक्षरः। पूर्व्वोरिति ना
मगतान्यक्षराणि यस्य स तथोक्तः। एवंविधः प्लुतो वा
च्यो न पुनरन्य एवाकारो नामान्ते वाच्य इति। तथाच व
सिष्ठः। आमंत्रिते स्वरोंत्योस्य प्लवत इति। आमंत्रिते क
र्तव्ये अभिवादकनाम्नोंते यः स्वरः स प्लवते त्रिमात्रो भव-
तीत्यर्थः। ननश्चाभिवादनः प्रत्यभिवादनयोरेवं प्रयो
गो भवति। अभिवादये चैत्र नामाहमस्मि भो इति। आ
युष्मान्भव सौम्य विष्णु शर्म्मान्नअइति। अथवा। आयु
ष्मान् भव सौम्य विष्णु शर्म्मान् न इति। क्षत्रिय वैश्ययो-
स्तु वर्म्म गुप्त शब्द प्रयोगः। यौ तु स्वनाम गुप्तं भवंति। आ
त्मनाम गुरोर्नाम यन्माम कृपणस्य च। आयुः कामोन
गृह्णीयाज्ज्येष्ठ पुत्र कलत्रयोरित्यादि विधिनिषेधौ तयो

रभिवादनव्यतिरिक्तस्थलं विषय इति विज्ञेयं। एतच्चा
भिवादनं हस्तद्वयेन कार्यं अपि वा आकर्णौ संपुटितौ
यथा तथैव संपुटितं करद्वयमपि न्यजाकर्णान्तिः। प्रत्य
भिवादनेपि दीक्षितस्य नाम न ग्राह्यं। तथा च मनुः। अ
वाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत्। भोभवत्पूर्व
कत्वेनमभिभाषेत धर्म्मवित्। भो दीक्षित भवन् दीक्षित
इति भोभवत्पूर्वकं यौगिकैः शब्दैरेनं प्रत्यभिवादना
दिष्वभिभाषेतेत्यर्थः। यो न वेत्त्यभिवादस्य विप्रः प्रत्य-
भिवादनं। नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः।
अभिवादे तु यो विप्रः आशिषं न प्रयच्छति। श्मशाने
जायते वृक्षः काकगृध्रादिसेवितः। शातातपः। पाखं-
डं पतितं व्रात्यं महापातकिनं शठं। सोपानत्कं कृतघ्नं-
च नाभिवादेत्कदाचन। धावंतं च प्रमत्तं च मूत्रोच्चार
कृतं तथा। भुंजानमाचमार्हं च नास्तिकं नाभिवादये-
त्। वमंतं जृंभमाणं च कुर्वंतं दंतधावनं। अभ्यक्तशिर
सं चैव स्नानं नैवाभिवादयेत्। बृहस्पतिः॥ जपय
ज्ञगणस्थं च समित्पुष्पकुशानलान्। उदपात्रार्थभै
क्ष्यं वहंतं नाभिवादयेत। उदक्यां सूतिकां नारीं भर्तृघ्नीं
ब्रह्मघातिनीं। अभिवाद्य द्विजो मोहादहोरात्रेण शुध्य
ति। यमदग्निः॥ देवताप्रतिमां दृष्ट्वा यतिं दृष्ट्वा त्रिदंडि-
नं। नमस्कारं न कुर्याच्चेत्प्रायश्चित्ती भवेन्नरः। मनुः।

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः। चत्वारि तस्य व-
र्द्धंते आयुःप्रज्ञायशोबलं। एतच्चाभिवादनमधिकव-
यसामेव कार्यं। तथा च मनुः। ज्यायांसमभिवादयेदिति।
अत एव गौतमः। ऋत्विक्श्वशुरपितृव्यमातुलानांयवी
यसां प्रत्युत्थानमनभिवादनमिति। ज्यायस्त्वं च कियता
कालेनेत्याकांक्षायां मनुः। दशाब्दाख्यं पौरसख्यं पंचा
ब्दाख्यं कलाभृतां। त्र्यब्दपूर्वं श्रोत्रियाणामल्पेनापि स्व
योनिषु। दशाब्दपर्यंतमाख्यायत इति दशाब्दाख्यं। एवं
पंचाब्दाख्यं कलाभृतां। त्र्यब्दपूर्वं श्रोत्रियाणामल्पेनापि
स्वयोनिषु। दशाब्दपर्यंतमाख्यायत इति दशाब्दाख्यमेवं
चाब्दाख्यमिति। एवंवैकविधानमिति कप्रत्ययः। पुरे भवाः
पौराः एकपुरनिवासिनां विद्याहीनानां दशभिर्वर्षैः पूर्वः स
खा भवति। ततोधिको ज्यायान्। कलाभृतां गीतादिविद्या
वतां पंचाब्दपूर्वः सखा भवति श्रोत्रियाणां वेदाध्यायिनां त्र्य
ब्दपूर्वः सखा। ततोधिको ज्यायान्। स्वयोनिषु भ्रात्रादिषु
स्वल्पेनापि कालेन एकदिनपूर्वत्वेनापि ज्येष्ठता। एकदि-
नजातत्वे तु सखा। तदुक्तमापस्तंबेन। वयस्यः समानेऽह्
नि जात इति ॥ अथ प्रसंगाद्गुर्वादिलक्षणं ॥ तत्र
याज्ञवल्क्यः॥ स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छ
ति। उपनीय ददद्वेदमाचार्यः स उदाहृतः। एकदेशमुपाध्याय
ऋत्विग्यज्ञकृदुच्यते। एते मान्या यथापूर्वमेभ्यो माता गरी

यमी। मनुः। उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः। संकल्पं
सरहस्यं च तमाचार्यं प्रचक्षते। एकदेशं तु वेदस्य वेदांगान्य
थवा पुनः। योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते। वेद
स्यैकदेशं संहितां ब्राह्मणं वा वेदांगमात्रं वा धर्मार्थमध्यापय
ति अपरिभाषितवृत्त्यभिसंधानेन वा पूर्वोक्तमध्यापकवृत्त्यर्थः।
निषेकादीनि कर्माणि यः करोति यथाविधि। संभावयति चा
न्नेन स विप्रो गुरुरुच्यते। विप्रपदं पितुरुपलक्षणं। अतश्चै
वंविधः पितैव न गुरुरिति गम्यते। अग्न्याधेयं पाकयज्ञानग्नि
ष्टोमादिकान्मखान्। यः करोति वृतो यस्य स तस्यर्त्विगि-
होच्यते। तथा। उपाध्यायान्दशाचार्य आचार्याणां शतं पि
ता। सहस्रं तु पितॄन्माता गौरवेणातिरिच्यते। उत्पादकब्र-
ह्मदात्रोर्गरीयान्ब्रह्मदः पिता। ब्रह्मजन्म तु विप्रस्य प्रेत्य चे
ह च शाश्वतं॥ ब्रह्मजन्म॥ ब्रह्मणो वेदाज्जन्म उपनयनं
प्रेत्य मोक्षसाधनपर्यंतयोग्यतापादकत्वात्। इह च सर्वक
र्माधिकारापादकत्वात्। शाश्वतं स्यापि फलं भवति। अ
ल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः। तमपीह गुरुं विद्या
च्छ्रुतोपक्रियया तया। ब्राह्मणस्य जन्मनः कर्ता स्वधर्मस्य
च शासिता। बालोऽपि विप्रो वृद्धस्य पिता भवति धर्मतः। वि
प्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु वीर्यतः। धनधान्येन
वैश्यानां शूद्राणामेव जन्मतः। अथ भिक्षाचरणं॥ तत्र
याज्ञवल्क्यः॥ आदिमध्यावसानेषु भवच्छब्दोपलक्षि-

ता। ब्राह्मणक्षत्रियविशां भैक्षचर्या यथाक्रमं। भैक्षं भिक्षा
कदंबकं। भिक्षादिभ्योऽण्। मनुः। प्रतिगृह्येप्सितं दंडमु
पस्थाय च भास्करं। प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथावि
धि। ईप्सितं। यद्यस्य विहितं। वचनान्तरे प्रतिनियतदंडवि
धानादनेन विजातीयग्रहणनिषेधः। भास्करं सौरैर्मन्त्रैरुप
स्थाय अग्निं प्रदक्षिणीकृत्य गनत्रितयं भिक्षांगं विधाय
यद्यथाविधि वक्ष्यमाणविधना भैक्षं चरेत्। भवत्पूर्वं च
रेद्भैक्षमुपनीतो द्विजोत्तमः। भवन्मध्यं तु राजन्यो वैश्य
स्तु भवदुत्तरं। चरेदित्यनेन पाठ्यं लक्ष्यते। अमुमेवार्थं
द्योतयति भैक्षमिति कर्मविभक्त्या। तेन चार्थसिद्धा भिक्षां
देहीति वाक्यरचना। तत्र च मगौरवसंबोधनार्थं भवत्पद
मादिमध्यावसानेषु ब्राह्मणादिभिः क्रमेण कार्यं तच्च सं
बुध्यंतं। प्रायशो गृहमेधिनां गृहे स्त्रिय एव भिक्षां ददतीति
सामर्थ्यात्स्त्रीप्रत्ययवच्चतत्पदं भवति। तत्रायं प्रयोगः।
भवति भिक्षां देहीति ब्राह्मणः भिक्षां भवति देहीति क्षत्रि
यः। भिक्षां देहि भवतीति वैश्यः। नायं नियमः स्त्रिय एव
भिक्षणीया इति अत एवाह पैठीनसिः। अप्रत्याख्यायिन
मग्रे भिक्षेत। प्रत्याख्यायिनीं वेति। भिक्षाचरणे विशेषमा
ह याज्ञवल्क्यः। ब्राह्मणेषु चरेद्भैक्षमनिंद्येष्वात्मवृत्तयइ
ति। भैक्षं चरेद्भैक्षसंग्रहं चरेदित्यर्थः। आत्मवृत्तये स्वश
रीरयात्रार्थमेव नाधिकं। यदा त्वाचार्यः मीरदद्वृत्तिर्नैवा-

दिविकल्पस्तदा तत्पोषणायापि भैक्षं चरेत्। अन्यथा प्रधान
भूतवेदाध्ययनविरोधात्। ब्राह्मणेषु चरेदित्येतद्ब्राह्मण
विषयं। अत एव व्यासः॥ ब्राह्मणक्षत्रियविशां चरेद्भै-
क्षमन्वहं। सजातीयगृहेष्वेव सार्ववर्णिकमेव वेति। सर्वश-
ब्दः प्रकृतवर्णत्रयपरः। नायमैच्छिको विकल्पः। अपितु।
व्यवस्थितविकल्पः॥ तथा च भविष्यत्पुराणे॥ सर्ववा
विचरेद्ग्रामं पूर्वोक्तानामसंभवे। अंत्यवर्ज्यं महाभाग इति।
अंत्यः शूद्रः। उक्तेष्वपि कदाचिदपवादमाह मनुः। गुरोः कु-
ले न भिक्षेत न ज्ञातिकुलबंधुषु। न तु मातरं स्वसारं वा मातु-
र्वा भगिनीं निजां। भिक्षेत भिक्षां प्रथममित्यनेन विरोधः
स्यादिति चेन्न। नैवं। एतदुपनयनांगभिक्षाविषयं। पूर्वो-
क्तं तु नित्यभिक्षाविषयं। एवं भिक्षां भिक्षित्वा ब्रह्मचारी गु-
रवे भैक्षं निवेद्य उपनयनदिने अहःशेषं वाग्यतस्तिष्ठेदा-
सीनः शयानो वा भवेत्। ततः सायं संध्यां विधाय यस्मिन्नु-
पनयनहोमो विहितस्तस्मिन्नेवाग्नौ समिधं स्वगृह्योक्तप्र-
कारेणाधाय वाचं विसृजेत्। ततश्च तद्भैक्षं भुंजीत॥ तत्र
याज्ञवल्क्यः॥ कृताग्निकार्यो भुंजीत वाग्यतो गुर्वनुज्ञ-
या। आपोशानक्रियापूर्वं सत्कृत्यान्नमकुत्सयन्। अमृतो
पस्तरणमसीत्यादिकापोशानक्रियां तां पूर्वं कृत्वा भुं-
जीतेत्यर्थः॥ गौतमः॥ सायंप्रातस्त्वन्नमभिपूजितमनिं
दन्भुंजीतेति। सायंप्रातरित्यनेन मध्ये भोजननिषेधः। तथा-

चश्रुतिः। सायंप्रातरशायेव स्यादिति॥ अत्र वशिष्ठः॥
अष्टौ ग्रासा मुनेर्भुक्तं वानप्रस्थस्य षोडश। द्वात्रिंशत्तु गृह-
स्थस्यामितं ब्रह्मचारिणः। भोक्तृनियममाह॥ मनुः॥
आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं दक्षिणामुखः। श्रियं प्र-
त्यङ्मुखो भुंक्ते ऋतमिच्छन्नुदङ्मुखः। आयुषे हितमायुष्यं य-
शसे हितं यशस्यं॥ श्रियमिच्छुर्यश्च तमिच्छन्नित्यन्वयः।
पात्रनियमो हारीतेनोक्तः॥ लौहे मृन्मये वा पात्रे भुंजीते-
ति। तं च स्वयमेव प्रक्षालयेत्। भुक्त्वा स्वयममत्रं प्रक्षाल-
येदित्यापस्तंबस्मरणात्। एवं भैक्षेण वर्तयेन्नित्यमि-
त्युक्तं तत्रापवादमाह याज्ञवल्क्यः। ब्राह्मणः कामम-
श्नीयाच्छ्राद्धे व्रतमपीडयन्निति। व्रतमपीडयन्। मधुमां-
सादि वर्जयेदित्यर्थः। अकामोपपन्ने मधुमिश्रे दोषमाह
वशिष्ठः। अकामोपपन्नं मधु वाजसनेयके न दुष्यतीति
उपनयनकालस्य परमावधिमाह। मनुः। आषोडशा-
द्ब्राह्मणस्य सावित्री नातिवर्तते। आद्वाविंशात्क्षत्रियस्य आच-
तुर्विंशतेर्विशः। अत ऊर्ध्वं त्रयोप्येते यथाकालेन संस्कृताः
सावित्रीपतिता व्रात्या भवंत्याचार्यगर्हिताः। उक्तपरमा-
वध्यतिक्रमेपि व्रात्यस्तोमरूपप्रायश्चित्तानंतरं संस्का-
र्या एव॥ तथा च याज्ञवल्क्यः। सावित्रीपतिता व्रात्या
व्रात्यस्तोमादृते क्रतोरिति। तथान्योपि विशेषः। स्मृत्यंतरे।
षंढांधबधिरस्तब्धजडगद्गदपंगुषु। कुब्जवामनरोगार्त्तशु-

षंढांधविकलांगेषु। मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिंद्रिये।
ध्वस्तपुंस्त्वेपि चैतेषु संस्काराः स्युर्यथोचितं। यथोचितं यस्मि-
न्संस्कारे क्रियमाणे तद्विहितकर्म्मसु समर्थो भवति तैः संस्का-
रैः संस्कार्या इत्यर्थः। मूकोन्मत्तौ न संस्कार्याविति एके। एतेषा-
मसंस्कृतत्वेपि पातित्यं नास्ति। कर्म्मस्वनधिकारात्। तदप-
त्यं तु संस्कार्यमेव। ब्राह्मण्यां ब्राह्मणेनोत्पन्नो ब्राह्मण एवे-
ति श्रुतेः। अत्र ब्राह्मणत्वजात्या क्षत्रियत्वादीनामप्युपलक्ष्येते
असंस्कृतेपि जातिमात्रस्यानपायात्। ब्राह्मण एव भवति।
द्विजातिरेवेत्यर्थः। स्त्रीणां तु विवाह एवोपनयनं॥ तथा च
मनुः॥ वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृत इति
यत्तु हारीतेनोक्तं॥ द्विविधाः स्त्रियो ब्रह्मवादिन्यः सद्योव-
ध्वश्च तत्र ब्रह्मवादिनीनामुपनयनमग्नींधनं वेदाध्ययनं स्व
गृहे च भिक्षाचर्येति सद्योवधूनां तूपस्थिते विवाहे कथंचिदु-
पनयनमात्रं कृत्वा विवाहः कार्य इति तत्कल्पांतराभिप्रायं।
पुराकल्पे कुमारीणां मौंजीबंधनमिष्यते। अध्यापनं च वेदानां
सावित्रीवाचनं तथेति यमस्मरणात्। यदा तु मेखलादीनि
त्रुटितानि तदा तेषां प्रतिपत्तिकर्म मनुनाभिहितं। मेखलाम-
जिनं दंडमुपवीतं कमंडलुं। अप्सु प्रास्य विनष्टानि गृह्णीतान्या-
नि मंत्रवदिति। यस्य गृह्ये यो मंत्र उदितस्तन्मंत्रवद्ग्राह्यं॥ इत्यु-
पनयनं॥ अथ ब्रह्मचारिनियमाः तत्र याज्ञवल्क्यः
मधुमांसांजनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनं। भास्करालोकना-

श्लीलपरिवादांश्च वर्ज्जयेत्। मांसवर्जनं व्याधिराहित्ये वेदि-
तव्यं॥ तथाच वशिष्ठः॥ स चेद्व्याधीयीत कामं गुरोरुच्छि-
ष्टं भेषजार्थं सर्वं प्राश्नीयादिति। व्याधीयीत व्याधिमत्ता-
मनुभवतीत्यर्थः। अंजनं तैलादिना शरीरस्य। कज्जलादि-
ना नेत्रयोः। एतद्विन्निषेधो प्यौषधादन्यत्र॥ तथाच स्म-
र्यते॥ अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः। हविर्ब्रा-
ह्मणकाम्या च गुरोर्वचनमौषधमिति। उच्छिष्टं गुरुव्यतिरि-
क्तस्य स्वस्य परस्य च वर्ज्जयेत्॥ तथाच वशिष्ठः॥ उच्छिष्ट-
मगुरोरभोज्यं स्वमुच्छिष्टमुच्छिष्टोपहतं चेति। गुरुस्तूक्त-
लक्षणो निषेकादिकृत्। शुक्तं परुषं वचः पर्युषितान्नं च।
स्त्रीशब्देन तद्विषयप्रेक्षणालंभने लक्ष्येते॥ तथाच गौ-
तमः॥ स्त्रीप्रेक्षणालंभने मैथुनशंकायामिति। भास्करा-
लोकने तु मनुना विशेषो दर्शितः। नेक्षेतोद्यंतमादित्यं ना-
स्तंयांतं कदाचन। नोपरक्तं न वारिस्थं न मध्यं नभसो गतमिति
अश्लीलं असभ्ययोग्यं वचः। परिवादः। सदसद्रूपपरदोषप्र-
काशनं। आदिशब्दात् गंधमाल्यादिनिषेधः॥ मनुः॥ व-
र्ज्जयेन्मधु मांसं च गंधमाल्यरसान्स्त्रियः। शुक्तानि चैव सर्वा-
णि प्राणिनां चैव हिंसनं। अभ्यंगमंजनं चाक्ष्णोरुपानच्छत्र-
धारणं। कामं क्रोधं च लोभं च नर्त्तनं गीतवादनं। द्यूतं च जन-
वादं च परिवादं तथानृतं। स्त्रीणां च प्रेक्षणालंभमुपघातं
परस्य वै॥ एकः शयीत सर्वत्र न रेतः स्कंदयेत्क्वचित्॥

द्धि स्कंदयन्रेतो हिनस्ति व्रतमात्मनः। व्रतं ब्रह्मचर्यं। स्वप्ने सि-
क्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः। स्नात्वार्कमर्चयित्वा त्रिः
पुनर्मामित्यृचं जपेत्। पुनर्मा तस्मादेनसो विश्वान्मुंचत्व-
ंहसः। यदि दिवा यदि नक्तमेनांसि चकृमा वयमिति।
इंद्रियाणां विचरतां विषयेष्वपहारिषु। संयमे यत्नमा-
तिष्ठेत् विद्वान्यंतेव वाजिनां। बुद्धींद्रियाणि पंचैषां श्रो-
त्रादीन्यनुपूर्वशः। कर्मेंद्रियाणि पंचैव पाय्वादीनि प्रच-
क्षते। एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकं। यस्मिन्
जिते जितावेतौ भवतः पंचकौ गणौ। इंद्रियाणां प्रसंगे-
न दोषमृच्छत्यसंशयं। सन्नियम्य तु तान्येव ततः सिद्धिं
नियच्छति॥ न जातु कामः कामानामुपभोगेन शा-
म्यति। हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते। यश्चैता-
न्प्राप्नुयात्सर्वान् यश्चैतान्केवलांस्त्यजेत्। प्रापणा-
त्सर्वकामानां परित्यागो विशिष्यते। न तथैतानि शक्यं-
ते संनियंतुमसेवया। विषयेषु प्रदुष्टानि यथा ज्ञानेन
नित्यशः। इंद्रियाणां तु सर्वेषां यद्येकं क्षरतींद्रियं। तेना-
स्य क्षरति प्रज्ञा दृतेः पादादिवोदकं। वशीकृत्येंद्रिय-
ग्रामं संयम्य च मनस्तथा। सर्वान्संसाधयेदर्थान् क्षिण्व-
न्योगतस्तनुं। सेवेतेमांस्तु नियमान्ब्रह्मचारी गुरौ वसन्।
सन्नियम्येंद्रियग्रामं तपोवृद्ध्यर्थमात्मनः। इंद्रियाणां
विचरतामित्यारभ्याभिहिता धर्म्मा न केवलं ब्रह्मचारिणः

अपित्वितरेषामपिभवंति॥ अथोच्चारविधिः॥ तत्र वि-
ष्णुः॥ ब्राह्मे मुहूर्त्ते उत्थाय मूत्रपुरीषोत्सर्गं कुर्यादिति।
ब्राह्ममुहूर्त्त इत्यर्थः॥ अंगिराः॥ उत्थाय पश्चिमे या-
मे रात्रेराचम्य चोदकं। अंतर्द्धाय तृणैर्भूमिं शिरः प्रा-
वृत्य वाससा। वाचं नियम्य यत्नेन निष्ठीवोच्छ्वासवर्ज्जि-
तः। कुर्यान्मूत्रपुरीषे तु शुचौ देशे समाहित इति। आच
म्य स्वापाद्याचमननिमित्ते सति। तृणैरयज्ञियैः। तृ-
णग्रहणं काष्ठादेरप्युपलक्षणार्थं। तिरस्कृत्योच्चा-
रेत्काष्ठपत्रलोष्ठतृणानि वेति मनुस्मरणात्॥ परा-
शरः॥ ततः प्रातः समुत्थाय कुर्याद्विण्मूत्रमेव च। नै-
र्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः। ग्रामान्
क्रमशानं गच्छेन्नगराच्च चतुर्गुणमिति। याज्ञवल्क्यः
दिवा संध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः। कुर्यान्मूत्र
पुरीषे तु रात्रौ चेद्दक्षिणामुखः॥ यमः॥ प्रत्यङ्मुख-
स्तु पूर्वाह्णे पराह्णे प्राङ्मुखस्तथा। उदङ्मुखस्तु मध्याह्ने
निशायां दक्षिणामुखः॥ देवलोपि। सदैवोदङ्मुखः ^
प्रातः नघाह्ने दक्षिणामुखः। विण्मूत्रमाचरेन्नित्यं संध्यासु
परिवर्ज्जयेत्। संध्यासुवर्जनं निरुद्धेतरविषयं। न वेगं धारये
भोपरुद्धः क्रियां कुर्यादिति मनुस्मरणात्। दिङ्नियमे वि-
कल्पो वेदितव्यः। यत्तु मनुनोक्तं। छायायामंधकारे वा रा-
त्रावहनि वा द्विजः। यथासुखमुखः कुर्यात्प्राणबाधाभयेषु

चेति। तच्चीहारांधकारजदिङ्मोहविषयं॥ विष्णुः॥ प्रा-
णास्ये समावेष्टयित्वा मूहारी ग्रीवायामासज्योच्चरेत्। मू-
हारी मृत्तिकाधारी ग्रीवायां यज्ञोपवीतमासज्य। अंगिराः।
कृत्वा यज्ञोपवीतं तु पृष्ठतः कंठलंबितं। विण्मूत्रं तु गृही कुर्या-
द्यद्वा कर्णे समाहितः। कर्णे निधानमेकवस्त्रविषयं॥ तथा
च सांख्यायनगृह्ये॥ यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा
मूत्रपुरीषोत्सर्गं कुर्यादिति। हारीतः। उच्चारे मैथुने चैव प्र-
स्रावे दंतधावने। स्नाने भोजनकाले तु षट्सु मौनं समाचरेत्
उच्चारे पुरीषोत्सर्गे। विष्णुपुराणे। दूरादावसथान्मूत्रं पु-
रीषं च विसर्जयेत्। पादावसेचनोच्छिष्टं न क्षिपेच्च गृहांगणे।
बृहद्विष्णुः। अंतर्द्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा। वा-
चं नियम्य यत्नेन निष्ठीवोच्छ्वासवर्ज्जितः। मनुः। वाय्वग्निविप्र-
मादित्यमपः पश्यंस्तथैव गां। न कदाचित्प्रकुर्वीत विण्मूत्रस्य
विसर्ज्जनं। पश्चान्मुखः। न फालकृष्टे न जले न चित्यां न च
पर्वते। न जीर्णदेवायतने न वल्मीके न शाद्वले ससत्वेषु गर्त्ते-
षु न गच्छन्न पथि स्थितः। न नदीतीरमासाद्य न भस्मनि न गो-
मये। न च पर्वतमस्तक इति पाठे पूर्वकृतपर्वतग्रहणेनैव त-
न्मस्तकसिद्धावपि पुनर्ग्रहणाद्दोषाधिक्यं द्योत्यते। तच्चाप्य-
नुपपत्त्यंतात्तस्य पर्वते दोषाभावप्रतिभावप्रतिपादनार्थमि-
त्युक्तं। विष्णुपुराणे। उत्सर्गे वै पुरीषस्य मूत्रस्य च विसर्जने।
तिष्ठेन्नातिचिरं तत्र न च किंचिदुदीरयेत्॥ भरद्वाजः॥ अप-

कृष्य च विण्मूत्रं काष्ठलोष्ठतृणादिना । उदस्तवासा उत्तिष्ठे-
द्दृढं विधृतमेहनः ॥ अथ शौचविधिः ॥ याज्ञवल्क्यः
गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः । गंधलेपक्षय-
करं शौचं कुर्यादतंद्रितः । उद्धृतैरिति जलानां निषेधः । गंध-
लेपक्षयकरमिति । सर्वेषां साधारणं शौचं । वक्ष्यमाणामृ-
त्संख्यानियमस्त्वदृष्टार्थः ॥ दक्षः ॥ शौचे यत्नः सदा कार्यः
शौचमूलो द्विजः स्मृतः । शौचाचारविहीनस्य समस्ता निःफ-
लाः क्रियाः । यमः । आहरेन्मृत्तिकां प्राज्ञः कूलात्ससिक-
तानुयाः । कूलग्रहणमनुपहतदेशोपलक्षणार्थं । वापीकू-
पतडागेषु नाहरेद्बाह्यतो मृदं । आहरेज्जलमध्यात्तु परतो म-
णिबंधनात् । शातातपः । शुचिदेशात्तु संग्राह्या शर्करा-
श्मादिवर्जिता । रक्ता गौरा तथा श्वेता मृत्तिका त्रिविधा स्मृ-
ता । कश्यपः । विप्रे गौरा मृदः प्रोक्ताः क्षत्रे रक्तास्तथोदिताः
वैश्यस्य हरिताः प्रोक्ताः कृष्णा स्त्रीशूद्रयोस्तथा ॥ वि-
ष्णुपुराणे ॥ वल्मीकमूषिकोत्खातां मृदमंतर्ज-
लां तथा । शौचावशिष्टां गेहाच्च मृदः शौचविवर्जिताः । वि-
ष्णुः । अंतःप्राणयवपन्नां च हलोत्खातां न चाहरेत् ॥
मनुः । आहृतामन्यशौचार्थं वालुकायां सुरूपिणीं ।
न मार्गान्न श्मशानाच्च नादद्यात्कुड्यतः क्वचित् । तथा ।
प्रक्षिप्ते शौचवत्तोयं यावद्वच्च मृत्तिका । सैव तत्र प्रशस्ता
स्यात्तया शौचं विधीयते । मृत्संख्यानियममाह दक्षः

एका लिंगे करे तिस्र उभयोर्मृद्द्वयं स्मृतमिति। करे सव्ये ए-
तच्च मूत्रशौचविषयं। एका लिंगे करे सव्ये तिस्रो द्वे हस्त-
योर्द्वयोः। मूत्रशौचं समाख्यातं शुक्रे तु द्विगुणं भवेदिति।
शातातपस्मरणात्। विट्शौचे तु मनूक्तो विशेषः। एका लिं-
गे गुदे तिस्रस्तथैकत्र करे दश। उभयोः सप्त दातव्या मृदः शु-
द्धिमभीप्सतेति। एतच्च विशिष्टे शौचे पर्यवस्यति। पुरीषो-
त्सर्गे मूत्रोत्सर्गस्यानान्तरीयकत्वात्। विष्णुपुराणेऽपि। एका
लिङ्गे गुदे तिस्रो दश वामकरे तथा। उभयोः सप्त दातव्या
मृदः शौचोपपादिकाः। यमदक्षौ। द्वे लिंगे मृत्तिके देये
गुदे पंच करे दश। उभयोः सप्त दातव्या इति। पुंरवः। मेह-
ने मृत्तिकाः सप्त लिंगे द्वे परिकीर्तिते। एकस्मिन्विंशतिर्हस्ते
द्वयोर्ज्ञेयाश्चतुर्दश। तिस्रस्तु मृत्तिका देशः कर्तुर्वैनखशो-
धनं। तिस्रस्तु पादयोर्ज्ञेयाः शौचकामस्य सर्वदा। शौच-
मेतद्गृहस्थानां तथा गुरुनिवासिनां। द्विगुणं स्याद्वनस्थानां यती-
नां त्रिगुणं स्मृतं। मृत्तिका तु समुद्दिष्टा त्रिपर्वपूर्यते यथेति।
अत्र मृत्तिकाधिक्यं एतन्मूत्रपुरीषानिर्हरणांशे कार्यं।
यदा त्वेवमपि गंधलेपक्षयो न भवति। तदोक्तसंख्याति-
क्रमेणापि कार्यं॥ यथाह मनुः। यावन्नापैत्यमेध्याक्तो
गंधलेपश्च तत्कृतः। तावन्मृद्वारि चादेयं सर्वासु द्रव्यशु-
द्धिष्विति। हस्तशौचे तु हारीतो विशेषमाह॥ दशमध्येष-
ट्टं पष्ठे सप्तभिश्चान्तिमैः भिः। पादौ च क्षालयेदिति।

पृष्ठे सव्यपश्चाद्भागे। लिंगशौचे तु तत्प्रमाणमाह दक्षः
लिंगे तु मृत्समाख्याता त्रिपर्वं पूर्यते यथेति। विट्शौचे
तु मनुः। अर्द्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता। द्वि-
तीया च तृतीया च तदर्द्धार्द्धा प्रकीर्त्तिता। एतच्छौचं गृह-
स्थानां द्विगुणं ब्रह्मचारिणां। वानप्रस्थस्य त्रिगुणं य-
तीनां च चतुर्गुणं। न्यूनाधिकं न कर्त्तव्यं शौचं शुद्धिमभी-
प्सता। प्रायश्चित्तेन युज्येत विहितातिक्रमे कृते। तीर्थे
शौचं न कुर्वीत कुर्वीतोद्धृतवारिणा। कथप्युद्धरणाश-
क्तावादित्यपुराणे। रत्निमात्रं जलं त्यक्त्वा कुर्याच्छौच-
मनुद्धृते। पश्चात्तु शोधयेत्तीर्थमन्यथा त्वशुचिर्भवेत्
। दक्षः। यद्दिवा विहितं शौचं तदर्द्धं च निशि स्मृतं। तद-
र्द्धमातुरे प्रोक्तमातुरस्यार्द्धमध्वनि॥ आदित्यपुराणे
स्त्रीशूद्रयोरर्द्धमात्रं शौचं प्रोक्तमनीषिभिः। यो विण्मूत्रो-
त्सर्जनायोपविष्टः स तत्र करोति। तस्याप्यर्द्धं शौचं॥
आह वृद्धपराशरः। उपविश्य तु विण्मूत्रं कर्त्तुं यस्त-
न्नेविंदति। स कुर्यादर्द्धशौचं तु तस्य शौचस्य सर्वदेति।
यत्र संख्याया विषमत्वे नार्द्धीकरणसंभवस्तत्र मध्याम-
र्द्धं परिमाणं ग्राह्यं। आर्त्तः कुर्याद्यथाशक्ति स्वस्थः कु-
र्याद्यथोदितं। बालस्यानुपनीतस्य गंधलेपक्षया-
वहं॥ वृद्धपराशरः॥ अरण्ये निर्जले रात्रौ चौरव्या-
घ्राकुले पथि। कृत्वा मूत्रं पुरीषं च द्रव्यहस्तो न दुष्यति

मृदादिकं हस्ते धारयित्वा न शुध्यतीत्यर्थः। अन्ये तु द्रव्य-
हस्तेन शुध्यतीत्यस्यान्यथार्थं वर्णयंति। एवंविधस्थ-
ले अवहनीयद्रव्यं हस्ते गृहीत्वा मूत्रपुरीषकरणेपि त-
द्द्रव्यं शुद्धमेवेति। तद्द्रव्यं हस्ते गृहीत्वैवाचमने कृ-
ते शुद्धं भवतीत्यर्थः। भोजनकाले गुदप्रस्रावे विशे-
षमाह बृहस्पतिः। भुंजानस्य तु विप्रस्य कदाचि-
त्स्रवते गुदं। उच्छिष्टमशुचित्वं च तस्य शौचं विधी-
यते। पूर्वं कृत्वा तु शौचं तु ततः पश्चादुपस्पृशेत्।
ततः कृत्वोपवासं च पंचगव्येन शुध्यतीति। विप्रग्रह-
णमुपलक्षणार्थं। शौचे हस्तनियममाह देवलः
धर्मविद्दक्षिणं हस्तमधः शौचे न योजयेत्। तथा च
वामहस्तेन नाभेरूर्ध्वं न शोधयेत्। अत्रेदं विचारणी-
यं विण्मूत्रयोर्मिलितयोः करणे एका लिंगे गुदे तिस्र
इत्येतच्छौचं प्रवर्तते। आहोस्वित्प्रत्येककरणेपी-
ति। प्रत्येककरणे तावन्न युक्तं। केवलमूत्रोत्सर्गे शा-
तातपवचनविरोधात्। वचनं तु। एका लिंगे करे सव्ये-
ति स्रो द्वे हस्तयोर्द्वयोः। मूत्रशौचं समाख्यातमिति। अ-
थ केवलपुरीषोत्सर्गविषयत्वमुच्यते। लिंगशौचनि-
मित्ताभावेपि नैमित्तिकं तच्छौचमापद्येत तदयुक्तं अ-
दृष्टार्थत्वप्रसंगात्। वचनादस्त्विति चेन्न। एकालिं-
ग इत्यस्यांशस्य केवलमूत्रोत्सर्गविषयत्वेनाप्युपपत्तेः

अगतिकाह्वीयं गतिः। यददृष्टकल्पनं। अतो विशिष्टोत्सर्गस-
वेतियुक्तं। तत्रापि लिंगशौचं पूर्ववचनप्रतीतक्रमातिक्रमे
कारणाभावात्संनिहितत्वात्। अथ सत एतदकरणे साक्षा-
न्मूत्रलेपस्य मणिबंधोपभागेपि संसर्गप्रसक्तेश्च। हस्तपादादि-
शौचं तु तत्रैव देशकालकर्त्रवस्थाशौचरूपोपकारस्यैक-
त्वाच्च। अथ विण्मूत्रव्यतिरिक्तशारीरमलशौचं। मनुः। ऊर्ध्वं
नाभेर्यानि खानि तानि मेध्यानि सर्वशः। यान्यधस्तान्यमेध्या-
नि देहाच्चैव मलाश्च्युताः इति। खानीन्द्रियच्छिद्राणि। मलानपि
स एवाह। वसाशुक्रमसृङ्मज्जा मूत्रं विट् कर्णविण्नखाः।
श्लेष्माश्रुदूषिका स्वेदो द्वादशैते नृणां मलाः। वसा काय-
स्नेहः। मज्जा शिरोभवं मेदः। कर्णविट् कर्णमलं। दूषिकाक्षि-
मलं। एतैरुपघाते बौधायनश्चाह। आददीत मृदोपश्चात्षट्सु
पूर्वेषु शुद्धये। उत्तरेषु तु षड्भिः केवलाभिर्विशुध्यतीति।
मनुस्तु। विण्मूत्रोत्सर्गशुद्ध्यर्थं मृद्वार्यादेयमर्थवत्। दैहि-
कानां मलानां च शुद्धिषु द्वादशस्वपीति। विण्मूत्रमुत्सृज्यते ये-
न तत्तादृशं तच्छुद्ध्यर्थं। अर्थवत्प्रयोजनवत्। एवं च बौधायन-
मनुवचनयोर्विकल्पः स च देशकालाद्यपेक्षया। तथा च बौ-
धायनः। देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं। उपप-
त्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत्। यमः। मूत्रे तिस्रः पा-
दयोस्तु हस्तयोस्तिस्र एव चावदः पंच दशगासेध्ये हस्ता-
दीनां विशेषतः। एतच्चात्मीयमूत्रादिस्पर्शशौचं ।

मुदाहृतं। उत्सर्गकालादन्यत्र परकीयेतु पद्यते। परस्य श्रो
णितस्य श्रोरेतोविण्मूत्रजे तथा। चतुर्णामपि वर्णानां द्वा
त्रिंशन्मृत्तिकाः स्मृताः। विष्णुः। नाभेरधस्तात्प्रवाहुषु
च कायिकैर्मलैः सुराभिर्मद्यैर्वोपहतो मृत्तोयैस्तदंगं प्रक्षा
ल्यापांतः शुध्येत्। अन्यत्रोपहतो मृत्तोयैस्तदंगं प्रक्षाल्य
स्नात्त्वैव। इंद्रियोपहतस्तूपोष्य स्नात्वा पंचगव्येन दशन
च्छदोपहतश्चेति। शौचप्रकरणं॥ अथाचमनं॥ तत्र वृ
द्धपराशरः। कृत्वा यशौचं प्रक्षाल्य पादौ हस्तौ च मृज्ज
लैः। निवद्धशिखकक्षस्तु द्विज आचमनं चरेत्। प्रचेताः
अनुष्णाफेनशीताभिरद्भिराचामेदिति। आतुराणामुष्णोदकम
प्यविरुद्धं। तथाचापस्तंवः। उदकेनातुराणां च तथोष्णेनो
ष्णपायिनामिति। अत्र आचमनं भवतीति शेषः। योगीश्व
रः। अंतर्जानुशुचौदेशे उपविष्ट उदङ्मुखः। प्राग्वा ब्राह्मे
ण तीर्थेन द्विजो नित्यमुपस्पृशेत्। तथा। कनिष्ठादेशिन्यंगु
ष्ठमूलान्यग्रं करस्य च। प्रजापतिपितृब्रह्मदेवतीर्थान्यनु
क्रमात्। दक्षः। प्रक्षाल्य पादौ हस्तौ च त्रिः पिबेदंबुवीक्षितं।
संमृज्यांगुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखं। वीक्षितमित्ये
तदहर्विषयं। रात्राववीक्षितेनैव शुद्धिरुक्ता मनीषिभिरि
तियमस्मरणात्। मनुः। त्रिराचामेदपः पूर्वं प्रमृज्यात्त
तो मुखं। खानि चोपस्पृशेदद्भिरात्मानं शिर एव च। गौ-
तमः। त्रिश्चतुर्वाप आचामेदिति। चतुर्ग्रहणं दैवपि-

न्यकर्मापेक्षयेति केचित्। त्रिर्ग्रहणेन तुष्टाभाव इत्यन्ये। भ-
रद्वाजः। संहतांगुलिभिस्तोयं गृहीत्वा दक्षिणेन तु। मुक्त्वां-
गुष्ठकनिष्ठे तु शेषेणाचमनं चरेत्। ब्राह्मेण विप्रः तीर्थेन
नित्यकालमुपस्पृशेत्। कायत्रैदशिकाभ्यां वा न पित्र्येण
कदाचन। कायं प्राजापत्यं त्रैदशिकं दैवं। यस्मिन्नाच-
मनप्रयोगे मद्गुल्मादितार्थस्वीकृतं तेनैव समयोगः कार्यो
न तीर्थान्तरेणेति दक्षः। संहतांगुलिभिः पूर्वमास्यमेवमुप-
स्पृशेत्। अंगुष्ठेन प्रदेशिन्या घ्राणं पश्चादनंतरं। अंगुष्ठा-
नामिकाभ्यां च चक्षुःश्रोत्रे पुनः पुनः। कनिष्ठांगुष्ठयोर्ना-
भिं हृदयं तु तलेन वै। सर्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण
संस्पृशेत्। याज्ञवल्क्यः। अद्भिस्तु प्रकृतिस्थाभिर्हीना-
भिः फेनबुद्बुदैः। त्रिः प्राश्यापो द्विरुन्मृज्य खान्यद्भिः स-
मुपस्पृशेत्। अत्र विशेषमाह पैठीनसिः। सव्ये पाणौ शे-
षा अपो निनयेदिति। शेषाचमनशिष्टाः। बृहच्छंद-
स्त्वन्यथोपस्पर्शनमाह। तर्जन्यंगुष्ठयोगेन स्पृशेन्ना-
सापुटद्वयं। मध्यमांगुष्ठयोगेन स्पृशेन्नेत्रद्वयं ततः।
अंगुष्ठस्यानामिकाया योगेन श्रवणे स्पृशेत्। कनिष्ठां-
गुष्ठयोगेन स्पृशेत्स्कंधद्वयं ततः। नाभिं च हृदयं तद्व-
त्स्पृशेत्पाणितलेन तु। संस्पृशेच्च तथा शीर्षमिति। पूं-
स्वस्तु॥ ततोंगुलिचतुष्केण स्पृशेन्मूर्द्धानमादितः।
तर्जन्यंगुष्ठयोगेन स्पृशेन्नेत्रद्वयं पृथक्। मध्यमाना-

मिकाभ्यां तु स्पृशेन्नासापुटे क्रमात् । अंगुष्ठेन कनीयस्याः
कर्णौ संयोगतः स्पृशेत् । तर्ज्जन्यंगुष्ठयोगेन नाभिं हृदि त
लं न्यसेत् । पैठीनसिः । अग्निरंगुष्ठस्तस्मात्तेनैव सर्वा-
णि स्थानानि स्पृशेदिति । अत्र स्वस्वशाखानुसारेण व्य
वस्थितो विकल्पः । यत्र शाखायामंगस्पर्शनमेव नाम्ना
तं अंगुष्ठादिविशेषो वा नाम्नातः तच्छाखीयानां स्वैच्छि-
को विकल्पः । येषां तु स्वशाखायां कतिपयांगस्पर्शनमाम्नातं ते
षां तु स्वशाखोक्तक्रमानुसारेण शाखोक्तक्रमः । अनुक्तांगस्प
र्शे भवतीति व्यवस्था । उदकपरिमाणमाह । याज्ञवल्क्यः ।
हृत्कंठतालुगाभिस्तु यथासंख्यं द्विजातयः । शुद्ध्येरन् स्त्री च शूद्र
श्च सकृत्स्पृष्टाभिरंततः । अंततः तालुगाभिः । हृद्गानां परि-
माणमाह प्रचेताः । माषमज्जनमात्रा हृदयंगमा भवंतीति
आचमनप्रसंगात्पवित्राचमने कश्चन विशेषः । प्रदर्श्य
ते तत्र मार्कंडेयः । सपवित्रेण हस्तेन कुर्यादाचमनक्रि
यां । नोच्छिष्टं तत्पवित्रं तु भुक्तोच्छिष्टं तु वर्जयेत् । एतद्दक्षि
णकराभिप्रायं । हारीतेन वामे निषेधात् । वामहस्ते कुशा
न्कृत्वा समाचामति यो द्विजः । उपस्पृष्टं भवेत्तेन रुधिरेण
मलेन चेति । एतत्केवलवामहस्ताभिप्रायं । हस्तद्वया
श्रयणे गोभिलेन फलस्मरणात् । उभयत्र स्थितैर्दर्भैः
समाचामति यो द्विजः । सोमपानफलं तस्य भुक्त्वा यज्ञ-
फलं भवेदिति । अत्र विशेषमाह हारीतः । सव्यापसव्यौ

कुर्वीत सपवित्रौ करौ बुधः। ग्रंथिर्यस्य पवित्रस्य न तेनाच-
मनं भवेदिति। पवित्रलक्षणमाह कात्यायनः। अनंत
र्गर्भिणं साग्रं कौशं द्विदलमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं
यत्र कुत्रचित्। मार्कंडेयः। चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्य प-
वित्रकं। एकैकन्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमं। त्रिभिर्द-
र्भैः शांतिकर्मे पंचभिः पौष्टिकं तथा। चतुर्भिश्चाभिचाराख्यं
कुर्वन्कुर्यात्पवित्रकमिति॥ अथाचमननिमित्तानि। तत्र
यमः। उत्तीर्योदकमाचामेदवतीर्य तथैव च। हारीतः।
स्त्रीशूद्रोच्छिष्टाभिभाषणे मूत्रपुरीषोत्सर्गदर्शने देवताम
भिगंतुकाम आचामेत्। अथ द्विराचमननिमित्तानि। तत्र
याज्ञवल्क्यः। स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपस
र्पणे। आचांतः पुनराचामेद्वासोपि परिधाय च। बौधाय
नः। भोजने हवने दाने उच्चारे च प्रतिग्रहे। हविर्भक्षणका
ले चात द्विराचमनं स्मृतं। ब्रह्मपुराणे। होमे भोजनकाले
च संध्ययोरुभयोरपि। आचांतः पुनराचामेत्। अन्यत्रका
कुत्स्नकृत्। अंगिराः। चांडालादीन् जपे होमे दृष्ट्वाचम्य
विशुद्ध्यति। श्वादीन स्पृष्ट्वापि वा वामोत्कर्णं वा दक्षिणं स्पृ
शेत्। जानुनोरधस्तात् श्वादिस्पर्शे आचमनं। अन्यत्र
स्नानविधानात्। उदकाभावे असामर्थ्ये वा दक्षिण
कर्णस्पर्शः। अनेनैवाभिप्रायेण। बृहस्पतिः। पितृमंत्रोच्चा
रे रौद्रे आत्मालंभे धमे क्षुते। अधोवायुसमुत्सर्गे आक्रंदे

क्रोधसंभवे। मार्जारमूषिकास्पर्शे प्रहासे ऽनृतभाषणे। नि
मित्तेष्वेषु सर्वेषु दक्षिणं श्रवणं स्पृशेत्। तथाऽऽर्द्रं तृणं
गोमयं वा भूमिं वा संस्पृशेद्द्विज इति। सांख्यायनः। क्षुते
निष्ठीवने चैव दंतोच्छिष्टे तथाऽनृते। पतितानां च संभाषे
दक्षिणं श्रवणं स्पृशेत्। आदित्या वसवो रुद्रा वायुरग्नि
श्च धर्मराट्। विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठंति सर्वदा।
आचारसागरे। अपो जग्ध्वौषधं जग्ध्वा कृत्वा तांबूल
चर्वणं। सौगंधिकानि सर्वाणि नाचामेत विचक्षणः।
अपोजग्ध्वेति अमृतापिधानमसीत्यादिभिर्मंत्रैरपोज
ग्ध्वा तन्निमित्तं नाचामेदित्यर्थः। बौधायनः। पादप्र-
क्षालनशेषेण नाचामेद्वारिणा द्विजः। शुद्धाभावे पि
वेत्किंचित् क्षिप्त्वा भूमौ जलं स्पृशेत्। आपस्तंबः। सं
ध्यार्थे भोजनार्थे चापित्र्यर्थे वा तथैव च। शूद्राहृतेन ना
चामेत् जपादिहवनेषु च। यमः। नाचम्योपस्पृशेद्विप्रो
यावद्वामेन संस्पृशेत्। वामे हि द्वादशादित्या वरुणस्त्रि
दशेश्वराः। उदकस्थः स्थलस्थस्तु स्थले शुचिः। पा
दौ स्थाप्योभयत्रापि आचांतो भयतः शुचिः। जलेस्थ
ले चैकैकं पादं कृत्वाचांत उभयत्र जलकर्मणि स्थ-
लकर्मणि च शुद्धो भवतीत्यर्थः। अकृत्वा पादयोः
शौचं तिष्ठन्मुक्तशिखोपि वा। विना यज्ञोपवीतेन आ
चांतोप्यशुचिर्भवेत्। तिष्ठन्निति स्थलविषयं। विष्णु

नातिसृतोपि जलेप्यनुष्णानात्। जान्वोरूर्द्ध्वं जलेतिष्ठन्नाचांतः शुचितामियात्। अधस्ताच्छतकृत्वोपि समाचांतो न शुध्यति। अधस्तान्निषेधाज्जानुदघ्नेप्यविरुद्धं। तथाच स्मर्य्यते निगमे। जानुमात्रे जले तिष्ठन्निति आचांतः शुचिरिति वाक्यशेषः। तथा। सोपानत्कोनचोष्णीषी पर्य्यंकासनयानगः। दुर्देशे प्रपदश्चैव नाचामन् शुद्धिमाप्नुयात्। नरगोवहयानाश्वहस्त्यारोहकस्तथा। आचांतः कर्मशुद्धः स्यात्तां बूली यधजंघिकृत। भुक्त्वा सनस्थो प्याचामेन्नान्यकाले कदाचन। न पादुकस्थो नत्वरितो नच यज्ञोपवीतवान्। सांख्यायनः। दानमाचमनं होमं भोजनं देवतार्च्चनं। प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्प्पणं। आसनारूढपादस्तु जानुनोर्वाथ जंघयोः। कृतावसक्थिकश्चैव प्रौढपादः स उच्यते। स्पृशंति विंदवः पादौ य आचामयतः परान्। भौमिकैस्ते समा ज्ञेया न तैरप्रयतो भवेत्। परेषामाचमनायोदके दीयमाने ये विंदवः पादयोः पतंति तैर्नाशुद्ध इत्यर्थः ॥ इत्याचमनविधिः ॥ अथ प्रातः स्नानं ॥ तत्र मार्कंडेयपुराणे ॥ अस्नातस्य क्रिया सर्व्वा भवंतीह्यफला यतः। प्रातः समाचरेत्स्नानं तच्च नित्यमिति स्मृतं। प्रातः स्नानं मंत्रवर्ज्यं मध्याह्ने मांत्रिको विधिः। नित्यं स्नात्वा शुचिः कुर्य्याद्देवर्षिपितृतर्प्पणं।

योगीश्वरः। स्नानमब्दैवतैर्मंत्रैर्मार्जनं प्राणसंयमः। सूर्यस्य चाप्युपस्थानं गायत्र्याः प्रत्यहं जपः। योगयाज्ञवल्क्यः। प्रातर्मध्यान्हयोः स्नानं वानप्रस्थगृहस्थयोः। यतेस्त्रिषवणं स्नानं सकृत्तु ब्रह्मचारिणः। वानप्रस्थस्य कालद्वये स्नानं ब्रह्मचारिणश्च सकृत्स्नानमप्राप्तविषयं। अत एव याज्ञवल्क्यः। दांतस्त्रिषवणस्नायीति निवृत्तश्च प्रतिग्रहादिति। स्मृतिसंग्रहे। स्नायात्प्रातश्च मध्यान्हे ब्रह्मचारी तथा गृही। शंखः। प्रातःस्नानं प्रशंसंति दृष्टादृष्टकरं हि तत्। सर्वमर्हति शुद्धात्मा प्रातःस्नायी जपादिकं। दृष्टं मलापनयनादंगशुद्धिः। अदृष्टं नित्यत्वेन पापक्षयः। अलक्ष्मीं कालकर्णीं च दुःस्वप्नं दुर्विचिंतितं। यांश्चान्यान्हि यातनाद्युग्वं नित्यस्नायी न पश्यति। कालकर्णी दुःसहदुहिता। नित्यस्नानेन पूयंते अपि पापकृतो नराः। कात्यायनः। यथाहनि तथा प्रातर्नित्यं स्नायादनातुरः। दंतान्प्रक्षाल्य नद्यादौ गेहे चेत्तदमंत्रवत्। अमंत्रवदिति प्रातः स्नानेन सर्वात्मना मंत्रनिषेधः। अपि तु मंत्रबहुत्वनिषेधः। यतः स एवाह। अल्पत्वाद्धोमकालस्य बहुत्वात्स्नानकर्मणः प्रातर्न तनुयात्स्नानं होमलोपो विगर्हित इति। दक्षः। अत्यंतमलिनः कायो नवछिद्रसमन्वितः। स्रवत्येव दिवा रात्रौ प्रातःस्नानं विशोधनं। वामनपुराणे। निषि

च्य तीरं कुशपिंजलानि पूर्वोत्तराग्राणि मिदं न्यसेच्च।
प्रक्षाल्य पादौ च मुखं च कंठे यज्ञोपवीतं च जलं पिबे-
त्त्रिः। कंठे यज्ञोपवीतमासज्येत्यध्याहारः। एवं चैतदु
क्तं भवति। उपवीतं निवीतं कृत्वा प्रक्षालयेदिति। त्रि-
र्जलं पिबेदाचामेदित्यर्थः। कराभ्यां धारयेद्दर्भान् शि
खाबंधं विधाय च। प्राणायामांस्तथा कुर्यात्कालज्ञा
नं यथाविधि। यथाविधिकालज्ञानं तिथिनक्षत्रादि
ज्ञानं कुर्यादित्यर्थः। मृत्तिकां तु त्रिधा कृत्वा भागेनैकेन
लेपयेत्। दक्षिणेनैव हस्तेन अष्टावेतामनुक्रमात्।
अष्टवक्ष्यमाणाः ललाटमंसद्वयं हृदयं पृष्ठमुदरं कु
क्षिद्वयं चेत्यष्टौ विज्ञेयाः। ललाटमंसौ हृत्पृष्ठमुदरं
च सकुक्षिकं। ततो वामकरेणैव नाभिस्थूरुजंघकं।
दक्षिणादिक्रमेणैव चरणौ च त्रिभिस्त्रिभिः। मृदा तृ
तीयभागेन करौ च त्रिः प्रमार्ज्जयेत्। इति तूष्णीं मृदा-
स्नानं कृत्वाचम्य जलं विशेत्। नाभिमात्रे जले गत्वा
कृत्वा केशान् द्विधा द्विजः। निरुद्ध कर्णौ नासां च त्रिः कृ
त्वोन्मज्जनं ततः। द्विराचम्याभिषेकं च कुर्याद्दक्षरे
णतु। आयं गौरिति सूक्तेन द्विज आवर्त्तयेदपः। ज्ञुव-
कायेति मंत्रेणादिदध्यादघमर्षणं। जुवकायेति नायं
नियमः। अपितु भावद्वृत्तादिदृष्टसूक्तानामुपलक्ष
णार्थं। जपं द्वादशवारं स्तु महापापापनुत्तये। अघ-

मर्षणक्रियया धूतपापः समाहितः। ततो निमज्ज्य वारां-
स्त्रींस्ततस्तर्पणमाचरेत्। तर्पणमिति स्नानांगतर्पणं
यथा तैत्तिरीयशाखायां। ॐ भूर्देवांस्तर्पयामि। भुवर्देवां
स्तर्पयामि। सुवर्देवांस्तर्पयामि भूर्भुवःस्वर्देवांस्त-
र्पयामि। एवं भूऋषींस्तर्पयामि इत्यादि। एवं भूः पितॄं
स्तर्पयामीत्यादि। पौरवः। आब्रह्मस्तंबपर्यंतं जगत्तृप्य
त्विति क्रमात्। जलांजलित्रयं दद्यादेतत्संक्षेपतर्पणमि
ति। एवमिव माध्याह्निकस्नानमपि। विशेषस्त्वाह्निके प्र
दर्श्यते॥ अथ प्रातःसंध्या॥ तत्र व्यासः। प्रातःसं-
ध्यां सनक्षत्रां मध्यमां स्नानकर्मणि। सादित्यां पश्चिमां
संध्यामुपासीत यथाविधि। मध्यमां स्नानकर्मणीति।
माध्याह्निकस्नाने जातइत्यर्थः। संध्याहीनोऽशुचिर्नित्य
मनर्हः सर्वकर्मसु। स यत्कुरुते कर्म न तस्य फलभा-
ग्भवेत्। संवर्त्तः। अथाचम्य कुशैर्युक्त आसने समुपस्थि
तः। करसंपुटकं कृत्वा संध्यां नित्यं समारभेत्। नत्वाथ
पुंडरीकाक्षं उपात्ताघप्रशांतये। ब्रह्मवर्चसकामोऽर्थं प्रातः
संध्यामुपास्महे। इत्थं कृत्वा तु संकल्पं कुशानादाय पा
णिना। नरांनसुत्यतो येस्तु गृहे वामकरे स्थितैः॥ त्रि-
भिर्वा द्वित्रिभिर्वै तु प्रत्येकं मिलितैरथैः। गायत्र्या च त-
तः कुर्यादभिषेकं तु तज्जलैः। आर्षं छंदो दैवतं च विनियो
गविधिं स्मरेत्। आवाहनं गायत्र्याः प्राणायामं समभ्यसे

तु। गायत्रीं त्र्यक्षरां बालां साक्षसूत्रकमंडलुं। त्र्यक्षरां प्रणा
वात्मिकां। रक्तवस्त्रां चतुर्वक्त्रां हंसवाहनसंस्थितां। ब्रह्मा
णीं ब्रह्मदैवत्यां ब्रह्मलोकनिवासिनीं। आवाहयाम्यहं देवीं
गायत्रीं सूर्यमंडलात्। ओंकारस्य ब्रह्मा ऋषिर्देवोऽग्निस्तस्य
कथ्यते। गायत्री च भवेच्छंदो नियोगः सर्वकर्मसु। त्रिमा-
त्रस्तु प्रयोक्तव्य आरंभे सर्वकर्मणां। व्याहृतीनां तु सर्वासां
मार्षं चैव प्रजापतिः। गायत्र्युष्णिगनुष्टुप् बृहती त्रिष्टुबे
व च। पंक्तिश्च जगती चैव छंदांस्येतानि सप्त वै। अग्निर्वायुस्त
था सूर्यो बृहस्पतिरपांपतिः। इंद्रश्च विश्वे देवाश्च देवताः
समुदाहृताः। प्राणायामने चैव विनियोग उदाहृतः। भूः
र्लोकं पादयोर्न्यस्य भुवर्लोकं तु जानुनोः। स्वर्लोकं गुह्यदे
शे तु नाभिदेशे महस्तथा। जनलोकं तु हृदये कंठदेशे तप
स्तथा। भ्रुवोर्ललाटसंधौ तु सत्यलोकं प्रतिष्ठितं। सवि
ता देवता यस्या मुखमग्निस्त्रयात्मकं। विश्वामित्र ऋषिः
छंदो गायत्री सा विशिष्यते। जपहोमोपनयने विनियोगो
विधीयते। न्यासः। ओं भूर्विन्यस्य हृदये भुवः शिरसि विन्य
सेत्। स्वरितीदं शिखायां तु गायत्र्याः प्रथमं पदं। विन्य-
सेत्कवचे चैव द्वितीयं नेत्रयोर्न्यसेत्। तृतीये नास्त्र विन्या
स एष न्यासो घनाशनः। या संध्या सा च गायत्री त्रिधा-
भूत्वा व्यवस्थिता। पूर्वा भवेत्तु गायत्री सावित्री मध्यमा
स्मृता। या भवेत्पश्चिमा संध्या सा च देवी सरस्वती। आग-

च्छ वरदे देवि त्र्यक्षरे ब्रह्मवादिनि। गायत्रीछन्दसां मातर्ब्रह्मयोने नमोस्तु ते। कात्यायनः। भूर्भुवःस्वरित्यपः अभिमंत्र्य परिक्षिपेत्। रक्षार्थमिति शेषः॥ अथ प्राणायामः॥ तत्र योगीश्वरः। सव्याहृतिकां सप्रणवां गायत्रीं शिरसा सह। त्रिः पठेयतप्राणः प्राणायामः स उच्यते। गायत्रीशब्दनिरुक्तिमाह। व्यासः। गायंतं त्रायसे यस्माद्गायत्री त्वं ततः स्मृतेति। मार्कंडेयपुराणे। प्रथमं साधनं कुर्यात्प्राणायामः स उच्यते। योगवित्। प्राणायामनिरोधस्तु प्राणायाम उदाहृतः। लघुमध्योत्तरीयाख्यः प्राणायामस्त्रिधोदितः। तस्य प्रमाणं वक्ष्यामि तदलर्क शृणुष्व मे। लघुर्द्वादशमात्रस्तु द्विगुणः स तु मध्यमः त्रिगुणाभिस्तु मात्राभिरुत्तमः स उदाहृतः। विष्णुपुराणे। प्राणाख्यमनिलं वश्यमभ्यासात्कुरुते तु यः। प्राणायामः स विज्ञेयः सबीजोऽबीज एव च। पूरकः पूरणं वायोः कुंभकः स्थापनं क्वचित्। बहिर्निःसरणं तस्य रेचकः परिकीर्त्तितः। सबीजो ध्यानजपसहितः सगुणो ध्यात्तिः। अबीजो निर्गुणोपासनं तच्च परमहंसविषयं॥ यथाह पराशरः। सालंबा भगवन्मूर्त्तिः स्थूलं रूपं द्विजोत्तमः। आलंबनमनन्तस्य योगिनोभ्यासतः स्मृतं। इडया कर्षयेद्वायुं बाह्यं षोडशमात्रया। धारयेत्पूरितं योगी चतुःषष्ट्या तु मात्रया। सुषुम्णामध्यगं सम्यक् द्वा-

त्रिंशन्मात्रया शनैः। नाड्या पिंगलया चैनं रेचयेद्योग-
विग्रहात्। व्यासः। अंगुष्ठेन पुटं गाढं नासाया दक्षिणं
पुनः। कनिष्ठानामिकाभ्यां तु वामं प्राणस्य संग्रहे। अं-
गुष्ठतर्जनीभ्यां तु ऋग्वेदी सामगायनः। अंगुष्ठानासि-
काभ्यां तु ग्राह्यः सर्वैरथर्वभिः। मनुः। प्राणायामा ब्रा-
ह्मणस्य त्रयोपि विधिवत्कृताः। व्याहृतिप्रणवैर्युक्ता
विज्ञेयं परमं तपः। प्राणायामत्रयं कार्यं संध्यासु च तिसृ
ष्वपि। प्राणस्यायमनं कृत्वा आचामेत्प्रयतोपि सन्। अं-
तरं क्षिप्यते यस्मात्तस्मादाचमनं स्मृतं॥ अथ मार्ज-
नं योगयाज्ञवल्क्यः। आपो हि ष्ठेति तिसृभिर्ऋग्भिः
स्तु प्रयतः शुचिः। नवप्रणवयुक्ताभिर्जलं शिरसि निक्षि-
पेत्। प्रतिपादं आदौ प्रणव उच्चार्यमाणे ऋक्त्रये पि
नवप्रणवसंयुक्तत्वं भवति॥ ब्रह्मांडपुराणे। नद्यां
वाप्यां ह्रदे वाथ भाजने मृन्मये यदा। औदुंबरे च सौवर्णे
राजते दारवे जलं। कृत्वाथ वामे हस्ते वा संध्योपास्तिं स-
माचरेत्। एवं च वामहस्तोदकसंध्यानिषेधवचनानि
पात्रांतरसद्भावे सावकाशानि। द्वैपायनः। दत्त्वा चाभि
मुखं तोयं दर्भैर्मार्जनमाचरेत्। यस्य क्षयायेति जलं। स
कृत्प्रक्षिपेत्त्वधः। नारायणः। ऋगंते मार्जनं कुर्या-
त्पादांते वा समाहितः। आपो हि ष्ठेत्यृचा कार्यं मार्जनं च
कुशोदकैः। प्रतिप्रणवसंयुक्तं क्षिपेन्मूर्ध्नि पदे पदे।

तृचस्यांते यथा कुर्याहृषीणां मतमीदृशं । आपो हि ष्ठेति
सूक्तस्य सिंधुद्वीप ऋषिः स्मृतः । आपो वै देवता छंदो गा
यत्री मार्जनं स्मृतं ॥ मार्जने तीर्थविशेषमाह । हारीतः ।
मार्ज्जनार्च्चनवलिकर्म्मभोजनानि देवतीर्थेन कुर्यादि-
ति । एवं मार्जनं कृत्वा सूर्य्यश्चेत्यपः पिबेत् । आह शौ
नकः । सायमग्निश्चमेत्युक्त्वा प्रातः सूर्येत्यपः पिबेत् ।
आपः पुनंतु मध्याह्ने एतैश्चाचमनं चरेत् । तत्र सूर्यश्च मा
मन्युश्चेत्यस्य मंत्रस्य प्रकृतिः छंदः अग्निर्ऋषिः सूर्य
श्चेति याजुर्वैदिकौ मंत्रौ । बौधायनोपि ॥ अथातः सं
ध्योपासनविधिं व्याख्यास्यामः ॥ तीर्थं गत्वा प्रयतो
निषिक्तः प्रक्षालितपाणिपाद आचम्याग्निश्च माम
न्युश्चेति सायमपः पीत्वा सूर्यश्च मा मन्युश्चेति प्रातः स प-
वित्रेण पाणिना सुरभिमत्याब्लिंगाभिर्वारुणीभिर्हिरण्य
वर्णाभिः पावमानीभिर्व्याहृतिभिरन्यैश्च पवित्रैरात्मा
नं प्रोक्ष्य प्रयतो भवतीति । सुरभिमती दधिक्राव्ण इति ।
अस्या वामदेव ऋषिरनुष्टुप्छंदो दधिक्रावा देवता मार्ज
ने विनियोगः । अब्लिंगाभिरापो हिष्ठीयाभिः । हिरण्यव
र्णाभिः । हिरण्यवर्णाः शुचयः यासाꣳ राजा । यासां दे-
वाः शिवेन मा चक्षुषा इति चतसृभिः । आसां त्रिष्टुप्छं-
दः । अग्निर्ऋषिः आपो देवता मार्जने विनियोगः । के-
चनात्र ऋषिं कश्यपं मन्यंते पावमानीभिः स्वादिष्ठये

त्यादिभिः पावमानीनां बहुत्वादृषिछंदोदेवतानां च।
सिद्धत्वाद्विस्तरभयान्नोक्तं तत्तत्स्वरूपं। छंदोगानां तु
संध्याचमने गौतमोक्तौ मंत्रौ द्रष्टव्यौ। अहश्चमादि
त्यश्च पुनात्विति प्रातः। रात्रिश्चमावरुणश्च पुनात्विति
सायमिति। एतौ प्रजापतिदृष्टौ लिंगोक्तदेवतौ च। सं
ध्याचमनानंतरं नारायणः। स्पृष्ट्वा चाविप्लुतं तोयं
मूर्द्धि ब्रह्ममुखेन तु। आपो हि ष्ठेति सूक्तेन दर्भैर्मार्जन
माचरेत्। स्पृष्ट्वाचम्य। ब्रह्ममुखं मनुनोक्तं। ओंका
रपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः। त्रिपदा चैव
गायत्री विज्ञेयं ब्रह्मणो मुखमिति। सूक्तऋक्संख्यादि
कमाह भृगुः। आपोहिष्ठा नव सूक्तस्य सिंधुद्वीप ऋषि
स्मृतः। अब्देवत्यास्तु सप्तर्चो गायत्र्यो द्वेत्यनुष्टुभावि
ति। मार्ज्जनानंतरं अस्मा जलपूर्णं तया हस्तं नासिका
ग्रे समर्प्पयेत्। ऋतं चेति पठित्वा तु तज्जलं तु क्षितौ क्षि
पेत्। यमः। गृहीत्वा पाणिना वारि स्वघ्राणोक्तामृचं
जपेत्। विभृयान्नासिकाग्रे तु निरुध्य प्राणमारुतम्।
य एवं द्रुपदां नित्यं त्रिरद्भिः प्रयतो जपेत्। न च तिष्ठति पा
पानि तस्य देहे द्विजन्मन इति। ऋतं च सत्यं चेति सूक्तं
तृचमघमर्षणदृष्टं भाववृत्तदेवताकं आनुष्टुभं। द्रु
पदादिवेन्मुमुचान इति द्रुपदा। अस्याः कोकिलो राज
पुत्र ऋषिः आपो देवता अनुष्टुप्छंदः। ततः सूर्यायार्घ्यं

निवेदयेत्। व्यासः। कराभ्यां तोयमादाय गायत्र्या चाभिमंत्रितं। आदित्याभिमुखस्तिष्ठंस्त्रिरूर्ध्वं संध्ययोः क्षिपेत्। मध्याह्ने तु सकृदेव क्षेपणीयं द्विजातिभिः। अर्घदाने मंत्रांतरमाह। नारायणः। कराभ्यामंजलिं कृत्वा जलपूर्णं समाहितः। उदुत्यमिति मंत्रेण तत्तोयंतु क्षिपेत्ततइति। शाखानुसारेण व्यवस्था। उदकक्षेपणे कारणमाह। कश्यपः। त्रिंशत्कोट्यो महावीर्याः मंदेहा नाम राक्षसाः। कुर्वन्ति दारुणा घोराः सूर्यमिच्छंति खादितुं। ततो देवगणाः सर्वे ऋषयश्च तपोधनाः। उपासते तदा संध्यां प्रक्षिपंत्युदकांजलिं। दह्यंते तेन ते दैत्या वज्रीभूतेन वारिणा। एतस्मात्कारणाद्विप्राः संध्यां नित्यमुपासते। ततः प्रदक्षिणमावृत्य जलं स्पृशेत्। तथा ब्रह्माण्डपुराणे। सायं मंत्रवदाचम्य प्रोक्ष्य सूर्यस्य चांजलिं। दत्वा प्रदक्षिणां कृत्वा जलं स्पृष्ट्वा विशुद्ध्यति। सायमित्युपलक्षणं। सूर्यार्घदानरूपनिमित्तस्य सर्वत्र विद्यमानत्वात्। श्रुतिरपि। यत्प्रदक्षिणं प्रक्रामंति तेन पाप्मानमवधुन्वंतीति॥ अथ सूर्योपस्थानं॥ तत्र कश्यपः। हस्ताभ्यां स्वस्तिकं कृत्वा प्रातस्तिष्ठेद्दिवाकरं। मध्याह्ने तु कृतूर्ध्ववाहुः सायं मुकुलितौ करौ। देवलः। मित्रस्य चर्षणीति प्रोवा सवस्त्वेति चोदयेत्। इमं मेति च तु प्रोक्षेण सायं कुर्यादुपस्थितिं। व्यासः। संध्यात्रयेऽप्येकमेवउपस्थानं

प्रचक्षते। उदुत्यमुदु त्यं चित्रं तच्चक्षुरिति दिवाकरं। एत-
च्चोपस्थानं प्रातर्जपानंतरमेव कार्यं। तदुक्तं। कूर्मपुराणे
। ओंकारव्याहृतियुतां गायत्रीं वेदमातरं। कृत्वा जप्त्वांज-
लिं दद्याद्भास्करं प्रतिजन्मना। वेदमातरमुच्चार्येत्यध्याहा-
रः। जन्मना द्विजन्मना। ध्यात्वार्कमंडलगतां सावित्रीं वै
जपेद्बुधः। अथोपतिष्ठेदादित्यमुदयंतं समाहित इति ॥

अथ जपः॥ तत्र व्यासः। तेजोसीति मंत्रेण गायत्रीमा-
वाहयेद्द्विजः। उपस्थाय तुरीयेण नमस्कृत्य जपेच्च तां॥
योगयाज्ञवल्क्यः। ओंकारं पूर्वमुच्चार्य भूर्भुवः स्वस्तथै-
व च। गायत्री प्रणवश्चांते जपो ह्येवमुदाहृतः। गायत्र्या वि-
श्वामित्र ऋषिः सविता देवता गायत्री छंदः जपे विनियो-
गः। ध्यायेच्च मनसा मंत्रं जिह्वोष्ठौ न विचालयेत्। न कंपये-
च्छिरो ग्रीवां दंतान्नैव प्रकाशयेत्। मध्यमादिद्वयं पर्व जप-
काले तु वर्जयेत्। एवं मेरुं विजानीयाद्दूषितं ब्रह्मणा स्वयं
विश्वतश्चक्षुरिति मंत्रेण जपांते भास्करं द्विजः। कुर्यात्प्रद-
क्षिणं चैव उपविश्यासने ततः। देवागातुविदो मंत्रात्कुर्या-
ज्जपविसर्जनं। प्रातःसंध्यांगभूतेन गायत्र्या जपितेन च।
यथासंख्येन जप्येन ब्रह्मा मे प्रीयतां रविः। उत्तमे शिखरे
जाता भूम्यां पर्वतवासिनी। ब्राह्मणैः समनुज्ञाता गच्छ
देवि यथासुखमिति। अकृतसंध्यस्य सूर्योदये सति प्राय-
श्चित्तं स्मर्यते। आदित्योभ्युदयाद्यस्य संध्योपास्तिमकु-

र्चनः। स्नात्वा प्राणांस्त्रिराचम्य गायत्र्यष्टशतं जपेत्। प्रा-
णायामत्रयं कृत्वेत्यर्थः॥ अथ मध्याह्नसंध्यायां सौक-
र्यीय विशेषः कथ्यते संकल्पावाहनाचमनोपस्थानज-
पनिवेदनेषु। तद्यथा यथोक्तफलप्राप्तये माध्याह्निकीं
संध्योपास्तिमहं करिष्ये इति संकल्पः। सावित्रीं युवतीं
शुक्लां शुक्लवस्त्रां त्रिलोचनां। त्रिशूलहस्तां वृषभाधि-
रूढां रुद्राणीं रुद्रदेवतां। यजुर्वेदकृतोत्संगां जटामुकुटमं-
डितां। कैलासविहितावासां मायांतीं सूर्यमंडलात्। वर-
दां त्र्यक्षरां साक्षाद्देवीमावाहयाम्यहं। अक्षरां प्रणवा-
त्मिकां। इत्यावाहनं। आपः पुनंत्वित्याचमनमंत्रः। अ-
स्य नारायण ऋषिः आपो देवता अनुष्टुप्छंदः आचमने
विनियोगः। एकांजलिं प्रक्षिपेत्। ऊर्ध्वबाहुः सूर्यमुदी-
क्षमाण उपतिष्ठेत्। उपस्थाने मंत्रविशेषः स्मृत्यंतरे प्र-
दर्शितः। गायत्र्या च यथाशक्त्या उपस्थाय दिवाकरं। वि-
भ्राडित्यनुवाकेन सूक्तेन पुरुषस्य च। शिवसंकल्पेन
तथा मंडलब्राह्मणेन च। पवित्रैर्विविधैश्चान्यैर्गुह्योपनि-
षदैस्तथा। जपयज्ञो हि कर्त्तव्यः सर्ववेदप्रणीतकैः। सर्व-
वेदप्रणीतकैरिति स्वस्वशाखाभिप्रायं। उपस्थानं स्व-
कैर्मंत्रैरादित्यस्यानुकारयेदिति वसिष्ठस्मरणात्। म-
ध्याह्नसंध्यांगत्वेन गायत्र्या जपितेन च। यथासंख्येन
जप्येन रुद्रो मे प्रीयतामिति। अथ क्रमप्राप्तसायंसं-

ध्याविशेषः। संकल्पावाहनाचमनोपस्थानजपनि
वेदनेषु। तद्यथा। उपात्तदुरितक्षयार्थं ब्रह्मप्राप्त्यै संध्यो
पासनमहं करिष्य इति संकल्पः। वृद्धां सरस्वतीं कृष्णां-
पीतवस्त्रां चतुर्भुजां शंखचक्रगदापद्महस्तां गरुडवा
हिनीं। वदर्याश्रमवासां तामायांतीं सूर्यमंडलात्।
सामवेदकृतोत्संगां वनमालाविभूषितां। वैष्णवीं त्र्यक्ष
रां ध्यां तां देवीमावाहयाम्यहं। इत्यावाहने। अग्निश्च मा
मन्युश्चेत्याचमनमंत्रः। अस्य नारायण ऋषिरग्निर्दे
वता अनुष्टुप् छंदः। आचमने विनियोगः। ततोऽञ्जलित्र
यं दद्यात्। इमं मे वरुण श्रुधीति चतसृभिरुपस्थानं। अ
वशिष्टोपस्थानं च प्रातर्वत्। सायंसंध्यांगभूतेन गाय
त्र्या जापितेन च। यथासंख्येन जप्येन विष्णुर्मे प्रीयता
मिति। नोदकस्थो जपेत्प्रातो गायत्रीं वेदमातरं। अग्नि
त्रयं मुखी यस्मात्तस्मादुत्थायतां जपेत्। उत्थायेति न सा
यं संध्याविषयं। जपन्नासीत सावित्रीं प्रत्यगातारकोद
यादिति याज्ञवल्क्यस्मरणात्। मध्याह्ने तु। योगयाज्ञ
वल्क्योक्तो विशेषः। त्रिसंध्योदीक्षमाणोऽर्कं जपं कुर्या-
त्समाहितः। अन्यथा प्राङ्मुखः कुर्यादिति॥ अथ ज
पसंख्यादिविधिः॥ तत्र मनुः। ब्रह्मचारी गृहस्थ
श्च शतमष्टोत्तरं जपेत्। वानप्रस्थो यतिश्चैव द्विसह-
स्राधिकं जपेत्। योगीश्वरः। पूर्वां संध्यां जपंस्तिष्ठेत्स्वा

विची मार्कं दर्शनात्। पश्चिमां तु समासीनः सम्यग्रक्षावि भावनात्॥ योगयाज्ञवल्क्यः॥ यक्ष राक्षस भूतानि सिद्धि विद्याधरोरगाः। हरंति प्रसभं यस्मात्तस्माद्गुप्तं तु कारयेत्। न चक्रमन्न च सहन्न पार्श्वमवलोकयन्। उपाश्रितो न कुड्यादीन्न न ग्रः प्रयतो नरः। नाप्याश्रितो न जल्पंश्च न प्रावृत्त शिरास्तथा। न पदा पदमाक्रम्य नचैव हि तथा करौ। न चासमाहितमना न च संश्राव यन् जपेत्॥ बृहस्पतिः। मनः संहरणं शौचं। मौनं मंत्रार्थ चिंतनं। अव्यग्रत्वमनिर्वेदो जपसंपत्तिहेतवः न क्लिन्न वासा स्थलगो जपादीनाचरेद्बुधः। जपकाले न भाषेत स्नान होमादिके षु च। तूष्णीमासीत च ज पंश्चाडालपतितादिकान्। दृष्ट्वा तान्वायुपस्पृ- श्या भाष्य स्नात्वा विशुध्यति। विधियज्ञाज्जपय- ज्ञो विशिष्टो दशभिर्गुणैः। उपांशुस्याच्छतगुणः साहस्रो मानसः स्मृतः। विनाशब्दं जपो यस्तु चल जिह्वजच्छदः। उपांशुं तं जपं प्राहुर्मनसा मानसं बुधाः। वसिष्ठः। मानसः प्रोंतिको जप्य उपांशुः पौष्टिकः स्मृतः। सशब्दश्चाभिचारोयं त्रिविधो ज्ञ- प उच्यते। गृहे तु प्राकृती संध्या गोष्ठे दशगुणा भ वेत्। नदीषु शतसाहस्रं ज्ञानं तं शिवसन्निधौ। प्रा कृतीयथा वस्थितानाधिकफलेति यावत्। स्नाता

तपः। अनृतं मद्यगंधं च दिवा मैथुनमेव च॥ पुनाति वृषल
स्यान्नं संध्या बहिरुपासिता। ब्रह्मपुराणे। अंगुष्ठेन जपे-
न्मोक्षं तर्जन्या माभिचारिकं। मध्यमा धनसंपत्तिः शान्तिः पु
ष्टिरनामिका। स्कंदपुराणे। सौवर्णं राजतं ताम्रं स्फाटिकं
रत्नजं तथा। अरिष्टं पुत्रजीवं च शंखपद्मं तथा मणिं। कुश
ग्रंथिं च रुद्राक्षं उत्तमं चोत्तरोत्तरं। ब्रह्मपुराणे। अक्षुस्मा
समरंध्रा च परिपूर्णा दृढा नवा। निविडाग्रथिताः व्यंगाश्च-
न्योन्यं शृष्टवर्जिता। सशब्दा चेच्चलायां तु त्रुटिता ग्रथिता
पुरा। भिन्नसूत्रेण ग्रथिता पाखंडस्य पुरातनी। पाखंड
स्य पाखंडसंबंधिनीत्यर्थः। माला दुःखप्रदायिन्यो ग्रथि
तानि च तंतुभिः। अष्टोत्तरशतं कुर्याच्चतुःपंचाशिकाथवा।
सप्तविंशतिका कार्या ततो नैवाधमा हिता। उमासंवादे।
उच्छिष्टो वा विकर्मस्थः संलिप्तः सर्वपातकैः। नासौ लि
प्यति पापेन रुद्राक्षस्य तु धारणात्। लक्षं तु स्पर्शने पुण्यं
कोटिर्भवति चालनात्। दशकोटिसहस्राणि धारणा
ल्लभते फलं। लक्षकोटिसहस्रस्य लक्षकोटिशतस्य-
च। जपे तु लभते पुण्यं नात्र कार्या विचारणा। योगया
ज्ञवल्क्यः। अभावे त्वत्तमालायाः कुशग्रंथ्या च पा
णिना। जपः सर्वो हि कर्तव्य एकाग्रमनसा सदा। पाणि
रेखाभिः परिगणनाप्रकारमाह स एव। अनामिकायां
मध्ये च मध्यः मक्रमेण च। तर्जन्यादिगतांते च अक्षमा-

ला करे स्थिता॥ अस्यार्थः। अनामिकामध्यरेखामादिं कृ-
त्वा तदधःप्रक्रमेण प्रदक्षिणवर्त्तनतर्जन्यादिरेखांतेन क
र्तव्या। इयं करे स्थिता। अक्षमाला भवतीति। मध्यमादि
द्वयं पर्व जपकाले तु वर्जयेत्। एवं मेरुं विजानीयाद्दूषितं ब्रह्म
णा स्वयं। तर्जन्या न स्पृशेत्सूत्रं न कंपेन विधूनयेत्। अंगुष्ठ
स्य तु मध्यस्थं परिवर्त्तं समाचरेत्। नार्द्रवासा जपं कुर्याद्धो-
मदानप्रतिग्रहं। सर्वं तद्राक्षसं ज्ञेयं बहिर्जानु च यत्कृतं।
अंगुष्ठाग्रेण यज्जप्तं यज्जप्तं मेरुलंघितं। असंख्यातं तु य
ज्जप्तं तत्सर्वं निःफलं भवेत्। यमः। जातके मृतके वापि
संध्याकर्म न संत्यजेत्। मनसैवोच्चरेन्मंत्रान्प्राणायाम-
विवर्जितान्। योगेश्वरः। संध्यां स्नानं त्यजन्विप्रः सप्ताहा
च्छूद्रतां व्रजेत्। तस्मात्संध्यां च स्नानं च सूतकेपि न संत्यजे
त्। शिवविष्ण्वर्चनं दीक्षा यस्य चाग्निपरिग्रहः। श्रौतकर्मा
णि कुर्वीत स्मार्तः शुद्धिमवाप्नुयात्। सहस्रकृत्वस्तु बहिर्जप
न्वै वार्षिकं द्विजः। महतोप्येनसो मासात्त्वचेवाहिर्विमुच्य
ते। योधीते चान्वहं त्वेतान् त्रीणि वर्षाणि मानवः॥ सब्र-
ह्म पदमभ्येति वायुभूतः खमूर्तिमान्। एतदक्षरमेतां च
जपन् व्याहृतिपूर्विकां। संध्ययोरुभयोर्विप्रो वेदपुण्येन
युज्यते। सप्तावृत्त्या पुनात्येषा दशभिः प्राप्नुयाद्दिवं। विं
शत्याहस्त्या नु सा देवी नयते ईश्वरालयं। अष्टोत्तरशतं जप्त्वा
तारयेज्जन्मसागरात्। सर्वेषां चैव पापानां संकरे समुपस्थिते

दशसाहस्त्रिको भ्यासो गायत्र्याः शोधनं परं। वायुभक्षो दि
नं तिष्ठेत् रात्रिं नीत्वाप्सु सूर्यदृक्। जप्त्वा सहस्रं गायत्र्याः
शुद्धिं ब्रह्मवधादृते। न गायत्र्याः समो मंत्रो न जपो वैदिका
त्परः। न वासुदेवात्परो देव इति व्यासः स्वयंब्रवीत्॥ अ
थोपाकर्म॥ तत्र याज्ञवल्क्यः। अध्यायानामुपाक
र्म श्रावण्यां श्रावणेन वा। हस्ते नौषधिभावे वा पंचम्यां
श्रावणस्य तु। अधीयंत इत्यध्याया वेदाः। तेषां संस्का
रकं कर्मोपाकर्माख्यं तत् श्रावण्यां श्रावणस्य पौर्णमा
स्यां कार्यं। चंद्रमसा युक्तं श्रवणनक्षत्रं यस्यां सा श्रावणी
श्रवणेन वा। श्रवणेन युक्ते हनि वा हस्तेन युक्तायां पंच
म्यां वा उपाकर्म कार्यं। अन्ये तु हस्तेन युक्ते हनि वा पंच-
म्यां वेति व्याचक्षते। अथवा श्रवणशब्दात्सप्तम्यर्थे-
एनप्रत्ययः। एवं हस्तशब्दादपि। श्रवणे नक्षत्रे हस्ते न-
क्षत्र इत्यर्थः। ओषधिभावः। ओषधीनां व्रीहिप्रभृतीनां
प्रादुर्भावसंकुरोदय इति यावत्। एतच्च विशेषणं श्रा-
वणस्येति च सर्वैः संबध्यते। यदा त्वोषधिनां व्रीहिप्र-
भृतीनां प्रादुर्भावसंकुरोदय इति यावत्। एतच्च विशेष-
णं श्रावणस्येति च सर्वैः संबध्यते। यदा त्वोषधिप्रादु
र्भावाभावो गुरुशुक्रास्तादि दोषो वा तदा भाद्रपदपौर्ण
मास्यादिषु कार्यं। तथा च मनुः। श्रावण्यां प्रोष्ठपद्यां
वाप्युपाकृत्य यथाविधि। युक्तश्छंदांस्यधीयीत मासा

न्वित्रोर्द्धपंचमान्। ऊर्द्धं पंचमो मासो येषां ते तादृशाः। उपा
कर्म्मप्रभृति अर्द्धसहितांश्चतुरो मासान् शुक्लकृष्णपक्षेषु
स्वाध्यायदिनेषु स्वाध्यायमधीयीतेत्यर्थः। एतच्च गृहणा
ध्ययनं गृहस्थस्यापि भवति। तथाह शौनकः। समावृ-
त्तो ब्रह्मचारिकल्पेन यथान्यायमितरे जायोपेयी इत्येक
इति। इतरे ब्रह्मचारिणः। जायोपेयी गृहस्थः। अपिश-
ब्दाद्भाद्रपदश्रवणहस्तपंचमीनामुपसंग्रहः। तथाच
बह्वृचगृह्यपरिशिष्टकारिका। अद्यौषधयस्तस्मिन्मा
से तु न भवंति चेत्। तदा भाद्रपदे मासि श्रवणेन तदिष्य
ते। गोभिलः। प्रौष्ठपदीं हस्तेनोपाकरणं। प्रौष्ठपदीं प्रा
प्येत्यर्थः। शौनकः। तद्वार्षिकमित्येतदाचक्षत इति।
वर्षाकाले भवं वार्षिकं। बौधायनः। श्रावण्यां पौर्ण-
मास्यामाषाढ्यां वोपाकृत्य छंदांस्यधीयीतेति। निगमः
श्रावण्यां श्रावणीकर्म यथाविधि समाचरेत्। उपाक-
र्म तु कर्त्तव्यं कर्कटस्थे दिवाकरे। हस्तेन शुक्लपंचम्यां।
श्रावण्यां श्रवणेनवेति। अत्र स्वस्वगृह्यानुसारेण व्यव
स्थेति। साधारणनिर्णयः। तत्रापि ऋक्शाखिनां श्रव
णे। यजुःशाखिनां पौर्णमास्यां तत्रापि तैत्तिरीयाणा
मौदयिके पर्वणि इतरेषां तु पूर्वविद्धे पर्वणि सामगानां
तु हस्ते। अयं च निर्णयः। श्रवणादिप्राधान्यनिर्देशा
न्गम्यते। असति ग्रहसंक्रांत्यादिरूपप्रतिबंधे श्रावणी

मासि एव। तत्र प्रतिबंधे प्रौष्ठपद्यां। उभयत्रापि प्रतिबंधसद्भा-
वे यदि स्वशाखायां गृह्यान्हिकतया न निषेधस्तदा सर्वशाखा-
धिकरणन्यायेन कर्म्मणः कृत्वा बौधायनोक्तत्वेन पारक्य-
मविरोधि यदिति वचनाच्चाषाढ्यां पौर्णमास्यां यजुःशाखि-
नां भवति। बह्वृचानां सामगानां चाषाढमासश्रवणहस्त-
नक्षत्रयोर्न भवति। कस्मिंश्चिदपि ऋक्शाखाविशेषे सा-
मशाखाविशेषे वाऽऽषाढमासे विध्यदर्शनात्। शिष्टप-
रंपरायामश्रुतत्वाच्च। कालवृद्धावप्युपाकर्म्मोत्कर्षो भ-
वति। यदाह। कात्यायनः। उत्कर्षः कालवृद्धौ स्यादुपा-
कर्मादिकर्मणि। अभिषेकादिवृद्धीनां न तूत्कर्षो युगादि-
षु। यत्तु ऋष्यशृंगवचनं। दशाहरात्रस्तु नोत्कर्षश्चतुर्ष्व-
पि युगादिषु। उपाकर्म्मणि चेति तच्छंदोगविषयं। यतः
कालवृद्धावपि तेषां सिंहार्क एवोपाकर्म्म। तथा च गा-
र्ग्यः। सिंहे रवौ च पुष्यर्क्षे पूर्वान्हे विचरेद्बहिः। छंदोगमि-
लिताः कुर्युरुत्सर्गं स्वस्वछंदसां। शुक्लपक्षे तु हस्तेन उपा-
कर्म्मापरान्हिकमिति। सिंहे रवावुपाकर्म्म पुष्यर्क्षे उत्स-
र्जनमित्यन्वयः। अत्र कर्त्तव्यतामाह। कार्ष्णाजिनिः। उपा-
कर्म्मणि चोत्सर्गे यथाकालं समेत्य च। ऋषीन्दर्भमया-
न्कृत्वा पूजयेत्तर्प्पयेत्ततः। बृहत्प्रचेताः। भवेदुपाकृतिः
पौर्णमास्यां पूर्वान्ह एव तु। ब्राह्मणान्भोजयेत्तत्र पितॄ-
नुद्दिश्य देवताः। बौधायनः। गौतमादीनृषीन्स-

न्नं कृत्वा दर्भमयान्मुनः। पूजयित्वा यथाशक्ति पूजयेदृच
मुद्धरेत्। गौतमादन् इति स्वस्वशाखोक्तऋषिप्रदर्शनार्थं पू
जयेदृचमिति ऋचं ऋग्वेदं पूजयेत्। तथा च उद्धरेत्पठे
त्। एतच्च वेदांतराणामपि प्रदर्शनार्थं भविष्योत्तर
पुराणे। संप्राप्ते श्रावणस्यांते पौर्णमास्यां दिनोदये।
स्नानं कुर्वीत मतिमान् श्रुतिस्मृतिविधानतः। ततो देवान्
पितॄंश्चैव तर्प्पयेत्परमांभसा। उपाकर्मादि चैवोक्तमृषीणां
चैव तर्प्पणं। कुर्वीत ब्राह्मणः श्राद्धं वेदानुद्दिश्य शक्तितः
संप्राप्ते श्रावणस्यांत इति शुक्लप्रतिपदादिमासाभिप्राये
ण। संप्राप्ते श्रावणस्यांत इत्यपि पाठः। तदा कृष्णप्रति
पदादिमासाभिप्रायः। दिनोदय इति औदयिकपर्वाभिप्रा
यं। एतच्च तैत्तिरीयाणामेव। तथा च बह्वृचपरिशिष्टकारि
का। पर्वण्यौदयिके कुर्युः श्रावणं तैत्तिरीयकाः। बह्वृचाः
श्रवणे कुर्युर्ग्रहसंक्रांतिवर्ज्जित इति। तैत्तिरीयव्यतिरिक्तै
र्यजुःशाखीयैः पूर्व्वविद्धैव पौर्णमासी ग्राह्या। श्रावणी
दुर्गनवमी दूर्वा चैव हुताशनी। पूर्वविद्धा तु कर्त्तव्या शिवरा
त्रिर्बलेर्दिनं। इति स्मरणात्। नन्वेतदनुपपन्नं औदयिके
पर्वणि तैत्तिरीयका एव कुर्युरिति वक्तुमशक्यत्वात्। त
था हि। औदयिकत्वविशेषणविशिष्टे पर्वणि यदुपाक
र्म्म तदनुवादेन हि तैत्तिरीयकाः कर्त्तारो विधीयंते। तथा च
वाक्यभेदप्रसंगः। किंच। औदयिकस्याप्राप्तदनुवादो

पिन घटते। नापि तैत्तिरीयकरूपकर्तृविधिः। नहि कर्म्मणि
कर्तृविधानं अपितु कर्त्तुर्हि कर्म्म विधीयते। किंच। वृद्ध
च गृह्यसंग्रहे पाकमेषु तत्कालस्य पौर्णमास्याश्च विधा
नादत्र कारिकायामंगस्य पौर्णमासीकालऔदयिक
त्वसंबंधो विधेयः। तथांगरूपकर्तृणां तैत्तिरीयकाणा
मौदयिकत्वेनापरः संबंधो विधेयः। संबंधद्वयस्याप्यप्रा
प्तत्वात्। तथा च दुष्परिहरणीयो वाक्यभेदः। प्राप्ते कर्म्म
ण्यनेकगुणविधानात्। न चारुणैकहायनीन्यायेन पा
र्ष्णिकान्वयः कर्म्मणः प्राप्तत्वाद्द्रव्यगुणरूपत्वाभावाच्च
तत्र ह्यारुण्यगुणो द्रव्यरूपैकहायन्यामेकवाक्यतयोपयुज्य
ते। अत्र तु तैत्तिरीयकरूपकर्त्तारमौदयिकत्वं चेत्युभयं
परस्परनिरपेक्षांगं। न च निरपेक्षयोर्गुणयोर्मिथः संबंधः
गुणानां च परार्थत्वाद् संबंधः समत्वात्स्यादिति सूत्रका
रवचनात्। कर्त्तुश्च शेषत्वमुपदिष्टं गुरुणा। अधिका-
रो हि यज्ञेषु कर्त्तुः शेषस्य चिंत्यत इति। तस्मात्तैत्तिरीयक
पदं हविरुभयस्य वस्तुपलक्षकं। अतएवानुवादः। तथा
चौदयिकत्वमात्रं विधेयमिति तैत्तिरीयकमिति तैत्तिरीय
कव्यतिरिक्तानामपि यजुःशाखिनामौदयिक एव पर्व-
ण्युकर्म्म प्राप्तं। श्रावण्यां तु गर्भनवमीन्यस्यतु हिरण्यग
र्भपवित्रारोपणं विषयः। उपाकर्मांगभूतमाभ्युदयिकं
श्रावण्यां कर्म्म चेति। एवं प्राप्ते अभिधीयते। नतावद्विशिष्ट

नुवादे वाक्यभेदः। उद्देश्यविशेषणविवक्षायामेव वाक्यभे
दो न तु विशिष्टोद्देशेनेति भवदेवेनोक्तत्वात्। यदुक्तमौदयिक
त्वस्याप्राप्तत्वादनुवादो न घटत इति। तदयुक्तं। वाक्यांतरे-
णौदयिकपर्व्वप्राप्तेः। तथा च भविष्योत्तरे। संप्राप्ते श्राव-
णस्यांते पौर्णमास्यां दिनोदय इति। वाक्यशेषस्तु पूर्वमेव द
र्शितः। तथा कालिकापुराणे। चतुर्द्दश्यां समुत्पन्नावसु
रौ मधुकैटभौ। वेदान्नीत्वा कुर्वतः पद्मयोनेस्तौ जह्रतुः श्रुतीः।
हत्वा च तौ सुरौ देवः पातालवासिनौ। आहृत्य ताः श्रुतीस्तस्मै
ददौ लोकगुरुः स्वयं। स्नानदानश्रुतीनां ज्ञापर्व्वणयोर
यिके पुनः। अतो भूतयुते तस्मिन्नोपाकरणमिष्यते
आसुरं वर्ज्जयेत्कालं वेदाहरणशंकयेति। तस्मात्पर्व्व
णयोरौदयिके कुर्युः श्रावणां तैत्तिरीयकाः। इत्यनेनैत्तिरी
यककर्तृमात्रं विधीयत इति न वाक्यभेदः। प्राप्ते कर्म्म-
णि गुणद्वयविध्यभावात्। न हि कर्मणि कर्तुर्विधान-
मिति चेत्। अप्राप्तांशे विधिः। अत्र च कर्तृविशेषस्या
प्राप्तत्वादुपपद्यते। अपि त्वनुपादेयपंचकमध्यस्थ
त्वात्कर्म्म विधीयते कर्तुरुद्देशेन। विधिपर्यवसानं तु कर्तृ
विशेष एव। अथवा विशिष्टविधिरेव कारिकायां॥ ननुगृ
ह्ये उपाकर्म्मादीनां विहितत्वेन प्राप्तत्वात्कथं विशिष्ट
विधिः उच्यते। ग्रंथकर्तृभेदेन विशिष्टविध्याश्रयणान
च कारिकाकारेणोपाकर्मादि विहितं। अन्यथा सर्वस्व-

त्युच्छेदापत्तेः। नच सर्वशाखाधिकरणन्यायेन कर्म्मणः प्रधानस्यैकत्वात् विशिष्टविधौ गौरवप्रसक्तेश्चतैत्तिरीयकपदे लक्षणाश्रयणमुचितं॥ तथा सति तैत्तिरीयकपदस्यवैयर्थ्यापत्तेः। तथाहि। पर्वण्यौदयिके श्रावणीं कुर्युरित्येतावता सर्वेषां प्राप्तत्वात्तैत्तिरीयकपदं व्यर्थमेव। किंच विशिष्टविधौ गौरवभयाल्लक्षणास्वीकारेऽनवस्था प्रसज्येत। यदुक्तं नागानां मिथः संबंध इति। तदप्यनुपपन्नं। कर्तृविशेषस्य कालाकांक्षायामौदयिकत्वस्य कालसंबंधोपपत्तेः। नचायं नियमः। द्रव्यगुणयोरेव संबंध इति। अद्रव्यगुणयोरप्याकांक्षावशात्संबंधोपपत्तेः। पूर्वोक्तदोषाणां बहुचपक्षेपि समानत्वात्तदपि विवक्षितमेव। तस्मात्तैत्तिरीयकाणामौदयिके। अत्र सिंगाभट्टीयविशेषः। श्रवणः श्रावणं पर्वसंगस्तकं यदा भवेत्॥ तदैवोदयिकं कार्यं नान्यादौदयिकं भवेत्। १। पराशरमाधवीये। गार्ग्यः। श्रावणी पौर्णमासी तु संगवान्परतो यदि। तदैवौदयिकी ग्राह्या नान्यदौदयिकी भवेत्। पर्वणि तैत्तिरीयकव्यतिरिक्तेतरयजुःशाखीयानां पूर्वविद्धैव पूर्णमासी बह्वृचानां तु श्रवणस्वेति सिद्धं। तच्च श्रवणनक्षत्रं मुत्तराषाढविद्धं नग्राह्यं। तथा च व्यासः। श्रवणे नतु यत्कर्म्म उत्तराषाढसंयुतं। संवत्सरकृतो ध्यायस्तत्क्षणादेव नश्यति धनिष्ठासंयुतं कुर्याच्छ्रावणं कर्म्म

यद्भवेत्। तत्कर्म सफलं विद्यादुपाकर्मणि संक्षितमिति।
तैत्तिरीयशाखिनां बह्वृचानां सामगानां चौदयिक एव स्वोक्तः
कालो भवति। तथा च परिशिष्टे। धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्र
ऋक्ष समन्वितं। श्रावणं कर्म कुर्वीरन् ऋग्यजुः सामपा
ठकाः। धनिष्ठायुक्तं श्रवणनक्षत्रं प्रतिपद्युक्तं पर्व चित्रायुक्तं
हस्तनक्षत्रं। वेधश्चेह्न दिकात्मको ज्ञेयः वेधः षड्घटिकोह्ने
य इति स्मरणात्। एतच्चोपाकर्म ग्रहणादिरहिते कार्यं।
तथा च स्मृत्यंतरे उपाकर्म प्रकुर्वीत क्रमात्सामर्ग्यजुर्वि
दः। ग्रहसंक्रांत्ययुक्तेषु हस्तश्रवणपर्वसु। तथा। संक्रांतौ
ग्रहणे चैव सूतके मृतके तथा। गणस्नानं न कुर्वीत नार
दस्य वचो यथा। अथ चेद्दोषसंयुक्ते पर्वणि स्यादुपाक्रि-
यादुः स्वशोकामयग्रस्ताराष्ट्रे तस्मिन्द्विजातयः। तथा। य
दि स्याच्छ्रवणं पर्वग्रहसंक्रांतिदूषितं। स्यादुपाकरणं शु-
क्ल पंचम्यां श्रावणस्य तु। शुक्लपंचमीति वाजसनेयाभि
प्रायं। तथा च स्मृतिमहार्णवे। संक्रांतिर्ग्रहणं वापि पौर्ण
मास्यां यदा भवेत्। उपाकृतिस्तु पंचम्यां कार्या वाजसने
यिभिरिति। तथा संक्रांतिर्ग्रहणं वापि यदि पर्वणि जाय
ते। तन्मासे हस्तयुक्तायां पंचम्यां वा तदिष्यते। हस्तयुक्ता
यामन्यस्यां तिथौ पंचम्यां वेति विकल्पः। न तु पर्वणि ग्र
हणे चतुर्दश्यां श्रवणे सोपाकर्म कार्यं। वेधदोषसंभवा
त्। तथा च स्मर्यते। त्रयोदश्यादितो वर्ज्यं दिनानां नवक-

ध्रुवं। मंगलेषु समस्तेषु ग्रहणे चंद्रसूर्ययोः। तथा द्वादश्यादितृतीयांतो वेधइंदुग्रहे स्मृतः। एकादश्यादिकः सौरश्चतुर्थ्यंतः प्रकीर्त्तितः। खंडग्रहे तयोः प्रोक्तः शुभयत्र दिनद्वयमिति। दिनद्वयं पूर्वोत्तरं। नित्ये नैमित्तिके जप्ये होमयज्ञक्रियासु च। उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यत इति। न दोषः। गुरुशुक्रास्तमयादिष्वपि उपाकर्म केचन नेच्छंति। तेषामयमभिप्रायः। विद्यारंभो गुरुशुक्रमौढ्यादिषु निषिद्धः उपाकर्म च वेदारंभरूपं। ततश्च प्रथमोपाकर्मणि गुरुशुक्रास्तमये प्राप्ते तु कर्म न कर्त्तव्यं। अन्यत्र न दोष इति। अथोत्सर्ज्जनं॥ तत्र याज्ञवल्क्यः॥ पौषमासस्य रोहिण्यामष्टकायामथापि वा। जलांते छंदसां कुर्यादुत्सर्गं विधिवद्बहिः। रोहिण्या युक्तायामन्यस्यां तिथौ रोहिणीयुक्तायामष्टकायां कृष्णाष्टम्यां वा बहिर्ग्रामाद्बहिर्जलसंनिधौ। अत्र छंदसामुत्सर्ज्जनं न सर्वात्मना। अत एव मनुः। अतः परं तु छंदांसि शुक्लेषु नियतः पठेत्। वेदांगानि रहस्यं च कृष्णपक्षेषु संपठेत्। तथा पुष्ये तु छंदसां कुर्याद्बहिरुत्सर्ज्जनं द्विजः। माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि। श्रावण्यां यदोपाकर्म तदा पुष्ये उत्सर्ज्जनं। यदा भाद्रपदे तदा माघशुक्लप्रतिपदि। हारीतः। अर्द्धपंचमान्मासानधीत्यार्द्धमुत्सृजति पंचार्द्धषष्ठान्वेति। अर्द्धपशान्यं च मासान्वेत्यर्थः। अयं च पक्ष आषाढपौर्णमास्या

शुषाकर्माभिप्रायः। अथ वेदव्रतानि। एतान्यप्युदग
यन आपूर्यमाणपक्षे प्राजापत्याग्नेयवैश्वदेवसौम्या
ख्यानि कुर्यात्। प्राजापत्यादिस्वरूपप्रदर्शनमुपलक्ष
णार्थं। अतः स्वस्वशाखाविहितव्रतानि कर्त्तव्यानि।
अत्र कालविशेषमाह। गार्ग्यः। वेदव्रतानामुदगयना
दिकाल इति। आदिशब्दादापूर्यमाणपक्षाद्युपसंग्रहः
यदाह स एव। पर्वण्युदगयन आपूर्यमाणयक्षस्य चो
दगयन इति। दक्षः। स्वीकरोति यदा वेदं चरेद्वेदव्रतानि
च। ब्रह्मचारी भवेत्तावदूर्ध्वं स्नातो भवेद्गृही इति। गौत-
मोऽपि। गर्भाधानपुंसवनसीमंतोन्नयनजातकर्मनाम
करणान्नप्राशनचूडोपनयनं चत्वारि वेदव्रतानीति।
ब्रह्मचर्यव्रतकालावधिमाह देवलः। अतः परमष्टा
चत्वारिंशद्वार्षिकीं वेदव्रतचर्यां यातिष्ठेदशक्तश्चेत्षड्विंश
द्वार्षिकीं चतुर्विंशतिद्वादश वा प्रतिवेदमिति। मनुः। ष-
ड्विंशदाब्दिकं कार्यं गुरौ त्रैविद्यकं व्रतं। तदर्धिकं पादिकं
वा ग्रहणांतिकमेव वेति। अस्यार्थः। त्रिवेदा एव त्रैविद्यं वेद
त्रयविषयं ब्रह्मचर्यं षड्विंशदाब्दिकं कार्यं प्रति वेदं द्वादश
वर्षाणि ब्रह्मचर्यं चरेदित्यर्थः। अर्द्धिकं षड् षाणि। पा-
दिकं तु त्रीणि। एवमुपनीतं तत्तत्कांडोपयुक्तव्रतधारिणं
माणवकमध्यापयेत्। याज्ञवल्क्यः। उपनीय गुरुः
शिष्यं महाव्याहृतिपूर्वकं। वेदमध्यापयेनमिति। तत्र

यदा ऋग्वेदमारभते। तदा स्वगृह्योक्तविधिनाग्निं प्रतिष्ठा
प्य पृथिव्यै स्वाहा। अग्नये स्वाहेति आज्याहुत्वा ब्रह्मणे छं
दोभ्य इत्याद्यानवाहुती हुत्वा शेषं समापयेत्। यदि य
जुर्वेदं तदांतरिक्षाय स्वाहा। वायवे स्वाहा। यदा सामवेदं तदा दि
वे स्वाहा। सूर्याय स्वाहेति। यदाथर्ववेदं तदा दिग्भ्यः स्वाहा।
चंद्रमसे स्वाहेति विशेषः। यद्येकदैव सर्ववेदारंभः तदाज्य
भागानंतरं प्रतिवेदं पूर्वोक्तप्रधानाहुतिद्वयं हुत्वा प्रजाप
तये स्वाहा। देवेभ्य ऋषिभ्यः श्रद्धायै मेधायै सदसस्पतये
अनुमतये स्वाहेति सप्ताज्याहुतीर्जुहुयात्। अनंतरं महा
व्याहृति स्विष्टकृतं तादशाहुतीर्हुत्वा शेषं समाप्य यथा
विधि वेदमध्यापयेत्। तत्रापि माणवकं कल्पपरं परा
यातं वेदमध्यापयेत्। तस्यैवाध्येतव्यत्वनियमात्। व
सिष्ठः। पारंपर्यागतो येषां वेदः सपरिबृंहणः। तच्छाखं
कर्म कुर्वीत तच्छाखाध्ययनं तथेति। स्वशाखाध्ययनां
नंतरं शाखांतराध्ययनमपि भवति। तथा च वसिष्ठः।
अधीत्य शाखामात्मीयां अन्यां शाखां ततः पठेदिति।
आरंभश्च शुभदिनादौ कार्यः। तथा च ज्योतिःशास्त्रं। वि
द्यारंभः प्रशस्तो भवति मधुरिपौ प्राप्तबोधे सुधांशौ यस्ते
स्तीक्ष्णांशुतौ च विदशपतिगुरौ वृद्धते चापि शुक्रे। अग्ना
ने सिंहराशौ दशशतकिरणे चापि दैत्यारिपूज्ये स्वाध्याये।
भानुशुक्रत्रिदशगुरुदिने लग्नसंस्थे च जीवे। वष्टीं प्रतिपदं

चैव वर्जयित्वा तथाष्टमीं । रिक्तां पंचदशीं चैव सौरभौम
दिनं तथा विद्यारंभः सुरगुरुसितज्ञेष्वभीष्टार्थदायी क
तुश्चायुश्चिरमपि करोत्यंशुमान्मध्यमोत्रानीहा राहौ
भवति जडता पंचता भूमिपुत्रे छायासूनावपि च
मुनयः कीर्त्तयंत्येवमाद्याः । मृगादिपंचस्वपि भेषु मू
ले हस्तादिके च त्रितये श्विनीषु । पूर्वात्रये श्रवणे च तद्व
द्विद्यासमारंभमुशंति सिद्धौ । अथाध्ययनविध्यादयः
॥ याज्ञवल्क्यः ॥ गुरुं चैवाप्युपासीत स्वाध्यायार्थं
समाहितः । मनुः । अध्येष्यमाणस्त्वाचांतो यथाशास्त्र
मुदङ्मुखः । प्रांजलिश्च कृतोध्याप्यो लघुवासाजितेंद्रि
यः । ब्रह्मारंभेवसाने च पादौ ग्राह्यौ गुरोः सदा । व्यत्यस्त
पाणिना कार्यमुपसंग्रहणं गुरोः । सव्येन सव्यः स्प्रष्टव्यो
दक्षिणेन तु दक्षिणः । ब्रह्मणः प्रणवं कुर्यादादावंते च
सर्वदा । स्रवत्यनोंकृतं पूर्वं पुरस्ताच्च विशीर्यते । प्रांज-
लिः पर्युपासीत पवित्रैश्चैव पावितः । प्राणायामैस्त्रिभिः
पूतस्तत ओंकारमर्हति । मनुः । अध्येष्यमाणश्च गुरुं
नित्यकालमतंद्रितः । अधीष्व भो इति ब्रूयात् विरामो
स्त्विति चारमेत् । नोदितो गुरुणा नित्यमप्रणोदित
एव वा । कुर्यादध्ययने योगमाचार्यस्य हितेषु च । द
क्षः । द्वितीये तु तथा भागे वेदाभ्यासो विधीयते । वेद
स्वीकरणं पूर्वं विचारोभ्यसनं जपः । आह्वानं चैव शिष्यो

भ्यो वेदाभ्यासो हि पंचधा। मनुः। नित्यमुद्धृतपाणिः स्यात्स्वा-
ध्यायार्थं समाहितः। आस्यतामिति चोक्तःस्वस्यास्रो साभिमुखं
गुरोः। हीनान्नवस्त्रवेषः स्यात्सर्वदा गुरुसन्निधौ। गुर्वपेक्षया
हीनान्नवस्त्रवेषत्वं। उत्तिष्ठेत्प्रथमं चास्य चरमं चैव संविशेत्
त्। याज्ञवल्क्यशिक्षा। हस्तौ सुसंयतौ धार्यौ जानुभ्यामु
परिस्थितौ। गुरोरनुकृतिं कुर्वन् पठन्नान्यमतिर्भवेत्। शरीरं
चैव वाचं बुद्धींद्रियमनांसि च। नियम्य प्रांजलिस्तिष्ठेद्वीक्ष-
माणो गुरोर्मुखं। पाणिनीयशिक्षायां। हस्तेन वेदं योधीते
स्वरवर्णार्थसंयुतं। ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीय
ते। हस्तहीनं तु योधीते स्वरवर्णविवर्जितं। ऋग्यजुःसामभि
र्दग्धो वियोनिमभिगच्छति। पराशरः। ज्ञातव्यः सर्वदेवा
र्थो वेदानां कर्मसिद्धये। पाठमात्रमधीतीच पंके गौरिवसीद
ति। व्यासः। वेदस्याध्ययनं रसर्वधर्म्मशास्त्रस्य चैव हि।
अजानतोर्थं तद्व्यर्थं तुषाणां कंडनं यथा। मनुः। योनधी
त्य द्विजो वेदानन्यत्र कुरुते श्रमं। सजीवन्नेव शूद्रत्वमाशु
गच्छति सान्वयः। यमः। यद्दुमां पृथिवीं सर्वां सर्वरत्नोप
शोभितां। दद्यात् शास्त्रं च शिष्येभ्यस्तच्च तच्च द्वयं समं।
मनुः। ब्रह्मयस्त्वाननुज्ञात अधीयानस्तदाप्नुयात्। सब्र
ह्मस्तेयसंयुक्तो नरकं प्रतिपद्यते। गुरोरनुमतिं कृत्वा वेदा-
ध्ययनमारभेत्। अध्यापयेत्ततः शिष्यान्न्यायशीलान्गु
णान्वितान्। याज्ञवल्क्यः। कृतज्ञाद्रोहिमेधाविशुचि

कल्यान सूयकाः। अध्याप्याधर्म्मतः। साधुशक्ताप्तज्ञानवि
त्तदाः। एते अध्याप्या इति गृह्णात् एतद्व्यतिरिक्तानां नि
षेधा। तथा च मनुः। धर्म्मार्थौ यस्य न स्यातां शुश्रूषा चा
पि तद्विधा। तत्र विद्या न वप्तव्या ऊषरं बीजमिवोषरे। विद्ययै
व समं कामं मर्त्तव्यं ब्रह्मवादिना। आपद्यपि हि कष्टायां न त्वे
नामिरिरोचयेत्। विद्या ब्राह्मणमित्याह शेवधिस्ते रक्षमां
असूयकाय मां मादास्तथा स्यां वीर्यवत्तमा। निधिर्नाशेव
धिरित्यमरः। असूयकः गुणानां विष्कारेण दोषाविष्कर-
णशीलः। यमेवनुशुचिं विद्यान्नियतं ब्रह्मचारिणं। तस्मै
मां ब्रूहि विप्राय निधिपायाप्रमादिने। निर्निदाताडने कुर्यात्तु
च्छिष्यं च ताडयेत्। अधो भागे शरीरस्य नोत्तमांगेन व-
क्षसि। अतोन्यथा तु प्रहरन्यापयुक्तो भवेन्नरः। न्याययु-
क्तो दंड्यः। सर्वधर्ममयं ब्रह्म प्रदानेभ्योधिकं यतः। तद्दद-
त्समवाप्नोति ब्रह्मलोकमविच्युतं॥ अथानध्यायाः।
तत्र उशनाः। अयने विषुवे चैव शयने बोधने तथा।
अनध्यायं प्रकुर्वीत मन्वादिषु युगादिषु। याज्ञवल्क्यः
त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबंधुषु। उपाकर्म्मणि
चोत्सर्गे स्वशाखा श्रोत्रिये मृते। पंचदश्यां चतुर्द्दश्यामष्ट
म्यां राहुसूतके। ऋतुसंधिषु भुक्त्वा च श्राद्धिकं प्रतिगृह्य
च। संध्यागर्जितनिर्घातभूकंपोल्कानिपातने। समाप्य वे
दं द्युनिशामारण्यकमधीत्य च। पशुमंडूकनकुलश्वाहि

मार्जारमूषकैः। कृते तेरत्वहोरात्रं शक्रपाते तथोच्छ्रये। अ-
श्वविप्रोष्ट्रस्तु शिष्टाचाराद्वगंतव्यः। खरोष्ट्रगर्दभोलूकसा-
मशब्दार्त्तनिःस्वने। अमेधशवशूद्रांत्यश्मशानपतितांति-
के। देशे शुचावात्मनि च विद्युत्स्तनितसंप्लवे। भुक्त्वार्द्र-
पाणिरंभोंतरर्द्धरात्रेतिमारुते। पांसुवर्षे दिशां दाहे संध्या-
नीहारभीतिषु। धावतः पूतिगंधे च शिष्टे च गृहमागते।
खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणारोहणे। सप्तत्रिंशदन-
ध्यायानेतांस्तात्कालिकान्विदुः। ब्रह्मांडपुराणे। रात्रौ
यामद्वयादर्वाक् यदि पश्येत्त्रयोदशीं। प्रदोषः स तु विज्ञेयः
सर्वस्वाध्यायवर्जितः। षष्ठी च द्वादशी चैव अर्द्धरात्रो न-
नाडिका। प्रदोषो न त्वधीयीत तृतीया नव नाडिका। अ-
ष्टमी हंत्युपाध्यायं शिष्यं हंति चतुर्दशी। अमावास्यो भ-
यं हंति प्रतिपद्बुद्धिनाशिनी। अष्टका तु समाख्याता सप्त-
म्यादिदिनत्रयं। शास्त्रं न तत्राधीयेत व्रतबंधं विवर्ज्जयेत्
। मनुः। वेदोपकरणे चैव स्वाध्याये चैव नित्यके। नानुरो-
धोस्त्यनध्याये होममंत्रेषु चैव हि। अथ गुरुकुलवास-
चर्या॥ तत्र मनुः। शरीरं चैव वाचं च बुद्धींद्रियमनांसि
च। नियम्य प्रांजलिस्तिष्ठेद्वीक्षमाणो गुरोर्मुखं। प्रति-
श्रवणसंभाषे शायानो न समाचरेत्। नासीनो न च भुंजा-
नन तिष्ठन्न पराङ्मुखः। कथं कुर्यादित्यत आह। आसीन-
स्य स्थितः कुर्यादभिगच्छंस्तु तिष्ठत॥ प्रत्युद्गम्याथ ब्रज-

नः पश्चाद्धावंस्तु धावतः। पराङ्मुखस्याभिमुखो। दूरस्थस्येत्य चांतिकं। प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः। अभिगच्छन् संमुखं गच्छन्। प्रत्युद्गमनं पश्चाद्गमनं। दूरस्थस्येत्येति। अत्र स्त्रो माङो ध्येति परस्मैपदत्वाद्वृध्यभावः। प्रणस्येत्येतन्निदेशे तिष्ठत इत्यनेन संबध्यते। निदेशोऽस्य स्थानान्निम्नदेशे गर्त्तादौ। निदेशे निकटदेश इत्यपरे। नीचं शय्यासनं चास्य नित्यं स्याद्गुरुसन्निधौ। गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत्। नोदाहरेदस्य नाम परोक्षे नापि केवलं। न चैवास्यानुकुर्वीत गतिभाषितचेष्टितं। गुरोर्यत्र परीवादो निंदा वापि प्रवर्त्तते। कर्णौ तत्र पिधातव्यौ गंतव्यं वा ततोऽन्यतः। परिवादात् खरो भवति श्वा वै भवति निंदकः परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी। अननुज्ञातगुरुत्वेनोपभोक्ता परिभोक्ता। दूरस्थो नार्चयेदेनं न क्रुद्धो नांतिके स्त्रियः। यानासनस्थश्चैवैनमवरुह्याभिवादयेत्। प्रतिवातेऽनुवाते च नासीत गुरुणा सह। असंश्रवे चैव गुरोर्न किंचिदपि कीर्त्तयेत्। गुरुदेशात् शिष्यदेशं प्रत्यभिमुखो वा वातः परिवातः। तत्र नासीत तनूष्यादिनिर्गमसंभवात्। शिष्यद्देशाद्गुरुदेशं प्रत्यनुगतो वातः अनुवातः। तत्रापि नासीत उदीरितं शब्दाश्रवणात्। असंश्रवे अननुज्ञायां। गोऽश्वोष्ट्रयानप्रासादे संस्तरेषु कटेषु च। आसीत गुरुणा सार्द्धं शिलाफलकनौषु च। गुरोर्गुरौ संनिहिते गुरुवृत्तिमाचरेत्। न वा

निसृष्टो गुरुणा स्वान्गुरूनभिवादयेत्। गुरोराचार्यस्य स-
मीपे गुरूनुपाध्यायादीन्नाभिवादयेत्। गुरोराचार्यस्य
समीपे गुरावुपाध्यायादौ संनिहिते सति। गुरुतुल्यां वृत्ति-
माचरेत्। गुरुणा आचार्येणाननुज्ञातः स्वान्गुरूनुपा-
दीन्नाभिवादयेत्। अध्यापयन्गुरुसुतो गुरुवन्मानम-
र्हति। उत्सादनं तु गात्राणां स्नापनोच्छिष्टभोजने। न
कुर्याद्गुरुपुत्रस्य पादयोर्वावनेजनं। गुरुवत्प्रतिपूज्याः
स्युः सवर्णा गुरुयोषितः। असवर्णास्तु संपूज्याः प्रत्यु-
त्थानाभिवादनैः। अभ्यंजनं स्नापनं च गात्रोत्सादनमे
व च। गुरुपत्न्या न कार्याणि केशानां च प्रसाधनं।
गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः। ऊनविंशति
वर्षेण गुणदोषौ विजानता। यथा खनन्खनित्रेण न-
रो वार्यं गच्छति। तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छ
ति। अब्राह्मणादध्ययनमापत्काले विधीयते। अनुव्र-
ज्या च शुश्रूषा यावदध्ययनं गुरोः। ब्रह्मचारी द्विविधः
उपकुर्वाणको नैष्ठिकश्च। तत्रोक्ता आद्यधर्माः। अथ द्वितीय
धर्माः प्रस्तूयंते। तत्र याज्ञवल्क्यः। नैष्ठिको ब्रह्मचारी तु वसे
दाचार्यसंनिधौ। तदभावे स्य तनये पत्न्यां वैश्वानरेऽपि वा।
उपकुर्वाणकवदुक्तविधिना आत्मानं निशामुत्क्रांतिकालं गम
यतीति नैष्ठिक उच्यते। स आचार्यसन्निधौ वसेत्समावर्त्तये-
ता। तदभाव इति सर्वत्रानुषज्यते। ततश्च पत्न्यभावे गुरुस-

पिंडे वसेत्। तदभावे स्वाग्निशुश्रूषा कर्त्तव्या। तथा च मनुः
आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते। गुरुदारे सपिंडे वा गुरु
वद्वृत्तिमाचरेत्। एतेष्वविद्यमानेषु स्थानासनविहारवान्।
प्रयुंजानोऽग्निशुश्रूषां साधयेद्देहमात्मनः। अयं च वास अनू
चानब्राह्मणगुर्वादिषु। यदाह मनुः। ब्राह्मणो गुरौ
शिष्यो वासमात्यंतिकं वसेत्। ब्राह्मणे वाननूचाने कांक्षन्
गतिमनुत्तमामिति। अस्य धर्मानाह देवलः। ब्रह्मसूत्रा
क्षमाला दंड काष्ठ कुंडिका मौंजी मेखला धारणं सकृद्भोज
नमसकृदवगाहनं। असकृदवगाहनं त्रिषवणं स्नानं। उ
भयकालमग्निहोत्रं संध्योपासनमकृत्तलोमकेशनखत्वं
गंधमाल्यस्नेहाभ्यंजनांजनवेषालंकारछत्रोपानद्वाहनं
धनप्लवनधावनचिकित्साज्योतिषलक्षणवास्तुविद्यामं-
गलपौष्टिकशांतिककर्मगंधसंज्ञमयवंधनशिल्पलेख
नकारुकर्मवेषमक्षेत्रद्रव्यधनधान्यपरिक्रयणास्त्रद्यूत।
व्यवहारक्रभावलीलापरिहासप्रणयकुहकविस्मापन
विडंबनविवादोत्सेकपरिदेवनरोदनपादोद्वर्त्तनवर्ज्जन
मिति। अग्निपरिचर्याप्रकारमाहहारीतः। यज्ञियाः स
मिध आहृत्य संमार्जनोपलेपनोद्बोधनोपगूहनसमिंधन
पर्य्यग्निकरणपरिक्रमोपस्थानहोममस्तोत्रनमस्कारादि
भिरग्निं परिचरेदिति। एवं कुर्वतः फलमाह। याज्ञव-
ल्क्यः। अनेन विधिना देहं साधयन्विजितेंद्रियः। ब्रह्म

लोकमवाप्नोति न चेहाजायते पुनः। अत्रेदं चिंत्यं। किमिदं
नैष्ठिकब्रह्मचर्यं कुब्जादिपुरुषविशेषाधिकारकं उतोपनी
तमात्राधिकारकमिति। तत्र कुब्जादिविषयमिति तावद्ब्रूमः।
वैफल्ये नियमाविधानात्। तथाहि। कुब्जवामनजात्यंध
क्लीबपंग्वार्तरोगिणां। व्रतचर्या भवेत्तेषां यावज्जीवम
नंशात इति। अंशाभावादित्यर्थः। किंच। उपनीतमात्र
विषयत्वे यावज्जीवमग्निहोत्रं जुहुयादिति। गृहस्थधर्म
प्रतिपादिकायाः श्रुतेः संकोच आपद्येत। एवं प्राप्ते भि
धीयते। उपनीतमात्रविषयमेतत्। अन्यथा मनुवचन
विरोधात्। तथाहि। यदि त्वात्यंतिको वासो रोचेतास्य गुरोः
कुले। युक्तः परिचरेदेनमाशरीरविमोक्षणादिति। अत्र
यदीत्यनेन पाक्षिकत्वं द्योत्यते। विष्णुवचने च यावज्जीव
मित्यनेन पंग्वादीनां नित्यमेतदित्यवगम्यते। एवं च पंग्वा
दिविषये मनुवचनयोर्विरोधः। तत्परिहाराय मनुवचनं
पंग्वादिव्यतिरिक्तविषयं। ततश्च पंग्वादिव्यतिरिक्तोपनी
तमात्रे पाक्षिकमिति। पक्षे नैष्ठिकत्वं पक्षे नेतीत्ययमर्थः सि
द्धः। एवं च केवलकुब्जादिविषयत्वे विरोधे दुष्परिहरः स्या
त्। यच्चोक्तं श्रुतिसंकोच इति तत्तु श्रुत्यंतरविरोधपरिहारा
र्थं मृष्यामहे। यमिच्छेत्तमावसेत्। यदहरेव विरजेत्तदह
रेव प्रव्रजेदित्याद्याश्रमविकल्पप्रतिपादकवाक्याविरो
धाय यावज्जीवमग्निहोत्रं जुहुयादित्यनेनापि येरागावशा

त्कृतोपयमाविषामेव रागातिरेकौ यावज्जीव गार्हस्थ्यनि
षत्ते नाग्निहोत्र कर्त्तव्यता प्रतिपाद्यते न तु सर्वेषां। अतो ये
रागाभावेन नैष्ठिकब्रह्मचर्यं कामयन्ते तस्याग्निहोत्राधि
काराभावादेव तद्विषये यावज्जीव श्रुतिः प्रवर्त्तते। तथाच
जावालश्रुतिः। यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेदिति
केचिन्नैवं मन्यन्ते। नैष्ठिकत्वस्य स्मार्त्तत्वेन श्रौताग्निहोत्रादि
नावाधइति। तच्च स्वाध्यायवैधुर्येनिवंधनमित्युपेक्षणी
यं। तस्यापि श्रुतिमूलत्वात्। ब्रह्मचार्याचार्यकुलवासी
द्वितीयोत्यंतमात्मानमाचार्यकुले वसादयन्निति हि।
श्रुतिः। ननु ब्रह्मचारि द्वैविध्ये चत्वार आश्रमा इत्यापस्त
ववचनविरोधः स्यादितिचेन्नैवं। संकल्पभेदमात्रेणानि
त्यकाम्यदर्शपूर्णमासादिवदभेदोपपत्तेः। तथाच दक्
षः। द्वितीयो नैष्ठिकश्चैव तस्मिन्नेवाश्रमे स्थित इति॥
अथ समावर्त्तनं॥ तत्र याज्ञवल्क्यः। गुरवे तु वरं दत्वा
स्नायीत तदनुज्ञया। वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव
वा। व्रियत इति वरः अभिलषितार्थः। वेदशब्दो वेदाध्यय
नतदर्थजिज्ञासादीनामप्युपलक्षणार्थः। तथाच स्मर्य
ते। वेदस्वीकरणं पूर्वं विचारो ध्ययनं जपः तद्दानं चैव शिष्ये
भ्यो वेदाभ्यासो हि पंचधा। व्यासः। वेदस्याध्ययनं सर्वं
धर्मशास्त्रस्य चापि यत्। अजानतोर्थं तद्व्यर्थं तुषाणां
कंडनं यथा। यो धीत्य विधिवद्विप्रो वेदार्थं न विचारयेत्।

ससान्वयः शूद्रसमः पात्रतां न प्रपद्यते। अधीत्य यत्किंचिद्
पि वेदार्थाधिगमे ततः। स्वर्गलोकमवाप्नोति धर्मानुष्ठान
वान्द्विजः। एकपादमप्यधीत्यातो न्यायज्ञस्तु तदर्थवि
त्। सम्यग्व्रतानि संसेव्य समावर्त्तनमर्हति। त्रिविधो हि स्ना
तकः। तथा। हारीतः। त्रयः स्नातका भवंति विद्यास्नात
को व्रतस्नातको विद्याव्रतस्नातक इति। यो वेदमेव समाप्य
समावर्त्तते स विद्यास्नातकः। यश्च व्रतान्येव समाप्य स व्रत
स्नातकः। यश्चोभयं स विद्याव्रतस्नातकः। एवं च व्रतस्ना
तकस्य विवाहोत्तरकालमध्ययनसमापनं वेदार्थज्ञानं चे
ति मंतव्यं। अस्मिन्पक्षे वेदाध्ययनसमाप्तावेव गुरवे द-
क्षिणां दद्यात्। तथा च गौतमः। विद्यांते गुरुरर्थेन नि
मंत्र्य इति। अर्थेन हेतुना निमंत्र्य प्रष्टव्यः। यत्तु मनुनोक्तं स्ना
स्यंस्तु गुरुणाज्ञप्तः शक्त्या गुर्वर्थमाहरेदिति तद्व्रतस्नातके
तरविषयं। गुरवे तु वरं दत्वा स्नायादित्युक्तं। न चैतज्ज्ञानक
र्मनियतं विरक्तस्य विवाहेच्छाभावात्। तथा च नृसिं
हपुराणे। गुरवे दक्षिणां दत्वा स्नायमिच्छेत्तमाविशेत्।
विरक्तः प्रव्रजेद्विद्वानन्यरागस्तु गृहे वसेदिति। एतच्च
समावर्त्तनमुक्तदिने कार्यं। तथा च सुरेश्वरः। भौमभानु
जयोर्वारे नक्षत्रे च व्रतोदिते। ताराचंद्रविशुद्धौ स्यात्समा
वर्त्तनकक्रिया॥ अथ स्नातकव्रतानि॥ तत्र पारस्क
रः। स्नातकस्य यमान्वक्ष्यामः कामादितरो नृत्यगीतवा

दित्राणि न कुर्यात् न गच्छेत्। कामं तु गीतं गायति गायति चीव
गीते रमत इत्यपरे। क्षेमे नक्तं ग्रामांतरं न गच्छेन्न धावेदिति।
ब्रह्मचर्यात्समावृत्तस्य यमान्व्रतानि वक्ष्यामः। कामात् इच्छ
यान्नृत्यगीतवादित्राणि न कुर्यात् न गच्छेत् द्रष्टुमिति शेषः।
इतरो ब्रह्मचारी। सोपि न कुर्यान्न गच्छेदित्येव। इच्छया गायेत्
शृणुयात्। यथा अश्वमेधे दिवा ब्राह्मणो गायत्रीति यजमानय
तीति यजमानं श्रावयति चेति गाने श्रवणे चाधिकारः। एवम
न्यत्रापि यत्र विशेषविधिरस्ति तत्रैवाधिकारो नान्यत्रेत्यर्थः
क्षेमे सति नक्तं ग्रामांतरं न गच्छेदिति। क्षेम आपदभावे सति।
न वधावेत् क्षेमे सतीत्यनुषज्यते। तथा। उदपानावेक्षणवृ
क्षारोहणफलप्रचयनसंधिसर्पणविवृतस्नानविषमलं
घनशुक्लवदनसंध्यादित्यप्रेक्षणमाभीक्ष्णेन न कुर्यात्।
उदपानं कूपादि। वृक्षाग्रपरिगमनेन फलप्रचयनं फलग्र
हणं। संधिसर्पणं संधिभूमिगमनं। अथवा संध्यायामपमा
र्गेगमनं। विवृते वर्त्मादौ स्नानं विषमं गर्त्तादि शुक्लमश्लीलं।
तत्त्रिविधं। लज्जाकरं। दुःखकरं। अमंगलसूचकं च। अभी
क्ष्णं वारंवारं। आदित्यमंडलं न पश्येदित्यर्थः। तथा। न
ह वै स्नात्वाभिक्षेत। वर्षत्यप्रावृतो न गच्छेत्। अयं मे वज्र
इत्यनेन मंत्रेण गच्छेत्। ऊर्ध्वीकृतकरपाणिस्तु चरेन्नात्रौ त
था दिवा। तच्छाया प्रावृद्वितस्ताः। अप्राप्स्यंति हि पन्नगाः।
अप्सु स्वमुखं नावेक्षेत। गर्भिणीं विजन्येति ब्रूयात्। सकुल

मितिन कुलं। भगाल्लमिति कपालं। इंद्रधनुर्मणिधनुरिति ब्रूयात्। परस्य गां वत्सं पाययंतीं नाचक्षीत स्वामिने अन्नास्तृते भूमौ सस्यवत्यां वाऽउत्सपर्यंस्तिष्ठन्मूत्रपुरीषे कुर्यात्। स्वयं जीर्णेन काष्ठेन लोष्ठेन न प्रमृजीत गुह्यं विकृतं वासो ना छादयीत। मंजिष्ठादिरक्तं नील्यादिरक्तं वा दृढव्रतो वधत्रः स्यात्सर्वेषामिव मित्र। वधात् पापात् त्रायत इति वधत्रः। इत्यादिव्रतलोपे एकरात्रं तिस्रो रात्रीर्वा व्रतं चरेत्। संवर्त्तः कुर्यान्न गृह्याणि कर्माणि स्वभार्यापोषणं परं। ऋतुकालाभिगामी स्यात्प्राप्नोति परमां गतिम्। शेषान्नस्तु गासित्वं पंचयज्ञाः स्वकर्म च। तुल्यैश्च सह संबंधो गृहस्थ विधीयते॥ गृहस्थस्यापि स्नातकत्वमस्तीति स्नातकस्य गृहस्थ साधारणधर्मकथनमविरुद्धं। बृहस्पतिः॥ सर्व्वं समिधिकैः कुर्यादुपेयादीश्वरं सदा। वैरं निर्हेतुकं वादं न कुर्यात्केन चित्सह। वसिष्ठः। आहारनिर्हारविहारयोगाः सुसंवृता धर्मविदा तु कार्याः। वाग्बुद्धिकार्याणि तपस्तथैव धनायुषी गुप्ततमे तु कार्ये। निर्हारः मूत्रपुरीषोत्सर्गः। विहारः स्त्रीसेवा। योगः समाधिः। वाग्गुप्तिः आलापादिपरिवर्जनेन। बुद्धिगुप्तिः। अशुभसंकल्पादिपरिवर्जनेन। मनुः। भद्रं भद्रमिति ब्रूयात् भद्रमित्येव वा वदेत्। शुष्कवैरं विवादं च न कुर्यात्केन चित्सह। विष्णुपुराणे। विरोधं नोत्तमैर्गच्छेत् नाधमैश्च सदा बुधः। विवाहश्च विवादश्च तुल्यशीलैर्नृपेष्यते। नारदमे

नकलिंमाद्रः शुष्कवैरंच वर्ज्जयेत्। अल्पत्यल्पहानिःसोढव्या-
वैरेणार्थागमं त्यजेत्। जीवेति क्षुवतो ब्रूयाज्जीवेत्युक्तः सहे
तिच। पैठीनसिः। मत्तप्रमत्तोन्मत्तैः सह संभाषणं न कुर्वीत
न परस्त्रियं रहसि संभाषेत। सांख्यायन गृह्ये सूतिकोदक्या
भ्यां न संवदेत। गौतमः। न म्लेच्छाशुच्यधार्मिकैः सह संभा
षेत संभाष्य पुण्यकृतो मनसा ध्यायेत। ब्राह्मणेन सह सं
भाषेत्। यमः। तिथिं पक्षस्य न ब्रूयान्नक्षत्राणि न निर्दि
शेत्। गौतम पुंश्चलि रिवतौ। न परक्षेत्रे चरंतीं गां पा
ययतीं वा अन्यस्मिन्कथयेत्। महाभारते। संपन्नं भो
जने ब्रूयात् पानीये तर्पणं तथा। सुशृतं पायसे ब्रूयान्य
वाग्वां कृशरे तथा। महात्मनां च गुह्यानि न वक्तव्यानि कर्हि
चित्। ओंकारं नामधेयं च ज्येष्ठानां परिवर्ज्जयेत। अधराणां
समानानामुभयेषां न दुष्यति। तथा च नारदः। गुरोर्ज्ये
ष्ठकलत्रस्य भ्रातुर्ज्येष्ठस्य चात्मनः। आयुःकामो न गृह्णी
यान्नामानि कृपणस्य च पैठीनसिः। अग्निं ब्राह्मणा
गावः कांचनं सलिलं स्त्रियः। पृथिवी च षडेतानि यो निंदति
स निंदितः। मार्कंडेयः। वेददेवद्विजातीनां साधुसत्यंत
पस्विनां। गुरोः प्रतिव्रतायाश्च तथा यज्ञतपस्विनां। परिवा
दं न कुर्वीत परिहासेपि पुत्रक। कुर्वतामविनीतानां श्रोतव्यं
न कथंचन। हारीतः। विवादं वर्ज्जयेद्विप्रे सर्वेषां चैव सूत्व
नं। परिभोगं यथोक्तेषु मत्सरं पुत्रशिष्ययोः। तथा। तथा

स्मान्नैवं परिवदेत् वाचं तं वायुमीश्वरं। आदत्ते सुकृतं तेषां ये वै परिवदंतिते। मनुः। ऋत्विक्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः। वृद्धबालातुरैर्वैद्यैर्ज्ञातिसंबंधिबांधवैः। मातापितृभ्यां जामीभिर्भ्रात्रा पुत्रेण भार्यया। दुहित्रा वा स्ववर्गेण विवादं न समाचरेत्। न च वादं वदेत्तुष्टां न हीनां न च कर्कशां ॥ अथानाक्रमणीयानधिष्ठेयाणि ॥ तत्र मनुः। दैवतानां गुरो राज्ञः स्नातकाचार्ययोस्तथा। नाक्रमेत्कामतश्छायां बभ्रुणो दीक्षितस्य च। बभ्रुः कपिलः। यमः। स्वां तु नाक्रामयेच्छायां क्लीबेन पतितेन च। चंडालेन द्विषद्भिश्च नित्यं रोगान्विते न च। याज्ञवल्क्यः। देवर्त्विक्स्नातकाचार्यराजच्छायां परस्त्रियाः। नाक्रामेद्रक्तविण्मूत्रष्ठीवनोद्वर्तनानि च ॥ मनुः। मध्यंदिनेऽर्धरात्रे च श्राद्धं भुक्त्वा च सामिषं। संध्ययोरुभयोश्चैव न सेवेत चतुःपथः। उद्वर्तनमपस्नानं विण्मूत्रे रक्तमेव च। श्लेष्मनिष्ठ्यूतवांतानि नाधितिष्ठेत कामतः। वैरिणं नोपसेवेत सहायं नैव वैरिणः। अधार्मिकं तस्करं च परस्यैव च योषितं। उद्वर्तनं कृतमलापकर्षणं कुंकुमादि। अपस्नानं स्नाने यत्त्यक्तं जलं। निष्ठ्यूतं उद्गीर्णं तांबूलादि। शंखलिखितौ। नोद्धतकुहकैः सहैकत्र तिष्ठेत्। उद्धतः। अविनीतः। कुहकः वशीकरणादिनिष्ठः। विष्णुः। न च चतुष्पथमभितिष्ठेत न रात्रौ वृक्षमूलं शून्यालयं। नद्दरां नवं धनागारं। हारीतः

आवपनापमार्जनापस्नानतुषभस्मास्थिकपालसंचयं
नाधितिष्ठेत्। आवपनं गोरायादिभागं। अपमार्जनमार्ज
नोपयुक्तकुशादि॥ कपालः॥ खर्परः। विष्णुपुराणे।
पूज्यदेवध्वजज्योतिश्छायां नातिक्रमेद्बुधः। देवीपुरा
णे। नचैव गोः प्रसूताया विश्वसेत्स्त्रीजनस्य च। नमुखे
न धमेदग्निं न खङ्गं लंघयेत्तथा। अथानवलोकनीया
नि। तत्र विष्णुः। नोद्यंतमादित्यमीक्षेत नास्तं यंतं नोप
रक्तं नवाससा तिरोहितं। नचादर्शतलमुपगतं। नमध्ये
ह्नि। याज्ञवल्क्यः। नेक्षेतार्कं न नग्नां स्त्रीं न च संसृष्टमैथु
नं। नच मूत्रं पुरीषं वानाशुचीराहुतारकाः। मार्कंडेय
पुराणे। देवतापितृसच्छास्त्रयज्ञसत्यादिनिंदकैः। कृत्वा-
स्य स्पर्शन मालापं शुद्ध्येतार्कावलोकनात्। अवलोक्य तथो
दक्यामंत्यजं पतितं शवं। विधर्मसूतिकाषंढविवस्त्रांत्याव
सायिनः। मृतनिर्यातकांश्चैव परदाररतांस्तथा। एतदेव हि
कर्त्तव्यं प्राज्ञैः शोधनमात्मनः। स्कांदे। कृतघ्नं मानवं दृष्ट्वा
नरकेष्वपि कुत्सितं। शुद्ध्यर्थं देवि द्रष्टव्याः सोमानलदि-
वाकराः। सोमादीनां यथासंभवं विकल्पः। विष्णुः। नक्रु-
द्धस्य गुरोर्मुखं न तैलोदकयोः स्वां छायां मलवत्यादर्शे
न पत्नीं भोजनसमये न स्त्रियं नग्नां न किंचन गृह्यमाणांन
वाल्लांन घर्षं कुंजरं वा विषमस्थो वृषादियुद्धं नोन्मत्तं नम
त्तं। मनुः। नाश्नीयाद्भार्यया सार्द्धं नैनामीक्षेत वाश्नतीं

क्षुवतीं जृंभमाणां च न चासीनां यथासुखं। नाञ्जयंतीं स्व
के नेत्रे न चाभ्यक्तामनावृतां। न पश्येत्प्रसवंतीं च तेजस्का
मो द्विजोत्तमः। अथाकुलकरणानि॥ तत्र यमशाता
तपव्यासाः। देवद्रव्यविनाशेन ब्रह्मस्वहरणेन च। कु
लान्यकुलतां यांति ब्राह्मणातिक्रमेण च। यमः। गो
भिरश्वैश्च यानैश्च कृष्या राजोपसेवया। अयाज्ययाजनेनैव
नास्तिकेन च कर्म्मणा। कुलान्यकुलतां यांति यानि हीन
नि मंत्रतः। मंत्रतस्तु समृद्धानि कुलान्यल्पधनान्यपि॥
कुलसंख्यां च गच्छंति कर्षंति च महद्यशः। अनृतं पारदा
र्यं च तथाभक्ष्यस्य भक्षणं। अगम्यागमनं चैव हिंसा-
स्तेयं तथैव च। अश्रौतकर्माचरणं मैत्रं धर्म्मबहिः कृतं।
एतानि चैव कर्माणि वर्ज्जयेन्मानवः सदा॥ अथ निवा
सः। अत्र बृहस्पतिः। भूरिमाल्यकुशैधान्नशय्यां
बुद्धिजनैगमे। निःकंटके धार्मिके च वसेत्स्थाने निराम-
ये। नैगमो वाणिजिकः। एककूपोदके ग्रामे ब्राह्मणो वृष
लीपतिः। वर्षेण शूद्रो भवति कृत्स्नवर्णसुपाश्रितः। व्या
सः। धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पंचमः। पंच यत्र
न विद्यंते न तत्र दिवसं वसेत्। मार्कंडेयपुराणे। जिता
मित्रो नृपो यत्र बलवान्धर्मतत्परः। तत्र नित्यं वसेत्प्रा-
ज्ञः कुतः कुनृपतौ सुखं। यस्मिन्कृषीवला राष्ट्रे प्राय
शो नातिभोगिनः। यत्रौषधान्यशेषाणि वसेत्तत्र विच

क्षणाः। श्रीयमाणा न राष्ट्रं प्रयच्छेत्पुरुयाचितं। स्वस्थचि
त्तो वसेत्तत्र कृतकृत्य इवात्मवान्। दंडो यत्राविनीतेषु स
त्कारश्च कृतात्मसु। वरं तत्र वसेन्नैव धर्मशीलेषु साधु
षु। देवलः। अरण्यं देवतास्थानं तीर्थान्यायतनानि च।
तस्मात्तेषु वसन् लोकान्यातिनाकं दिवौकसां। अरण्यं नैमि
षादि। तीर्थं गंगादि। आयतनं अविविमुक्तादि। अथ गम
ने वर्ज्यादीनि। तत्र मनुः। नाविनीतैर्व्रजेद्धुर्यैर्न च क्षुद्व्या
धिपीडितैः। न भिन्नशृंगाक्षिखुरैर्न वालधिविरूपितैः।
विनीतैस्तु व्रजेन्नित्यमाशुगैर्लक्षणान्वितैः। वर्णरू
पोपसंपन्नैः प्रतोदेनातुदन्भृशं। नातिसायं नातिमध्यंदि
ने स्थिते। नाज्ञातेन समं गच्छेन्नैको न वृषलैः सह। तथा
गवां च यानं पृष्ठेन सर्वथैव विगर्हितं। विष्णुः। नैकोऽध्वानं
प्रपद्येत नाधार्मिकैः सार्द्धं। विष्णुपुराणे। वर्षातपादि
षु छत्री दंडी रात्र्यटवीषु च। शरीरत्राणकामो वै सोपान
त्कः सदा व्रजेत्। नोर्ध्वं न तिर्यग्दूराद्वा निरीक्षन्पर्यटेद्बुधः। यु
गमात्रं महीपृष्ठं नरो गच्छेद्विलोकयन्। तथा। नदुष्टं यान
मारोहेत्कूलच्छायां न संश्रयेत्। नैकः शून्याटवीं गच्छेन्न तु
शून्यगृहे वसेत्। नासहायो व्रजेद्रात्रौ नोत्पथेन चतुष्पथे
वसिष्ठः। नाग्निब्राह्मणान्तरे व्यपेयात्। नाग्न्योर्न ब्राह्मणयो
र्न गुरुशिष्ययोः। अनुज्ञया वा व्यपेयात्। न बाहुभ्यां नदीं तरेत्
न नावं सांशयिकीमारोहेत्। आपस्तंबः। अग्निमुखमग्नि

माह्निकमारभ्य प्रतिदिनं भूमौ प्रदक्षिणीकृत्याभ्युपेयात्।
ब्रह्मचारिप्रकरणे स्नातकप्रकरणे चये साधारणधर्म्मा अ-
भिहितास्ते ऽनिषिद्धा गृहस्थादीनामपि भवंत्येव। उक्त
वक्ष्यमाणाश्चोपयोगिस्यात्। ब्रह्मचर्यंस्तूर्यरूपं तद्भेद
श्च प्रदर्श्यते। तत्र हारीतः। ब्रह्मचर्यं नाम अप्रार्थनमस्म
रणमसंकल्पनमनभिप्रेक्षणमसंकीर्तनमनभिभाष-
णमनभिगमनमसंदर्शनमसमागमश्चासां। अप्रार्थनं
सा मे भूयादित्याशाविरहः। असंकल्पनं एवं करिष्यामी-
त्यभिध्यानाभावः। अप्रतिप्रेक्षणं अभिमुख्यानवलोकनं।
असंदर्शनं सकलावयवावलोकनाभावः। तच्च ब्रह्मचर्यं च
तुर्विधं भवति। कृत्स्नं रक्तं शुक्लं विमलमिति। तत्र परदारव-
र्ज्जं नित्यं स्वदाराभिगमनं कृत्स्नं। पर्ववर्जनं तदेव रक्तं। ऋ-
तुकालाभिगमनं शुक्लं। ऊर्द्ध्वरेतस्त्वं विमलं। कृत्स्नेन माक्ष
येल्लोकान्मध्यमं रक्तकाज्ज्ञयेत्। शुक्लेन तु जपेत्स्वर्गं वि
मलेन्मोक्षमाप्नुयादिति॥ इह मदनपारिजाते मदनक्षिति
पालदानजलरूढे। स्तवकोयमाद्य आसीदामोदाकृत्स्न
पंडितभ्रमरः ॥१॥ मतिर्येषां शास्त्रे प्रकृतिरमणीया व्यवहृ-
तिः परश्लाघ्यं जगति ऋजवस्ते कतिपये। विरंचितेतेषां
मुकुरतलभूतेस्थितिमिवा। दियं व्यासारण्यप्रवरमुनिशिष्य
स्य भणितिः॥ इति पंडितकह्लारमल्लेत्यादिविरुद
राजीविराजमानस्य श्रीमदनपालस्य निबंधे म-

दन पारिजाताभिधेयं प्रथमस्तबकः ॥ १ ॥

ब्रह्मचारिस्तबकानंतरं क्रमप्राप्तो गृहस्थस्तबकआरभ्यते । तत्रोपयुक्ता सापिंड्यमीमांसा प्रथमं प्रक्रम्यते । तच्च सापिंड्यं केचिदेवं वर्णयन्ति । एकस्यां पिंडदानक्रियायां दातृत्वेन यजमानस्य देवतात्वेन पितृपितामहप्रपितामहानां लेपभाक्त्वेन प्रपितामहस्य पितृपितामहप्रपितामहानां यजमानादिभार्याणां पत्या सह कर्तृत्वेन नैकशरीरारंभकत्वेन च । मातृभार्याणां परस्परमेकशरीरार सहैकशरीरारंभकत्वेन । यजमानप्रभृति पितृपरंपरायां सप्तमपुरुषावधिकसंत मध्ये केषांचित्पिंडदेवतात्वेनोद्दिश्यमानान्वयेन केषांचित्लेपभाक्त्वेनोद्दिश्यमानान्वयेनेति । दात्रादिषु च सापिंड्यविषये मत्स्यपुराणवचनमप्युदाहरंति । लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागिनः । पिंडदः सप्तमस्तेषां सापिंड्यं साप्तपौरुषमिति । अत्र तेन प्रष्टव्याः कल्पनागुरुलघुभावयोः कोवाज्यायानिति । यदि कल्पनागौरवं । ज्यायः तर्हि सपिंडशब्दप्रवृत्तौ पूर्वोक्तनिमित्तान्येव स्युः । अथ कल्पनालाघवं ज्यायः । तत्र वयं ब्रूमः । पिंडो देह समानएक । पिंडो देहो यस्य स सपिंडः तस्य भावः सापिंड्यं । तच्च पुत्रादीनामेकशरीरावयवान्वयेनापत्न्यादीनां मातृभार्यादीनां चैकशरीरारंभकत्वेन एकशरीर

वयवान्वितैः सहैककार्यकर्तृत्वेन च भवति। एवं च शब्दप्रवृत्तौ निमित्तत्रयमेवांगीकृतं स्यात्। अथैवं मन्यसे एकपिंडदानक्रियान्वयित्वमेकपिंडदानक्रियाचयान्वयित्वं चेति निमित्तद्वयमेवेति न कल्पनागौरवमिति। तर्हि अस्मत्पक्षेप्येकमेव निमित्तमिति ततोपि लाघवं न ह्येकशरीरावयवान्वयित्वमेव। अवयवान्वयश्च पित्रादिषु अवयवानां समवायिकारणत्वेन। पत्न्यादिष्वेकशरीरावयवात्मतिसाक्षात्परंपरया वा अधिकरणत्वेनेति निमित्तैक्याल्लाघवं। कल्पनागौरवं च गर्हितमाचार्यैः कल्पनालाघवं यत्र तं पक्षं रोचयामहे। तदेव कतरन्नेति निपुणं संप्रधार्यतामिति। ततश्च निर्मथ्य पंकजादिवद्योगरूढोयं शब्दः। शरीरावयवान्वयश्च श्रुतौ श्रूयते। आत्मा हि जज्ञ आत्मन इति। तथा। प्रजामनु प्रजायस इति। तथा गर्भोपनिषद्यपि एतत्षाट्कौशिकं शरीरं त्रीणि पितृतस्त्रीणि मातृतः अस्थिस्नायुमज्जानः पितृतस्त्वङ्मांसरुधिराणि मातृत इति। आपस्तंबोपि सएवायं विरूढः। प्रत्यक्षेणोपलभ्यत इति। मत्स्यपुराणवचनस्य त्वयमर्थः। लेपभाजस्तुर्याद्याः प्रपितामहपिताचतुर्थस्तदाद्याः प्रतिलोमक्रमेण त्रयो लेपभाजः। पिंडदानं कृतवतः स्वं शाजस्य हस्तलेपं कुशेषु दत्तं भजंत इति। पित्राद्याः पिंडभागिनः पिंडदाने

देवताभूताः। पिंडदःसप्तमस्तेषां। तेषांपिंडदातासप्तमः। सा
पिंड्यंसाप्तपौरुषं। दातान्सप्तपुरुषान्सापिंड्यं व्याप्नोतीत्युक्तं
भवति। ननु सापिंड्ये पूर्वोक्तं लेपभोक्त्रादिकं निमित्तमिति।
तथासति पूर्वोक्तगौरवदोषापत्तेः। अतोस्मदुक्तमेवयुक्तं। अ
थ प्रकृतमनुसरामः। तत्र मनुः। वेदानधीत्य वेदौ वा वेदं वा
पि यथाक्रमं। अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाश्रयेत्। उद्व
हेत द्विजो भार्यां सवर्णां लक्षणान्वितां। कश्यपः। दार
धाना क्रियाः सर्वा ब्राह्मण्यं तु विशेषतः। दारान्सर्वप्रयत्ने
न विशुद्धानुद्वहेत्ततः। विशुद्धान्कुलतो रूपतश्च। याज्ञव
ल्क्यः। अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्। अन
न्यपूर्विकां कांतामसपिंडां यवीयसीं। अरोगिणीं भ्रातृमती
मसमानार्षगोत्रजां। अविस्खलितब्रह्मचर्यो बाह्याभ्यंतर
लक्षणयुक्तां स्त्रियमुद्वहेत्। अनन्यपूर्विकां कांतामसपिं
डां यवीयसीं। अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजां।
अविस्खलितब्रह्मचर्यो बाह्याभ्यंतरलक्षणयुक्तां स्त्रि-
यमुद्वहेत्। बाह्यलक्षणानि। मनुराह। अव्यंगांगीं सौम्य
नाम्नीं हंसवारणगामिनीं। तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत्स्त्रि
यमिति। यान्याभ्यंतराणि संदिग्धानि च तत्ज्ञानोपाय
आश्वलायनोक्तो द्रष्टव्यः। अष्टौ दुर्विज्ञेयानि लक्षणा
नि। अष्टौ पिंडान्कृत्वा ऋतमग्रे प्रथमं यज्ञे ऋते सत्यं प्रति
ष्ठितं। यदियं कुमार्यभिजाता तदियमिह प्रतिपद्यतां यत्स

त्वं तद्दृश्यतामिति पिंडानभिमंत्र्य कुमारीं ब्रूयादेषमेकं गृहाणेति क्षेत्राच्चेदुभयतः सस्यात् गृह्णीयात् अन्नवत्यस्याः प्रजा भविष्यतीति विद्यात् गोष्ठात् पशुमती वेदिपुरीषाद्ब्रह्मवर्चस्विनी अविदासिनो ह्रदात् सर्वसंपन्ना देवनात् कितवी चतुष्पथात् द्विप्रव्राजिनी इरिणात् अधन्या श्मशानात् पतिघ्नीति। अस्यार्थः। ऋतमग्रे इत्यारभ्य यत्सत्यं तद्दृश्यतामित्यंतेन मंत्रेण मृत्पिंडाभिमंत्रणं कुर्यात्। मृदाहरणस्थानमाह क्षेत्राच्चेदिति। पार्श्वद्वयेपि सस्यपरिपूर्णात् क्षेत्राद् आहृता या मृत् तत्कृतं पिंडं यदि गृह्णाति तदा अस्याः प्रजा अन्नवती भविष्यतीति विद्यात्। एवं गोष्ठादित्येवमादि। वेदिपुरीषं वेदिमृत्तिका। देवनं द्यूतस्थानं। द्विप्रव्राजिनी विविधं प्रव्रजनशीला स्वैरिणीति यावत्। इरिणमूषरं। अधन्या धनरहितेत्यर्थः। अनन्यपूर्विकां दानेनोपभोगेन वा पुरुषांतरापरिगृहीतां। असपिंडा समान एकः पिंडः शरीरं यस्याः सा सपिंडा न सपिंडा तां। सपिंडता चैकशरीरावयवान्वयेनेति निरूपितं प्राक्। मनुरपि। असपिंडा च या मातुरसगोत्रा च या पितुः। सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने। अस्यार्थः। या मातुरसपिंडा चकारादसगोत्रा च या च पितुरसगोत्रा चकारादसपिंडा च सा दारकर्मणि मैथुने च प्रशस्ता। प्रशस्ता परिणयनार्हेत्यर्थः। एतदुक्तं भवति। अनुलोमक्रमेण द्विजातीनां सवर्णां पाणिग्रहणमनंतरं क्षत्रजादिकन्यका परिणयो

विहितः। तत्र सवर्णाविवाहो मुख्यः इतरस्त्वनुकल्पः। सदा
रस्य विहितं कर्म द्वयं एकं यज्ञादिकं अपरं निधुवनं। यज्ञादि
के तु सवर्णादारैः सहितस्यैवाधिकारः सवर्णायास्तु वय
सावर्णेन वा ज्येष्ठत्वेन तस्यां सत्यामन्यस्या अनधिकारात्
असत्यां ज्येष्ठायां नित्ययज्ञादिकेष्वेवासवर्णासहितस्य गौ
णाधिकारो न काम्येषु। तथा ज्येष्ठापरित्यागेनान्य
ग्रहणनिषेधाच्च। सुरते तु विवाहितास्वनियमः। एवं स्थिते दा
र कर्मणि मैथुनद्वयत्वात् गोबलीवर्दन्यायेन दारकर्मशब्दे
मैथुनव्यतिरिक्ते यज्ञादौ वर्त्तते। तथा च दारकर्मणि प्रशस्ते
त्युक्ते यज्ञादिकर्मणि सवर्णाया एवाधिकारात् तद्विवाह ए
व असपिंडा च या मातुरित्यादिग्राह्यं स्यात्। नत्वसवर्णावि·
वाहे तन्निवृत्त्यर्थं मैथुनपदग्रहणं। एवं सवर्णापरित्यागेऽ
पि पूर्वोक्तवाक्यमनुषज्यते। यदि मैथुने प्रशस्तेत्युच्येत तदा·
तस्मिन्कर्मणि पूर्वोक्ता ग्राह्या नान्यत्रेति स्यात्। ततश्चाना
श्रमी न तिष्ठेत क्षणमेकमपि द्विजइति कृतसमावर्त्तनस्य
पंचमहायज्ञनित्योपासनादिदारकर्मनिष्पत्त्यर्थं पूर्वोक्त
गुणरहितापि परिणेया स्यात्। तन्मा भूदिति दारकर्मग्र
हणं। ननु च। एकत्वं सागता भर्तुः पिंडे गोत्रे च सूतक इति
मातुर्गोत्रांतराभावादसपिंडाया मातुरित्येतावतैवालं
किमिति चकारान्मातुरसगोत्राग्रहणं कृतं। मनुनाउच्यते।
सत्यमेवं तथापि दत्तपुत्रो यस्य माता भवति। साच पुत्रिका

कृता दत्तपुत्री प्रतिगृहीता द्व्यमेव मम पुत्रस्थानीयेति। तदा तस्य प-
रिणेतुर्दत्तपुत्रीप्रतिगृहीतुः सपिंडा असपिंडा भवतीति तत्परिण-
योमाप्रसांक्षीदिति चकारेण मातृसगोत्रापरिणयेऽप्युच्यते। उ-
क्तं च दत्रिमायां जनकगोत्रादिनिवृत्त्या अन्यगोत्राप्तिर्मनु-
ना। गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः गोत्ररिक्थगतः पिं-
डो व्यपैति ददतः स्वधेति पूर्वं न हि असपिंड्या मातुरिति न वक्त-
व्यं चकारलभ्या सगोत्रा गृह्णतो नैवासपिंडाया अपि प्राप्तत्वात्।
वाढं। सापत्नमातृपितृकुलजा मातृसगोत्रापि भवति मातृसपिं-
डा चेति तत्र विवाहप्राप्तिरिदमुच्यते। मातुरसपिंडेति। तया च
सापत्नमातृसपिंडेष्वपि मातुलादिव्यवहारं दर्शयति। सुमं-
तुः। पितृपत्न्यः सर्वा मातरस्तद्भ्रातरो मातुलास्तद्दुहितरश्च भ-
गिन्यस्तदपत्यानि भागिनेयानि अन्यथा संकरिकाः स्युरिति।
असगोत्रा च या पितुरित्यत्र चकारेण पितुरसपिंडाया ग्रहणं न
कर्त्तव्यं। असगोत्रापदेनैव लभ्यत्वात्। उच्यते। यस्य पिता दत्रि-
मपुत्रस्तस्य दत्रिमस्य यज्जनककुलं तद्वजातां परिणेतुः पितुरस-
पिंडा ग्राह्येति। यद्येवं नाभविष्यत् असगोत्रा च यात्मन इत्येवा-
वक्ष्यत्। तस्मात्तु रसपिंडा असगोत्रा पितुरसपिंडा असगोत्रा
च परिणेयेति सिद्धं। यवीयसीं वयसा प्रमाणेन च। अरोगिणीं
अचिकित्सनीयव्याधिरहितां। भ्रातृमतीं पुत्रिकाकरणशंकानि-
वृत्तये। अत्र मनुः। यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता।
नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशंकयेति। यस्याः पिता पु-

त्रिकाकरणाभिप्रायवान्न वेति न विज्ञायते तां नोपयच्छेदि
त्यर्थः । एवं च यत्र शंका नास्ति तामुपयच्छेदित्यर्थादुक्तं भव-
ति । असमानार्षगोत्रजां । ऋषेरिदमार्षं प्रवर इत्यर्थः । गोत्रं वं
शपरंपराप्रसिद्धं । आर्षं च गोत्रं च आर्षगोत्रे समाने आर्षगोत्रे
यस्य स समानार्षगोत्रः तस्मादुत्पन्ना समानार्षगोत्रजा अनेनैवंविधास्स
मानार्षगोत्रजां । गोत्रं प्रवरश्च पृथक् पृथक् पर्युदासे निमि
त्तं । परिणीय सगोत्रां तु समानप्रवरां तथा । त्यागं कृत्वा द्विज
स्तस्यास्ततश्चान्द्रायणं चरेदिति पार्थक्येन परिगणनात् । त्याग
श्चोपभोगस्यैव न तु तस्याः । समानप्रवरां कन्यामेकगोत्रा-
मथापि वा । विवाहयति यो मूढस्तस्य वक्ष्यामि निष्कृतिं । उ-
त्सृज्य तां ततो भार्यां मातृवत्परिपालयेदिति शातातपस्म
रणात् । आपस्तंबः । समानगोत्रप्रवरां कन्यामूढ्वोपगम्य
च । तस्यामुत्पाद्य चंडालं ब्राह्मण्यादेव हीयत इति । समान
प्रवरस्वरूपं च । बौधायन आह । एक एव ऋषिर्यावत्प्रवरे
ष्वनुवर्त्तते । तावत्समानगोत्रत्वमृते भृग्वंगिरोगणात् ।
समानगोत्रत्वं समानप्रवरत्वमित्यर्थः । भृग्वंगिरोगणेषु
विशेषमाह । संग्रहकारः । पंचानां त्रिषु समान्या विवाह
स्त्रिषु द्वयोः । भृग्वंगिरोगणेष्वेवं शेषेष्वेकोपि वारयेदिति ।
पंचार्षेयाणामृषित्रयानुवृत्तौ न मिथो विवाहः । त्र्यार्षेया
णामृषिद्वयानुवृत्तौ न शेषेष्वेकानुवृत्तावपि न विवाह इ
त्यर्थः । बौधायनोपि । द्व्यार्षेयसन्निपातेऽविवाहस्त्र्या

र्षेयाणां त्र्यार्षेयसंनिपातेऽविवाहः पंचार्षेयाणामिति। संनिपाते साम्य इत्यर्थः। गोत्रभेदेपि प्रवरैक्यमस्ति। तद्यथा। संकृतिपूतिमाषतंडिशंबुशैवगवानां गोत्राणामांगिरसगौरिवीतसांकृत्येति प्रवरैक्यं। तथा। यास्कवाधूलधौनमौकानां गोत्रभेदेपि भार्गववीतहव्यसावेहसेति प्रवरैक्यं। एतेषामिथो विवाहो माभूदित्यसमानार्षग्रहणं। यत्र तु प्रवरविकल्पः। यथा। आंगिरसांबरीषयौवनाश्व मांधात्रंबरीषयौवनाश्वेति। तत्रास्ति प्रवरभेदः। न तु गोत्रभेदः। तन्निरासार्थमसमानगोत्रग्रहणं। एवं प्रवरगोत्रयोः पृथक् पृथक्पर्युदासनिमित्तत्वं विज्ञेयं। एवं मातृत्वात्परंपरया वाऽन्वयवानुवृत्तेर्निर्मर्यादत्वात्सर्वत्र निषेधप्राप्तावविधिमाह। याज्ञवल्क्यः। पंचमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा। मातृतः मातृकुले पंचमादूर्ध्वं पितृतः पितृकुले सप्तमादूर्ध्वं सापिंड्यं निवर्त्तत इत्यर्थः। पित्रादयः षट् सपिंडाः। तस्यैव स्वपुत्रादयश्च षट्। आत्मा च सप्तमः। अर्थान्मूलपुरुषादयमष्टमः। तथा मात्रादयश्चत्वारः। पुत्रादयश्चत्वारः। आत्मा च पंचमः। संतानभेदेपि यतः संतानभेदस्तमादाय गणयेत् यावत्समो भवति। पित्रादिवीजतो नियोगादिना याकुलांतरे जातास्तत्रापि ऊर्ध्वं सप्तमाज्जातायां विवाहः पितृबंधुषु। मातृबंधुभ्यः पंचमात्। आह वशिष्ठः। असमानार्षेयामस्पृष्टमैथुनामवरवयसं सदृशीं भार्यां विंदेत पंचमीं मातृबंधुभ्यः सप्तमीं

पितृभ्य इति बंधुशब्दोपादानादयमर्थो गम्यते। अन्यथा कुलादित्येव ब्रूयात्। यच्च वसिष्ठेनोक्तं। पंचमीं चैव मातृतः पितृतस्तथेति। तत्सवर्णासपत्नमातामहकुलविषयं। ब्राह्मणादीनां क्षत्रियादिदारसमुत्पन्नपितृकुलविषयं च। एकत्रावयवानुवृत्तेरभावादन्यत्र सावर्ण्याभावाच्च। यत्तु पैठीनसिराह। पंचमात्मातृतः सप्त पितृतः त्रीनतीत्य मातृतः पंचातीत्य वा पितृत इति। अत्र त्रीनतीत्येत्यादिकस्यायं विषयः। यस्य माता दत्तपुत्री तां यः प्रतिगृहीता पुत्रत्वेन स्वीकरोति तत्कुलं यस्य दत्तपुत्रः पिता तस्य दात्रिमस्य जनककुलं च। एकत्रावयवानुवृत्तेरभावादन्यत्र गोत्रानुवृत्तेरभावाच्च। यत्तु शंखवचनं। यद्येकजाता बहवः पृथक्क्षेत्राः पृथक्जनाः। एकपिंडाः पृथक्शौचाः पिंडस्त्वावर्तते त्रिष्विति। अस्यार्थः। एकस्माद्ब्राह्मणादेर्जाताः पृथक्क्षेत्राः। भिन्नमातृजन्याः। पृथग्जनाः। भिन्नजातीयाः। ते एकपिंडाः सपिंडाः पृथक्शौचाः पिंडस्त्रिष्वावर्तते त्रिषु पुरुषमेव सापिंड्यमिति। एतद्भिन्नजातीयसापत्नमातृकुलविषयं। तत्राप्युत्कृष्टजातीयानामुत्तमजातीयविवाहप्राप्तिरेव नास्ति। अनुलोमतः प्राप्तिरस्ति तत्र त्रिषु पुरुषमेव सापिंड्यं युक्तं। उत्कृष्टजातीयावयवसंयोगेनेतरजातीयावयवपरिणामात्। एवं पूर्वोक्तगुणविशिष्टां परिणयेत्युक्तं। तत्र येषु विधिनिषेधेषु दृष्टं गुणदोषौ न स्तः। केवलशास्त्रैकसमधिगम्यौ तौ

यथा ऽसपिंडा च या मातुरित्यत्र शास्त्रसमभिगम्यो गुणस्त
दतिक्रमे च दोषोऽपि। अत्रातिक्रान्तशास्त्रस्य भार्यैव न सा भवति
भार्याशब्दस्याहवनीयादिवत्संस्कारशब्दत्वात्। प्रायश्चि-
त्तीयते च। तथा पुत्रिकायाश्च न परिपूर्णं भार्यात्वं प्रदानाभा
वात्। तथा गोत्रमपि न निवर्त्तते। एवमासुरादिविवाहेष्व
पि गोत्रानिवृत्तिः। अभ्रातेव पुंस एति प्रतीचीति मंत्रलिंगाच्च
न परिपूर्णं पुत्रिकाया भार्यात्वं। व्याख्यानं च निरुक्तकृता। अ-
भ्रातृकेव पुंसः पितॄनेत्यभिमुखी संतानकर्मणे पिंडदानाय
चेति। वसिष्ठः। अभ्रातृका पुंसः पितॄनत्येति प्रतीचीनं गच्छ
ति। पुत्रत्वमिति। यत्र पुनर्दृष्टगुणदोषदर्शनेन विधिनिषेधा
भिधानं यथा हीनक्रियामित्यादिना न तदतिक्रमे भार्यात्वा
भावः किंतु नियमातिक्रमात्प्रायश्चित्तमात्रं भवति। तथा प्र
सिद्धश्रोत्रियकुलजा परिणेया। तथा च याज्ञवल्क्यः।
दशपुरुषविख्याताच्छ्रोत्रियाणां महाकुलादिति। मातृ
तः पंच पितृतश्चेत्पंक्ति दश। एवं सर्वत्राशावपवादमाह स एव
स्फीतादपि न संचारिरोगदोषसमन्वितात्। संचारिणो रो-
गाः कुष्ठापस्मारादयः। मातृसापिंड्याभावेऽपि मातृसगो-
त्राया अपि पाक्षिको निषेधो व्यासेन दर्शितः। सगोत्रां तु एके
केनेच्छत्युद्वाहकर्मणि। एके नेच्छतीत्यनेन पक्षे विवाहप्रा-
प्तिर्दर्शिता। अमुमेवार्थं हेतुपूर्वकमुत्तरार्द्धेन स एवाह। जन्म
नाम्नोरविज्ञानादुद्वहेदविशंकितः। अत्र देशाचारा व्यव-

स्याद्विज्ञेया॥ अथ वरलक्षणानि॥ तत्र याज्ञवल्क्यः।
एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः। यत्नात्परीक्षितः पुं
स्त्वे युवा धीमान् जनप्रियः। एतैः कन्यागुणैः। अनन्यपूर्विक
त्वयवीयस्त्वभ्रातृमत्त्वव्यतिरिक्तैर्युक्तः। सवर्णः उत्कृष्टवर्णो
वा न हीनवर्णः। श्रोत्रियः श्रुताध्ययनसंपन्नः। कात्याय
नः। उन्मत्तः पतितः कुष्ठी षंडश्चैव सगोत्रजः। चक्षुःश्रो
त्रविहीनश्च तथापस्मारदूषितः। वरदोषाः स्मृता ह्येते
कन्यादोषाः प्रकीर्तिताः। नारदः। परीक्ष्य पुरुषं पुंस्त्वे
निजैरेवांगलक्षणैः। पुमांश्चेदविकल्पेन स कन्यां लब्धु
मर्हति। सुबद्धजत्रुजान्वस्थि सुबद्धांसशिरोधरः। यस्याप्सु
प्लवते रेतो ह्रादि मूत्रं च फेनिलं॥ पुमान्स्याल्लक्षणैरेतैर्वि
परीतस्तु षंडकः। अपत्यार्थं स्त्रियः सृष्टाः स्त्री क्षेत्रं बी
जिनो नरः। क्षेत्रं बीजवते देयं नाबीजे क्षेत्रमर्हति। अथ
दारानुकल्पः। तत्र मनुः। सवर्णाग्रे द्विजातीनां प्रश
स्ता दारकर्मणि। कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशो
ऽवराः। अवरा जघन्याः। शूद्रैव भार्या शूद्रस्य सा च स्वा च वि
शः स्मृते। ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः। अत्र
शूद्राविषये पक्षांतराणि स एवाह। शूद्रावेदी पतत्यत्रेरुत
थ्यतनयस्य च। शौनकस्य सुतोत्पत्त्या तदपत्यतया भृगोः।
शूद्राप्रावोढा पततीति अत्रेरुतथ्यतनयस्य गौतमस्य च
मते। अत एतयोर्मते शूद्राविवाह एव नास्ति। शौनकमते

तु शूद्राविवाहात्पातित्यं किं तु तत्र सुतोत्पत्त्या । अतः शूद्रा
सूतुकालेन गच्छेदिति तन्मतं । एवं चऋतुकालगमनप्रा
पकारि अगमने दोषप्रापकारि च । वचनान्येतद्व्यतिरि
क्तविषयाणि । भृगुमते तु न तत्र सुतोत्पत्तिरपि पातित्यहे
तुः । अपि तु ब्राह्मण्यादि भार्यासु पुत्ररहितस्य केवल
शूद्रापत्यत्वं पातित्यहेतुः । ततश्च ब्राह्मण्यादिष्वप्रसूता
सु शूद्रां मृतौ नोपगच्छेत् । तदपत्यतयेति । तान्येव शूद्राया
मुत्पन्नान्येवापत्यानि यस्य स तदपत्यः तस्य भावस्तदप-
त्यता । एष एवार्थो वचनान्तरे स्पष्टीकृतः । शिल्पेन व्यवहा
रेण शूद्रापत्यैः केवलैरिति । अत्र वाक्यशेषः । कुलान्यकु
लतां यान्तीति । यच्च मनुनैवोक्तं । न ब्राह्मणक्षत्रिययोराप
द्यपि च तिष्ठतोः । कस्मिंश्चिदपि वृत्तान्ते शूद्रा भार्योपदिश्य
त इति तत्प्रथमत एव शूद्रापरिणयनविषयं आपद्यपि हि
तिष्ठतोः सवर्णामलभमानयोरित्यर्थः । एतच्च वैश्यस्यापि
नियतं । यतः स एवाह । हीनजातिं स्त्रियं मोहादुद्वहन्तो द्वि
जातयः । कुलान्येव नयन्त्याशु ससन्तानानि शूद्रतामिति ।
हीनजातिं शूद्रं । सवर्णालाभे तु क्षत्रियादिविवाहमाह ।
पैठीनसिः । अभावे कन्यायाः स्नातकव्रतं चरेत् । अपि वा
क्षत्रियायां तु पुत्रानुत्पादयीत वैश्यायां वा शूद्रायां वेत्यन्य
इति । सर्वात्मना शूद्रापरिणयनिषेधमाह । याज्ञवल्क्यः
यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः । न तन्मम मतं

यस्मात्तत्रात्मा जायते स्वयं। एषु पक्षेषु यच्छाखीयस्तत्री
यः पक्षस्तच्छाखीयस्यापि स एव पक्ष इत्येवं व्यव
स्थितो विकल्पः॥ अथ दातृनिरूपणं॥ तत्र याज्ञव
ल्क्यः॥ पिता पितामहो भ्राता सकुल्यो जननी तथा। क
न्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः। सकुल्यो दायादः
दायादेष्वपि सन्निहित एवाधिकारी। प्रकृतिस्थः पातित्यो
न्मादादिदोषरहितः। अप्रकृतिस्थेन पित्रादिना कृतमप्य
कृतमेव। यदाह नारदः। स्वतंत्रोपि हि यत्कार्यं कुर्याद् प्र-
कृतिं गतः। तदप्यकृतमेव स्यादस्वातंत्र्यस्य हेतुतः। पितृ
त्वादिना स्वतंत्रोपि सन्नप्रकृतिस्थत्वेन हेतुना यदा परतं
त्रो भवति तदा तत्कृतं वाग्दानादिकं कार्यमकृतमेव वेदित
व्यं। यदि तस्मिन्नपतनीयदोषा अचिकित्स्यरोगा वा भ-
वेयुः। अभावे तु तथैवोपरितनं कर्म प्रकृतिस्थो निर्वहेत्।
दृष्टादृष्टदोषाभावात्। यद्यप्रकृतिस्थदत्ताया विवाहसंस्का
रेण निर्व्यूढस्तदा प्राधानकर्मणो निष्पन्नत्वेनाधिकारिणा
न्तरेवैकल्पात्तत्रापि न वो सत्मना प्रत्यावर्त्तनीया कन्या।
एवं तर्ह्यनधिकारिणा कृतमकृतमेवेत्येतद्विरुध्येतेति
चेत्। सत्यं तद्विरोधपरिहाराय परिवेत्तृविवाहवत्तां प्र
त्यारुह्यममाह। पिता दद्यात्स्वयं कन्यां भ्राता वानुमते
पितुः। मातामहो मातुलश्च सकुल्या बांधवास्तथा। मा
तात्वभावे सर्वेषां प्रकृतौ यदि वर्त्तते। तस्यामप्रकृतिस्था

यां दद्युः कन्यां स्वजातय इति। स्वकुल्याः पितृपक्षीयाः। बां-
धवा मातृपक्षीयाः। स्वजातयो ब्राह्मणादयः। यस्य व-
र्णस्य या कन्या तज्जातीया अधिकारिण इत्यर्थः। अस्मिं-
श्च वचने भ्रात्रनंतरं मातामहमातुलयोः क्रमेणाधि-
कारं प्रतिपाद्य तदनंतरं पितृबंधूनामधिकारः प्रदर्शितः
अयं च क्रम औरसकन्यकाविषये पुत्रिकादिविषये वेदि-
तव्यः। पुत्रिकाप्यौरससमैव। औरसो धर्म्मपत्नीजस्त-
त्समः पुत्रिकासुतः इति याज्ञवल्क्यस्मरणात्। क्षेत्र-
जायां तु क्रमांतरमाह। कात्यायनः। स्वयमेवौरसीं द-
द्यात्पित्रभावे स्वबांधवाः। मातामहस्ततोऽन्यां हि माता
वा धर्म्मजां सुतां। अस्यार्थः। औरसीं पिता स्वयमेव दद्या-
त्। पित्रभावे स्वबांधवाः। पितृबांधवा दद्युः। ततोऽन्यामौ-
रसीं व्यतिरिक्तां धर्मजां नियोगेन जातां क्षेत्रजां तु पित्रभा-
वे मातामहो दद्यात्। मातामहग्रहणं मातुलस्याप्युप-
लक्षणं। अत स्तदभावे मातुलस्तदभावे मातेति क्रमः
युक्तं चैतत्। क्षेत्रजायां मातामहावयवप्राधान्यात्। ए-
वं च मातामहादीनामौरसीपुत्रीदाने पितृबंधुषु विद्य-
माना तु समये दद्यादौरसीमपि कन्यकां। पौगंडो
व्यवहाराद्यसमर्थः। समये रजोदर्शनोचितसमयात्पू-
र्वकाले। पूर्वोक्तसकलाधिकार्यभावे। मनुः। यदा तु नै-
व कश्चित्स्यात्कन्या राजानमाव्रजेत्। अनुज्ञया तस्य

वरं सवर्णं वरयेत्स्वयं । वरयेदित्यनुवृत्तौ नारदः । स
वर्णमनुरूपं च कुलरूपवयःश्रुतैः । सह धर्मं चरेत्तेन
पुत्रांश्चोत्पादयेत्ततः । पित्रादिषु सत्स्वपि कालविशेषे वि
धत एव स्वयंवरः । यदाह बौधायनः । त्रीणि वर्षाण्यृतु
मतीं कांक्षेत पितृशासनं । ततश्चतुर्थे वर्षे तु विन्देत सदृ
शं पतिं । अविद्यमाने सदृशे गुणहीनमपि श्रयेत् । यत्तु
विष्णुनोक्तं । ऋतुत्रयमुपास्यैव कन्या कुर्यात्स्वयंवरमि
ति । तद्गुणवद्वरलाभे वेदितव्यं । अत्र विशेषांतरमाह
मनुः । अलंकारं नाददीत पितृदत्तं स्वयंवरा । मातृदत्तं
स्तेयं स्याद्यदि तं हरेत् । वरं प्रत्यपि स एवाह । पित्रे न दद्या
च्छुल्कं तु कन्यामृतुमतीं हरन् । स हि स्वाम्यादतिक्रमेत
ऋतूनां प्रतिरोधनात् । यमः । कन्या द्वादशवर्षाणि या
प्रदत्ता वसेद्गृहे । भ्रूणहत्या पितुस्तस्याः सा कन्या वरये
त्स्वयं । एवं चोपगतां पत्नीं नावमन्येत्कदाचन । ननु
तां वंधकीं विद्यान्मनुः स्वायंभुवो ब्रवीत् । एवं विधायां वं
धकीत्वाभावो देशकालादिप्रतिबंधाभावे सति । अन्य
था कालातिक्रमे दोषश्रवणात् । तथा च बौधायनः
दद्याद्गुणवते कन्यां नग्निकां धर्मचारिणीं । अपि वा गु
णहीनाय नोपरुंध्याद्रजस्वलां । कुलीनाय गुणहीनाय
रूपादिगुणरहिताय । नग्निका च दर्शिपुराणे ॥ याव-
न्नलज्जयांगानि कन्या पुरुषसंनिधौ । योन्यादीन्यवगू

हेत तावद्भवति मग्निकेति।। अमरसिंहस्त्वन्यथाप्राह।
नाग्निका। नागतार्त्तवेति। अत्रिकश्यपौ। पितुर्गेहेतु
या कन्या रजः पश्येदसंस्कृता। भ्रूणहत्या पितुस्तस्याः
सा कन्या वृषली स्मृता। यस्तु तां वरयेत्कन्यां ब्राह्मणोऽज्ञा
न दुर्बलः। अश्राद्धेयमपांक्तेयं तं विद्याद्वृषलीपतिं। संव-
र्त्तः। रोमकाले तु संप्राप्ते सोमो भुंजीत कन्यकां। रजःका
ले तु गंधर्वो वह्निस्तु कुचदर्शने। तस्मात्तामुद्वहेत्कन्यां
यावर्त्तुमती भवेत्। विवाहस्त्वष्टवर्षायाः कन्यायाः शस्य
ते बुधैः। कश्यपः। अष्टवर्षा भवेद्गौरी नववर्षा तु रोहि-
णी। दशवर्षा भवेत्कन्या अत ऊर्द्ध्वं रजस्वला। एवं कन्या
दाने अधिकारिणो निरूपिताः। सांप्रतं दत्ताया अपि कन्या
याः क्वचित्प्रत्याहरणं निरूप्यते। तत्र याज्ञवल्क्यः।
दत्तामपि हरेत्पूर्वात् श्रेयांश्चेद्वर आव्रजेत्। दत्तामपि हरे
द्धरिपूर्वस्य पातकादिदोषदुष्टत्वमितरस्य गुणयुक्तत्वं
च स्यात्। तच्च सप्तमपदात्प्राक्द्रष्टव्यं। यथाह नारदः
स्त्रीपुंसयोस्तु संभोगाद्वरणं प्राग्विधीयते। वरणाद्ग्रहणं
पाणेः संबंधोयं त्रिलक्षणः। तयोरनियतं प्रोक्तं वरणं
दोषदर्शनात्। पाणिग्रहणिका मंत्रा नियतं दारलक्षणं
तेषां निष्ठा च विज्ञेया विद्वद्भिः सप्तमे पदे इति। अस्यार्थः।
स्त्रीपुंसयोः संभोगात्प्राग्वरणं भवति। वरणात्पाणि
ग्रहणं। एवं संबंधस्त्रिलक्षणः। वरणं पाणिग्रहणामु

पभोगश्चेति त्रिविधः। गांधर्वादिषु नायं क्रमः। तयोः क-
न्यावरयोः रनियतमनियमः। दत्तोपि न परिणीयते। वाग्-
दत्तापि न दीयत इत्येवंरूपः। तत्र हेतुः वरणाद्दोषदर्श-
नादिति। वरणादूर्ध्वं कन्यावरयोरन्योन्यं दोषदर्शनात्।
अनेन च विवाहादूर्ध्वं नानियम इत्युक्तं भवति। तत्र नियमे
हेतुमाह पाणिग्रहणिका मंत्रा इति। तैर्मंत्रैरुत्पादितसं-
स्कारयोर्न परित्याग इत्यर्थः। पाणिग्रहणमंत्रोत्पाद्यसं-
स्कारावधि माहुस्तेषामिति। केचनास्मिन्वचने पाठांतरं व्या-
ख्यांतरं च कुर्वते। तद्यथा। वरणग्रहणं पाणेः ससंस्का-
रोग्निलक्षणः। तयोरनियतं प्रोक्तं वरणं दोषदर्शनात्।
पाणिग्रहणं यज्ञोग्निलक्षणः संस्कारः अग्निविहितो
होमादिनिष्पाद्यः संस्कारः। तयोर्वरणपाणिग्रहणयो-
र्मध्ये वरणमेव दोषदर्शनादनियतं न पाणिग्रहणं तस्मा-
दर्वाक् पतित्वानुत्पत्तेरिति यमोपि पाणिग्रहणसंस्कारात्प-
तित्वं सप्तमे पदे। एवं च सप्तमपदादर्वाक् परिणेतृमरणेपि
न विधवात्वमिति गम्यते। उक्तं च वसिष्ठेन अद्भिर्वाचा च दत्ता-
यां म्रियेतादौ वरो यदि। न च मंत्रोपनीता स्यात्कुमारी पितुरे-
व सा। सा पितुरेव न प्रतिग्रहीतुरित्यर्थः। सा च तद्देवराय प्रदेया
तदभावे तज्ज्ञातये तदभावे त्वन्यस्मै। इदमपि लोकविद्विष्टत्वाद्दे-
शाचारानुसारेण भवति। बलादपहृतायां तु विशेषमाहतुर्व-
सिष्ठयमौ। बलाच्चापहृता कन्या मंत्रैर्यदि न संस्कृता। अन्यस्मै

विधिवद्देया यथा कन्या तथैव सा। बहुभ्यो वाग्दाने का-
त्यायनोक्तो विशेषो द्रष्टव्यः। अनेकेभ्यो हि दत्तायामनूढा-
यां तु यत्र वै वरागमश्च सर्वेषां लभेतादिवरस्तु तां। सर्वेषां
वराणामागमे सतीत्यर्थः। च पूर्ववरो यदि दोषरहितो गु-
णवांश्च भवति। अन्यथा चेत्त्वा वरयित्वा देशांतरगमने ना-
रदः। प्रतिगृह्य च यः कन्यां वरो देशांतरं व्रजेत्। त्रीनृतू-
न्समतिक्रम्य सा चान्यं वरयेद्वरं। प्रतिगृह्य वरयित्वेत्यर्थः
प्रदाय शुल्कं गच्छेद्यः कन्यायाः स्त्रीधनं तथा। धार्या सा
वर्षमेकं तु देयान्यस्मै विधानतः। अत्र विशेषमाह। म-
नुः। कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कदः। देव-
राय प्रदातव्या यदि कन्यानुमन्यते। कुलादिरहितेभ्यो-
पि कन्या प्रत्याहरणीयेत्याह वशिष्ठः। कुलशीलवि-
हीनस्य षंडादिपतितस्य च। अपस्मारिविधर्मस्य रोगि-
णां वेषधारिणां। दत्तामपि हरेत्कन्यां सगोत्रोढां तथै-
व च। अत्र पुनः विवाहाविवाहादिविशेषस्तु पूर्वमेव-
निरूपितः। अदुष्टकन्यापरित्यागे विशेषमाह। नारदः।
प्रतिगृह्य तु यः कन्यामदुष्टामुत्सृजेद्वरः। विनेयः। सोऽपि
दंडेन कन्यां तामेव चोद्वहेत्। कात्यायनः। वरदोषम-
नाख्याय यः परिगृह्णाति यो नरः। याचनं च प्रकुर्वीत तद्द-
त्तानानुयातु सः। कन्यादोषेप्येवमेव दातारं दंडो वरस्त-
था। नारदः। नादुष्टां दूषयेत्कन्यां नादुष्टं दूषयेद्वरं।

दोषे सति न दोषः स्यादन्योन्यं त्यजतोस्तयोः। मनुः
विधिवत्प्रतिगृह्यापि त्यजेत्कन्यां विगर्हितां। व्याधितां
विप्रदुष्टां वा छद्मना चोपपादितां। विप्रदुष्टां। अन्यग
तभावां। छद्मना। अन्यकन्योपदर्शनेन। एवमुक्तल
क्षणाय चरणायोक्तलक्षणा कन्या देयाधिकारिणा तु-
क्तो विवाहः संप्रपंचः। सोपि ज्येष्ठानुक्रमेणेति शास्त्र
नियमः। तत्र क्वचिदपवादमाह। मनुः। षंडांधवधिरा
दीनो विवाहोस्ति यथोचितं। विवाहासंभवे तेषां क-
निष्ठो विवहेत्तदा। पितृव्यपुत्रे सापत्ने परदारसुतादि-
षु। विवाहाधानयज्ञादौ परिवेदो न दूषणं। शातात
पोपि। नाग्नयः परिविंलिन वादानं तपांसि च। न च श्रा
द्धं कनिष्ठस्य या च कन्या विरूपिका। अन्योपि विशेष
आवसथ्याधानप्रकरणे वक्ष्यते॥ अथ विवाहभे
दाः॥ तत्र मनुः। यो यस्य धर्म्यो वर्णस्य गुणदोषौ तु
यस्य यौ। तद्वः सर्वं प्रवक्ष्यामि प्रसवे च गुणागुणान्।
ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः। गांध
र्वो राक्षसश्चैव पैशाचश्चाष्टमो धनः। ब्राह्मविवाह
लक्षणं तत्तं तति फलं चाह॥ याज्ञवल्क्यः॥
ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृता। त-
ज्जः पुनात्युभयतः पुरुषानेकविंशतिं। उभयतः
पित्रादीन्दश पुत्रादीन्दश आत्मानं चैकविंशतिकमित्येक

विंशतिं पुनाति। यद्वा उभयतः मातृतो दश पितृतो द-
श आत्मा चेत्येकविंशतिं। तथा। यज्ञस्थ ऋत्विजे दैवस्त-
दायार्षस्तु गोद्वयं। यज्ञे पारब्धे कन्यामलंकृत्य यत्र र्त्विजे दी-
यते स दैवः। वराद्गोमिथुनं वृषभं गांच गृहीत्वा यथाशा-
स्त्रमलंकृता यत्र तस्मै दीयते स आर्षः। गोद्वयग्रहणं प्रदर्श-
नार्थं। यत आह मनुः। एकं गोमिथुनं द्वेवा वरादादाय
धर्म्मत इति। एतद्गोमिथुनं पित्रादिश्चेद्गृह्णाति तदा विक्रय
एव। तथाच मनुः। आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव
तत्। अल्पोपि वा महान्वापि विक्रयस्तावदेव स इति। क-
न्यार्थं यदि गृह्णाति तदा न दोष इत्याह स एव। यासां माद-
दते शुल्कं ज्ञातयो न विक्रयः। अर्हणं तत्कुमारीणामानृ-
शंस्यं हि केवलं। यच्छुल्कं कन्यार्थं तत्कुमारीणामर्हणं
पूजनं। आनृशंस्यमयाविष्टं तच्छुल्कं कन्यायै दद्यादित्य-
र्थः। दैवार्षयोः फलमाह। याज्ञवल्क्यः। चतुर्दश प्र-
थमजः पुनात्युत्तरजश्च षट्। प्रथमजो दैव विवाहजः
उत्तरज आर्षविवाहजः सप्त सप्त पूर्वान् सप्तावरान् इति चतु-
र्दश त्रीन् पूर्वान् त्रीन वरानिति षट् पुनाति उभयत्र स्वस्य म-
ध्यस्थितत्वात् स्वपवित्रता। इत्युक्त्वा वरतो धर्म्मं सह यादी-
यते र्थिने। स कायः पावयेत्तज्जः षट् षट् वंश्यान् सहात्मना
सह धर्मं चरतामिति परिभाषणापूर्वकमलंकृता कन्या
यत्र दीयते स कायः प्राजापत्यः। तस्यां जातः षट् पूर्वान्ष-

ड्वरान् आत्मानं चेति त्रयोदश पावयेत्। अर्थवान्योर्थः।
आत्मना सह षट्पूर्वान् आत्मना सह षड्वरानिति एका
दश पावयेत्। तथा। आसुरो द्रविणादानाद्गांधर्वः समया-
न्मिथः। राक्षसो युद्धहरणात्पैशाचः कन्यकाछलात्। आ
त्मार्थं द्रविणादानाय यत्कन्यार्पणं स आसुरः॥ अस्य मा
नुष्य इत्यपि संज्ञा। तथा च हारीतः। शौल्के न मानुष इति
कन्यावरयोरन्योन्यानुरागेण यः समयः त्वं मे भार्या त्वं
मे पतिरिति स गांधर्वः। समयपूर्वकमुपभोगेपि गांधर्व-
एव। युद्धहरणाद्राक्षसः। क्षात्र इत्यप्यभिधीयते। य-
थाह हारीतः। अलंकृतामभिजयन् क्षात्र इति। कन्य
काछलात्। छलनं छलः कपटेन स्वापाद्यवस्थासु कन्य
काछलाहरणं पैशाचो विवाहः। कन्यकां छलादित्य
पि पाठः। न चासुरादिविवाहेषु सप्तपदाभिक्रमणाभाव
त्पतित्वभार्यात्वयोरनुत्पत्तिरित्याशंकनीयं। तत्रापि
स्वीकारानंतरमेव संस्कारविधानात्। तथा च देवलः।
गांधर्वादिविवाहेषु पुनर्वैवाहिको विधिः। कर्त्तव्यश्च त्रि
भिर्वर्णैः समयेनाग्निसाक्षिकः॥ गृह्यपरिशिष्टेपि। गांध-
र्वासुरपैशाचा विवाहा राक्षसश्च यः। पूर्वं परिणयस्तेषां
ततो होमो विधीयते। परिणयः स्वीकारादिः। एवं स्थिते
वर्णव्यवस्थया विवाहनियममाह। मनुः। षडानुपूर्व्व्या
त् विप्रस्य क्षत्रस्य चतुरो वरान्। विट्शूद्रयोस्तु तानेव वि-

शूद्रयोर्न राक्षसान्। अस्यार्थः। ब्राह्मादीन् षडानुपूर्व्या
क्रमेण ब्राह्मणस्य धर्म्मान् धर्म्मादनपेतान् विद्यात्
च षट् ब्राह्मो दैव आर्षः प्राजापत्य आसुरो गांधर्वश्चेति।
यत्तु कश्यपेनोक्तं। क्रीता द्रव्येण या नारी न सा पत्नीवि-
धीयते। न सा दैवे न सा पित्र्ये दासीं तां कश्यपो ब्रवीदि-
ति। तद्द्रव्यमात्रप्रशस्तविवाहसंभवे सति द्रष्टव्यं। क्ष-
त्रस्य अवरान् पश्चादुक्तान् आसुरगांधर्वराक्षसपैशा-
न धर्म्यान्विजानीयात्। विट्शूद्रयोस्त्वराक्षसान्। राक्षस-
वर्जितां स्तानेवासुरादिपैशाचांतान् धर्म्यान्विद्यात्।
केचन्नैवं व्याचक्षते। षट् ब्राह्मादिगांधर्वांतान्विप्रस्या
क्षत्रस्य प्राजापत्यादिराक्षसांतान् चतुरः। विट्शूद्रयो-
स्तु अराक्षसान्प्राजापत्यादीन् तानेव धर्म्यान्विद्यात्।
पैशाचपरित्यागे च हेतुमप्युपदिशंति। हेतुश्च नार-
दमनुवचनेन चत्वारो ब्राह्मणस्याद्याः शस्ता गांध-
र्वराक्षसौ। राज्ञस्तथासुरो वैश्ये शूद्रे चांत्यस्तु गर्हितः।
स पापिष्ठो विवाहानां पैशाचः कथितोष्टम इति। एषा-
मपि मध्ये प्रशस्तानाह। मनुः। चतुरो ब्राह्मणस्या-
द्यान् प्रशस्तान्कवयो विदुः। राक्षसं क्षत्रियस्यैकमासु-
रं वैश्यशूद्रयोः। अयमर्थः। ब्राह्मो दैव आर्षः प्राजाप-
त्यश्चेति चतुरो ब्राह्मणस्य प्रशस्तानाहुः। क्षत्रियस्यैकं
राक्षसमेव प्रशस्तं। वैश्यशूद्रयोरासुरमेव। ब्राह्मण

स्य ब्रह्मादि प्राजापत्यांतो मुख्यः कल्पः राक्षसोनु-
कल्पः । अनंतर क्षत्र धर्म्मत्वात् । क्षत्रस्य राक्षसो
मुख्यः । क्षत्रस्य चतुरो वरानित्यत्र येषां मतेऽआ
सुरगांधर्वराक्षसपैशाचा इति चत्वारः । तन्मतेऽआ
सुरगांधर्वपैशाचा अनुकल्पः । यन्मते तु प्राजाप-
त्यादयश्चत्वारः प्राजापत्यासुरगांधर्वराक्षसा इ-
ति तन्मते तु प्राजापत्यादयः अनुकल्पाः । तथा वै-
श्य शूद्रयोरासुरो मुख्य कल्पः । गांधर्वपैशाचावनु-
कल्पौ । प्राजापत्यगांधर्वौ वा । एवं स्थिते ब्राह्मण
स्यापत्कल्प माह मनुः । पंचानां तु त्रयो धर्म्या द्वाव
धर्म्यौ स्मृताविह । पैशाचश्चासुरश्चैव न कर्त्तव्यौ
कदाचन । पंचानां प्राजापत्यासुरगांधर्वराक्षसपै
शाचानां मध्ये त्रयः प्राजापत्य गांधर्व राक्षसा ध-
र्म्या द्वावधर्म्यौ । तावेव दर्शयति । पैशाचश्चासुर
श्चेति मुख्य कल्पमध्य परिगणितस्यापि प्राजा
पत्यस्यापत्कल्पमध्यमपरिगणनमार्षापेक्षया
प्राजापत्यस्यापकृष्टत्वद्योतनार्थं । पुनात्युत्तरज
श्च षडित्यार्षविवाहजापेक्षया सकायः पावयेत्त-
ज्जः षट्षट्वंश्यान् सहात्मनेति प्राजापत्यविवाह-
जस्याधिक्य श्रवणात् प्राजापत्यस्याधिक्यं द्योत्य-
ते तन्माभूदिति । क्षत्रियस्यापत्कल्पमाह मनुः

पृथक् पृथक् वा मिश्रौ वा विवाहौ पूर्वचोदितौ । गांधर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ । पृथक् पृथक् मुख्यो नुकल्पश्चेति व्यवस्थितविकल्पत्वेनोभिहितः । तत्र पूर्वोक्तौ विवाहौ यदि मिश्रौ भवतः स मिश्रो विवाह उच्यते मिश्रविवाहमेवोदाहृत्य दर्शयति । गांधर्वो राक्षस इति । यथा प्रथमं गांधर्वेण परिगृह्यत द्बंधुषु विरुद्धेषु युद्धेन हरणं । एतच्च प्रदर्शनार्थं । अतः अनेनैव न्यायेन वर्णान्तराणामप्यूहनीयं । वैश्यशूद्रयोरप्यायत्कस्थे अतिनिंदितोपि पैशाचो ग्राह्यः । तथा वैश्यशूद्रवृत्तेरपि विप्रादेः । तथा च वत्सः । सर्वोपायैरसाध्यस्यात्तु कन्यापुरुषस्य वै चौर्येणापि विवाहेन सा विवाह्या रहः स्थितेति । चौर्येण पैशाचेन । सकलविवाहोपयोगाविशेषो यज्ञपार्श्वेनोक्तः । विवाहे वितते तंत्रे होमकाल उपस्थिते । कन्या या ऋतु रागच्छेत् कथं कुर्वंति याज्ञिकाः । स्नापयित्वा तु तां कन्यामर्चयित्वा यथाविधिः । युंजानामाहुतिं दत्वा ततस्तंत्रं प्रवर्त्तयेदिति युंजानः प्रथमं मनः । युक्ताय मनसेति मंत्रद्वयेमाहुतिद्वयं दद्यात् । याज्ञवल्क्येनाप्यन्यो विशेषो दर्शितः पाणिर्ग्राह्यः सवर्णासु गृह्णीयात्क्षत्रिया शरं । वैश्या प्रतोदमादद्याद्वे

नेत्व गृजन्मनः । स्त्रीशूद्रादिकं गृह्णाति प्रणिस्थितं च वरो गृह्णीयादित्यर्थः । अग्रजन्मन इत्युपलक्षणं । तथा च मनुः । वसनस्य दशां ग्राह्या शूद्रयोत्कृष्टवेदन इति । विधवानियोगो नात्र विचारसरणिमारोपितः युगान्तरविषयत्वात् । विवाहे वर्षमासादिशुद्धिर्ज्योतिःशास्त्रेभिहिता । सिंहस्थं मकरस्थं च गुरुं यत्नेन वर्जयेत् । सिंहस्थे तु मघासंस्थं गुरुं यत्नेन वर्जयेत् । अन्यत्र सिंहभागे तु विवाहादि विधीयते । ततः । नर्मदा पूर्वभागे तु शोणस्योत्तरदक्षिणे । गंडक्याः पश्चिमे पारे मकरस्थो न दोषभाक् । ज्योतिःसागरे । अतिचारगतो जीवस्तं राशिं नैति वेद्यदि । लुप्तसंवत्सरो ज्ञेयः सर्वकर्मबहिष्कृतः । माघफाल्गुनवैशाखा ज्येष्ठाषाढमृगाह्वयः । षडेते पूजिता मासा आतुर्वीर्यस्य नित्यशः । मार्गेमासि तथा ज्येष्ठे क्षौरं परिणयं व्रतं ज्येष्ठपुत्रदुहित्रोस्तु यत्नेन परिवर्जयेत् । श्रेष्ठपक्षमुशंति शुक्लमसितस्याद्यं त्रिभागं तथा । रिक्तां ग्राह्यतिथिं तथर्त्वयनयोः संधिं च शेषाः शुभाः । अमायां चैव भद्रायां करणे विष्टिसंज्ञिते । यः करोति विवाहं स शीघ्रं याति यमालयं । प्रतिपद्दुःखजननी द्वितीया प्रीतिवर्द्धनी । सौभाग्यदा तृतीया स्याच्चतुर्थी चार्थनाशिनी पंचम्यां सुखवित्तानि षष्ठी विघ्नप्रदा मता । विद्याशील

सुखाप्तिः स्यात्सप्तम्यामफलाष्टमी। नवमी शोकभयदा
ह्यानंदो दशमी दिने। सुखदैकादशी ज्ञेया सफला द्वाद-
शी स्मृता। मानपुत्रौ त्रयोदश्यां चतुर्दश्यां तु दोषदो फलं
बहुविधं नित्यं पंचदश्यां विशेषतः। न चेह शुक्लप्रति-
पद्दुदयंती निषिध्यते। अत्रापि कृष्णपक्षस्य दशमी ह्य
विवाहिकां। वदंत्यन्ये तु दशमीमुभयोरविवाहिकां।
गुरुशुक्रेंदुपुत्राणां दिनेषु परिणीयते। या कन्या सा भवे
न्नित्यं भर्तुश्चित्तानुवर्तिनी। अर्कार्किभौमवाराणां दिने
षु कलहप्रिया। सापत्न्यं समवाप्नोति तुषारांशुवासरेऽत्र
त्र दिनेष्वित्यभिधानाद्रात्रावप्यनुज्ञा गम्यते। तथा च स्मरंति
न वारदोषाः प्रभवंति रात्राविति। यावज्जीवं कन्या भर्त्रा स-
ह वियुज्यते। तथा च स्मरंति न वारदोषाः प्रभवंति रात्रावि
विति। यावज्जीवं कन्या भर्त्रा सह वियुज्यते दुःखं। पश्चाद्राम
परोगेष्विन्यां याति पंचत्वं। याम्ये षड्भिर्मासैर्वैधव्यं याति नि
धनत्वं च। धनकनकभूषणायुता पाणिग्रहणे तु कृत्तिका
यां च। उपयुज्यते च पश्चात् वह्नौ याति पंचत्वं। प्राजापत्ये
सुभगा पतिव्रता मानिनी प्रिया भर्तुः। सुचिरमनुकूला भर्तुः
प्रियंवदा सौम्यदैवते कन्या। रुद्रार्द्रे पाणिग्रहणे वर्ष-
रोगेण न याति पंचत्वं। त्रिभिरब्दैरादित्ये कन्या समु-
पैति पतिमन्यं। अब्दचतुष्कात्कन्या कुलविद्वेषि-
णी भवति पुष्ये श्लेषास्वपि कन्या पाणिग्रहणे समे-

त्व भर्त्तारं। सप्तभिरब्दैर्ईन्यादथ कुलटात्वं समाप्नो-
ति। भवति त्रिवर्ग युक्ता पित्र्ये पाणिगृहे हि संप्राप्ते।
भाग्ये सुतसौभाग्यं दासीत्व याति निर्भया कन्या।
अब्दे के तिक्रांते पतिमरणं प्राप्नुयाच्चैव। व्यपगत
शोका सुभगा भोगवती सुप्रजा प्रिया भर्त्तुः। आर्य-
म्णो पाणियुक्ते कन्या वर्षद्वये तीते। हस्ते पाणिगृ-
हणं समेत्य कन्या पतिव्रता नित्यं। आत्मप्राण वि-
योग मवाप्नुयात्क का वाब्दात्। अथवा शील भ्रं-
शं त्वाष्ट्रे प्राप्नोति बांधवकुलात्। स्वातौ धर्मसमेता
पति दयिता बंधुवल्लभा साध्वी। ऐंद्राख्ये कन्या
बुद्धिभ्रष्टा प्रयाति पतिमन्य। अब्दचतुष्के तीते मै-
त्रे कन्याप्नुयाद्धनं सौख्यं। भर्त्तुरवज्ञां कृत्वा दुःखा-
न्यनुभूय शाक्रभे कन्या। दशमेब्दे वैधव्यं प्रयाति य-
दाष्टमेन सूता। मूले सधना साध्वी पत्युरति प्रियतमा
प्रकृष्टाच। अशुचिरनाचारा हासरता तथान्यमेति
भर्त्तारं। अब्दद्वयेन कन्या ज्ञेया सा पूर्वाषाढासु। वि-
दधाति वैश्वदेवे भर्त्तुर्वित्तं च गुरुजनानुरता। पा-
णिग्रहणमुपयाते श्रवणे नैकन्न सारमते। विभ्र-
ष्ट स्मृतिशौच। मृत्युमुखं याति वसुदैवे। ईर्ष्यारो-
गेण हता यमसदनं याति वारुणे पश्चात्। आजै-
कपदे कन्या दुःशीला दुर्भगा दरिद्रा च। आहिर्बु-

ध्ये कन्या मणिकनकविभूषणां सभूतमाप्नोति प्राप्नोति शी-
लशौचं। पौष्णे शय्या सनोपकरणानि। वैधृतके
परिणीता कन्या विकल्लं क्रिया व्यतीपाते। विष्कं-
मरणं नित्यं सुभगा षट्स्वपि चरेषु करणेषु। ध्रुव
करणैः शकुनाद्यैः पाणिग्रहणाद्ध्रुवं मृत्युः। दु
ष्टस्य पूर्वमपहाय दिनार्द्धं भागं विष्टि प्रदुष्टमपि
नष्टविधं तिथिं चाशेषाः शुभा निगदिता अशुभा
स्तथान्ये पूर्वोक्ता मत्र सकलं हि विचिंतनीयं। शनै-
श्चर दिने प्राप्ते यदा रिक्तातिथिर्भवेत्। तस्मिन्विवा
हिता कन्या पतिसंततिवर्द्धिनी। मेषे कुमारेष्वनुर-
क्ता चित्ता विहीनचित्ता गविगीता च। कुलहृया-
नंदकरी तृतीये कुलीरलग्ने कुलटा नृशंसा। हरौ
प्रसूता सकृदाश्रिता पितुः पतिप्रिया च श्वशुरस्य
षष्ठे। रूपाभिमानार्थवती तुलाधरे तथालिकेंद
ति नित्यमस्थिरा। धनुषि कुलनतनूर्वाद्द सनीत्यपरे
जगुः। मृगघटकषेष्वन्या सक्ताजरा सुपगच्छति।
पंच पापग्रहे दोषा वर्जनीयाः प्रयत्नतः। दारिद्र्यं
मरणं व्याधिः पुंश्चल्त्वमनपत्यतेति। तथा गुरुशु-
कास्तादिष्वपि विवाहादि निषेधो ज्योतिःसारसागा
रे। बाले शुक्रे वृद्धे शुक्रे वृद्धे जीवे नष्टे जीवे बाले जीवे सिंहे
सिंहादित्ये जीवादित्ये तथा। मलिम्लुचे मासि सुराचा-

र्येतिचारे। वापीकूपविवाहादिक्रियाः आगुदिता स्त्यजेत्। अस्तादिलक्षणं च भ्रष्टसिद्धांते। रविगा सन्निरन्येषां गृहाणामस्तउच्यते। अर्वागूर्ध्वमधस्तात्स्यान्मौढ्यं द्वादशकेशवइति। बालवृद्धत्वयोरवधिर्दर्शितो दरीये। प्राग्बालो दिवसत्रयं दशदिनं पश्चात्सितो वृद्धतां पक्षे वासरपंचकेच लभते पक्षे गुरुः सर्वतः। नत्वय्रात्त्रुगुरुभृगुकयोर्विमलयोः कुर्याद्विवाहं सितेऽलक्षे वासरपंचकशिवदंनस्याद्दशाहः परइति। वार्हस्पत्येतु। प्राक्पश्चादुदितः शुक्रः पंचसप्तदिनं शिशुः। विपरीतं तु वृद्धत्वं नद्वदेव गुरोरपीति। अत्र देशभेदेन आपदा वा व्यवस्थामाह। गार्ग्यः। शुक्रो गुरुः प्राक्परतश्च बालो विंध्ये दशाबंतिषु सप्तरात्रं। वंगेषु हूणेषु च षट्प्रपंच शेषे च देशे त्रिदिनं वदंतीति। अस्मिन्वचने येधिककाला स्ते भेदेन व्यवस्थिता इति न विरोधः मिहिरोपि। बहवो दर्शिता कालाये वाल्ये वार्द्धकेपि वा। आद्यास्तत्राधिकाः शेषा देशभेदाद्धुनाय देति॥ इति विवाहादिविधिः॥ अथावसथ्याधानं॥ आवसथ्यस्य गृह्यस्य अग्नेराधानमावसथ्याधानं। नहि विवाहकाले चतुर्थीकर्मानंतरं कुर्यात्। प्रयोगमध्ये प्रयोगांतरकरणाधिकाराभावा

त्। दायाद्यकालम् आवसथ्याधानमित्येकेषां मतं
दायाद्यकालो नाम भ्रातॄणां पितृधनविभागका-
लः। अविभक्ते पितृधने सर्वेषां भ्रातॄणां स्वत्वस्य
साधारणत्वेन विनियोगानर्हत्वात्। धनविनि-
योगसाध्यं हि आवसथ्यादिकर्मानुष्ठानं। अतो
भ्रातृमतो विवक्तस्यैवाधानेधिकार इति तेषाम-
भिप्रायः। अन्येषां तु मते समुदितधनेस्वस्यापि स्व-
त्वमस्तीतीतरानुज्ञया विवाहकालेपि भवतीत्य-
भिप्रायः। तथा च पारस्करः। आवसथ्याधानं
दारकाले दायाद्यकाल एकेषामिति। व्यासो
पि। अग्निर्वैवाहिको येन न गृहीतः प्रमादिना।
पितर्य्युपरते तेन गृहीतव्यः प्रयत्नतः। यो गृ-
हीत्वा विवाहाग्निं गृहस्थः प्रतिमन्यते। अन्नं त-
स्य न भोक्तव्यं वृथापाको हि स स्मृतः। एतच्च ज्ये-
ष्ठस्याधिकारिणो द्रष्टव्यं। कनीयांस्तु ज्येष्ठेनाग्नि-
परिग्रहे विद्यमाने स्वयमध्ययनादिनिरतोग्निपरि-
ग्रहमकुर्वन्नपि न प्रत्यवैति। तथा च गार्ग्यः। पि-
तृपाकोपजीवी वा भ्रातृपाकोपजीवकः। ज्ञाना-
ध्ययननिष्ठो वा न दुष्येताग्निना विना। अध्ययन
निष्ठ इति। प्रथमाध्ययनपरं। अत्र च ज्येष्ठे वि-
द्यमानेन कनीयसामधिकारः। तथा च मानुषा-

नातयोः। दाराग्निहोत्रसंयोगं कुरुते योग्रजे स्थिते।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः। अग्रजश्च
सोदर एव अन्यमातृजो न। आह वशिष्ठः। पि
तृव्यपुत्रान्सापत्नान्परनारीसुतांस्तथा। दारा
ग्निहोत्रसंयोगे न दोषः परिविंदतः। परनारीसुता
दत्तकादयः। अन्यमपि विशेषं स्वंदोगपरिशि
ष्टे। कात्यायन आह। देशांतरस्थक्लीवैकवृष
णा श्च सहोदरान्। वेश्यातिसक्तांश्च पतितशूद्रतु
ल्यातिरोगिणः। जडमूकांधबधिरकुब्जवाम
नकंटकान्। अतिवृद्धानभार्यांश्च कृषिसक्तान्नृप
स्य च। धनवृद्धिप्रसक्तांश्च कामतो कारिणस्तथा
कुटिलोन्मत्तरोगांश्च परिविंदन्न दुष्यति। एतेषा
माधानाद्यधिकाराभावादेव न दोष इत्यर्थः। दे
शांतरस्थिते तु सोदरे वसिष्ठेन विशेषः अष्टौ दश वा
द्वादश वा वर्षाणि ज्येष्ठं भ्रातरमनिविष्टमप्रतीक्ष
माणः प्रायश्चित्ती भवति। अनिविष्टमकृतवि-
वाहाग्निहोत्रं। कालविकल्पस्त्वेवं विज्ञेयः। तत्र
तत्र पुनः पुनः श्रूयमाणे सुप्रदेशस्थिते द्वादश व
र्षाणि किंचिच्छ्रूयमाणे नातिसुप्रदेशस्थिते द
शानदीपर्वतनीराद्याकुलदूरतरदेशस्थिते अ
श्रूयमाणे चाष्टौ वर्षाणि इति। यत्र ज्येष्ठेऽधिका-

यैपित्राधानं न करोति तत्र तदनुज्ञया कनीयान्कर्त्तव्यं। यथाह मनुः। ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव चाश्रयेत्। अनुज्ञातस्तु प्रकुर्वीत शंखस्य वचनं यथा वृद्धवशिष्ठोपि। अग्रजस्तु यदा नाग्निं रादध्यादनुजः कथं। अग्रजानुमतः कुर्यादग्निहोत्रं यथाविधि। हारीतोपि। अधिकारि भ्रात्रनुज्ञापूर्वकमाधानमनुजानीते। नतु विवाहं। सोदराणां तु सर्वेषां परिवेत्ता कथं भवेत् दारैस्तु परिविद्यंते नाग्निहोत्रेण नेज्यया। पितृविषये तु मनुः। पित्राय स्यतु नाधीतं कथं पुत्रस्तु कारयेत्। अग्निहोत्रेधिकारोस्ति शंखस्य वचनं यथा। नाधीतं न अग्निराहितमित्यर्थः। अत्राप्यनुज्ञापूर्वकमित्यवगंतव्यं। समानन्यायत्वात्। आधानार्थमग्निः कुतो ग्राह्य इत्याकांक्षायां स्मृत्यंतरे दर्शितं। आधानं विधिवद्वैश्यकुलाद्ब्राह्मणाद्वापि वीतमहान्सादरण्योर्वा दारदायादकालयोः वैश्यस्य पशुसमृद्धस्य गृह्णात्। महानसान्बहुपाकवतो ब्राह्मणस्य महानसान्। तथा च कात्यायनः। वैश्यस्य बहुपशोरंबरीषाद्बहुयाजिनो ब्राह्मणस्येति। अरणीलक्षणं च स्मृत्यंतरेभिहितं। अपूर्नस्यो यः शमीगर्भः प्रशस्तोर्वीसमुद्भवः। तस्य या प्राङ्मुखी शाखाप्योदीची वोर्ध्वगापि वा। अरणिस्तन्मयी ज्ञेया तन्मय्येवोत्तरारणिः। सारवद्वारवद्धात्रमौविलीच प्रशस्य

ति। सारवत् बलवत्। खदिरादिदृढकाष्ठनिर्मितमित्यर्थः
चात्वं यस्मिन् काष्ठे रज्जुं वेष्टयित्वा प्रमथ्यते तत् । औविली
चात्रस्योपरि बिलयुक्तं तन्निर्यन्त्रणार्थं यद्दीयते तत्। सं
सक्तमूलो यः शम्याः स शमीगर्भ उच्यते। अलाभे त्वशमी
गर्भाद्धरेदेवाविलम्बितः। चतुर्विंशत्यंगुला दीर्घा विस्ता
रेण षडंगुला। चतुरंगुलमुत्सेधा अरणिर्याज्ञिकैः स्मृ-
ता। मूलाद्दष्टांगुलं त्यक्त्वा अग्राच्च द्वादशांगुलं। अंतरं
देवयोनिः स्यात्तत्र मंथ्यो हुताशनः। अष्टांगुलः प्रमंथः
स्याच्चात्वं स्याद्द्वादशांगुलं। औविली द्वादशैव स्यादेतन्मं
थनयंत्रकं। प्रमंथः चात्वस्याधो भागे अरणिकाष्ठनिर्मि
तोऽग्निमथनार्थं यद्दीयते स उच्यते। अधोभागे प्रमंथकाष्ठ
संबद्धचात्वस्योपरि औविलीं निधाय चात्वं नेत्रेणावेष्टयि-
त्वा प्रमथनं कुर्यात्। गोवालैः शणमिश्रैस्तु त्रिवृद्वृत्तम
नंशुकं। व्याम प्रमाणं नेत्रं स्यात्तेन मंथ्यो हुताशनः। चात्व
बुध्ने प्रमंथाग्रं गाढं कृत्वा विचक्षणा इति। अत्र नक्षत्रनिय
मश्च ज्योतिःशास्त्रे। उत्तरात्रितयपौष्णरोहिणीपौरुहूत
वह्न्यादिदैवतैः। पुष्यसौम्यसहितैर्द्विजन्मनः स्याद्धुता
शनपरिग्रहो हितः॥ इत्यावसथ्याधानं॥ अथोपास
नस्यावसथ्यस्य चोपासनं। कुत आरभ्येत्याकांक्षाया
माह पारस्करः। उपनयनप्रभृतीति। अत्र सायंकाल
नियममाह अस्तमितानुदितयोरिति। अस्तमितं च सू-

नुदितं च अस्तमितानुदिते तयोः। अस्तमितलक्षणं छंदोगपरिशिष्टे। यावत्सम्यङ्न भाव्यंते नभस्यृक्षाणि सर्वतः। न च लौहित्यमापैति तावत्सायं च सूयते। अनुदितस्य तु हेतुविष्णं। अनुदितः समयाध्युषितश्च। तथा च मनुः। उदितानुदिते चैव समयाध्युषिते तथा। सर्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिरिति। अनुदितसमयाध्युषितलक्षणमाह। कात्यायनः। रात्रेः षोडशमे भागे ग्रहनक्षत्रभूषिते। कालं त्वनुदितं ज्ञात्वा होमं कुर्याद्विचक्षणः। तथा प्रभातसमये नष्टेन क्षत्रमंडले। रविर्यावन्न दृश्येत समयाध्युषितं च तत्। रेखामात्रश्च दृश्येत रश्मिभिश्च समन्वितः। उदितं तद्विजानीयात् तत्र होमं प्रकल्पयेत्। तत्र वाजसनेयिनां नियमेनानुदितहोमः। सूर्यो ह वा अग्निहोत्रमित्यारभ्य तस्मादुदितहोमिनां विच्छिन्नमग्निहोत्रं मन्यामह इति उदितहोमनिंदापूर्वकमनुदितहोमसमर्थनात्। तथा तत्समानतंत्राणां छंदोगादीनामपि। अश्वलायनादीनामुदितहोमः। तथा चैतरेयकब्राह्मणे अनुदितहोमनिंदा श्रूयते। प्रातःप्रातरनृतं ते वदंति पुरोदयाज्जुह्वति येऽग्निहोत्रं। दिवाकीर्त्यमदिवाकीर्त्यंतः सूर्यो ज्योतिर्न तदा ज्योतिरेषामिति। । होमद्रव्याणि च स्मृत्यंतरे प्रदर्शितानि। दध्नान्नं दुग्धं रक्षमेवा तदभावे श्यामाकनीवारवेणुयवकंदमूलफ-

लादीनीति। तन्दुलशब्दो व्रीहियवोपलक्षणार्थः।
अत एव श्रुतौ। व्रीहिभिर्यजेत यवैर्वा यजेतेति। वेणुप
वा वेणुबीजानि। आहुतिपरिमाणं च स्मृत्यर्थसारे।
व्रीहीणां च यवानां च शतमाहुतिरिष्यते। व्रीहिवदेवतं
दुला अपि। यद्वा धान्यं चतुःषष्टिराहुतिः परिकीर्त्तित।
तिलानां तु तदर्द्धं स्यात्तदर्द्धं स्याद्धृतस्य तु। यावति प्रदे
श उक्तसंख्याकास्तिलास्तिष्ठन्ति तदर्धदेशव्यापि घृत
माहुतौ भवतीत्यर्थः। एवं सायं प्रातर्नित्यहोमो निर्वर्त्त
नीयः। होमे कर्त्तारो दर्शिताः स्मृत्यर्थसारे। यजमानः प्र
धानः स्यात् पत्नी पुत्रश्च कन्यका। ऋत्विक्शिष्यो गुरु
र्भ्राता भागिनेयः सुतापतिः। एतैरेव हुतं यच्च तद्धुतं स्वय
मेव तु। पत्नी कन्या च जुहुयाद्विना पर्युक्षणक्रियां। अ
समक्षं तु दंपत्योर्न व्यं नर्त्विगादिना। द्वयोरप्यसमक्षं चे
द्भवेद्धुतमनर्थकं। सन्निधौ यजमानः स्यादुद्देशत्यागा
कारः। असंन्निधौ तु पत्नी स्यादुद्देशं त्यागकारिका।
असंनिधौ तु पत्न्याः स्यादध्वर्युस्तदनुज्ञया। उन्मादे-
प्रसवे चन्नैव कुर्वीतानुज्ञया विना। नोपवासी प्रवासे स्या
त् पत्नी धारयते व्रतं। सर्वदा यजमानो वा त्यजेत्तद्विज्ञसु
खः श्रुतिः। अग्निधमने च विशेषो दर्शितः कात्यायने
न। जुहूपंक्ष्वहुते चैव पाणिशूर्पस्फ्यदारुभिः। न कुर्या
दग्निधमनं न कुर्याद्व्यजनादिना॥ मुखेनैव धमेदग्निं मुखा

देशो ह्यधतेति । तथा । नाग्निं मुखेनेति वचो लौकिके यो
जपत्ति तदिति । यद्वा मुखेन धमनं तद्वानलिकादिव्यव
धानेन साक्षादिति ज्ञेयं । बौधायनः । आसायं कर्मणः
प्रातरा प्रातः सायं कर्मणः । आहुतिर्नातिपद्येत पार्व
णं पार्वणान्तरात् । मैत्रायणीयपरिशिष्टेपि । ऊर्ध्वयो
हस्य पापायुका आसंस्तेग्निहोत्रेणातप्यंस्ते समस्त
होमानं पश्यंस्तथा द्विरात्राय वह्वात्र्याद्वैमासाग्नि
होत्रं न जुहवुः तस्माच्छ्राया वस्यामयाव्या लौर्वाद्वै
मासाग्निहोत्रं जुहुयात्यस्मादौ पार्वणान्ते सायंप्रात
रेव चतुर्दश्यां चतुर्गृहीतानि सकृदुन्नयनमेकस्मिन्त
स्मृहोमः सकृत्परिमार्जनमिति । पक्षादौ यजनीये
हनि प्रातः परिपार्वणान्ते पक्षान्ते अमावास्यादौ यव
स्तव्येऽन्वाधानादिने । अत्र च पक्षान्ते सायंकाले चतु
र्दश्यां पंचदशाव्याप्तागतामिति परिगणनेन सप्रातर्होत्र
प्रकारेण चतुरवत्तादीनि हवींषि पात्रादग्रस्य सकृत्तं मार्ज
नादिकं विधाय सकृदेव होमः कर्तव्यः । देशकालक
र्तृदैवताहविषामेकत्वात्तंत्रं । एवं पक्षादौ यजनीये ह
नि प्रातः । एतच्च श्रौतकालात्ययपक्षहोमस्य दे
वात्कर्मणा अत्यैवं भवानादिनिमित्तेन चेदितव्यं नस
र्वदा । एवं द्विरात्रादिदिनार्थमपि निमित्तसद्भावे तंत्रेण
होमो भवति । पक्षहोमे विशेषमाह । मरीचिः । पक्ष-

होमानयो कृत्वा गत्वा कस्मान्निवर्तितः। होमं पुनः प्र-
कुर्वीत भवेच्च न स दोषभाक्। पक्षहोमानित्युपलक्ष
णं। अतोऽन्यत्राप्येवमेव। अत्र च सायंहोमे यद्द्रव्यं स्वी
कृतं हविष्ट्वेन तदेव प्रातर्होमेऽपि नान्यत्। यतः सायमु-
पक्रमः प्रातरपवर्गोऽयमेक एव प्रयोगः। एकस्मिंश्च
प्रयोगे प्रक्रांतद्रव्यपरित्यागेन द्रव्यांतरस्वीकरणं न
युज्यत इति व्रीहियववाक्यमीमांसायाम मीमांसिमां
सकैः। अथ दैवात्सायंहोमगृहीतं द्रव्यं प्रातर्होमे न
प्राप्येत तदा तद्द्रव्यप्रतिनिधिभूतं द्रव्यांतरं गृह्णीया
त्तू तैः व्रीह्यादिमध्येऽन्यतमत् ग्राह्यं। अप्रतिनिधि
द्रव्यांतरे प्रकृतिद्रव्यांचयवाभावात्। प्रतिनिधौ प्र-
कृतिद्रव्यावयवसंभवाच्च। एतदपि प्रतिनिधिपदे नि
र्णीतं। स्मृत्यर्थसारे। हव्यार्थं गोघृतं ग्राह्यं तदलाभे तु-
माहिषं। आजं वा तदलाभे तु साक्षात्तैलं गृहीष्यते। तै
लाभावे गृहीतव्यं तैलं जर्तिलसंभवं। तदलाभेऽतसीस्ने-
हः कौसुंभः सर्षपोद्भवः। वृक्षस्नेहोऽथवा ग्राह्यः पूर्वा
लाभे परः परः। तदलाभे यवव्रीहिश्यामाकान्यतरोद्भ
वं। पिष्टमालोड्य तोयेन घृतार्थे योजयेत्सुधीः। वृक्षतै
लेषु पुन्नागनिंबैरंडोद्भवं त्यजेत् पिण्याकेषांचिदन्येषां
हुलिषामप्यसंभवे। सर्वत्राज्यमुपादेयं भरद्वाजमुनेर्म-
तात्॥ अथ प्रसंगात्सकनित्यनैमित्तिककर्मोपयोगि

नया मुख्यकालातिक्रमे गौणकालो निरूप्यते। ननु को
मुख्यः को वा गौणः। उच्यते। यो विहितः स मुख्यः। य-
था वृद्धिश्राद्धादौ प्रातरादिः। यश्चाविहितस्तत्समीपव-
र्त्त्युपरितनस्तेष्वेव कर्म्मस्वंगत्वेनीयमानः संगवादिका-
लः स गौणः। तदाहुस्त्रिकाण्डमण्डनमिश्राः। स्वकाला-
दुत्तरो गौणः कालः पूर्वस्य कर्म्मणः। यद्वागामिक्रिया-
मुख्यकालस्यान्तरालवत्। गौणकालत्वमिच्छंति-
केचित्प्राक्तनकर्म्मणामिति। अस्यायमर्थः। पूर्वोत्तरयोः क-
र्म्मणोर्मध्ये पूर्वस्य कर्म्मणः स्वकालादुत्तरो यः काल उ-
त्तरकर्म्मकालावधिकः स पूर्वकर्म्मणो गौणः कालः।
अथवाऽऽगामिक्रियाया उत्तरक्रियापायो मुख्यका-
लस्तस्यापि प्राक्तनकर्म्मणि पूर्वकर्म्मणि कर्म्मणि के-
चिद्गौणकालत्वमिच्छंति। तत्र दृष्टान्तः। अन्तरालवदि-
ति। यथा पूर्वोत्तरकर्म्मणोर्मध्यकालः पूर्वकर्म्मणो गौ-
णस्तद्वदुत्तरकर्म्ममुख्यकालोऽपि पूर्वकर्म्मणो गौण
इत्यर्थः। ननूत्तरकर्म्ममुख्यकालः पूर्वकर्म्मानुष्ठाने-
न स्वीकर्त्तुमुचितः। तथाहि। पूर्वकर्म्म तावत्स्वकाला-
त्प्रच्युते विनष्टप्रायं। तदुत्तरकर्म्मकाले क्रियमाणं
तस्मादुत्तरकर्माऽपसारयति। ततश्च स्वकालाद्धि च्यु-
तं तदपि प्रणष्टरूपं भवति। तदपि उत्तरकर्म्मकाले
यदि क्रियेत तर्हि विनष्टसमाधानप्रातं प्रसज्येतेति चेत्

वाढमेवं ॥ उत्तरकर्मकाले पूर्वोत्तरयोः कर्म्मणोरेककाले
सतीदमुच्यते । न पुनरसतीति न दोषः । एवं स्थिते विचार्य-
ते । किमयं गौणः कालः सर्वेषां नित्यनैमित्तिककाम्यकर्म-
णां मुख्यकालासंभवेऽङ्गं उत नेति ॥ तत्र ब्रूमः ॥ काम्य
वर्ज्जं नित्यनैमित्तिकानि सर्वाण्यपि मुख्यकालातिक्रमे
गौणकाले कर्त्तव्यानीति । आवश्यके पुनित्यनैमित्तिके
षु यथाशक्त्या तथाकुर्यादित्यभिधानात् । विहिताङ्गाभा
वे तत्सदृशप्रतिनिधिग्रहणस्य न्याय्यत्वान्मुख्यकाला-
तिक्रमे गौणकालो ग्राह्यः ॥ तथा च मंडनमिश्राः ॥ मु-
ख्यकाले यदावश्यं कर्म्म कर्त्तुं न शक्यते । गौणकालेपि
कर्त्तव्यं गौणोप्यत्रेदृशो भवेदिति । ईदृशः अत्रापि विशे
षस्तैनैवोक्तः । गौणेष्वेतेषु कालेषु कर्म चोदितमाचरन्
प्रायश्चित्तप्रकरणप्रोक्तां निष्कृतिमाचरेत् । निष्कृतिः प्रा-
यश्चित्तमकृत्वा वा गौणे काले समाचरेदिति । देशकाल
शक्त्याद्यपेक्षया प्रायश्चित्तकरणमकरणं चेति व्यवस्था ॥
तथा स्मृत्यंतरमपि । यथाकथंचित्कर्त्तव्यं नित्यकर्म विजा
नता । नशाप्रस्य विलोपोस्ति पैतृकस्य विशेषतः ॥ तथा । दिवो
दितानि कर्म्माणि प्रमादादकृतानि वै । यामिन्याः प्रहरं
यावत्तावत्सर्वाणि कारयेदिति ॥ श्राद्धे तु विशेषः ॥
संध्यारात्र्योर्न कर्त्तव्यं श्राद्धं खलु विचक्षणैरिति ।
संध्यायां रात्रौ च श्राद्धं न कर्त्तव्यमित्यर्थः । एतदुक्तं

भवति यदा शक्नुयात्तदा कुर्यादित्युपबंधात्काम्येषु न गौ-
णस्वीकारः। नित्यनैमित्तिकेषु यथाशक्नुयादित्युपबंधा-
द्गौणपरिग्रह इति॥ यथाच पैठीनसिः॥ प्रधानमिमां-
गान्यपि मुख्यान्येव न गौणानीत्यर्थः। यद्येवं तर्हि दर्शपौ-
र्णमासपार्वणश्राद्धादीनामावास्यादिविहितकालाति-
क्रमे तदनंतरगौणकालकर्तव्यता प्रसज्येतेति चेत्। अ-
स्तु नाम कानो हानिर्गौणकालस्वीकारवादिनां। एवं प्राप्ते
सिद्धांतो विधीयते। काले हि कर्म विधीयते न कर्मणि कालः
यत्वेच्छाविनियोगार्हं तदुपादेयं यदुपादेयं तद्विधेयं।
कालश्चेच्छया कर्तुं न शक्यः अत एवानुपादेयपंचकम-
ध्ये मीमांसकैः कालः परिगणितः। कालोद्देशेन कर्म वि-
धातव्यं। तथा च कालो निमित्तं निमित्तभूतकालाभावेऽधि-
काराभावात्कालांतरे कृतमकृतमेवेति गौणकालग्रहणं
नोचितं। विहितकालाभावे चाधिकाराभावः सांतपना-
धिकरणे प्रापणाच्च निमित्तस्येत्यस्मिन्सूत्रे प्रतिपादि-
तः। लौगाक्षिरपि गौणस्यापरिग्राह्यत्वमाह। गणिता
ज्ञायते कालः कालेनिष्यंति देवताः। वलं त्वेकाहुतिः
कालेनाकाले लक्षकोटयः। यत्तु मंडनमिश्रैरभिहितं
गौणकालेपि कर्तव्यं गौणोप्यत्ते दर्शो भवेदिति। तत्तु
दिवोदितानि कर्माणीत्यादिना यत्र गौणकालाभ्य-
नुज्ञानं वाचनिकं तद्विषयं। अत एव मंडनमिश्राः

मुख्यकाले हि मुख्यं चेत्साधनं नैव लभ्यते । तत्कालद्र-
व्ययोः कस्य मुख्यत्वं गौणता पि वा । मुख्यकालमुपा
श्रित्य गौणमप्यस्तु साधनं । न मुख्यद्रव्यलोभेन गौ-
णकालप्रतीक्षणमिति । यत्तु यथा कथंचित्कर्त्तव्यं नि-
त्यकर्म्म विजानतेति । तस्यायमभिप्रायः । स्वकालप्रा-
प्तस्य कर्म्मणो मुख्यद्रव्याभावेन विलोपो न कर्त्तव्यः अ-
पितु मुख्यकाल एव मुख्यद्रव्याभावेपि प्रतिनिधिद्रव्येण
कर्म्म निर्वर्त्तनीयमिति । एतेन वचनमंतरेण संवत्सरर्त्तु
मासतिथ्यादिकालविशेषविहितानि कर्म्माणि स्वकाला-
तिक्रमे कालांतरे कर्त्तुं न युज्यंते । अपितु तदतिक्रमप्राय-
श्चित्तमेव कुर्यात् । यत्र गौणकालानुज्ञानं दृश्यते तद्विद्व-
गर्हापरिहाराय स्वमनःपरितोषाय चेति सर्वमनवद्यं ॥
इति मुख्यगौणकालनिर्णयः ॥ अथ समाचारप्रा-
प्तद्विरागमने शुभकालादि ॥ तत्र मुहूर्त्तेश्वरः ॥ वैशाखे
शुभगाप्रभूतधनिनी स्यच्छ्रोत्रे नूनं देवगुनापि दुःखमतुलं
लेभेन्यमासे गता । मार्गफाल्गुनवैशाखेशुक्लपक्षे शुभे
दिने । गुर्वादित्यविशुद्धौ स्यात्तत्स्य पत्नीद्विरागमः । धात्रा-
र्यमाः । नीहारांशुधनोत्तरादिति गुरुत्वाष्ट्रानुराधाश्विनी
शाक्रो भास्करवायुविष्णुवरुणत्वाक्षेत्यत्र मतेतिथौ । कुंभा
ज्ञालिगते रवौ शुभकरे प्राप्नोदये भार्गवे जीवारास्फुजि-
तां दिने नववधूसद्मप्रवेशः शुभः । इर्तुः शोभनगोचरेहित

कोणास्तंगते भार्गवे सूर्ये कीटघटाजगे शुभदिने पक्षेतु कृ-
ष्णेतरे । हित्वादिक्यलिषीतमूबुधसितौ लालादकेंद्रि-
कातावानीता गुणशालिनी न च वधूर्नित्योत्सवैर्नंद-
ते । पूर्वतोभ्युदिते शुक्रे प्रयाद्दक्षिणापरे । पश्चादभ्यु-
दिते चैव यायात्पूर्वोत्तरे दिशौ । स्वभवनपुनःप्रवेशे दे-
शानां विप्लवे तथोद्वाहे । न व वध्वा गृहगमने प्रतिशुक्र
विचारणा नास्ति ॥ इति द्विरागमनं ॥ अथाधि-
वेदनं ॥ तत्र मनुः ॥ मद्यपाऽसत्यवृत्ता न त्यान कर्त्र्ये
विधीयते । असत्यवृत्ता असाध्वाचारा प्रतिकूला भर्तु-
रनिष्टकारिणी । हिंस्रा पुत्रदास्यादिताडनशीला । अ-
र्थघ्नी उपेक्षादिना अर्थविनाशकारिणी । अधिवेदनं
भार्यांतरपरिग्रहः ॥ याज्ञवल्क्यः ॥ सुरापी व्याधि-
ता धूर्ता वंध्यार्थघ्न्यप्रियंवदा । स्त्रीप्रसूश्चाधिवेत्तव्या
पुरुषद्वेषिणी तथा । धूर्त्ता वंचनप्रधाना । स्त्रीप्रसूः
स्त्रीमात्रजननी । अधिवेदनप्रतीक्षणे कालो मनुनो-
क्तः ॥ वंध्याष्टमेऽधिवेद्याब्दे दशमे तु मृ प्रधाना । स्त्रीप्रसू-
स्त्रीमात्रजननी । अधिवेदनप्रतीक्षणे कालो मनुनोक्तः
वंध्याष्टमेऽधिवेद्याब्दे दशमे तु मृतप्रजा । एकादशे स्त्रीजननी स-
द्यस्त्वप्रियवादिनी । अधिवेत्तव्येति शेषः । देवलः । आकांक्षेता-
ष्टवर्षाणि भर्तानिष्फलाः स्त्रियः । दशवंध्यां च निंद्यां च द्वादश स्त्री-
प्रसूतिनीं । ततो विंदेद्विधिना पुत्रार्थं धर्मतः स्त्रियं । पुत्रलाभा-

त्वयं लोके नास्ति हि प्रसवा हिते। अतिप्रसवा। प्रसवः पुष्पं रजः तद्योग्यकालमतिक्रान्ता। निंद्याः श्वित्रादियुक्ताः। प्रसवाः फलानि ते पुत्राः। एका मूढा तु कामार्थमन्यां लब्धुं यदिच्छति समर्थस्तोषयित्वार्थैः पूर्वोढामपरां वहेत। अत्र ष्टद्याकालप्रतीक्षादिकल्पो वयः शक्त्यपेक्षया व्यवस्थितो बोद्धव्यः। समर्थस्तोषयित्वार्थैरित्यत्रार्थैरित्युपलक्षणं अतउपायांतरेणापि सा परितोषणीया। येषु तु अधिवेदननिमित्तेषु न कालविशेषः श्रूयते तेषु यावता कालेन तद्दोषनिश्चयो भवति। तावत्कालं प्रतीक्षेत। याज्ञवल्क्यः। अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समं। न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्द्धं प्रकीर्त्तितं। आधिवेदनिकं अधिवेदनप्रयोजनमलंकरणादि। यस्यै पूर्वं विवाहादिसमये स्त्रीधनमलंकारादि न दत्तं तस्मै समं दातव्यं। पश्चादुद्ह्यमानाया यावद्दीयते तावदित्यर्थः। दत्ते तु पूर्वमेवालंकारादिके दत्ते अर्द्धं। अत्रार्द्धशब्दोंऽशमात्रपरो न तु समांशपरः। पूर्वस्यै दत्तमलंकारादिकं न वोढालंकाराच्यूनं चेद्यावता तत्साम्यं भवति तावद्दातव्यमित्यर्थः॥ मनुः। अधिविन्ना तु या नारी निर्गच्छेद्रुषिता गृहात्। सा सद्यः सन्निरोद्धव्या त्याज्या वा कुलसन्निधौ। याज्ञवल्क्यः। अधिविन्नातु भर्त्तव्या

महद्देनोन्यथा भवेत्। यत्रानुकूल्यं दंपत्यो स्त्रिवर्ग स्तत्र वर्द्धते। मनुः। चतस्रस्तु परित्याज्याः शिष्यगा- गुरुगा च या। पतिघ्नी च विशेषेण जुंगितोपगता च या। जुंगितः प्रतिलोमजः। अत्र विशेषमाह॥ याज्ञवल्क्यः हृताधिकारां मलिनां पिंडमात्रोपजीविनीं। परिभूतामधः शय्यां वासयेद्व्यभिचारिणीं॥ इत्यधिवेदनं॥ अथ स्त्रीधर्म्माः॥ तत्रादौ तासामवश्य रक्षणीयत्वं प्रद- र्श्यते। तत्र मनुः। प्रजनार्थं महाभागाः पूजार्हा गृहदी- प्तयः। स्त्रियः श्रियश्च गेहेषु न विशेषोस्ति कश्चन। उत्पा दनमपत्यस्य जातस्य परिपालनं। प्रत्यहं लोकया- त्रा प्रत्यक्षं स्त्रीनिबंधनं। अपत्यं धर्म्मकार्याणि शुश्रू षा रतिरुत्तमा। दाराधीनस्तथा स्वर्गः पितॄणामात्म- नस्त्विह। तस्माद्यत्नेन रक्षेत भर्त्ता व्यासमनुरब्रवीत्। अस्वतंत्राः स्त्रियः कार्याः पुरुषैश्च दिवानिशं। विषये षु च सज्जंत्यः संस्थाप्या ह्यात्मनो वशे। पिता रक्षति कौ मारे भर्त्ता रक्षति यौवने। पुत्रा रक्षंति वार्द्धके न स्वातं- त्र्यं क्वचित्स्त्रियाः। सूक्ष्मेभ्योपि प्रमादेभ्यः स्त्रियो र- क्ष्या विशेषतः। द्वयोर्हि कुलयोः शोकमावहेयुररक्षि ताः। भारते। पानं दुर्ज्जनसंसर्गः पत्या च विरहोटनं। स्वप्नोन्यगेहे वासश्च स्त्रीणां वै दूषणानि षट्। नैता रूपं परीक्षंते नासां वयसि संस्थितिः। सुरूपं वा कुरू-

पं वा पुमानित्येव भुंजते। एवं स्वभावं ज्ञात्वासां प्रजाप-
तिनिसर्गतः। परमं यत्नमातिष्ठेत्पुरुषो रक्षणं प्रति। श-
य्यासनमलंकारं कामं क्रोधमनार्ज्जवम्। कार्यंच
स्त्रीभ्यो मनुरकल्पयत्। यादृग्गुणेन भर्त्रा स्त्री प्रयुं-
जीत यथाविधि। तादृग्गुणानुसारेण समुद्रेणेव नि-
म्नगा॥ अथ रक्षोपायः॥ न कश्चिद्योषितः शक्तः प्र-
सह्य परिरक्षितुं। एतैरुपाययोगैश्च शक्यास्ताः परि-
रक्षितुं। अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत्।
शौचे धर्मेन्नपक्त्यां च पारिणाह्यस्य चेक्षणे॥ अथ
स्त्रीकर्त्तव्यधर्म्माः। तत्र मनुः। बाल्ययौवनवत्या
वा वृद्धया वापि योषिता। न स्वातंत्र्येण कर्त्तव्यं किंचि-
त्कार्यं गृहेष्वपि। पित्रा भर्त्रा सुतेनापि नेच्छेद्विरहमा-
त्मनः। एषां हि विरहेण स्त्री गर्हिता स्यात्कुलद्वये।
सदा प्रहृष्टया भाव्यं गृहकार्येषु दक्षया। सुसंस्कृतोप-
स्करया व्यये चामुक्तहस्तया। याज्ञवल्क्यः। संयतो-
पस्करा दक्षा हृष्टा व्ययपराङ्मुखी। कुर्यात् श्वशुर-
योः पादवंदनं भर्तृतत्परा। स्त्रीभिर्भर्तृवचः कार्यमे-
ष धर्म्मः परः स्त्रियाः। आशुद्धेः संप्रतीक्ष्यो हि महा-
पातकदूषितः। मनुः। विशीलः कामवृत्तो वा गु-
णैर्वा परिवर्ज्जितः। उपचर्यः स्त्रिया भर्त्ता सततं दे-
ववत्पतिः। नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपो-

चरणं। पतिं संसेवते यानु येन स्वर्गे महीयते। पत्यौ जीवति या स्त्री तु उपोष्यव्रतचारिणी। आयुष्यं हरते भर्तुर्नरकं च गच्छति। पाणिग्रहस्य साध्वी स्त्री जीवतो वा मृतस्य च पतिलोकमभीप्संती नाचरेत्किंचिदप्रियं। याज्ञवल्क्यः मृते जीवति वा पत्यौ या नान्यमुपगच्छति। सेह कीर्त्तिमवाप्नोति मोदते चोमया सह। स्कांदे। प्रसुप्तं तु सुखासीनं रममाणं यदृच्छया। आतुरेष्वपि कार्येषु पतिं नोत्थापयेत्क्वचित्। स्त्रीधर्मिणी त्रिरात्रं तु स्वमुखं नैव दर्शयेत् स्ववाक्यं श्रावयेन्नापि यावत्स्नाता न शुध्यति। सुस्नाता भर्तृवदनं मीक्षेन्नान्यस्य कस्यचित्। अथवा मनसि ध्यात्वा पतिं भानुं च लोकयेत्। हरिद्रां कुंकुमं चैव सिंदूरं कज्जलं तथा। कूर्पासकं च तांबूलं मांगल्याभरणं शुभं। केशसंस्कारकबरी करकर्णविभूषणं। भर्तुरायुष्यमिच्छंती दूरयेन्न क्वचित्सती। न रजक्या न कारुक्या तथा श्रवणया पि च। न च दुर्भगया चापि सखित्वं कुरुते तु सा। भर्तृविद्वेषिणीं नारीं न संभाषेत कर्हिचित्। नैकाकिनी क्वचिद्भूयान्न नग्ना स्नाति वै क्वचित्। नोलूखले न मुशले न वर्द्धन्यां दृषद्यपि। न यंत्रके न देहल्यां न स्त्री चोपविशेत्क्वचित्। उक्ता प्रत्युत्तरं दद्यात् या नारी क्रोधतत्परा। सा शुनी जायते ग्रामे शृगाली निर्जने वने। अपवादेन वक्तव्यः कलहं दूरतस्त्यजेत्

गुरूणां सन्निधौ क्वापि नो ब्रूयान्न च वा हसेत्। ताडिता
ताडितुं चेच्छेत्सा व्याघ्री वृषदंशिका। कटाक्षैर्वीक्षते
या तु भर्त्तारं कुपिता हि वा। केकराक्षी तु सा नूनं भवेद्वै
नात्र संशयः। भर्त्तारं या समुत्सृज्य मिष्टमश्नाति केव-
लं। ग्रामे सा सूकरी वा स्याद्वृद्दंभी वा स्वविष्टभुक्। या-
ज्ञवल्क्यः। पतिप्रियहिते युक्ता स्वाचारा विजितेन्द्रि-
या। इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमां गतिं। शंखः
नानुक्त्वा गृहान्निर्गच्छेत् नानुत्तरीया न त्वरितं व्रजेत्।
न परपुरुषं च संभाषेतान्यत्र वणिक प्रव्रजित वृद्धवैद्ये-
भ्यो न नाभिं दर्शयेत्। आगुल्फाद्वासः परिदध्यान्न-
स्तनौ विवृतौ कुर्यात्। न हसेदनपावृता न भर्त्तारं तद्बन्धू-
न्वा द्विष्यात्। न गणिकाधूर्त्ताभिचारिणी प्रव्रजिता प्रे-
क्षणिका मायामूलकुहादूर्ध्वैर्वदितव्यः॥ अथ पति-
व्रता विशेषधर्म्माः॥ तत्र मनुः॥ कन्यां विवाह-
समये वाचयेयुरिति द्विजाः। भर्त्तुः सहचरी भूया जी-
वतोऽजीवतोऽपि वा। भर्त्ता देवो गुरुर्भर्त्ता धर्म्मतीर्थव्रता-
नि च। तस्मात्सर्वं परित्यज्य पतिमेकं समर्चयेत्। भुंक्ते
भुंक्ते पतौ या तु स्वासीना वापि चासिते। विनिद्रिते विनि-
द्राति प्रथमं परिबुध्यते। अनलंकृतमात्मानं पत्युर्ना
दर्शयेत्क्वचित्॥ कार्यार्थे प्रोषिते पत्यौ सर्वमंडनव-
र्ज्जिता। न च तन्नाम गृह्णीयात्तस्यायुष्यविरुद्धये।

पुरुषांतरनामापि न गृह्णाति कदाचन। आक्रुष्टापि न चा
क्रोशेत् ताडितापि प्रसीदति। इदं कुरु कृतं स्वामिन्मन्यता
मिति च केचित्। आहूता गृहकार्याणि त्यक्त्वा गच्छति
सत्वरं। पूजोपकरणं सर्वमनुज्ञाप्य शोधयेत्स्वयं। नियमो
दकबर्हिश्च पत्रपुष्पाक्षतादिकं। सेवते भर्त्तुरुच्छिष्टं मिष्ट
मन्नं फलादिकं। महाप्रसाद इत्युक्त्वा पतिदत्तं प्रतीच्छ-
ति। हारीतः। मातृकं पैतृकं चैव यत्र चैव प्रदीयते। कुल
त्रयं पुनात्यत्र भर्त्तारं यानुगच्छति। अयं च सर्वासां स्त्रीणां
पतिव्रतानामगर्भिणीनामबालापत्यानामाचांडालं सा
धारणो धर्म्मः। अपतिव्रतादीनामनधिकारात्। ननु
च अपतिव्रतादीनामप्यधिकारोनुगमने श्रूयते।
तथा च महाभारते। अवमन्य च याः पूर्वं पतिं दुष्टेन
चेतसा। वर्त्तंते याश्च सततं भर्त्तृणां प्रतिकूलतः। भ-
र्त्रानुमरणं काले याः कुर्वंति तथाविधाः। कामा-
त्क्रोधाद्भयान्मोहात्सर्वाः पूता भवंत्युत। आदिप्रभृ
तिया साध्वी यत्युः प्रियपरायणा। ऊर्द्धं गच्छति सात
त्र भर्त्रानुमरणागतेति। नैतत्सारं। उत शब्दश्रवणा-
त्। सर्वाः पूता भवंत्युतेति। पत्यवमानकर्त्र्यादीना
मपि पापक्षयोस्ति किमुतादि प्रभृति या साध्वी तस्याः
पापक्षयः परलोकश्च वित्युत इति साध्या उत्तमलो
कप्राप्तिविधायकवाक्यशेषत्वेनापि चरितार्थत्वात्

साधारणधर्मत्वं च भर्त्तारं यावद्गच्छतीत्यविशेषोपादाना
गवगम्यते। यानि च ब्राह्मण्यननुगमननिषेधपराणि
पैठीनसिगिरःप्रभृतीनां वाक्यानि। मृतानुगमनं नास्ति
ब्राह्मण्या ब्रह्मशासनात्। या स्त्री ब्राह्मणजातीया मृतं
पतिमनुव्रजेत्। सा स्वर्गमात्मघातेन नात्मानं न पतिं नयेदि
त्येवमादीनि तानि पृथक्चितिविषयाणि। पृथक्चि-
तिं समारुह्य न विप्रा गन्तुमर्हति। अन्यासां चैव नारीणां।
स्त्रीधर्मोऽयं परः स्मृतः इत्युशनसा विशेषस्मरणात्।
इदं चान्वारोहणमनित्यं अन्वारोहणस्य स्वर्गादिफलयुक्त
त्वेन काम्यत्वात्। अत एव विकल्पमाह। विष्णुः। मृते
भर्त्तरि ब्रह्मचर्यं तदन्वारोहणं वेति। देशान्तरमृते पत्यौ
ब्राह्मण्यास्तदस्थिभिः सहानुगमनं भवत्येव। इतरा
सां तु अस्थ्यभावेऽपि पतिपादुकादिकं चिह्नं किमपि गृही
त्वा चिह्नाभावेऽपि भवति। पृथक्चित्यनुज्ञानात्। ननु-
च पतिव्रताया इदमनुगमनं नित्यमेव। तथा च हारी-
तः। आर्त्तार्त्ते मुदिते हृष्टा प्रोषिते मलिना कृशा। मृते।
म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता। अत्र मृते यो म्रि-
येत सा पतिव्रतेत्यनेन नित्यत्वं द्योत्यते। अतः अनित्य-
त्ववर्णनमयुक्तमिति चेत्। मैवं। मृते भर्त्तरि साध्वी स्त्री
ब्रह्मचर्ये व्यवस्थिता। स्वर्गं गच्छत्यपुत्रापि यथा ते ब्र-
ह्मचारिण इति मनुना पतिव्रताया अननुगमनस्याप्य

मिहितत्वात्। अत्र साध्वीत्यनेन पतिव्रताभिधीयते।
अन्यथा ब्रह्मचर्ये व्यवस्थितेत्यनेन पौनरुक्त्यप्रसक्तेः।
तथा महाभारते भगवान् व्यासः। पतिव्रतायाः सत्या
अग्निप्रवेशं दर्शयति। नत्वग्निप्रवेशेन पतिव्रतात्वं। प-
तिव्रता संप्रदीप्तं प्रविवेश हुताशनं। तत्र चित्राङ्गदं धर्मं भ
र्त्तारं सान्वपद्यतेति। न च तस्मादु हन पुरायुषः स्वः कामी-
येयादिति श्रुतिविरोधः। विषयभेदात्। श्रुतिर्हि सामान्ये-
नशास्त्राविहितं स्वेच्छामरणं निषेधति। स्मृतिस्तु भर्त्तरि
मृते ज्वलनप्रवेशविशेषेण मरणविशेषं विधत्ते अतो वि
षयभेदान्न विरोधः। यथा न हिंस्यात्सर्वा भूतानीति सा
मान्यशास्त्रमग्नीषोमीयं पशुमालभेतेति विशेषशास्त्रं
विषयमुत्सृज्य प्रवर्त्तते तद्वदत्रापीति न कश्चिद्विरोधः।
ननु ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वा भवेत्पतिः। पुनात्य
विधवा नारी तमादाय मृतेतया। इत्येवमादिहारीतादि
वाक्यानि ब्रह्महत्यादिदोषनिवृत्तिमनुगमनेनाभिदध-
ति॥ एतदुपपन्नं शास्त्रफलं प्रयोक्तरि तल्लक्ष-
णत्वादिति न्यायेनापूर्वफलयोः कर्त्तृसमवेतत्वात्पतिग-
तदुरितापूर्वस्य पत्नीगतानुब्रह्मघ्नो वेत्यादीनि वाक्यानि
अनुगमनविधिशेषत्वेनार्थवादत्वादनुगमनस्य प्राश-
स्त्यं वर्णयंति। अतो न स्वार्थे प्रमाणानि। युक्तमेवार्थवा
दत्वं। ब्रह्महननादिदोषदुष्टस्य पतितत्वेनासौ संस्कार

मेनतावन्नाहंति दूरेनुगमनं। अतः प्राप्तस्य पततामीतिन
काचिदनुपपत्तिः। एवं द्विविधं कर्म प्रारब्धमप्रारब्धं चेति
तत्र प्रारब्धकर्म्मणां भोगादेव क्षयात् प्रारब्धमपि अनु
गमनरूपप्रति प्रतिबंधकेन प्रतिबद्धं विद्यमानमप्यवि-
द्यमानमिव सद्दुःखदानोन्मुखमनुन्मुखं चास्ते। तथा चा-
नुगमनफलं स्वर्गादिकमनुभूय पश्चात्प्रारब्धशेषमु-
पभुंक्ते। अप्रारब्धमपि कर्म्म द्विविधं। फलदानोन्मुख-
मनुन्मुखं च। यदुन्मुखमप्रारब्धं कर्म्म तदनुगमनेन ना
श्यते प्रायश्चित्तेनैव। अन्यथा पतिपत्न्योः स्वर्गसाधन
त्वेनोपदिश्यमानानुगमनेन साध्यस्वर्गानुपपत्तेः। पु-
नात्यविधवा नारी तमादाय म्रियेत येत्यत्र च पुनातीत्ये
तदपि नोपपद्येत। यत्फलदानायोन्मुखमप्रारब्धकर्म्म
तस्य निवृत्तिरनुगमनेन भवतीत्येतदेवमनसि कृत्वा व्या
सोप्याह। यदि प्रविष्टो नरकं बद्धः पाशैः सुदारुणैः। सं
प्राप्तो यातनास्थानं गृहीतो यमकिंकरैः। तिष्ठते विव
शो दीनो वेष्ट्यमानः स्वकर्म्मभिः। व्यालग्राही यथा व्या
लं बलादुद्धरते बिलात्। तद्वद्भर्तारमादाय दिवं
याति च सा बलादिति। फलदानानुन्मुखं त्वप्रार-
ब्धं कर्म्मानुगमनसाध्यस्वर्गोपभोगानंतरमुपभुज्यते
इति न विरोधः। ननु फलादानोन्मुखमप्रारब्धं कर्म
प्रायश्चित्तस्थानीयेनानुगमनेन यथा विनश्यति तथा

फलदानानुन्मुखमपि तेनैवापगच्छतु विशेषाभावादिति चेत् । न पुनातीत्युक्त्या पापनिवृत्तिः कल्प्यते कल्पना चानुपपत्तिवशात् । सा चानुपपत्तिर्यावति कल्पिते शाम्यति तावत्कल्पनीयं । तथा च फलोन्मुखप्रारब्धकर्मनिवृत्त्यापि पुनातीत्यस्य चारितार्थत्वान्न सकलपापनिवृत्तिः परिकल्पनीया । यत्तूक्तमन्यनिषेधेनानुगमनेनान्यगतदुरितनिवृत्तिरयुक्तेति । तदपेशलं । पतिपत्न्योः सहकर्तृत्वेनाग्निहोत्रादिसाध्यस्वर्गादिवदुपपत्तेः इदंच दुरितं जन्मांतरकृतमेव निवर्त्त्यं । एतज्जन्मकृतदुरितयुक्तस्य पतितत्वेन तेन सहानुगमनानधिकारात् । वैधव्यपालनेपि स्वर्गादिफलविशेषः स्मृत्यंतरे स्मर्यते पत्यौ मृतेपि या योषित् वैधव्यं पालयेत्क्वचित् । सा पुनः प्राप्य भर्त्तारं स्वर्गलोकान्समश्नुते । विधवाकबरीबंधो भर्तृबंधाय जायते । शिरसो वपनं तस्मात्कार्यं विधवया सदा । एकाहारः सदा कार्यो न द्वितीयः कदाचन । त्रिरात्रं पंचरात्रं वा पक्षव्रतमथापि वा । मासोपवासं वा कुर्यात्चांद्रायणमथापि वा । कृच्छ्रं पाराकं कुर्यात्तप्तकृच्छ्रमथापि वा । यवान्नेन फलाहारैः शाकाहारैः पयोव्रतैः प्राणयात्रां प्रकुर्वीत यावत्प्राणाः स्वयं व्रजेत् । पर्यंकशायिनी नारी विधवा पातयेत्पतिं । तस्माद्भूशयनं कार्यं पतिसौख्यसमीहया । नैवांगोद्वर्तनं कार्यं स्त्रिया वि-

धवयाक्वचित् । गंधद्रव्यस्य संभोगो नैव कार्यस्तया पुनः
तर्पणं प्रत्यहं कार्यं भर्तुः कुशतिलोदकैः । तर्पणं पुत्र
पौत्राभावविषयं । विष्णोस्तु पूजनं कार्यं पतिबुद्ध्या नचा
न्यथा । पतिमेव सदा ध्यायेद्विष्णुरूपधरं परं । यद्यदिष्ट
तमं लोके यद्वस्यत्युः समीहितं । तत्तद्गुणवते देयं पति
प्रीणनकाम्यया । वैशाखे कार्तिके माघे विशेषनिय-
मं चरेत् । स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं मुहुः ।
एवंविधैश्च विविधै र्विधिस्थैर्नियमव्रतैः । वैशाखा
न्कार्तिकान्माघानेवमेवातिवाहयेत् । नाधिरोहेद
नड्वाहं प्राणैः कंठगतैरपि । कंचुकं न परीदध्यान्न वा
सो न विकृतं वसेत् । अपृष्ट्वा च सुतान्किंचिन्न कुर्यात्तु
तत्परा । एवं धर्म्मसमायुक्ता विधवापि पतिव्रता । पति
लोकानवाप्नोति न भवेत्क्वापि दुःखितेति ॥ इति मदन
पारिजाते मदनक्षितिपालदानजलरूढे । स्तवको द्वि-
तीयः आसीदामोदाकृष्टपंडितभ्रमरः ॥ इति पंडि-
तपारिजातकदारमल्लंत्यानिरुद्धराजीविराज
मानस्य श्रीमदनपालस्य निबंधे मदनपारिजाता
भिधेये द्वितीयस्तवकः ॥

अथ गृहस्थस्तवकानंतरं गृहस्थोपयोगित्वाद्द्वि
कमारभ्यते । तत्र विष्णुः । गृहमेधिनियत्योक्तं स्वर्गसा
धनमुत्तमं । ब्राह्मे मुहूर्ते चोत्थाय तत्सर्वं सम्यगाचरेत् ।

मनुरपि। ब्राह्मे मुहूर्त्ते बुध्येत धर्मार्थौ चानुचिंतयेत्। का-
यक्लेशांश्च तन्मूलान्वेदतत्त्वार्थमेव च। विष्णुपुराणे
मैत्रं प्रसाधनं स्नानं दन्तधावनमंजनं। पूर्वाह्न एव कुर्वी-
त देवतानां च पूजनं। मैत्रमित्र दैवत्यं मूत्रपुरीषोत्सर्गः
प्रसाधनं केशानां अंजनं सौवीरांजनं। ब्राह्ममुहूर्त्तल-
क्षणं ब्रह्मचारिप्रकरणेभिहितं। विष्णुः। उत्थायोत्था-
य बोधव्यं महद्भयमुपस्थितं। मरणव्याधिशोकानां किम-
द्य निपतिष्यति इति संचिंत्येष्टदेवतां स्मरेत् शयनादु-
त्थितो यस्तु कीर्त्तयेन्मधुसूदनं। कीर्त्तनात्तस्य पापानि
नाशमायांत्यशेषतः ॥ स्कन्दपुराणे ॥ अविमु-
क्तचरणयुगलं दक्षिणमूर्त्तेश्च कुक्कुटचतुष्कं स्मृत-
मपि वाराणस्यां निहंति दुःस्वप्नमशकुनं च ॥ का-
त्यायनः ॥ रोचनां चंदनं गंधं मृदंगं दर्पणं मणिं
गुरुमग्निं रविं पश्येन्नमस्येत्प्रातरेव हि। श्रोत्रियं सुभ-
गामग्निं गां नृपं धार्म्मिकं नरं। प्रातरुत्थाय यः पश्येत्स-
र्वापद्भ्यः प्रमुच्यते। मूत्रपुरीषोत्सर्गादिस्तु ब्रह्मचारिप्र-
करणेभिहितः ॥ अथ दंतधावनं ॥ तत्र यमः। मु-
खे पर्युषिते नित्यं भवेदप्रयतो नरः। तदार्द्रकाष्ठं शुष्कं
वा भक्षयेद्दंतधावनं। विष्णुः। कंटकी क्षीरवृक्षोत्थं द्वा-
दशांगुलमव्रणं। कनिष्ठिकाग्रवत्स्थूलं कूर्चाग्रं त्वंग-
पर्वकं। दंतकाष्ठस्याग्रं भक्षयित्वा प्रशिथिलावयवं

कर्त्तव्यमित्यर्थः । पर्वार्द्धकृतकूर्चकमित्यपिपाठः । यदि दंतकाष्ठं पर्वयुक्तं भवति तदा पर्वद्वयमध्यभागंछित्वा तत्रकूर्चकं शिथिलावयवं कर्त्तव्यमितितात्पर्यं । अथवा पर्वशब्देनांगुलीपर्वनिर्दिश्यते । पर्वार्द्धपरिमाणेन दंतकाष्ठस्याग्रं प्रशिथिलावयवं कर्त्तव्यमित्यर्थः । दंतधावनंचाग्रेण कर्त्तव्यं । तथाच कूर्मपुराणे । मध्यांगुल्यसमस्थौल्यं द्वादशांगुलसंमितं । सत्वचंदंतकाष्ठंस्यात्तदग्रेण तु धावयेत् । मनुः । तिक्तं कटु कषायं वा सुगंधं कंटकान्वितं । क्षीरवृक्षात्तथागुल्माद्भक्षयेदंतधावनं । कात्यायनः । उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः । परिजप्य च मंत्रेण भक्षयेद्दंतधावनं । मंत्रमाह विष्णुः । आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च । ब्रह्म प्रज्ञां च मेधां च त्वं नो धेहि वनस्पत इति । गर्गः । दशांगुलं तु विप्राणां क्षत्रियाणां नवांगुलं । अष्टांगुलं तु वैश्यानां इतरेषां षडंगुलं । चतुरंगुलमानं च नारीणां नात्र संशयः । विष्णुः । द्वादशांगुलकं विप्रे काष्ठमाहुर्मनीषिणः । अत्र विट्शूद्रजातीनां नव षट् चतुरंगुलं । एवं विकल्पः परिमाणे । तथान्योपि विशेषस्तेनैवोक्तः । कनिष्ठिकाग्रवत्स्थूलं पर्वार्धकृतकूर्चकं दंतधावनमुद्दिष्टमित्युक्त्वा सुसूक्ष्मं हीनदंतस्य समदंतस्य मध्यमं । स्थूलं विषमदंतस्य त्रिविधं दंतधावनं ।

गर्गः। प्राङ्मुखस्य धृतिः सौख्यं शारीरारोग्यमेव च।
दक्षिणेन तथा कष्टं पश्चिमेन पराजयः। उत्तरेण गवां-
नाशः स्त्रीणां परिजनस्य च। मार्कण्डेयः। उद-
ङ्मुखो वा कषायं तिक्तं कंटकमिति। उदङ्मुख ईशा-
नाभिमुख इत्यर्थः। अन्यथा गर्गवचनेन विरोधात्
अनेनैवाभिप्रायेण। कात्यायनः। पूर्वोत्तरे तु दि-
ग्भागे सर्वान्कामानवाप्नुयादिति। महाभारते। दं-
तधावनप्रकरणे। प्रक्षाल्य हस्तौ पादौ च मुखं च सु-
समाहितः। दक्षिणं बाहुमुद्धृत्य कृत्वा जानूनि रात-
तः। मनुः। प्रक्षाल्य दंत शुचौ देशे दंतधावनमुत्सृ-
जेत्। पतितेभिमुखे सम्यग्भोज्यमाप्नोत्यसंशयः।
यमः। आम्रपीलासबिल्वानामपामार्गशिरीषयोः। भक्षयेत्प्रातरुत्थाय वाग्यतो दंतधावनं।
पीलासश्चाम्रातकः। मार्कण्डेयोपि। प्रातर्भुक्त्वा च य-
तवाग्भक्षयेद्दंतधावनं। प्रक्षाल्य भक्षयेत्पूर्वं प्रक्षाल्यैव च
संत्यजेत्। नारदः। खदिरश्च करंजश्च करवीरकदंबयोः। स-
र्वे कंटकिनः पुण्याः क्षीरिणश्च यशस्विनः। जंबूतिंदुक-
चूताश्च कदंबो लोध्रचंपकाः। बदरीतिंदुकास्त्वेते प्रशस्ता
दंतधावने। कोविदारः करंजश्च कुटजश्चाक्षमालतीः। मा-
लोकश्च प्रियंगुश्च तमालः शाक एव च। शाकः शाकवृ-
क्षः शाकवन इति लोके प्रसिद्धः। आम्रातको रिमेदश्च प्रश-

स्तान्येपि ये द्रुमाः । वर्ज्यानि शाल्मलीपीलुभव्यकिंशुकतिंदुकाः । अरिष्टोक्षः पारिभद्रो गुग्गुलुस्तिन्तिडी तथा । आसने शयने याने पादुके दंतधावने । पालाशाश्वत्थकौटजौ सर्वकर्मसु कुत्सितौ । अभावे दंतकाष्ठानां निषिद्धायां तिथौ तथा । अपां द्वादशगंडूषैः पत्रैर्वा दंतधावनं । चतुर्दश्यष्टमी दर्शपौर्णिमासंक्रमेषु च । नंदासु च नवम्यां च दंतकाष्ठं विवर्जयेत् । श्राद्धे यज्ञे च नियते तथा प्रोषितभर्तृकाः । विष्णुः । प्रतिपद्दर्शषष्ठीषु चतुर्दश्यष्टमीषु च । नवम्यां भानुवारे च दंतकाष्ठं विवर्जयेत् । मरीचिः । नाद्यादजीर्णिवमथुकासश्वासज्वरार्दितः । तृष्णास्यपाकहृन्नेत्रशिरःकर्णामयी तथा । वृद्धयाज्ञवल्क्यः । दुष्टकालोष्टपाषाणैर्नखैरंगुलिभिस्तथा । मुक्त्वा चानामिकांगुष्ठौ वर्जयेद्दंतधावनं । वाराहपुराणे । अज्ञातपूर्वाणि न दंतकाष्ठान्यद्यान्न पत्रैश्च समन्वितानि । न युग्मपर्वाणि न पाटितानि न चोर्ध्वशुष्काणि विना त्वचा च । व्यासः । यो मोहात्स्नानवेलायां भक्षयेद्दंतधावनं । निराशास्तस्य गच्छंति देवताः पितृभिस्सह । एतच्च मध्याह्नस्नानविषयं । तथा च यमः । मध्याह्नस्नानवेलायां यो भक्षेद्दंतधावनं । निराशास्तस्य गच्छंति देवताः पितृभिः सहेति ॥ इति दंतधावनं ॥ अथ केशप्रसाधनादिमांगल्यविधिः ॥

॥ तत्र विष्णुपुराणे ॥ स्नातकश्च ततः कुर्यात्पुमान्के-
शप्रसाधनं । आदर्शाञ्जनमाङ्गल्यं दूर्वाद्यालम्भनानि
च । ब्रह्मपुराणे । स्वमात्मानं घृते पश्येद्यदीच्छेरजी-
वितं । प्रातःस्नानं ततः कृत्वा संक्षेपेण यथोदितं । सं-
ध्यां वापि तथा कुर्यादिति । प्रातःसंध्यासमनन्तरं । या-
ज्ञवल्क्यः । हुत्वाग्नीन्सूर्यदैवत्याञ्जपेन्मन्त्रान्समा-
हितः । वेदार्थानधिगच्छेच्च शास्त्राणि विविधानि च ।
प्रातःसंध्यावंदनानंतरमग्नीनाहवनीयादीनौपासना-
ग्निं वा विधिवद्धुत्वा सूर्यदैवत्यानुदुत्यं जातवेदसमित्या-
दिकाञ्जपेत् । प्रातःसंध्यादिकं ब्रह्मचारिस्तवके प्रपंचि-
तं । होमविधिस्तु गृहस्थस्तवके प्रपंचितः । नरसिंहपु-
राणे । दिवसस्याद्यभागे तु सर्वमेतत्समाचरेत् । दि-
वसस्याद्यभागे पूर्वाह्णस्याद्यभागे । दक्षः । द्वितीये-
च तथा भागे वेदाभ्यासो विधीयते । वेदस्वीकरणं पूर्वं
विचारोऽध्ययनं जपः । तद्दानं चैव शिष्येभ्यो वेदाभ्यासो
हि पंचधा । समित्पुष्पकुशादीनां स कालः समुदाहृतः
उपादानस्येति शेषः । द्वितीयभागे पूर्वाह्णस्य द्वितीय-
भागे ॥ अथ पोष्यवर्गचिंतादि ॥ तत्र दक्षः । तृतीये
च तथा भागे पोष्यवर्गस्य पोषणं । तृतीयो भागः पूर्वा-
ह्णस्यैव । पोष्यवर्गस्तु । माता गुरुः पिता भार्या प्रजा दी-
नः समाश्रितः । अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग उदा-

हृतः। याज्ञवल्क्यः। उपेयादीश्वरं चैव योगक्षेमार्थ
सिद्धये। ईश्वरमभिषेकादिगुणयुक्तं अन्यं वा श्रीम
तमकुत्सितं। अलब्धस्य प्रापणं योगः। लब्धस्य रक्ष
णं क्षेमः। अष्टांगहृदये। गंतव्यं राजकुलं द्रष्टव्या-
राजपूजिता लोकाः। यद्यपि न भवंत्यर्था स्तथाप्यनर्था
निवर्त्तंते। विष्णुपुराणे। ततः स्ववर्णधर्मेण वृत्त्य-
र्थं च धनार्जनं। कुर्वीत श्राद्धकर्मापि यजेत पृथिवीपते
सोमसंस्था हविःसंस्थाः पाकसंस्थाश्च संस्थिताः। धनाय-
त्ता मनुष्याणां यतेत च धनार्ज्जने। नारदः। धनमूलाः
क्रियाः सर्वा यत्नस्तस्यार्ज्जने मतः। रक्षणं वर्द्धनं भोग
इति तत्र विधिः क्रमात्। महाभारते। धर्मेणार्थः समा
हार्यो धर्मलब्धं त्रिसाधनं। कर्त्तव्यं धर्मपरमं मानवेन प्र
यत्नतः। एकेनांशेन धर्मस्तु कर्त्तव्यो भूतिमिच्छता।
एकेनांशेन कामस्तु एकमंशं विवर्द्धयेत्। मार्कंडेयः
पादेन तस्य पारत्र्यं कुर्यात्संचयमात्मवान्। अर्द्धेन चा
त्मभरणं नित्यं नैमित्तिकान्वितं। पादं च पार्थमर्थस्य मू
लभूतं विवर्द्धयेत्। नारदः। तत्पुनस्त्रिविधं ज्ञेयं शुद्धं
शबलमेव च। कृष्णं तस्य तु विज्ञेयो विभागः सप्तधा पु
नः। श्रुतशौर्यतपःकन्याशिष्ययाज्यान्वयागतं। शब-
लं समुदाहृतं। पार्श्विकं चैव चौर्यार्त्तिप्रतिरूपकसाहसैः
व्याजेनोपार्ज्जितं यच्च तत्कृष्णं समुदाहृतं। यथाविधेन द्र-

न्येन यत्किंचित्कुरुते नरः। तथाविधमवाप्नोति स फलं प्रेत्य चेह च। श्रुतेन अध्ययनेन। शौर्येण जयादिना। तपसा जपहोमदेवतार्चनादिना। कन्यागतं कन्यया सहागतं श्वशुरादेर्लब्धं। शिष्यागतं गुरुदक्षिणादि। याज्यागतं। आर्त्विज्यलब्धं अन्वयागतं दायाद्यलब्धं उदयः फलं। तद्विधः तादृशः शुद्ध इत्यर्थः। अनुवृत्तिः सेवा। पार्श्विकं उत्कोचादिलब्धं आर्त्तिः पीडा। प्रतिरूपकं ॥ कृत्रिमधातुरत्नादि। साहसं पोतगिर्यारोहणादि। व्याजेन घृतव्याजेन तैलालादिकं दत्वा यदुपार्ज्जितं। भारद्वाजः। तत्पुनर्द्वादशविधं प्रतिवर्णाश्रयाश्रितं। साधारणं स्यात्त्रिविधं विदुः तच्चक्रमागतं। प्रतिदानं तथैवात्र प्राप्तं सह भार्यया। अविशेषेण वर्णानां सर्वेषां त्रिविधं धनं वैशेषिकं धनं विद्यात् ब्राह्मणस्य त्रिलक्षणं प्रतिग्रहेण यल्लब्धं याज्यतः शिष्यतस्तथा। त्रिविधं क्षत्रियस्यापि प्राहुर्वैशेषिकं धनं। युद्धोपलब्धं कराच्च दंडश्च व्यवहारतः। कारः। वैशेषिकं धनं ज्ञेयं वैश्यस्यापि त्रिलक्षणं। कृषिगोरक्षवाणिज्यैः शूद्रस्यापि त्वनुग्रहात्। इतरवर्णानुज्ञया शूद्रस्यापि कृषिगोरक्षवाणिज्यैर्वैशेषिकं धनं भवतीत्यर्थः। सर्वेषामेव वर्णानामेष धर्मो धनागमः। विपर्ययादधर्म्मः स्यान्न चेदापद्गरीयसी॥ अथ प्रसंगाद्वर्णवृत्तिरभिधीयते। तत्र

मनुः । अद्रोहेण च भूतानामल्पद्रोहेण वा पुनः । या वृ-
त्तिस्तां समास्थाय विप्रो जीवेदनापदि ॥ याज्ञवल्क्यः । इ-
ज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च । प्रतिग्रहोऽधिको विप्रे
याजनाध्यापने तथा । अत्र चकारो द्विरावर्त्त्यते ब्राह्मणस्यै-
व प्रतिग्रहयाजनाध्ययनानि भवंति नान्यस्य । अत एव वि-
प्र इति विषयसप्तमी । अनन्यत्र भावश्च विषयः । ब्राह्मण-
स्यैव प्रतिग्रहादित्रयं वृत्तिरित्यर्थः । यत्तु गौतमेनोक्तं
आपत्कल्पो ब्राह्मणस्याब्राह्मणाद्विद्योपयोगोऽनुग-
मनं शुश्रूषा चासमाप्तेः समाप्ते तु ब्राह्मणो गुरुरिति तत्तु
क्षत्रियवैश्ययोर्ब्राह्मणापेक्षितयोरध्यापनमात्रकर्तृत्वा-
भ्यनुज्ञानं न तु वृत्तित्वेनाभिधानं । अनुगमनं शुश्रूषा-
नुगमनमेव शुश्रूषेत्यर्थः । मनुः । षण्णां तु कर्म्मणाम-
स्य त्रीणि कर्म्माणि जीविका । याजनाध्यापने चैव विशु-
द्धाच्च प्रतिग्रहः । देवलः । द्विविधो गृहस्थो यायावरः शा-
लीनश्च तयोर्यायावरो याजनाध्यापनेप्रतिग्रहरिक्थच-
यवर्ज्जनात् । शालीनस्तु प्रेष्यचतुष्पद्धनधान्ययुक्तः
शालायां भवः लोकानुवर्त्ती । स चतुर्विधः । यथाह म-
नुः । कुशूलधान्यको वा स्यात्कुंभीधान्यक एव वा । त्र्य-
हैहिको वापि भवेदश्वस्तनिक एव वा । चतुर्णामपि चैते-
षां द्विजानां गृहमेधिनां । ज्यायान्परः परो ज्ञेयो धर्म्मतो-
लोकजित्तमः । षट्कर्म्मको भवेत्तेषां त्रिभिरन्यः प्रवर्त्तते ।

द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवति । एकः कुसूल
धान्यः षट्कर्मा उंछशिलायाचितयाचितकृषिवाणि-
ज्यैः अन्यः कुंभीधान्यस्त्रिभिः उंछशिलायाचितैः अपर
स्त्र्यहैहिको द्वाभ्यामुंछशिलाभ्यां । चतुर्थस्त्वश्वस्तनि
को ब्रह्मसत्रेण ब्रह्मलोकप्राप्तिहेतुत्वेन सत्रयागतुल्यफ-
लेनोंछेन जीवति । मनुः । ऋतामृताभ्यां जीवेत मृतेन प्र
मृतेन वा । सत्यानृताभ्यां जीवेत न श्ववृत्त्या कदाचन । ऋ
तमुंछशिलं ज्ञेयममृतं स्यादयाचितं । मृतं तु याचितं भैक्ष्यं
प्रमृतं कर्षणं स्मृतं । सत्यानृतं तु वाणिज्यं तेन चैवोपजीव्यते
सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्ज्जयेत् ।। अथापदि
प्रतिग्रहवृत्तिः ।। तत्र याज्ञवल्क्यः । राजांतेवासिया-
ज्येभ्यः सीदन्निच्छेद्धनं क्षुधा । दंतिहैतुकपाखंडिबकवृत्तीं
श्च वर्ज्जयेत् । राजा न्यायपरः । शिष्यो यथोक्तलक्षणः ।
याज्यः याजनार्हस्त्रैवर्णिकः । पूर्णस्वः । एतैरेव गुणैर्युक्तं
धर्माज्जितधनं तथा । याजयेत्तु सदा विप्रो ग्राह्यस्तस्मात्प्र
तिग्रहः । एतैरिति जन्मकर्मादिभिः शुद्धः । मनुः । राजतो
धनमन्विच्छेत्संसीदन्स्नातकः क्षुधा । याज्यांतेवासिनो
र्वापि न त्वन्यत इति स्थितिः । न त्वन्यत इत्येषां सद्भावे
। व्यासः । द्विजातिभ्यो धनं लिप्सेच्छस्तेभ्यो द्विजसत्तमः
अपि वा द्विजमात्रेभ्यो न शूद्रात्तु कथंचन । द्विजमात्रेभ्यद्
तिगुणाधर्मकस्य कृतघ्नस्य रक्षार्थं ग्रासतोमुचीन् ।

अशुचीन् कृतापराधात। मेध्यमेव धनं प्राहुस्तीक्ष्णस्या
पि महीपतेः। शुचीनामशुचीनां तु सन्निपातो यथांभसां।
समुद्रे समतां याति तद्वद्राज्ञो धनागमः। यथाग्नौ संस्थिते
दोषे शुद्धिमायाति कांचनं। एवं धनागमाः सर्व्वे शुद्धिमा
यांति राजनि। अशुचिर्वचनाद्यस्य शुचिर्भवति पूरुषः।
शुचिश्चैवाशुचिः सद्यः कथं राजन दैवतं। विदुर्य एव देव
त्वं राज्ञो ह्यमिततेजसः। तस्य ते प्रतिगृह्णंतो न लिप्यंते-
कथंचन। देवत्वं अष्टलोकपालरूपेण। मनुः। नरा-
ज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः। सूनाचक्रध्वजव-
तां वेश्येनैव च जीवतां। न राज्ञ इति लोभतत्परप्रजापी
डकस्य। अराजन्यप्रसूतित इति हीनजातिप्रसूतस्य।
यो राज्ञः प्रतिगृह्णाति लुब्धस्योच्छास्त्रवर्त्तिनः। सपर्या
येण यातीमान्नरकानेकविंशति। यमश्च। अराजन्य
प्रसूतस्य राज्ञः स्वच्छंदवर्त्तिनः। घोरः प्रतिग्रहस्तस्य मध्वा
स्वादो विषोपमः। तथैव राजमहिषीराजामात्यपुरोहिताः
पापेनार्थेन संयुक्ताः सर्वे ते राजधर्म्मिणः। याज्ञवल्क्यः
प्रतिग्रहे सूनिचक्रिध्वजिवेश्यानराधिपाः। दुष्टा दशगुणं
पूर्वात्पूर्वादेते यथोत्तरं। हारीतः। दशसूनासहस्राणि
अह्ना राजा करोति च। तान्येव कुरुते राज्ञो घोरस्तस्य प्रति
ग्रहः। अर्द्धेन तु ततो मात्याः सेनानी दंडनायकौ। ततो
ऽर्द्धं तदर्द्धं साश्रितोपाश्रितेषु च। यदि यदा कथंचि-

दैतेभ्यो गृह्णातीत्यत्र बृहस्पतिः। असतोपि समादाय साधु-
भ्यः संप्रयच्छति। धनस्वामिनमात्मानं संतारयति दुस्तरा-
त्। अथ प्रतिग्रहविषये आपदनापत्साधारणं किंचिदु-
च्यते। तत्र मनुः। एकोदकं मूलफलमन्नमभ्युद्यतं च
यत्। सर्वतः प्रतिगृह्णीयन्मध्वथाभयदक्षिणाम्। अत्र-
चाभयदक्षिणाव्यतिरिक्तैरभ्युद्यतमिति संबध्यते। अ-
भ्युद्यतमप्रार्थ्य दत्तं। सर्वतः शूद्रादपि। अयं चोपदेशः
प्रतिग्रहप्रवृत्तस्यैव न तु निवृत्तस्य। अभयदक्षिणां तु
म्लेच्छादिभ्योपि। शय्यासनं कुशान् गंधान्पयः पुष्पं म-
णीन्दधि। धानामत्स्यानयो मांसं शाकं चैव न निर्णु-
देत्। मणीन् विषादिनिवारकान्। धानाः लाजाः। न-
निर्णुदेन्न प्रत्याख्यायात्। तिलधेनुर्गजो वाजी प्रेतान्न-
मजिनं मणिः। सुरभी स्तूयमाना च घोराः सप्त प्रतिग्रहाः
प्रतिग्रहे किंगुणविशिष्टोऽधिकारी कोवनित्याकांक्षायां।
निषेधमुखेनानधिकारिणमर्थादधिकारिणं चाह।।
याज्ञवल्क्यः। विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रति-
ग्रहः। गृह्णन्प्रदातारमधो नयत्यात्मानमेव च। मनुः।
हिरण्यं भूमिमश्वं वाऽऽन्नं वासस्तिलान्घृतं। अविद्वा-
न्प्रतिगृह्णानो भस्मीभवति दारुवत्। याज्ञवल्क्यः।
प्रतिग्रहसमर्थोपि नादत्ते यः प्रतिग्रहं। ये लोका दान-
शीलानां स तानाप्नोति पुष्कलान्। मनुः। वृद्धौ च मा-

तापितरौ साध्वी भार्या सुतः शिशुः। अप्यकार्यशतं कृत्वा भर्त्तव्यामनुरब्रवीत्॥ अथ क्षत्रीयवृत्तिः तत्र हारीतः। धनुर्वेदव्रत स्नान अध्ययजनदानधर्मशिष्टपालनाशिष्टनिग्रहवान्। अभिजित षड्गुणवृत्तिर्वेदव्रतैकदेशीति। अभिजितानां शत्रौ भूम्यादीनां षड्गुणग्रहणं वेदव्रतैकदेशेनैव कृतार्थः। याज्ञवल्क्यः। ग्रहाधीना नरेंद्राणामुच्छ्रयाः पतनानि च। भावाभावौ च जगत स्मात्पूज्यतमा ग्रहाः। महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः। विनीतः सत्वसंपन्नः कुलीनः सत्यवाक्शुचिः। स्थूललक्षः बहुदेयार्थदर्शी। बहुप्रद इति यावत्। अदीर्घसूत्रः स्मृतिमानक्षुद्रोपरुषस्तथा। धार्म्मिकोव्यसनश्चैव प्राज्ञः शूरो रहस्यवित्। अदीर्घसूत्रः। आवश्यककर्मणामारंभे आरब्धानां च परिसमापने सो न विलंबते सः। रहस्यवित्। गोपनीयार्थगोपननिपुणः स्वरंध्रगोप्ता न्वीक्षिक्यां दंडनीत्यां तथैव च। विनीतस्त्वथ वार्त्तायां त्रय्यां चैव नराधिपः। आन्वीक्षिकी तर्कविद्या आत्मविद्या तथैव च। तथा च मनुः। त्रिविद्येभ्यस्त्रयींविद्यां दंडनीतिं च तद्विदः। आन्वीक्षिकीं चात्मविद्यां वार्त्तारंभांश्च लोकतः। दंडनीतिरर्थशास्त्रं वार्त्ता कृषिवाणिज्य पशुपालनरूपा। त्रयी ऋग्यजुःसामरूपा। समंत्रिणस्तु कुर्वीत प्राज्ञान्मौलान्स्थिरान् शुचीन्। तैः

सार्द्धं चिंतयेद्राज्यं विप्रेणाथ ततः स्वयं। मौलान् राजवंश
परंपरापातान्विप्रेण पुरोहितेन पुरोहितं च कुर्वीत दै
वज्ञमुदितोदितं। दंडनीत्यां च कुशलमथर्वांगिरसे तथा
उदितोदितं शास्त्रोदितैर्विद्याभिरुदितं समृद्धं। श्रौतस्मा
र्तक्रियाहेतोर्वृणुयादेव चर्त्विजः यज्ञांश्चैव प्रकुर्वीत वि
धिवद्भूरिदक्षिणान्। भोगांश्च दद्याद्विप्रेभ्यो वसूनि वि-
विधानि च। अक्षयोयं निधी राज्ञां यद्विप्रेषूपपादितं। भो
गान्सुखसाधनानि अस्कन्नमव्यथं चैव प्रायश्चित्तैरदूषि
तं। अग्नेः सकाशाद्धि प्राग्नौ हुतं श्रेष्ठमिहोच्यते। अस्कं
न्नं स्वरणरहितं। अव्यथं पशुहिंसारहितं। अलब्धमी-
हेद्धर्मेण लब्धं यत्नेन पालयेत्। पालितं वर्द्धयेन्नीत्या
वृद्धं पात्रेषु निक्षिपेत्। दत्वा भूमिं निबंधं वा कृत्वा लेख्यं
तु कारयेत्। स्वदत्तां परदत्तां वा यो हरेत वसुंधरां। षष्टि-
वर्षसहस्राणि विष्ठायां जायते कृमिरिति। ब्रह्मपुरा-
णे स्मरणात्। पटे वा ताम्रपट्टे वा स्वमुद्रोपरिचिह्नि
तं। अभिलेख्यात्मनो वंश्यनात्मानं च महीपतिः। प्र-
तिग्रहपरीमाणं दानछेदोपवर्णनं। स्वहस्तकालसं-
पन्नं शासनं कारयेत्स्थिरं। आत्मानं च। चशब्दात्प्र
तिग्रहीतारमपि। प्रतिगृह्यत इति प्रतिग्रहो निबंधः।
तस्य परिमाणं दीयत इति दानं क्षेत्रादि तस्य छेदः।
छिद्यत इति छेदो नद्यादि। नातः परतरो धर्मो नृपाणां

यद्रणार्ज्जितं विप्रेभ्यो दीयते द्रव्यं प्रजाभ्यश्चाभयं स-
दा। यस्माहवेषु वध्यंते भूम्यर्थमपराङ्मुखाः। अकू-
टैरायुधैर्यांति ते स्वर्गं योगिनो यथा। यदा निकृत्तु तु-
ल्यानि भग्नेष्व विनिवर्त्तिनां। रामुत्कृतमादत्तेहतानां
विपलायिनां। तथाहं वादिनं क्लीवं निर्हेतिं परमंगतं
न हन्याद्विनिवृत्तं च युद्धप्रेक्षणकादिकं। कृतरक्षः
समुत्थाय पश्येदायव्ययौ स्वयं। व्यवहारांस्ततो दृष्ट्वा
स्नात्वा भुंजीत कामतः। प्रतिदिनं प्रातःकाले पुरस्या
त्मनश्च रक्षां विधाय स्वयमेवायव्ययौ पश्येत्। ततो
व्यवहारान् दृष्ट्वा मध्याह्नकाले स्नात्वा यथारुचि भुंजी
त। हिरण्यं व्यापृतानीतं भांडागारेषु निक्षिपेत्। पश्ये
च्चारांस्ततो दूतान्प्रेषयेन्मंत्रिसंगतः। व्यापृता हिरण्या
द्यानयने नियुक्ताः। ततः स्वैरविहारी स्यान्मंत्रिभिर्वा
समाहितः। बलानां दर्शनं कृत्वा सेनान्या सहं चिंत-
येत्। ततः अपराह्ने स्वैरविहारोंऽतःपुरे। तथा च म-
नुः। भुक्तवान् विहरेच्चैव स्त्रीभिरंतःपुरे सह। विभुं
जीत पठेत्स्वाध्यायमेव च। संध्यां सायं संध्यां गीतनृ
त्यैः कंचित्कालं नीत्वा भुंजीत। स्वाध्यायमविस्मर-
णार्थं पठेत्। संविशेत्तूर्यघोषेण प्रतिबुध्येत्तथैव च
शास्त्राणि चिंतयेद्बुध्या सर्वकर्त्तव्यतास्तथा। संवि-
शेत्स्वप्यात्। ब्राह्मणेषु क्षमी स्निग्धेष्वजिह्मः क्रोध

नोरिषु। स्याद्राजा भृत्यवर्गेच प्रजासु च यथा पिता। पु-
ण्यात्षड्भागमादत्ते न्यायेन परिपालयन्। सर्वदाना-
धिकं यस्मात्प्रजानां परिपालनं। अन्यायेन नृपो राष्ट्रा-
त्स्वकोशं योऽभिवर्द्धयेत्। सोऽचिराद्विगतश्रीको नाशमे-
ति सबांधवः। प्रजापीडनसंतापात्समुद्भूतो हुताशनः
राज्ञः कुलं श्रियं प्राणान्नादग्ध्वा विनिवर्त्तते। आह
विष्णुः। निधिं ब्राह्मणोऽलब्ध्वा सर्वमादद्यात्। क्षत्रि-
यः चतुर्थमंशं राज्ञे दद्याच्चतुर्थमंशं ब्राह्मणेभ्यः अर्द्ध-
मादद्यात् वैश्यश्चतुर्थमंशं राज्ञे दद्यात्। ब्राह्मणेभ्यो-
ऽर्द्धमंशमादद्यात्। स्वनिहिताद्राज्ञे ब्राह्मणवर्ज्जं द्वा-
दशमंशं दद्युः। आह वशिष्ठः। अज्ञातमानं वित्तं-
योऽधिगच्छेद्राजा तद्धरेदधिगंतुः षष्ठमंशं प्रदाय। ब्रा-
ह्मणश्चेदधिगच्छेत्षट्कर्म्मसुवर्त्तमानो न राजा हरेत्।
आह मनुः। प्रनष्टस्वामिकं रिक्थं राजा त्र्यब्दं निधा-
पयेत्। अर्वाक्त्र्यब्दाद्धरेत्स्वामी परेण नृपतिर्हरेत्।
परेण नृपतेर्भोगानुज्ञामात्रमिदमिति व्याचक्षते।
स्वाम्यागमने तु दर्पणमेव। ममेदमिति यो ब्रूयात्सोऽनि-
योज्यो यथाविधि। संवाद्य रूपसंख्यादीन्स्वामी च द्रव्य-
मर्हति। आददीताथ षड्भागं प्रनष्टाधिगमे नृपः दश-
मं द्वादशं वापि सतां धर्ममनुस्मरन्। ममेदमिति यो ब्रू-
यान्निधिं सत्येन मानवः। तस्याददीत षड्भागं राजा द्वा

दृष्टमेव वा। विद्वांस्तु ब्राह्मणो दृष्ट्वा पूर्वोपनिहितं निधिं अशेषमप्याददीत सर्वस्याधिपतिर्हि सः। यं तु पश्येन्निधिं राजा पुराणं निहितं क्षितौ। तस्माद्द्विजेभ्यो दत्त्वार्द्धं कोशे प्रवेशयेत्। आह नारदः। परेण निहितं लब्ध्वा राजन्युपहरेन्निधिं। राजगामी निधिः सर्वः सर्वेषां ब्राह्मणादृते। ब्राह्मणोपि निधिं लब्ध्वा क्षिप्रं राज्ञे निवेदयेत्। तेन दत्तं तु भुंजीत स्तेनः स्यादनिवेदयन्॥

अथ वैश्यवृत्तिः॥ मनुः। वैश्यस्तु कृतसंस्कारः कृतदारपरिग्रहः। वार्त्तायां नित्ययुक्तः स्यात् पशूनां चैव रक्षणे। मणिमुक्ताप्रवालानां लोहानां तांतवस्य च। लोहानां धातूनां। गंधानां च रसानां च विद्यादर्थबलाबलं। बीजोप्तिविधियुक्तः स्यात् क्षेत्रबीजगुणस्य च। मानयोगांश्च जानीयात्तुलायोगांश्च सर्वशः। सारासारं च भांडानां देशानां च गुणागुणं। भांडानां विक्रेयद्रव्याणां लाभालाभावापणानां पशूनां परिवर्द्धनं। भृत्यानां च भृतिं विद्यात् भाषाश्च विनिधानृणां। द्रव्याणां स्थानयोगांश्च क्रयविक्रयमेव च। धर्मेणाद्रिद्रव्यवृद्धौ आतिष्ठेद्यत्नमुत्तमं। विद्याच्च सर्वभूतानामन्नमेव प्रयत्नतः। कालिकापुराणे। कृषिगोरक्षवाणिज्यमेतद्वैश्यस्य संमतं। तथाप्यनडुहस्तुरमाभ्यां कृषिं नैव समाचरेत्। द्विगवाभ्यां द्विषड्वाभ्यां महाराष्ट्रमा

गात्तः। द्वौ द्वौ योज्यां तरे चैकं कारयेद्धर्मतो द्विजः। पि-
गयाकतृगा तोयं तु तेषां यत्नात्सदार्पयेत्। धूमकंडू-
यनं चैव कृत्वैवं कारयेत्ततः। वैणावीमपि भूमिं तु श्वे-
धोमूत्रगसायनं च। कुर्वन्नेवं न सीदेत कृषिं वैश्यो महा
मुने। राज्ञां षड्भागमुत्सृज्य पंचमं कर्षकस्य च। शिल्पि
नः प्रकृतीश्चैव दीनां धांस्तर्प्ययेत्ततः। शेषमात्मनि युं
जीत खलक्षेत्रे ध्वयं विधिः। हारीतः। अष्टागवं धर्महलं
षड्गवं जीविकार्थिनां। चतुर्गवं नृशंसानां द्विगवं न सीदे
त कृषिं वैश्यो महामुने। राज्ञां षड्भागमुत्सृज्य पंच च ब्रह्मवा
दिनां। बालानां दमनं चैव वाहनं च न शस्यते। वृद्धा
नां दुर्बलानां च प्रजापति वचो यथा। पुंस्त्वोपघातनं
नासौ वाहानां कारयेत्ततः। वृद्धं युग्मेन युंजीत जीर्णं व्या
धितमेव च। अथ कुसीदं। तत्र याज्ञवल्क्यः। अशी
तिभागो वृद्धिः स्यान्मासि मासि सबंधके। वर्णक्रमाच्छ
तं द्वि त्रि चतुः पंचकमन्यथा। अन्यथेति अबंधे। मनुः
नातिसांवत्सरीं वृद्धिं नाभीष्टां तु पुनर्हरेत्। चक्रवृद्धिः
कारिका च कापिका कालिका च या। याज्ञवल्क्यः।
वृद्धेर्वृद्धिश्चक्रवृद्धिः प्रतिमासं तु कालिका। इच्छाकृता
कारिका स्यात्कायिका कायकर्मणा। बृहस्पतिः। व-
हवो वर्त्तनोपायाः ऋषिभिः परिकीर्त्तिताः। सर्वेषामं-
पि चैतेषां कुसीदमधिकं विदुः। अनावृष्ट्या राजभयान्मू-

पकारार्थे रूपद्रव्यैः । कृष्यादिके भवेद्धानिः सा कुसीदेन विद्यते ॥ अथ शूद्रवृत्तिः ॥ तत्र मनुः । विप्राणां वेदविदुषां गृहस्थानां यशस्विनां । शुश्रूषैव तु शूद्रस्य धर्मो नैःश्रेयसः परः । बृहस्पतिः । शौचं ब्राह्मणशुश्रूषा सत्यमक्रोध एव च । शूद्रकर्म तथा मंत्रो नमस्कारोस्य चोदितः । पराशरः । शूद्रस्य द्विजशुश्रूषा प्रथमं धर्मलक्षणं । यदन्यत्कुरुते किंचित्तद्भवेत्तस्य निःफलं । द्विजशुश्रूषा त्रिवर्णशुश्रूषा । तस्य निष्फलमिति । द्विजसेवाया विरोधि यदन्यत्कुरुते तन्निरर्थकमित्यर्थः । गौतमः । चतुर्थो वर्ण एकजातिस्तस्यापि सत्यमक्रोधः शौचमाचमनार्थे पाणिपादक्षालनमेके श्राद्धकर्म भृत्यभरणं स्वदारवृत्तिः परिचर्या चेतरेषामेभ्यो वृत्तिं लिप्सेत । इतरेषां द्विजातीनां । याज्ञवल्क्यः । भार्यारतिः शुचिर्भृत्यभर्ता श्राद्धक्रियापरः । नमस्कारेण मंत्रेण पंचयज्ञान्न हापयेत् । नमइत्येतावानेव मंत्रः । देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वधायै स्वाहायै नित्यमेव नमो नमः । इति वा मंत्रः । नन्वनग्नेः शूद्रस्य कथमग्निसाध्यकर्माधिकारः । विवाहाग्नाविति चेत् । न शूद्रस्य विवाहहोमाभावात् । न ह्यमंत्रकोस्ति होमः नच शूद्रो मंत्रवान् । नच नमस्कारमंत्रेणैव मंत्रवत्तेति वाच्यं । तस्य पंचयज्ञेष्वेव विहितत्वात् । तस्माद-

ग्निसाध्यकर्म्मसु वक्तव्यो स्याधिकारहेतुः। उच्यते। अ-
नग्नेरपि शूद्रस्य लौकिकेग्नौ वैश्वदेवादीनि कर्माणि का-
र्याणि तं प्रति साक्षाद्विधानात्। निषादस्थपतीष्टिवत्
किंच द्विजानामपि नविवाहाग्नौ नियतं वैश्वदेवकर्म्म कि-
मुत शूद्रस्य। एवंच शूद्रस्य यत्रयत्र होमविधिस्तत्र तत्र
लौकिकाग्नावेव मंत्राणां विधानेच नमस्कारमंत्र एवे-
ति सिद्धं॥ अथापद्वृत्तिः॥ तत्र मनुः। अजीवंस्तु य-
थोक्तेन ब्राह्मणः स्वेन कर्मणा। जीवेत क्षत्रियधर्म्मेण
सह्यस्य प्रत्यनंतरः। उभाभ्यामप्यजीवंस्तु कथंस्यादिति
चेद्भवेत्। कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकां।
वैश्यवृत्त्यापि जीवतो विक्रेयमाह स एव। सर्वान्रसा-
नपोहेत कृतान्नंच तिलैः सह। अपोहेत वर्जयेत् न वि-
क्रीणीतेत्यर्थः। अपोहेतेति सर्वत्रानुषज्यते। अश्मा-
नो लवणंचैव पशवो येच मानुषाः। सर्वंच तांतवं रक्तं-
शाणक्षौमाविकानि च। अपिचेत्स्युररक्तानि फल-
मूले तथौषधीः। अपः शस्त्रं विषं मांसं सोमं गंधांश्च सर्व-
शः। क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान्। आर-
ण्यांश्च पशून्सर्वान्दंष्ट्रिणश्च वयांसि च। मद्यं नीलंच
लाक्षांच द्विशफैकशफांस्तथा। अत्र रसग्रहणेनैव
लवणस्यापि ग्रहणे सिद्धे पुनर्ग्रहणं दोषाधिक्यप्र-
तिपादनार्थं। एतेनान्यदपि पुनरुक्तं व्याख्यातं। क्षौद्रं

मधुकल्क-सिक्थकं। माक्षिकस्य मधुशब्देनैवोपा-
दानात्। सद्यः पतति मांसेन लाक्षया लवणेन च। त्र्य
हेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात्। इतरेषां तु
पण्यानां विक्रयादिह कामतः। ब्राह्मणः सप्तरात्रे-
ण वैश्यः भावं निगच्छति। रसा रसैर्निमातव्या नत्वे
व लवणं रसैः। कृतान्नं चाकृतान्नेन तिला धान्येन
तत्समाः। निमातव्याः परिवर्त्तनीयाः। जीवेदेतेन रा
जन्यः। सर्वेणाप्यनयं गतः। नत्वेव ज्यायसीं वृत्तिम
भिमन्येत कर्हिचित्। एतेन पूर्वोक्तेन। अनयमापत
वैश्योजीवन्स्वधर्मेण शूद्रवृत्त्यापि वर्त्तयेत्। अश
क्नुवंस्तु शुश्रूषां शूद्रः कर्तुं द्विजन्मनां। पुत्रदारात्ययं
प्राप्तो जीवेत्कारुककर्म्मभिः। यैः कर्मभिः प्रचरितैः
शुश्रूष्यन्ते द्विजातयः। तानिकारुककर्माणि शिल्पा-
नि विविधानि च। कुर्वीतेति शेषः। आपद्यपीतरवृत्ति-
भ्योपि स्ववृत्तिरेव ब्राह्मणस्य ज्यायसीत्याह मनुरेव
वरं स्वधर्म्मो विगुणः परधर्मात्स्वनुष्ठितात्। परधर्मे
णजीवन्हि सद्यः पतति जातितः। वैश्यवृत्तिमनाति
ष्ठन्ब्राह्मणः स्वे पथि स्थितः। अवृत्तिकर्षितः सीदन्नि
मं धर्म्मं समाचरेत्। सर्वतः प्रतिगृह्णीयाद्ब्राह्मणस्त्व
नयंगतः। नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रतिग्र-
हात्। दोषो भवति विप्राणां ज्वलनांबुसमा हिते ॥

तथा। जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः।
आकाशमिव पंकेन न स पापेन लिप्यते। तथार्यवा-
दोपि। क्षुधार्त्तश्चात्तुमभ्यागाद्विश्वामित्रः श्वजाघ-
नीं। चंडालहस्तादादाय धर्म्माधर्म्मविचक्षणः।
श्वजाघनी श्वश्रोणिः। आपद्यप्यत्यंतागत्या आ-
वश्यकश्यकस्य कर्म्मणः। संपत्त्यर्थं चौर्यमपि का-
च नानुजाति। वानस्पत्यं मूलफलं दार्वग्न्यर्थं तथैव
च। तृणं च गोभ्यो ग्रासार्थं हर्त्तव्यं मनुरब्रवीत्। वान
स्पत्यं पत्रपुष्पादि। द्विजोध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च
मूलके। आददानः परक्षेत्रान्न दंडं दातुमर्हति। तथै
व सप्तमे भक्ते भक्तानि षडनश्नता। अश्वस्तनविधा-
नेन हर्त्तव्यं हीनकर्म्मणः। ब्राह्मणव्यतिरिक्तश्च क्ष-
त्रियो हीनकर्म्मेत्यभिधीयते। उत्कृष्टं वायकृष्टं च त-
योः कर्म्म न विद्यते। मध्यमे कर्मणी हित्वा सर्वसाधार-
णे हि ते। तयोर्ब्राह्मणशूद्रयोरुत्कृष्टं ब्राह्मणकर्म्म
अपकृष्टं शूद्रकर्मं न विद्यते। मध्यमे कर्म्मणी क्षत्रवै
श्यकर्म्मणी सर्ववर्णसाधारणे इत्यर्थः। एवमापदं-
निस्तीर्य प्रायश्चित्तं कृत्वा स्वमार्गनिरतो भवेत्। तथा
च याज्ञवल्क्यः। निस्तीर्य तामथात्मानं पावयि-
त्वा पथि न्यसेदिति। तामापदं। पावयित्वा प्रायश्चि-
त्तैः पथि स्ववर्णधर्म्मे। स्ववर्णधर्मनिरतानां फल-

साह। पैठीनसिः। ब्राह्मणस्य प्राजापत्यमैंद्रं पदं क्षत्रि-
यस्य मारुतं वैश्यस्य गांधर्वं शूद्रस्य स्वस्थानं व्रजं-
ति ते। स्वे स्वे कर्म्मण्यभिरताश्चेव इति ॥ इति वर्णा-
वृत्तिप्रकरणं ॥ अथ प्रासंगिकं परिसमाप्य प्रकृत-
मनुसरामः ॥ तत्र मध्याह्नस्नानविधिः ॥ तत्रा-
दौ तावत्प्ररोचनार्थं स्नानप्रशंसा। योगयाज्ञव-
ल्क्यः। अगम्यागमनात्स्तेयात्पापेभ्यश्च प्रतिग्र-
हात्। रहस्याचरितात्पापान्मुच्यते स्नानमाचरन्। मनः
प्रसादजननं रूपसौभाग्यवर्द्धनं। शोकदुःखापहं स्ना-
नं मोक्षदं ह्लादनं तथा। स्नानभेदानाह। दक्षः। स्ना-
नं तु द्विविधं प्रोक्तं गौणमुख्यप्रभेदतः। तयोस्तु वा-
रुणं मुख्यं तत्पुनः षड्विधं भवेत्। नित्यं नैमित्तिकं-
काम्यं क्रियांगं मलकर्षणं। क्रियास्नानं तथा षष्ठं-
षोढा स्नानं प्रकीर्त्तितं। एतल्लक्षणान्यपि स एवाह।
अस्नातस्तु पुमान्नार्हो जप्याग्निहवनादिषु। प्रातः
स्नानं तदर्थं तु नित्यस्नानं प्रकीर्त्तितं। प्रातरित्युप-
लक्षणं। अतो माध्यंदिनस्यापि नित्यत्वमेव। तथा
च साधारण्येनाह। गोभिलः। नित्यं सततनिर्वर्त्य-
मिति। वैयाघ्रपादोपि। प्रातःस्नायी भवेन्नित्यं मध्ये
स्नानं सदा भवेत्। इति। चंडालशवयूपादिस्पृष्ट्वा।
स्नातां रजस्वलां। स्नानार्हस्तु यदा स्नाति स्नानं नैमि-

त्तिकं हितन्। पुष्पस्नानादिकं यत्तु दैवज्ञविधिचोदितं।
तद्धि काम्यं समुद्दिष्टं नाकामस्तु प्रयोजयेत्। जप्तुकामः पवि-
त्राणि अर्चिष्यं देवताः पितॄन्। स्नानं समाचरेद्यस्तु क्रियां-
गं तत्प्रकीर्त्तितं। पवित्राणि सूक्तानि। मलापकर्षणं नाम
स्नानमभ्यंगपूर्वकं। मलापकर्षणार्थान्तु प्रवृत्तिस्तस्य ना-
न्यथा। सरःसु देवखातेषु तीर्थेषु च नदीषु च। क्रियास्नानं
समुद्दिष्टं स्नानं तत्र मता क्रियेति। स्नानमेव तत्र क्रिया कर्त्तव्य
तया विहितेत्यर्थः। दक्षः। चतुर्थे तु तथा भागे स्नानार्थं मृ-
दमाहरेत्। तिलपुष्पकुशादीनि स्नानं चाकृत्रिमे जले। च-
तुर्थे भागे पूर्वाह्णस्यैव। रक्तागौरा तथा श्वेता त्रिविधा मृ-
त्तिका स्मृता। शुचौ देशे तु संग्राह्या शर्कराश्मादिवर्जिता।
शेषलक्षणं तु मृत्तिकाद्याः शौचप्रकरणे बोद्धव्यं। तिलाः
कृष्णाः पुष्पाणि यथोक्तानि। कुशावक्ष्यमाणलक्षणाः कु-
शग्रहे कालविशेषमाह। कात्यायनः। मासे नभस्यमावस्या
तस्यां दर्भोच्चयस्मृतः अयातयामास्ते दर्भा नियोक्तव्याः पु-
नः पुनः एतच्च प्रतिदिनाशक्तौ बोधव्यं। कुशोत्पाटनवि-
धिः। शुचौ देशे शुचिर्भूत्वा स्थित्वा पूर्वोत्तरामुखः। ओंकारे-
णातु मंत्रेण सकृदेव कुशं स्पृशेत्। सकृदेव प्रथमत एवा।
दर्भोत्पाटने मंत्रः। विरिंचिना सहोत्पन्न परमेष्ठि निसर्गज।
नुद सर्वाणि पापानि मम स्वस्तिकरो भव। कुशमूले स्थितो
ब्रह्मा कुशमध्ये तु केशवः। कुशाग्रे तु हरं देव स्वयोरे-

वाः कुशेस्थिताः। अच्छिन्नाग्रान्सप्तपर्णान्समूलान्को
मलान् शुभान्। पितृदेवजपार्थं च समाहृत्यात्कुशा
न्द्विजः। सप्तपर्णाः शुभादर्भास्तिलसेत्रसमुद्भवाः।
ते प्रशस्ता नियोक्तव्या दैवे पित्र्ये च कर्मणि। जातिमात्रो
भवेद्दर्भः साग्रमूलः कुशः स्मृतः। सप्तपत्रस्तु कुतपश्छि
न्नाग्रस्तृणमुच्यते। अच्छिन्नाग्राश्च शुष्काग्राह्यस्ताश्चे
न प्रमाणतः। कुतपाहुतिविज्ञेयास्ते स्तुश्राद्धं समारभेत्।
श्राद्धं सोगपरिशिष्टे। अनंतगर्भिणं साग्रं कौशं द्विदलमेव च।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्। कौशेयं विधृया
न्नित्यं पवित्रं दक्षिणे करे। भुंजानस्तु विशेषेण गर्हिता भ
स्यशोधनं। द्वौ दर्भौ दक्षिणे हस्ते सव्ये त्रीनासने सकृत्।
उपवीतेपि खाद्यां तु पादमूले मकृत्सकृत्। सकृत एकद्
त्वर्थः। कौशिकः। पवित्रस्य तु नाशो वं आचांते तु कदाचन
पित्र्यां तर्पणे त्याज्य भुच्चारे पूजने तथा। शंखः। उभयत्र
स्थितैर्दर्भैः समाचामति यो द्विजः। सोमपानफलं तस्य
भुक्त्वा यज्ञफलं लभेत्। ग्रंथिर्यस्य पवित्रस्य न तेनाचम
नं भवेत्। आचामे यस्तु मोहाच्च यथा भोक्ता तथा तु सश्च य
थाभोक्तेति दृष्टांतः। अतो भोजनकालेपि ग्रंथिनिषेधः। ब्र
ह्मयज्ञे जपे चैव ब्रह्मग्रंथिर्विधीयते। भोजने वर्त्तुलः प्रोक्त
एवं धर्मो न हीयते। वामहस्ते कुशान्कृत्वा दक्षिणेनो
दकं पिबेत्। रुधिरं तद्भवेत्तोयं पीत्वा चांद्रायणं चरेत्॥

कुशाभावे तथा काशान्दूर्वां व्रीहियवानपि। तदभा
वे तु नीवाराणां श्यामाकान्वा नियोजयेत्। हारीतः॥
जपे दाने तथा होमे स्वाध्याये पितृतर्पणे। अशून्यं तु
करं कुर्यात्सुवर्णरजतैः कुशैः। आपस्तंबः। ब्रह्म
यज्ञे च ये दर्भा ये दर्भाः पितृतर्प्पणे। हता मूत्रपुरीषे
तु तेषां त्यागो विधीयते। चितौ दर्भाश्च ये मार्गे स्वा
ध्याये पितृतर्पणे। स्तरणासनपिंडेषु न ग्राह्याः स
र्व्वै कुशाः। अपूता गर्भिता दर्भा ये चाग्रे छिदिता न
खैः। कथितांश्चाग्निदग्धांश्च कुशान्यत्नेन वर्ज्जये
त्। नीवीमध्ये स्थिता दर्भा ब्रह्मसूत्रेण ये धृताः। पवि
त्रांस्तान्विजानीयात् गृहणीयस्तथा कुशः अत्र विशेष
माह कात्यायनः। हरिता यज्ञिया दर्भा पीतकाः पा
कयज्ञियाः। समूलाः पितृदेवत्याः कल्माषा वैश्व
देविका इति। पितृदेवत्याः पित्र्याः। गोवालपवित्रं
प्रकृत्य कौशिकः॥ गवां वालपवित्रेण धार्यमाणे
न नित्यशः। न स्पृशंतीह पापानि शीघ्रगात्रेषु तिष्ठति
गवां वालपवित्रेण वन्ह्युपास्तिं करोति यः। स वै द्वाद
शवर्षाणि कृतसंध्यो भवेन्नर इति। हारीतः। स
मित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत्। शूद्रानी
तैः क्रयक्रीतैः कर्म कुर्वन्व्रजत्यधः। कुशपुष्पाणि
समिधः शेषधं तु विशेषतः। निषेधे चापि गृह्णीयाद्:

मावास्यामपि द्विजः । यत्तु वचनं । अमावास्यां नहिंस्या
त्तु कुशांश्च समिधस्तथा । सर्वत्रावस्थिते सोमे हिंसा
यां ब्रह्महा भवेत् । तत्तु यस्मिकाले वनस्पत्यादिषु
सोमो वसति तन्मुहूर्त्तनिषेधपरं । सर्वत्रावस्थितइ
ति हेतूपादानात् । सर्वत्र वनस्पतिकुशादिषु । अ
वस्थानकालविशेषश्च सोपरोऽभिहितः । त्रिमुहूर्त्तं
वसेदर्के त्रिमुहूर्त्तं जले वसेत् । त्रिमुहूर्त्तं वसेद्गोषु त्रि-
मुहूर्त्तं वनस्पतौ वनस्पतिगते सोमे यस्तु हिंस्याद्वन-
स्पतिं । घोरायां भ्रूणहत्यायां युज्यते नात्र संशय इ
ति । वनस्पतिरिति कुशादीनामपि प्रदर्शनार्थम् ॥

इति कुशविधिः ॥ अथावशिष्ठस्नानवि-
धिः ॥ अथ स्नानविधिं कृत्स्नं प्रवक्ष्याम्यनुपूर्व-
शः । येन स्नात्वा दिवं यांति श्रद्दधाना द्विजोत्तमाः ।
नदीषु देवखातेषु तडागेषु सरःसु च । स्नानं समाचरे
न्नित्यं गर्त्तप्रस्रवणेषु च । पारक्येषु निपानेषु न स्ना-
याद्धि कदाचन । निपानकर्त्तुः स्नात्वा तु दुष्कृतांशेन
लिप्यते । अलाभे देवखातानां सरसां सरितां तथा ।
उद्धृत्य चतुरः पिंडान्पारक्ये स्नानमाचरेत् । याज्ञव
ल्क्यः । पंचपिंडाननुद्धृत्य न स्नायात्परवारिषु ॥
योगयाज्ञवल्क्यः । अरुके दिवा चरेत्स्नानं म-
ध्याह्नात्प्रागविशेषतः । प्रयतो मृदमादाय दूर्वामार्द्र

च गोमयं। अरुगनातुरः। विशेषतइति वचनादप-
राह्णेप्यनुज्ञानमस्तीति गम्यते। स्थापयित्वा तथाचम्य
ततः स्नानं समाचरेत्। प्रक्षाल्य हस्तौ पादौ च शिखाबं
धं समाचरेत्। शिखाबंधनप्रकारमाह। व्यासः। स्मृ
त्वोंकारं च गायत्रीं निबध्नीयाच्छिखां ततः पुनराचम्य
हृदयं बाहू स्कंधौ च संस्पृशेदिति। मृदैकया शिरः प्रक्षा
ल्यं द्वाभ्यां नाभेरधोपरि। अधश्च तिसृभिः कायः षड्भिः
पादौ तथैव च। प्रक्षाल्य सर्वकायं च द्विराचम्य यथा-
विधि। ततः संमार्जनं कुर्यात् मृदा पूर्वं तु मंत्रवित्। सं-
गान्युक्तविधिना मृदा संमार्जयेदित्यर्थः। अश्वक्रांते
रथक्रांते विष्णुक्रांते वसुंधरे। उद्धृतासि वराहेण कृष्णे-
न शतबाहुना। मृत्तिके त्वां च गृह्णामि प्रजया च धनेन-
च। मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमंत्रिता। मृत्तिके
जहि नः सर्वं यन्मया दुःकृतं कृतं। मृत्तिके देहि मे पुष्टिं
त्वयि सर्वं प्रतिष्ठितं। ततश्च गोमयेनैव मग्रमग्रमिति ब्रु-
वन्। अग्रमग्रं चरंतीनामोषधीनां रसं वने। तासामृष
भपत्नीनां पवित्रं कायशोधनं। तन्मे रोगांश्च शो-
कांश्च नुद गोमय सर्वदा। ततो दूर्वया। कांडा-
त्कांडात्प्ररोहंती परुषः परुषः परि। एवा नो दूर्वे प्रतनु
सहस्रेण शतेन च।। या शतेन प्रतनोषि सहस्रेण वि-
रोहसि। तस्यास्ते देवि दूर्विके विधेम हविषा वयं। कृत्वैवं

मार्जनं मंत्रैरश्वक्रांतादिभिस्ततः । इहेत देवीरमृतंपा-
रावतस्य रातिषु । देवीः आपः । पारावतस्य रातिष्वित्या-
दिमंत्रैरमृतमीहेत । एभिरभिमंत्रिता अमृतं भवतीत्य-
र्थः । एते श्रुतमिति द्वाभ्यां तीर्थान्यावाहयेत्ततः । कुरु-
क्षेत्रादीन्यावाहयेत् । कुरुक्षेत्रं गयां गंगां प्रभासं पु-
ष्कराणि च । ततो महाव्याहृतिभिर्गायत्र्या वाभिमंत्र-
येत् । आपो हिष्ठेदमापश्च द्रुपदादिव इत्यपि । तथा
हिरण्यवर्णाभिः पावमानीभिरं ततः । ततोऽह्वोसीष्व
चोंकारं निमज्यांतर्जले बुधः । प्राणायामांश्च कुर्वीत-
गायत्रीं चाघमर्षणं । यथोक्तैः क्षोभितस्तैस्तु मंत्रैस्त्रि
र्देहवत्ततः । यथोक्तैः प्राणायामादिभिः क्षोभितः स्तु
ष्यः । पूर्वावस्थामातिक्रांतो विगतपापवृत्तियावत् ।
अन्येऽपि स्नानविधयो बहवः संतिते ग्रंथगौरवभया-
न्नेह प्रदर्शिताः । एतच्च स्नानं सर्वसाधारणं । विशे-
षस्तु स्वस्वशाखाभ्यो विज्ञेयः । अत्र चापवादः । भानौ
भौमे त्रयोदश्यां नंदाभृगुमघासु च । पिंडदानं मृदा-
स्नानं न कुर्यात्तिलतर्प्पणमिति । पिंडदानं काम्यं न-
नित्यं । योगयाज्ञवल्क्यः । मृदा स्नानं न कुर्वीत
रात्रौ संध्याग्रहेषु च । विधिज्ञः स्नानकाले तु तथा भौ-
मार्कवारयोः । तिलतर्पणस्य प्रतिप्रसवः तर्प्पणप्रक-
रणे । एवक्ष्यते । संक्षेपस्नानविधिमाह । योगयाज्ञ-

वल्क्यः। एषविस्तरतः प्रोक्तः स्नानस्य विधिरुत्तमः
असामर्थ्यान्न कुर्याच्चेत्तत्रायं विधिरुच्यते। स्नानमं-
तर्ज्जलेचैव मार्ज्जनाचमनेतथा। जलाभिमंत्रणं चैव
तीर्थस्यपरिकल्पनं। अघमर्षणंसूक्तेन त्रिरावृत्तेनस
र्व्वशः। स्नानाचरणमित्येतदुपदिष्टं स्वयंभुवा। जवा-
लिः। प्रवाहाऽभिमुखोमज्जेद्यत्रापःप्रवहंतिवै। स्था-
नेषुचसर्वेषु आदित्याभिमुखस्तथा। विष्णुपुराणे
कूपेवोद्धृततोयेन स्नानं कुर्वीत वा भुवि। स्नायीतोद्धृ
ततोयेनयदिवा भुव्यसंभवे। मनुः। न स्नानमाचरे
द्भुक्त्वा नातुरोनमहानिशि। नवासोभिःसहाजस्रंना
विज्ञातेजलाशये। व्यासः। अनुत्सृष्टेषु न स्नाया-
त्तथैवासंस्कृतेषुच। असंस्कृतमप्रतिष्ठं। अनुत्सृष्टम
दत्तंपरकीयमिति यावत्। जाबालिः। न पारक्येस-
दास्नायान्न भुक्त्वा न महानिशि काम्यव्रतेषुच। भा-
रद्वाजः। विद्यमानेन सूर्येण संगृहीतंतु यज्जलं।
तत्सुवर्णोदकं कृत्वा स्नायात्स्याप्यान्नलांतिके। प-
राशरः। आपो रात्रौ न गृह्णीयात्प्रविष्टा वरुणाल-
यं। आवश्यके च मंत्रेणधाम्नो धाम्नइतिस्वयं। धाम्नोधा
म्नइति मंत्रेण स्वयमेव गृह्णीयादित्यर्थः। योगया-
ज्ञवल्क्यः। दर्शे स्नानं न कुर्वीत मातापित्रोस्तुजीव
तोः। पुत्रः कुर्वन्निराचष्टे पित्रोरुन्नतिजीविते। माता

पित्रोरिति साहित्यं विवक्षितं। त्रयोदश्यां तृतीयायां दशम्यां च विशेषतः। शूद्रविट्क्षत्रियाः स्नानं नाचरेयुः कथंचन। एतन्नित्यनैमित्तिकादिस्नानव्यतिरिक्तविषयं। अत एव भरद्वाजः। भोगार्थं क्रियते तत्तु स्नानं यादृच्छिकं नरैः। तन्निषिद्धं तृतीयादौ नित्यनैमित्तिके न तु। पैठीनसिः। नित्यं जह्यापये स्नानं काम्यं नैमित्तिकं च यत्। दशम्यादिषु कर्त्तव्यं न तु यादृच्छिकं क्वचित्। यादृच्छिकलक्षणं गर्गेणोक्तम्। क्रियतां वा न कुर्याद्वा शास्त्रयंत्रणया विना। मलव्ययोहन फलं स्नानं यादृच्छिकं तु तत्। पुत्रजन्मनि संक्रान्तौ श्राद्धे जन्मदिने तथा। नित्यस्नाने च कर्त्तव्ये तिथिदोषो न विद्यत इति॥ मार्कण्डेयपुराणे॥ मातरं पितरं जायां भ्रातरं सुहृदं गुरुं। यमुद्दिश्य निमज्जेत अष्टभागं लभेत सः। नार्द्रशाकेन वस्त्रेण स्नायात्कौपीनकादृते। नान्यदीयेन नार्द्रेण न सूच्या ग्रथितेन च। स्नानं कृत्वार्द्रवासास्तु विण्मूत्रं कुरुते यदि। प्राणायामत्रयं कृत्वा पुनः स्नानेन शुध्यति। मनुः। स्नातस्य वह्नितप्तेन तथैव परिवारिणा। शरीरशुद्धिर्विज्ञेया न तु स्नानफलं लभेत्। यत्तु षड्त्रिंशन्मते। आपः स्वभावतो मेध्याः किं पुनर्वह्निसंयुताः। तेन संतः प्रशंसंति स्नानमुष्णेन वारिणेति। तदनातुरविषयं। अनातुर

स्यापि नद्याद्यसंभवे उष्णोदकस्नानमविरुद्धमित्याह यमः। नित्यं नैमित्तिकं चैव क्रियांगं मलकर्षणं। तीर्थाभावे तु कर्त्तव्यमुष्णोदकपरोदकैः। अत्र मलापकर्षणस्नानं तीर्थे कर्त्तव्यमिति न विधीयते। अपितु प्रायश उष्णोदकसाध्यत्वादुष्णोदकप्रकरणे परिगणितं। उष्णोदकस्नानेकर्त्तव्ये। व्यासः। शीतास्वप्सु निषिच्योष्णा मंत्रसंभारसंभृताः। गृहेपि शस्यते स्नानं तद्धीनमफलं भवेत्। संभारा मृदादयः। आगूढ्यास्त्वागता ह्यापो नद्याः प्रथमवेगजाः। प्रक्षोभिताश्चकेनापि तथा तीर्थाद्विनिर्गताः। तथा। अत्याहृत्तोदके स्नानं वर्ज्यं नद्या द्विजातिभिः। तस्यां रजकतीर्थे तु दशहस्तेन वर्ज्जयेत्। प्रतिस्रोतारजोयोगे रथ्याजलनिवेशनं। गंगायां न प्रदुष्यंति माहि धर्मद्रवः स्वयं। देवलः। नभोनभस्ययोर्मध्ये सर्वा नद्यो रजस्वलाः। तासु स्नानं प्रकुर्वीत वर्जयित्वा समुद्रगाः॥ कात्यायनः। नभोनभस्ययोर्मध्ये सर्वा नद्यो रजस्वलाः। तासु स्नानं न कुर्वीत देवर्षिपितृतर्पणं। एवं श्रावणभाद्रपदयोर्मध्ये सर्वासु नदीषु स्नाननिषेधे प्रसक्ते क्वचिद्विशेषोभिहितो भविष्यत्पुराणे। आदौ कर्कटके देवि महानद्यो रजस्वलाः। त्रिदिनं च चतुर्थेह्नि शुद्धाः स्युर्जाह्नवीयथेति। महानद्यश्च ब्रह्मपुराणे दर्शिता। गोदा-

वरी भरथी तुंगभद्रा च वेणिका। तापी पयोष्णी विंध्य
स्य दक्षिणे तु प्रकीर्तिताः। भागीरथी नर्मदा च यमुना
च सरस्वती। विशोका च वितस्ता च विंध्यस्योत्तरतः
स्थिताः। द्वादशैता महानद्यो देवर्षिक्षेत्रसंभवा इति
एवं गंगादिष्वपि प्रसक्तापवादमाह। देवलः।
गंगा च यमुना चैव प्लक्षजाता सरस्वती। कुरुक्षेत्रे या
सरस्वती सा प्लक्षजाता। रजसा नाभिभूयंते ये चान्ये
नदसंज्ञकाः। शोणसिंधुहिरण्याख्याः कोकलोहि
तघर्घराः। शतद्रूश्च नदाः सप्त पावना ब्रह्मणः सुताः
निगमः। गंगा धर्मद्रवः पुण्या यमुना च सरस्वती
अंतर्गतरजोदोषाः सर्वावस्थासु चामलाः। एवं च
त्र्यहं गंगा रजस्वलेत्यादि गंगायमुनासरस्वतीनां
रजोदोषप्रापकाणि यानि तान्यपि अंतर्गतरजो
विषयाणि अतो न दोषः। तथा। कर्कटादौ रजोदु
ष्टा गोमती वासरत्रयं। चंद्रभागा सती सिंधुः सरयू
र्नर्मदा तथा। आसु नदीषु रजोदोषोस्ति तास्वपि त
त्तीरवासिनां न दोषः। तथा च निगमः। न दुष्ये
त्तीरवासिनामिति। अत्र विशेषमाह। व्याघ्रपा
दः। अभावे कूपवापीनामन्यासामपि पयोभृतां। र
जो दुष्टेपि पयसि ग्रामभोगो न दुष्यत इति। व
सिष्ठः। उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च।

चंद्रसूर्यग्रहे चैव रजोदोषो न विद्यते। योगयाज्ञवल्क्यः। न स्नायादुत्सवेतीते मांगल्यं विनिवर्त्य च। अनुव्रज्य सुहृद्बंधूनर्चयित्वेष्टदेवताः। प्रसंगादत्यल्पग्रहणे प्रतिकृष्ठविशेषः कथ्यते। तत्र स्मृतिसंग्रहेः। काले न वर्षशुद्धं के प्रत्यग्रमशुचिव्यहं। अकाले तु दशाहं तु पीत्वा नाद्यादहर्निशमिति। काले वर्षाकाले। अकाले तद्विपरीते। अत्रापि विशेषमाह। भविष्योत्तरे। महद्धंवुसमंचात्र यदि निष्ठत्युरातनं। न वा बुमिश्रितं तेन न दुष्टमिति सूरयइति। उक्तं नित्यस्नानं। अथ नैमित्तिकानि॥ याज्ञवल्क्यः। उदक्याशुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशेत्। अब्लिंगानि जपेच्चैव गायत्रीं मनसा सकृत। उदक्या रजस्वला। अशुचयः शवपतितचंडालसूतिकाशावाशौचिनः। एतैः स्पृष्टः स्नायात। तैरुदक्यादिस्पृष्टैरुपस्पृष्ट आचामेत्। आचम्य चाब्लिंगानि आपो हिष्ठेत्येवमादीनि त्रीणि सूक्तानि वा वाक्यानि वा जपेत्। त्रिष्वेव बहुवचनस्य कपिंजलाधिकरणन्यायेन चरितार्थत्वात्। सूक्तवाक्ययोर्देशकालानुसारेण व्यवस्था। ततो गायत्रीं मनसा सकृज्जपेत्। पराशरः। दुःस्वप्ने मैथुने वान्ते शिशिश्मश्रुक्षुरकर्मणि इति। यूपश्मशानास्थां स्पर्शे

ने स्नानमाचरेत्। मैथुनइति ऋतुकाले। अनृतुका
ले बृहस्पतिना शौचमात्रविधानात्। अनृतौ तु यदा
गच्छेच्छौचं मूत्रपुरीषवदिति। अनृतावपि काल
विशेषे स्नानमेव। तथा च स्मृतिः। अष्टम्यां च चतुर्द
श्यां दिवा पर्वणि मैथुनं। कृत्वा सचैलं स्नात्वा तु
वारुणीभिश्च मार्जयेदिति। अष्टमीचतुर्द्दशीपर्व
सु रात्रावपि अन्यत्र दिवा। अत्र च गोवलीवर्द्दन्या
येनाष्टमीचतुर्द्दशीव्यतिरिक्तामावास्यादिषु पर्व
शब्दो वर्त्तते। अजीर्णादिषु स्नानमात्रमेव न स
चैलस्नानं। यथाह यमः। अजीर्णेऽभ्युदिते वांते
तथाप्यस्तमिते रवौ। दुःस्वप्ने दुर्जनस्पर्शे स्नानमात्रं वि
धीयत इति। अजीर्णे स्नानं तदुपशमे सति। अभ्यु
दित इति निद्रायां क्रियमाणायां रवावभ्युदिते तथै
वास्तमिते चाएतत्सर्वमकामतः स्पर्शे वेदितव्यं।
शवस्पृशं न दिवाकीर्त्तिं चितिं यूपं रजस्वलां स्पृष्ट्वा
त्वकामतो विप्रः स्नानं कृत्वा विशुद्ध्यतीति। बृह-
स्पतिनाऽकामत इत्युपादानात्। कामतस्तु च्य
वनोक्तं द्रष्टव्यं। श्वानं श्वपाकं प्रेतधूमं देवद्र-
व्योपजीवनं। ग्रामयाजकं सोमविक्रयिणं यू-
पं चितिं चितिकाष्ठं मद्यं मद्यभांडं सस्नेहं मानुषा-
स्थि शवस्पृशं रजस्वलां महापातकिनं स्पृष्ट्वा स-

चैलमंभोवगाह्योत्तीर्याग्निमुपस्पृश्य गायत्र्यष्टशतं जपेत् घृतंप्राश्य पुनः स्नात्वाचिराचामेदिति। कश्यपः। उदक्यास्तमपयोः स्कंदित्वाक्षिस्यंदनेकर्णकोशने चित्याहरेयूपसंस्पर्शनेच सचैलंस्नात्वा पूनर्मन इतिजपेन्महाव्याहृतिभिःसप्ताज्याहुतीर्जुहुयादिति। तथा। स्पृष्ट्वा देवलकंचनमवा-साजलमाविशेत् । देवार्चनपरो विप्रोवित्तार्थी वत्सरत्रयं। असौदेवलकोनाम हव्यकव्येषुगर्हितः॥ ब्रह्मांड पुराणे॥ शैवान्पाशुपतान्स्पृष्ट्वा-लोकायतिकनास्तिकान्। विकर्मस्थान्द्विजान् शूद्रान्सवासाजलमाविशेत्। अधिकारेअविद्यमानेयेशैवाःपाशुपतानवंति तत्स्पर्शे स्नानमिकवगंतव्यं। अन्यथातत्तद्दीक्षावक्षायक पुराणवचननिचयविरोधात्। अथवा श्रोत्रियादीनांमाल्यचंदननिषेधो यथावाचनिकः श्रोत्रियादिषु दोषाभावेपितथादोषाभावेपि वाचनिकःस्पर्शेनयेव-विकर्म्मस्थानित्येतद्द्विजानित्यनेनैवसंबध्यतेन शूद्रानित्यनेन। आस्वर्णाद्याहुति साम्याच्छूद्रसंस्पर्शेदृश्यतेति। शूद्रमानस्पर्शने नास्त्वर्ग्यत्व प्रतिपादन सामर्थ्यात्। व्याघ्रपादः। चांडालं पतितं चैव दूरतः परिवर्ज्जयेत। गोवालव्यज

नादर्वाक् सवासा जलमाविशेत्। एतच्चाति संकी
र्णस्थानविषयं। असंकीर्णे तु चतुरहस्यत्युक्तं। युगं
च द्वियुगं चैव त्रियुगं च चतुर्युगं। चंडालसूतिको
दक्या पतिता नामधः क्रमात् इति। अधः क्रमा-
त्प्रतिलोमक्रमात्। चतुर्युगं चंडाले त्रियुगं सूति
कायामित्येवं। पैठीनसिः। अनुदकमूत्रकरणे
क सचैलं स्नानं व्याहृतिहोमश्च। एतच्च शौचमकृ
त्वा चिरकालस्थितौ वेदितव्यं। अंगिराः। भास
वायसमार्जारखरोष्ट्रश्वानशूकरान्। अमेध्यानि
च संस्पृश्य सचैलो जलमाविशेत्। मार्जारस्पर्शे
स्नानमुच्छिष्टस्य समये कर्म्मकाले च। मार्जारश्चैव द
र्वीच मारुतश्च सदा शुचिरिति स्मरणात्। श्वस्प-
र्शे नाभेरूर्द्ध्वं स्नानं। नाभेरूर्द्ध्वं करौ मुक्त्वा शुनापस्पृ-
पहन्यते। तत्र स्नानमधस्तात्प्रक्षाल्याचम्य शु
द्ध्यतीत्यंगिरसैव स्मरणात्। अस्पृश्यपतितस्पर्शे
ज्ञानकार्यं च ऊर्द्ध्वं नाभेः करौ मुक्त्वा यदंगं संस्पृशे
त्द्विजः। स्नानं तत्र प्रकुर्वीत शेषं प्रक्षाल्य शुध्यतीति
अमेध्यस्पर्शे तु शौचप्रकरणे विशेषो दर्शितः पूर्व
मेव प्रचेताः। रथ्याकर्द्दमतोयेन ष्ठीवनाद्येन वा त
था। नाभेरूर्द्ध्वं नरः स्पृष्टः सद्यः स्नानेन शुद्ध्यति।
यमः। सकर्द्दमं तु वर्षं सुप्रविश्य ग्रामसंकरं ॥

जङ्घयोर्मृत्तिकास्तिस्रः पाद्योर्द्विगुणास्ततः। ग्राम
सलिलप्रवाहदेशो ग्रामसंकरः। तं सकर्दमं प्रावि
श्य। मनुः। नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो वि
शुद्ध्यति। आचम्यैव तु निःस्नेहं गां स्पृष्ट्वा वीक्ष्य
वा रविं। एतच्च द्विजात्यस्थिविषयं। अन्यत्र तु मा
नुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमाशौचं अस्निग्धे
त्वहोरात्रमिति वसिष्ठोक्तं। अमानुषे त्वस्थनि
विभूक्तं। भक्ष्यवर्ज्यं पंचनखं शावं तदस्थि च स्ने
हं स्पृष्ट्वा स्नातः पूर्ववत्स्वयं प्रक्षालितं विमृ
पादिति। अन्येप्येवंविधाः स्नानार्हाः स्मृत्यंतर
तोवगंतव्याः। ग्रंथगौरवभयान्नेह लिखिताः।
उदक्यादिभिः स्पृष्टानां मनुष्याणां स्नानं। अचे
तनानां पीठादीनां प्रक्षालनं। तत्रोदक्यादिस्पृष्ट
वेतेन स्पर्शवतामाचमनं। उदक्याशुचिभिः स्ना
यात्स्पृष्टस्तैरुपस्पृशेत् इति याज्ञवल्क्यस्म
रणात्। उदक्यादिस्पृष्टत्वे चेतनस्पर्शे तु द्वितीय
स्यापि स्नानमेव। तथा च मनुः। दिवाकीर्तिमुदक्यां
च पतितं सूतिकां तथा। शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा
स्नानेन शुद्ध्यति। स्नानार्हचेतनस्पर्शेपि द्वितीयस्य
क्वचित्स्नानापवादमाह। संग्रहकारः। कटधूम
स्पृष्टां वांतां विरिक्तां क्षुरकर्मणि। मैथुन। वरिता

रंच स्पृष्ट्वा स्नानं न विद्यत इति। एतदुपलक्षणं। अतो यस्य
स्नानमात्रमेव प्राप्तं न सचैलं तत्स्पर्शेऽपि द्वितीयस्याप्याच
मनमेवेति सिद्धं। तृतीयस्य त्वाचमनं॥ तथाह संवर्त्तः
तत्स्पृष्टिनं स्पृष्ट्वा यस्तु स्नानं तस्य विधीयते। ऊर्द्धमाच
मनं प्रोक्तं द्रव्याणां प्रोक्षणं तथेति। एतत्त्वाकामकारिवि
षयं। कामकृते तु तृतीयस्यापि स्नानमेव। पतितचंडाल
सूतिकोदक्याशव स्पृष्टितत्स्पृष्ट्युपस्पर्शने सचैलमुद
कोपस्पर्शनाच्छुद्धेदिति गौतमस्मरणात्। चतुर्थस्या
चमनं। यथाह देवलः। उपस्पृश्याशुचिस्पृष्टं तृतीयं
चापि मानवः। हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शु-
द्ध्यति। यत्तु कूर्मपुराणे। तत्स्पृष्टस्पृष्टिनं स्पृष्ट्वा बुद्धिपू
र्वं द्विजोत्तमः। आचामेत्तस्य शुद्ध्यर्थं प्राह देवः पितामह
इति। तद्दुर्बलत्वेन स्नानाशक्ततृतीयविषयं। अन्यथा
गौतमादिवचनविरोधात्। अथवाऽचेतनपीठादि-
स्पर्शविषयं। एवं सर्वत्र विषयविवेको वगंतव्यः। स्वयमशु
चिना उदक्यादिस्पर्शे कृते देवलः। अशुद्धान्स्वयमप्येता
नशुद्धस्तु यदि स्पृशेत्। विशुध्यत्युपवासेन तथा कृच्छ्रेण-
वा पुनः। कृच्छ्रः श्वपाकादिविषयः। उपवासः खादिविषयः
आतुरं स्नानं प्रति पराशरोक्तो विशेषः। आतुरे स्नान-
उत्पन्ने दशकृत्वोऽह्यनातुरः। स्नात्वा स्नात्वा स्पृशेदे
नं ततः शुद्ध्येत्स आतुरः। स्नाने नैमित्तिके प्राप्ते नारी यदि

रजस्वला। याव्वांक्षदिनतो येन स्नानं कृत्वा व्रतं चरेत्। सिक्तगात्रा भवेदद्भिः सांगोपांगा कथंचन। न वस्त्रपीडनं कुर्यान्नान्यद्वासश्च धारयेत्। उशनाः। ज्वराभिभूता या नारी रजसा च परिप्लुता। कथं तस्या भवेच्छौचं शुद्धिः स्यात्केन कर्म्मणा। चतुर्थेऽहनि संप्राप्ते स्पृशेदन्या तु तां स्त्रियं। सा सचैलावगाह्यापः स्नात्वा स्नात्वा पुनः स्पृशेत्। दशद्वादशकृत्वो वा आचामेच्च पुनः पुनः। अंते च वाससां त्यागस्ततः शुद्धा भवेत्तु सा दद्याच्छक्त्या ततो दानं पुण्याहेन विशुद्ध्यति। सूतिकामरणे रजस्वलामरणे च पूर्ववत्स्नानं कारयित्वा पंचगव्येन स्नापयेत्। तथा च संग्रहकारः सूतिकायां मृतायां तु कथं कुर्वंति याज्ञिकाः। कुंभे सलिलमादाय पंचगव्यं तथैव च। पुण्यभिरभिमंत्र्यापो वाचा शुद्धिं लभेत्ततः। तेनैव स्नापयित्वा तु दाहं कुर्याद्यथाविधि। पंचभिः स्नापयित्वा तु गव्यैः प्रेतां रजस्वलां। वस्त्रांतरावृतां कृत्वा दाहयेद्विधिपूर्वकमिति। वृद्धशातातपस्तु। रजस्वलायाः प्रेतायाः संस्कारादीनि नाचरेत्॥ ऊर्द्ध्वं त्रिरात्रात्स्नातायाः शववद्धर्मतो दाहयेदिति त्रिरात्रानंतरं दाहादि संस्कारमाह। अत्र देशकालाद्यनुसाराद्व्यवस्था विज्ञेया॥ शातातपः॥ ग्रामे तु यत्र संस्पृष्टिर्यात्रायां कलहादिषु। ग्रामसंदूषणे चैव स्पृष्टिदोषो न विद्यते। ग्रामे राजमार्गादौ। षड्त्रिंशन्मते॥

देवयात्राविवाहेषु यज्ञेषु प्रकृतेषु च । उत्सवेषु च सर्वेषु स्पृ-
ष्टास्पृष्टिर्न विद्यते ॥ बृहस्पतिः ॥ तीर्थे विवाहे यात्रायां संग्रा-
मे देशविप्लवे । नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यति ।
एतच्च यत्राहमनेन स्पृष्ट इति सम्यग्ज्ञानं नास्ति तद्वि-
षयं । एतत्स्नानापवादेऽपि वचनानां चरितार्थत्वात् ॥
शातातपः । रात्रौ स्नानं न कुर्वीत होमं दानं च रात्रिषु ।
नैमित्तिकं च कुर्वीत स्नानं दानं च रात्रिषु । एतन्मध्यम
यामद्वयाभिप्रायं ॥ तथा च पराशरः ॥ महानिशा तु
विज्ञेया मध्यस्थप्रहरद्वयं । प्रदोषपश्चिमौ यामौ दिनव-
त्स्नानमाचरेत् । एतदप्यापद्विषयं । यतः स एवादिवा-
करकरैः पूतं दिवा स्नानं प्रशस्यते । अप्रशस्तं निशि स्ना-
नं राहोरन्यत्र दर्शनात् । राहुदर्शनादिति पुत्रजन्मादिप्र-
दर्शनार्थं ॥ तथा च पराशरः ॥ पुत्रजन्मनि यज्ञे च तथा
संक्रमयो रवौ । राहोश्च दर्शने स्नानं प्रशस्तं नान्यथा नि-
शीति ॥ इति नैमित्तिकस्नानानि ॥ अथ काम्य
स्नानानि ॥ तत्र पुलस्त्यः ॥ पुष्ये तु जन्मनक्षत्रे व्य-
तीपाते च वैधृतौ । अमायां च नदीस्नानं पुनात्या सप्त-
मं कुलं । चैत्रकृष्णचतुर्दश्यां यः स्नायाच्छिवसंनि-
धौ । न प्रेतत्वमवाप्नोति गंगायां तु विशेषतः ॥ भ-
विष्यत्पुराणे । शिवलिंगसमीपे तु यत्तोयं पुरतः
स्थितं । शिवगंगेति तज्ज्ञेयं तत्र स्नात्वा शिवं व्रजेत् ।

॥यमः॥ कार्त्तिक्यां पुष्करे स्नातः सर्वपापैः प्रमुच्य-
ते। माघ्यां स्नातः प्रयागे तु मुच्यते सर्वकिल्बिषैः
ज्येष्ठे मासि सिते पक्षे दशम्यां हस्तसंयुते। दशज-
न्माघहा गंगा तेन पापहरा स्मृता। यमुनायां तथा
स्नात्वा माघकृष्णचतुर्दशी। वैशाखे शुक्लपक्षे-
तु तृतीयायां तथैव च। गंगातोयेन रः स्नात्वा
मुच्यते सर्वकिल्बिषैः॥ पद्मे॥ कार्त्तिके नवमी-
शुक्ला पितृणामुत्सवापरा। तस्यां स्नानं हुतं द-
त्तमनंतफलदं भवेत्॥ विष्णुः॥ सूर्यग्रहण-
तुल्या तु शुक्ला माघस्य सप्तमी॥ अरुणोदय
वेलायां तस्यां स्नानं महाफलं। पुनर्वसौ बुधो-
पेता चैत्रमासे सिताष्टमी। स्रोतस्सु विधिवत्स्ना-
त्वा वाजपेयफलं लभेत्॥ तथा॥ कार्त्तिकं सक-
लं मासं नित्यस्नायी जितेंद्रियः। जपन्हविष्य-
भुक् स्नातः सर्वपापैः प्रमुच्यते। तुलामकरमे-
षेषु प्रातःस्नायी सदा भवेत्। हविष्यं ब्रह्मचर्यं च
महापातकनाशनं॥यमः॥ यदीच्छेद्विपुलान्-
भोगान्चंद्रसूर्यग्रहोपमान्। प्रातःस्नायी भवे-
न्नित्यं मासौ द्वौ माघफाल्गुनौ॥ मत्स्यपुराणे॥ आ-
षाढ्यादि चतुर्मासं प्रातःस्नायी भवेन्नरः विप्रेभ्यो भो-
जनं दत्वा कार्त्तिक्यां गोप्रदो भवेत्। सवैष्णवं पदं याति विष्णु

व्रतमिदं स्मृतं। मार्कंडेयः। गवां कोटिसहस्रस्य सम्य
ग्दत्तस्य यत्फलं। तत्फलं जाह्नवीस्नाने राहुग्रस्ते दि-
वाकरे। वृद्धवसिष्ठः। रविसंक्रमणे पुण्ये न स्नाया
द्यदि मानवः। सप्तजन्मांतरं रोगी दुःखभागी सदा भवे
त्। मार्कंडेयः। तुष्यत्यामलकैर्विष्णुरेकादश्यां विशे
षतः। श्रीकामः सर्वदा स्नानं कुर्वीतामलकैर्नरः। सप्त
मीं नवमीं चैव पर्वकालं च वर्जयेत्। गार्ग्यः। कुर्यान्नै
मित्तिकं स्नानं शीताद्भिः काम्यमेव च। नित्यं याहृच्छि-
कं चैव यथारुचि समाचरेत्। ब्रह्मांडपुराणे। नित्यं
नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते। तर्पणं तु भवे
त्तस्यांगत्वेन प्रकीर्तितं। अंगतर्पणं भूर्देवास्तर्पया
मीत्यादिकं याजुर्वैदिकं॥ इति काम्यस्नानानि॥ अथ
माघस्नानविधिः॥ नारदीयपुराणे॥ संप्राप्ते मा
घमासे तु तपस्विजनवल्लभे। क्रोशंति सर्ववारीणि
समुद्गच्छति भास्करे। पुनीमः सर्वपापानि त्रिविधानि
न संशयः। तडागेषु तु वा स्नायात्कूपे भांडाश्रिते तथा
माघमासे वरारोहे प्रशस्तं वै निमज्जनं। भांडाश्रिते
तु विशेषः। सरित्तोयं महावेगं नवकुंभस्थितं तथा॥
वायुना ताडितं रात्रौ गंगास्नानसमं स्मृतं। अधिकवे
गयुक्तायाः सरित आनीतं तोयमित्यर्थः। स्नातो व-
ह्निं न सेवेत अस्नातो वा कथंचन। सेवेतापि तु होमार्थं न

प्रीतार्थं कथंचन। विष्णुः। दर्शं वा पूर्णमासीं वा प्रार-
भ्य स्नानमाचरेत्। पुण्यान्यहानि त्रिंशत्तु मकरस्थे दि-
वाकरे। तत्र चोत्थाय नियमं गृह्णीयाद्विधिपूर्वकं। मा
घमासमिमं पूर्णं स्नास्येऽहं देव माधव। तीर्थस्यास्य ज-
ले नित्यमिति संकल्प्य चेतसि। ततः स्नात्वा शुभे तीर्थे
दत्त्वा शिरसि वै मृदं। वेदोक्तविधिना राजन्सूर्यस्या-
र्घ्यं निवेदयेत्। पितॄणां तर्प्पयित्वा तु अवतीर्य ततो ज-
लात्। काष्ठमौनान्नमस्कृत्य पूजयेत्पुरुषोत्तमं। शंख-
चक्रधरं देवं माधवं नाम पूजयेत्। वह्नौ हुत्वा विधानेन
ततस्त्वेकासनो भवेत्। भूशय्या ब्रह्मचर्येण प्रातःस्ना-
नं समाचरेत्। अशक्तस्याधनाढ्यस्य स्वेच्छा सर्वत्र
कथ्यते। अवश्यमेव कर्त्तव्यं माघस्नानमिति श्रुतिः।
तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी। तिल-
दस्तिलभोक्ता च षट् तिलीनावसीदति। तैलमामल-
काश्चैव तीर्थे देयास्तु नित्यशः। तथा प्रज्वालयेद्वह्निं
सेवनार्थं द्विजन्मनां। स्वं स्नानावसाने तु भोज्यं देयं न-
वारितं। भोजयेद्द्विजदंपत्यं भूषयेद्वस्त्रभूषणैः। कं-
बलाजिनरत्नानि वासांसि विविधानि च। चोलकानि
च देयानि प्रच्छादनपटास्तथा। उपानहौ तथा गुप्त-
मोचकौ पापमोचकौ। अनेन विधिना दत्तान्माधवः।
प्रीयतामिति। अत्र समापनमंत्रः। सवित्रे प्रसवित्रे च

परं धाम जले मम। त्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा। दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते। परिपूर्णं करिष्येऽहं माघस्नानं तवाज्ञया। अहन्यहनि दातव्यास्तिलाः शर्करयान्विताः। माघावसाने सुभगे षड्रसं भोजनं तथा। सूर्यो मे प्रीयतां देवो विष्णुमूर्त्तिर्निरंजनः। दंपत्योर्वाससी सूक्ष्मे सप्तधान्यसमन्विते। त्रिंशत्तु मोदका देयाः शर्करातिलसंयुताः। भागत्रयं तिलानां तु चतुर्थं शर्कराशकः। अनभ्यंगी वरारोहे सर्वमासं नयेद्बुधीति॥ इति माघस्नानविधिः॥ क्रियांगस्नानलक्षणं प्रागभिहितं। तत्तु तेनैव व्याख्यातं॥ अथ मलापकर्षणस्नानं॥ तत्र गार्ग्यः। पंचमी नवमी चैव तृतीया च त्रयोदशी। एकादशी द्वितीया च पक्षयोरुभयोरपि। अभ्यंगस्पर्शपानाद्यैर्येत्र तैलं निषेवते। चत्वारि तस्य नश्यंति आयुः प्रज्ञा यशो वलं। तथा। पंचदश्यां चतुर्दश्यामष्टम्यां रविसंक्रमे। द्वादश्यां सप्तमी षष्ठ्योस्तैलस्पर्शमपि त्यजेत्। गार्ग्यः। त्रयोदश्यां तृतीयायां प्रतिपद्दशमीद्वये। तैलाभ्यंगं न कुर्वीत स्पृशेद्वा नवमीं विना। मोहात्प्रतिपदं षष्ठीं कुहूरिक्ते तिथिं तथा। तैलेनाभ्यंजयेद्यस्तु चतुर्भिः परिहीयते। व्यासः। आदित्यादिषु वारेषु तापः कान्तिर्मृतिर्धनं दारिद्र्यं दुर्भगत्वं च कामाप्तिः स्नानतः क्रमात्। गार्ग्यः

मांसाशने पंचदश्यां तैलाभ्यंगे चतुर्दश्यां। अष्टमी ग्राम धर्मे च ज्वलंतमपि पातयेत्। षष्ठ्यष्टमी त्वमावास्या उभे पक्षे चतुर्दशी। अत्र संनिहितं पापं तैले मांसे क्षुरे भगे। अत्र प्रतिप्रसवमाह प्रचेताः। सार्षपं गंधतैलं च यत्तैलं पुष्पवासितं। अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन। तैलाभ्यंगनिषेधे तु तिलतैलं निषिध्यते॥ अभ्यंगस्य निषेधे तु सार्षपादेरपीष्यते। स्नेहाभ्यंगो भवत्येव सस्नेहः सार्षपादिषु। न भोजने च तैलस्य निषेधोभ्यंग एव सः। तैलशब्दस्तिलस्नेहे सुरूढो नैव यौगिकः। अतस्तिलविकारेपि पिण्याक तिलमोदके। शष्कुलीकृशरादौ च निषेधो नैव जायते। मनुः। शिरः स्नातस्तु तैलेन नांगं किंचिदुपस्पृशेत्। अस्यार्थः। तैलेन शिरः स्नातः सन् स्वांगमन्यदपि तैलेन न संस्पृशेत्। न प्रक्षालयेदिति। एतच्च तस्मिन् दिवसे एव न रात्राविति शिष्टाचारात् ज्ञेयं। निषिद्धदिनादिष्वपि मंगल्यादिषु भवत्येव। तथा च कात्यायनः। मंगलं विद्यते स्नानं वृद्धि सर्वोत्सवेषु च। स्नेहमात्र समायुक्तं मध्याह्नात्प्राग्विशिष्यते। निषिद्धतिथ्यादिषु भवारयोगे तैलस्नानं कार्यमिति व्यपेक्षयाचारस्य प्राबल्यात्। तदुक्तं ब्रह्मसिद्धांते। तिथिरेकगुणा प्रोक्ता नक्षत्रं च चतुर्गुणं। योगास्तु षड्गुणाश्चैव वारस्त्वष्टगु-

णाःस्मृत इति। तिलैः स्नानं सदा पुण्यं कुर्यादामलकैः
श्रिये। सप्तमी नवमीदर्श रविसंक्रमणादृते। व्यासः
तथादर्शे च सप्तम्यां संक्रांतौ च रवेर्दिने। चंद्रसूर्योपरा
गे च स्नानमामलकैस्त्यजेत्। षड्त्रिंशन्मते। सर्वकालं
तिलैः स्नानं यादिति व्यासोब्रवीन्मुनिः। शिरःस्ना-
नं तटे कृत्वा मज्जेदप्सु यथाविधि॥ इति मलस्ना-
नं॥ अथ क्रियास्नानं॥ तत्र शंखः। क्रियास्ना
नं प्रवक्ष्यामि यथावद्विधिपूर्वकं। मृद्भिरद्भिश्च क-
र्त्तव्यं शौचमादौ यथाविधि। जले निमग्नस्तून्मज्ज्य
उपस्पृश्य यथाविधि। तीर्थस्यावाहनं कुर्यात्तत्वक्ष्या-
म्यतः परं। प्रपद्ये वरुणं देवमंभसां पतिमूर्ज्जितं
याचितं देहि मे तीर्थं सर्वपापापनुत्तये। तीर्थमावा
हयिष्यामि सर्वाघविनिषूदनं सान्निध्यमस्मिं-
स्तोये तु स्थीयतां मदनुगृह्णात्। रुद्रान्प्रपद्ये वरदा-
न्सर्वानप्सुषदस्त्वहं। सर्वानप्सुषदश्चैव प्रपद्ये प्रण
तः स्थितः। देवमप्सुषदं वह्निं प्रपद्ये घनिषूदनं।
आपः पुण्याः पवित्राश्च प्रपद्ये शरणं तथा। रुद्राश्चा
ग्निश्च सर्पाश्च वरुणस्त्वापएव च। शमयं त्वाशु मे पा
पं रक्षंतु सदाप्सुमो। इत्येवमुक्त्वा कर्त्तव्यं। ततः सं
मार्जनं कुशैः। आपो हि ष्ठेति तिसृभिर्यथावदनुपू-
र्वशः। हिरण्यवर्णा इति च ऋग्भिश्चतसृभिस्त-

था। शन्नो देवीरिति तथा। शन्न आपस्तथैव च। इ-
दमापः प्रवहतेत्येवं पूर्वमुदीरयेत्। एवं संमार्जनं
कृत्वा छंद आर्षं च दैवतं। अघमर्षणसूक्तस्य संस्मरे
त्प्रयतः सदा। ततोम्भसि निमग्नस्तु त्रिः पठेदघमर्षणं
प्रदद्यान्मूर्द्धनि तथा महाव्याहृतिभिर्जलमिति ॥
इति क्रियास्नानं॥ अथ गौणस्नानः॥ तत्र
जाबालिः। असामर्थ्याच्छरीरस्य देशकाला-
द्यपेक्षया। मंत्रस्नानादिकाः सप्त केचिदिच्छंति
सूरयः। योगयाज्ञवल्क्यः। मांत्रं भौमं तथाग्ने
यं वायव्यं दिव्यमेव च। वारुणं मानसं चैव सप्त-
स्नानान्यनुक्रमात्। आपोहिष्ठादिभिर्मंत्रं मृदा
लंभेन पार्थिवं। आग्नेयं भस्मना स्नानं वायव्यं गोर
जः स्मृतं। यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते।
वारुणं चावगाहं च मानसं विष्णुचिंतनं। कालदे-
शादसामर्थ्यात्सर्वं तुल्यफलं स्मृतं। कूर्म्मपुराणे
स्वस्थस्य वारुणं स्नानं ब्राह्मं व्याधौ जलक्षये। दिव्यं
ब्रह्मवतां पुण्यं वायव्यमुपपायिनं। जाबालिः।
अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्म्मिणां। आ-
र्द्रेण वाससा चापि मार्जनं दैहिकं विदुः। नाभेरधः प्र-
विष्टया सुकटिं प्रक्षाल्य मृज्जलैः। आर्द्रेण कर्पटेनां
गं कापिलं शोधनं स्मृतं। विद्वत्सरस्वती स्नानं प्राप्त-

सारस्वतं मतं। विद्वद्वाक्येन पादविद्या पादनं सारस्वतं
स्नानमित्यर्थः। इत्थं प्रासंगिकं संप्रति प्रकृतं प्रक्रम्यते
एवं स्नात्वा वस्त्रादिभिरंगं न प्रमृज्यात्। तथा च शा
तातपः। अपमृज्यान्न च स्नातो गात्राण्यंबरपाणि
भिः। न चाविधूनयेत्केशान् वाससी न विधूनयेत्।
तिस्रः कोट्योर्द्धकोटी च यावद्रोमाणि मानवे। स्रवंति
सर्वतीर्थानि तस्मान्न परिमार्जयेत्। देवलः। देवाः
पिबंति शिरसो मुखस्य पितरस्तथा। वक्षसोपि च गं
धर्वा अधस्तात्सर्वजंतवः। अतस्त्वंगानि वस्त्रेण पा
णिना च न मार्जयेत्। अमार्जयन्निति गोदोहमात्रं
तिष्ठेत्। एतच्च शिष्टाचारादवगम्यते। ततो वाससी प
रिधायोरू प्रक्षालयेत्। तथा च योगयाज्ञवल्क्यः
स्नात्वैवं वाससी धौते अक्लिन्ने परिधाय च। प्रक्षा
ल्योरू मृदाचांधी हस्तौ प्रक्षालयेत्तथा॥ अथ व
स्त्रविधिः॥ तत्र भृगुः। ब्राह्मणस्य सितं वस्त्रं
नृपते रक्तमुल्वणं। पीतं वैश्यस्य शूद्रस्य नीलं म
लवदिष्यते। उल्वणं निबिडं। रक्तं धातुरक्तं। शा
तातपः। ईषद्धौतं नवं श्वेतं सदशं यन्न धारितं।
अहतं तद्विजानीयात्सर्वकर्म्मसु पावनं। ईषद्धौतं
जलमात्र प्रक्षालितं। यंत्रादुत्तार्य यद प्रक्षालितं
तदप्यहतं। यथाह सत्यतपाः। अहतं यंत्रनिर्मुक्त-

मुक्तं वासः स्वयंभुवा। प्रशस्तं तन्मांगल्लिक्येषु ता-
वत्कालं न सर्वदा। मांगलिक्यं विवाहादि। प्रागग्रमु
दगग्रं वा धौतं वस्त्रं प्रसारयेत्। पश्चिमाग्रं दक्षिणाग्रं
पुनः प्रक्षालनाच्छुचि। अन्यदेव भवेद्वासः शयनी
ये नराधिप। अन्यद्रथ्यासु देवानामर्चायामन्यदेव
हि। अन्यच्च लोकयात्रायामन्यदीश्वरदर्शने।
बौधायनः। उत्तरं वासः कर्त्तव्यं पंचस्वेतेषु कर्म्मसु
स्वाध्यायोत्सर्गदानेषु भुक्ताचमनयोः स्मृतं। उत्स-
र्गो मूत्रादेः। स्वाध्यायादिग्रहणं विहितविकल्पक
र्म्मोपलक्षणार्थं। योगयाज्ञवल्क्यः। अभा-
वे धौतवस्त्रस्य शाणक्षौमाजिनानि च। कुतपं यो-
गपट्टं वा द्विवासा येन वा भवेत्। यज्ञोपवीते द्वे-
धार्ये श्रौते स्मार्त्ते च कर्मणि। तृतीयमुत्तरीयं च
वस्त्राभावे तदिष्यते। जातूकर्ण्यः। वस्त्रोत्तरी-
याभावे द्व्यंगुलं त्र्यंगुलं वा चतुरंगुलं वा सूत्रं व-
स्त्राकृति परिमंडलं तदुत्तरीयं कुर्यात्। वस्त्रस्य
चीवरं वा। उत्तरीयाभावे तु धौतवस्त्रस्यार्द्धभागे
नोत्तरीयं कुर्यात्। तथा च पारस्करः। एकं चेद्वा-
चेद्वासो भवति। तस्यैवोत्तरवर्गेण प्रच्छादयीते-
ति। योगयोगीश्वरः। जलादृते नार्द्रवासा नै-
कवासाः स्थले जपेत्। कषायं कृष्णवस्त्रं च मलिनं

केशदूषितं। छिन्नाग्रं चोपवस्त्रं च सूच्या ग्रथितमेव
च। वर्जयेदित्यर्थः। एतच्च सति विभवे। विष्णुपुरा-
णे। होमदेवार्चनाद्यासु क्रियासु स्नानभोजने। नै
कवस्त्रः प्रवर्त्तेत द्विजवाचनिके जपे॥ जातूकर्ण्यः।
परिधानाद्बहिः कक्षानिबद्धा ह्यासुरी मता। धर्म्मे
कर्म्मणि विद्वद्भिर्वर्जनीया प्रयत्नतः। परिधायन-
कं वस्त्रमुत्तरीयं च मंत्रतः। आचामेच्च द्विजो वस्त्रे
धौते विपरिधाय च। तत्रापूर्वग्रहण एव मंत्रः पार-
स्करेण दर्शितः। परिधास्यै यशो धास्ये दीर्घायु-
त्वाय जरदष्टिरस्मि शतं च जीवामि शरदः पुरूची
रायस्पोषमभिवर्द्धयिष्य इति। उत्तरीयेपि। यश
सा मा द्यावापृथिवी यशसेन्द्रा बृहस्पती यशोभग-
श्च मा विदद्यशो मा प्रतिपद्यतामिति। तथा वासः छ-
न्नोपाहनश्चापूर्वाणि चेन्मंत्र इति। नव्यवस्त्रपरिधा-
ने वारादयो ज्योतिः शास्त्रे प्रदर्शिताः। तत्र सुरेश्व-
रः। मार्त्तंडे च घनं व्रणाः शशधरे क्लेशः सदा भू-
मिजे वस्त्रं लाभकरं बुधे सुरगुरौ विद्यागमः संप-
दः। नानायोगरतिः प्रमोदवनिता शय्यादि ला-
भो भृगौ दैन्यं शश्वत्तरोगवान्किल नरो धृत्वांब-
रं सौरिणा। श्रीपतिः। रोहिणीषु करपंचके श्वि-
भेष्युत्तरे पि च पुनर्वसुद्वये। रेवतीवसुदैवते च

भेन व्यवस्त्रपरिधानमिष्यते ॥ अथ क्रमप्राप्ततिलकविधिः ॥ ब्रह्मांडपुराणे ॥ भगवानुवाच ॥ अंगुष्ठः पुष्टिदः प्रोक्तो मध्यमायुष्करी भवेत् । अनामिकान्नदा नित्यं मुक्तिदा च प्रदेशिनी । एतैरंगुलिभेदैस्तु कारयेन्न नखैः स्पृशेत् । वर्त्तिदीपाकृतिं वापि वेणुपत्राकृतिं तथा । पद्मस्य मुकुलाकारं तथैव कुमुदस्य च । मत्स्यकूर्म्माकृतिं वापि शंखाकारमतः परं । दशांगुलप्रमाणं तु उत्तमोत्तममुच्यते । नवांगुलं मध्यमस्याद्दशांगुलमतः परं । सप्तषट्पञ्चभिः पुण्ड्रं मध्यमं त्रिविधं स्मृतं । चतुस्त्रिद्व्यंगुलैः पुण्ड्रकनिष्ठं त्रिविधं भवेत् । ललाटे केशवं विद्यात् नारायणमथोदरे । माधवं हृदये न्यस्य गोविंदं कंठकूपके । विष्णुं च दक्षिणे कुक्षौ तद्भुजे मधुसूदनं । त्रिविक्रमं कर्णदेशे वामे कुक्षौ तु वामनं । श्रीधरं च तथा न्यस्य वामबाहौ नरस्सदा । पद्मनाभं चांसदेशे ककुद्दामोदरं स्मरेत् । वासुदेवं स्मरेन्मूर्ध्नि तिलकं कारयेत्क्रमात् । व्यासः । जाह्नवीतीरसंभूतां मृदं मूर्ध्ना बिभर्त्ति यः । बिभर्त्ति रूपं सोऽर्कस्य तमोनाशाय केवलं । सत्यतपाः । गोमतीतीरसंभूतां गोपीदेहसमुद्भवां । मृदं मूर्ध्ना वहेद्यस्तु सर्व्वपापैः प्रमुच्यते । ब्रह्मांडपुराणे । श्यामं शांतिकरं प्रोक्तं रक्तं वश्यकरं भवेत् । श्रीकरं पीतमित्याहुर्वैष्णवं श्वेतम्

मुच्यते। ब्रह्मपुराणे। स्नानं गोदानं तपो होमः स्वाध्या-
यः पितृतर्पणं। भस्मी भवति तत्सर्वमूर्ध्वपुंड्रं विना
कृतं। ऊर्ध्वपुंड्रं यदा कुर्यात् त्रिपुंड्रं भस्मना सदा। तिल-
कं वै द्विजः कुर्याच्चंदनेन यदृच्छया। ऊर्ध्वपुंड्रं द्विजः कु-
र्यात् क्षत्रियस्तु त्रिपुंड्रकं। अर्द्धचंद्रं तु वैश्यस्य वर्तुलं
शूद्रजातिषु। अथ माध्याह्निकीं संध्यां पूर्वोद्दिष्टां समा-
चरेत। उपस्थानं च तत्रोक्तं जपस्य च विधिस्तथा। अथ
ब्रह्मयज्ञः। तत्र श्रुतिः। उदित आदित्ये दक्षिणात-
उपवीयोपविश्य हस्तावव निज्य त्रिराचामेद्द्विः परिमृ-
ज्य सकृदुपस्पृश्य शिरश्चक्षुषी नासिके श्रोत्रे हृदयमाल-
भ्येति। अयमाचमनप्रकारः। ब्रह्मयज्ञानुष्ठानप्रका-
रः शौनकेनोक्तः। प्राग्वोदग्वा ग्रामान्निष्क्रम्याप आ-
प्लुत्य यज्ञोपवीत्यच्छिन्नवासा दर्भाणां महदुपस्तीर्य प्राक्कू-
लानां तेषु प्राङ्मुख उपविश्योपस्थं कृत्वा दक्षिणोत्त-
रौ पाणी संधाय पवित्रवन्तौ द्यावापृथिव्योः संधिमीक्षमा-
णः संमील्य वा यथा वा युक्तमात्मानं मन्यते तथा युक्तो-
धीयीत स्वाध्यायं ॐ पूर्वा व्याहृतीः सावित्रीमन्वाहप-
च्छोऽर्द्धर्चशः सर्वामिति तृतीयं स यावन्मन्येत तावदधी-
त्यैतया परिदधाति नमो ब्रह्मण इति। अच्छिन्नवासाः
स्नानार्द्रवासाः। महदुपस्तीर्य प्राक्कूलैर्दर्भैर्भुवं निविडं
यथा भवति तथाच्छाद्य। उपस्थं कृत्वा वामपादांगुष्ठ-

दक्षिणपादांगुष्ठं निधाय पादपार्ष्णिसंमेलने कृते मध्य उपस्थाकृतिर्भवति । तदुपस्थमित्युच्यते । इतरेतरपादव्यत्यासस्थापनेनोपवेशनमुपस्थकरणमिति स्मृतिरत्नार्थः । अथवा यथोपदेशं कुर्यात् । यथा वा युक्तमात्मानं मन्यते यथा समाहितमात्मानं मन्यते । ॐकारपूर्वं भूरादिव्याहृतित्रयं क्रमेण गायत्रीपादादौ निक्षिप्य प्रथमतः पठेत् ततस्तथैव भूरादिव्याहृतिद्वयमर्द्धर्चक्रमेण ततस्तथैव त्रीन् व्याहृतिपूर्वकं सर्वां गायत्रीं पठेत् । यावन्मन्येत तावदित्यादि गायत्रीजपानंतरं ऋग्यजुःसामादिषु यावत्पठितं मन्येत तावदधीत्य नमो ब्रह्मणे नमोस्त्वग्नय इत्येतया परिदधाति परिधानं त्रिःपठनं ॥

योगयाज्ञवल्क्यः । आदावारभ्य वेदं तु स्नात्वोपर्युपरि क्रमात् । यदधीतेन्वहं शक्त्या सस्वाध्याय इति स्मृतः ॥ ब्रह्मयज्ञप्रसिद्ध्यर्थं विद्यां वाध्यात्मिकीं जपेत् । जप्त्वा च प्रणवं वापि ततस्तर्पणमाचरेत् । मनुः अपां समीपे नियतो नैत्यकं विधिमास्थितः । सावित्रीमप्यधीयीत गत्वारण्यं समाहितः । अरण्यं गत्वेति यथाच्छदिर्न दृश्यते तथारण्यं गत्वेत्यर्थः । तथा च श्रुतिः । ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि ग्रामादच्छदिर्दर्श उदीच्यां प्रागुदीच्यां वोदित आदित्य इति । उदित आदित्य इत्युदयोत्तरकालः सकलोपि गृह्यते न

प्रातःकाल एव। अत एव बृहस्पतिः। सचार्वाक्तर्पणा
त्कार्यः पश्चाद्वा प्रातराहुतेः। वैश्वदेवावसाने चाना
न्यदत्ते निमित्तत इति। सः ब्रह्मयज्ञ इत्यर्थः। वैश्व
देवावसान इति मनुष्ययज्ञानंतरं। मनुष्ययज्ञश्च
सनकाद्युद्देशेन हंतकारो यो दीयते स एव नातिथि
पूजा। श्रुतिरपि मनुष्ययज्ञानंतरं ब्रह्मयज्ञं दर्श-
यति। देवयज्ञः पितृयज्ञो भूतयज्ञो ब्रह्मयज्ञ इति।
कूर्म्मपुराणेपि। यदि स्यात्तर्प्पणादर्वाक् ब्रह्मय-
ज्ञः कृतो नहि। कृत्वा मनुष्ययज्ञं वै ततः स्वाध्याय
मारभेत्। यदि दैवादिनिमित्तेनोक्तकाले ब्रह्मय-
ज्ञो न कृतस्तदा कालांतरेपि भवति। यदा त्वसम-
र्थस्तदा मनसा पठेत्। तथा च श्रुतिः। ग्रामे मनसा
स्वाध्यायमधीयीत दिवा नक्तं वेति। मनुः। नैत्यके
नास्त्यनध्यायो ब्रह्मसत्रं हि तत्स्मृतं। ब्रह्माहुति-
हुतं पुण्यमनध्यायवषट्कृतं। तथा। वेदोपकरणे-
चैव स्वाध्याये चैव नैत्यके। नानुरोधोस्त्यनध्याये
होममंत्रेषु चैव हि। वेदोपकरणं वेदांगं। अत्र विशे
षो गौतमेनोक्तः। अथ यदि वातो वा यास्तनयेद्वा वि
द्युत्येत। वाऽवस्फूर्जेद्वा एकां वर्चमेकं वा यजुरेकं सा
माभिव्याहरेत्। भूर्भुवः स्वः सत्यं तपः श्रद्धायां जुहोमी
ति। अत्र वातो वायादित्यनध्यायोपलक्षणं। अतो

नध्यायेष्वेकमृचादिकमेव वा पठेत् । नाधिकमिति गम्यते । तथा । आद्यावेवोङ्कृतं पूर्वं परस्ताच्च विरम्यते । कुशानुत्तरतः क्षित्वा यथाचमनमारभेत् । इति विद्यातपोयोनिरयोनिर्विष्णुरीडितः । ब्रह्मयज्ञार्चितो देवः प्रीयतां मे जनार्दनः ॥ इति ब्रह्मयज्ञविधिः ॥ अथ तर्पणं ॥ बृहस्पतिः । ब्रह्मयज्ञप्रसिद्ध्यर्थं विद्यां चाध्यात्मिकीं जपेत् । जप्त्वाथ प्रणवं वापि ततस्तर्पणमाचरेत् । शातातपः । तर्पणं तु शुचिः कुर्यात्प्रत्यहं स्नातको द्विजः । देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमं । अत्रांजलिनियममाह । व्यासः ॥ एकैकमंजलिं देवा द्वौ द्वौ तु सनकादयः । अर्हंति पितरस्त्रीं स्त्रींस्त्रियस्त्वेकैकमंजलिं । विष्णुपुराणे । त्रिरपः प्रीणनार्थाय देवानामपवर्जयेत् ॥ ऋषीणां तु यथान्यायं सकृच्चापि प्रजापतेः । यथान्यायमित्यनेन देवानामिव त्रिरित्यर्थो गम्यते । चशब्दो वाशब्दार्थे । अपिशब्दादंजलिद्वयं गृह्यते । अत्रांजलिसंख्यायां स्वस्वगृह्यानुसारेण व्यवस्था । येषां स्वशाखायां न कोपि विशेष आम्नातस्तेषां विकल्पः ॥ योगयाज्ञवल्क्यः । अन्वारब्धेन सव्येन नाम्ना गोत्रेण वाप्यथ । कूर्मपुराणे । अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु । देवर्षींस्तर्पयेद्धीमानु प्रशं

संति देवताः। उभाभ्यामपि हस्ताभ्यामुदकं यः प्रय-
च्छति। स मूढो नरकं याति कालसूत्रमवाक्शिरा इ-
त्यादि। योगयाज्ञवल्क्यः। व्याघ्रादिवचनानि ता-
नि तत्तच्छाखाप्रयुक्ततया निषेधकानि न तु सर्वसाधारण्ये-
न। अतो न काप्यनुपपत्तिः। अन्वारब्धेन सव्येन
पाणिना दक्षिणेन तु। देवर्षीस्तर्पयेदिति कूर्मपुरा-
णवचने देवर्षीनिति विशेषोपादानादितराण्येक-
हस्ततर्पणवचनानि सामान्यानि विशेषविषयकू-
र्मपुराणवचनं विषमे देवर्षितर्पणे तु प्रविशन्त्वि-
ति चेन्न। मैवं। अन्वारब्धेन सव्येन नामगोत्रेण चाप्य-
थेति योगयाज्ञवल्क्येन नामगोत्रसंहितसव्यह-
स्तान्वारब्धदक्षिणहस्ततर्पणविधानात्। गोत्रो-
च्चारणं च पितृणामेव न देवानां नाप्यृषीणां। अत
एकहस्ततर्पणं देवर्षिपितृतर्पणसाधारणं। एवं-
च पूर्वोक्तैव व्यवस्था ज्यायसी। विवाहादावेकह-
स्तेनैव। तथा च कार्ष्णाजिनिः विवाहे श्राद्धकाले च
पाणिनैकेन दीयत इति। हारीतः। वसित्वा वसनं
शुष्कं स्थले विस्तीर्णबर्हिषि। विधिज्ञस्तर्पणं कु-
र्यान्न तु पात्रे कदाचन। एतच्चानुद्धृतोदकस्य तर्पण-
विषयं। उद्धृतोदके तु स एव पात्राद्वा जलमादाय शुभे
पात्रांतरे क्षिपेत्। जलपूर्णेऽथवा गर्त्ते न स्थलेन विच-

ह्नेषि। पात्रं चात्र पितामहेनोक्तं। हेमरूप्यमयं पात्रं ताम्रं कांस्यसमुद्भवं। पितॄणां तर्प्पणे पात्रं मृन्मयं तु परित्यजेदिति। अत्र योगयाज्ञवल्क्यः। यज्ञोपवीतेन सिंचेत तिलान् संमिश्रयेज्जले। अन्यथा वामहस्ते तु ततस्तर्प्पणमाचरेत्। अन्यथा अनुद्धृत्य। अतोन्यथा चेत्सव्ये तु तिलान् कृत्वा विचक्षण इति वा पाठः। तथा। अतोन्यथा चेत्सव्येनेत्यपि पाठः। येषां शाखिनां वामहस्तान्वारब्धेन दक्षिणहस्तेन तर्प्पणं तेषां वामहस्तेन तिलग्रहणमित्यनुसंधेयं। अपरोपि विशेषस्तेनैवोक्तः आवाह्य पूर्ववन्मंत्रैरास्तीर्य च कुशान्बुधान्। प्रागग्रेषु सुरान्सर्वान्दक्षिणाग्रेषु वै पितॄन्। देवं च देवर्षीणामपि। कूर्म्मपुराणे। देवान् ब्रह्मऋषींश्चैव तर्प्पयेदक्षतोदकैः। पितॄन् शक्त्या तिलैः कृष्णैः स्वसूत्रोक्तविधानतः। गोभिलः। शुक्लैस्तु तर्प्पयेद्देवान् मनुष्यान् शबलैस्तिलैः। पितॄंस्तु तर्प्पयेत्कृष्णैः तर्प्पयन् सर्वदा द्विजः। तिलग्रहणे तु विशेषमाह। मरीचिः। मुक्तहस्तेन दातव्यं नमुद्रां तत्र दर्शयेत्। वामहस्ते तिला ग्राह्या मुक्तहस्तस्तु दक्षिणः। प्रदेशिन्यंगुष्ठाग्रसंयोगो मुद्रा। अत एव तर्ज्जन्यांगुष्ठेन वा तिला ग्राह्यास्तच्चोभयं दक्षिणहस्तस्यैव। अत एव मुक्तहस्तेन दातव्यमित्युक्त्वापि मुक्तहस्तदक्षिण इति। पुनरभिहितं मरीचि-

ना। एतच्च येषामंजलिनातर्प्पणं तद्विषयं विषयांतरेतु पूर्वमभिहितं। तिलस्थापनस्थलंतु स्मृत्यर्थसारे। वामहस्ते तिलान् क्षिप्त्वा जलमध्ये तु तर्प्पयेत्। स्थले-ष्वाचं वले पात्रे रोमकूपे न कुत्रचित्। जलतर्प्पणे लोमरहितप्रदेशे वामबाहौ तिलान्संस्थाप्य मुद्रारहितदक्षिणतर्जन्यंगुष्ठयोरन्यतरेण तिलान्गृहीत्वा वामहस्ततले स्थापयित्वा तर्प्पयेदित्यर्थः। वामबाहुतिलसंस्थापनव्यतिरिक्तमन्यत्स्थलतर्प्पणेपि समानं। एवमुक्तेन प्रकारेण स्थले स्थित्वा स्थले पात्रे गर्त्ते वा तर्प्पणं कुर्यान्नतु जलइति सिद्धं। तथाच यदुक्तं कार्ष्णाजिनिना। देवतानां पितॄणां च जले दद्याज्जलांजलिं॥ असंस्कृतप्रमीतानां स्थले दद्याज्जलं सकृदिति। तत्तु जलतर्प्पणाभिप्रायेण। एवंच यानि स्थलतर्प्पण-निषेधकानि तानि जलस्थितस्य यानि च जलतर्प्पणनिषेधकानि तानि स्थलस्थितस्येति वचनानां विरोधः परिहरणीयः। विष्णुस्तु स्थलस्थितस्य यानि च जलतर्प्पणं क्वचिदनुजानीते। यत्राशुचिस्थलं वा स्यादुदके देवतापितॄन्। तर्प्पयेत्तु यथाकाममप्सु सर्वं प्रतिष्ठितमिति। हारीतः। आर्द्रवासा जले कुर्यात्तर्प्पणा-चमनं जपं। शुष्कवासाः स्थले कुर्यात्तर्प्पणाचमनंजपं। अत्र च शुष्कमुक्तस्त्वप्पतु वप्यतामितिवा क्षमुक्तं-

र्प्पयामीति वा मन्त्रप्रयोगो भवति। तथा च योगयाज्ञव-
ल्क्यः। तृप्यन्त्विति समुच्चार्यं तृप्यतामित्यथापि वा।
विधिज्ञः प्रक्षिपेत्तोयं देवादीनां च शेषतः। बौधाय-
नः। अथ दक्षिणतः। प्राचीनावीती पितॄन्स्वधा न-
मस्तर्प्पयामि पितामहमित्यादि। स्मृत्यर्थसारेऽपि॥
ब्रह्मादयो ये देवास्तान्देवांस्तर्प्पयामि भूर्देवांस्तर्प्पया-
मि भुवर्देवांस्तर्प्पयामि स्वर्देवांस्तर्प्पयामि भूर्भुवः स्व-
र्देवांस्तर्प्पयामि। एवं भूर्ऋषीन् भूः पितॄनित्यादि॥
यमः। द्वौ हस्तौ युग्मतः कृत्वा पूरयेदुदकाञ्जलिं। गोशृं-
गमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत्। गोशृंगस्या-
नियतप्रमाणत्वाद्विवक्षितं प्रमाणमाह। दक्षः॥
प्रादेशमात्रमुद्धृत्य सतिलं प्राङ्मुखः सुरान्। उद-
ङ्मनुष्यांस्तर्प्पयेत् पितॄन् दक्षिणतस्तथा। अग्रैस्तु त-
र्प्पयेद्देवान्मनुष्यान् कुशमध्यतः। पितॄंस्तु कुशमू-
लाग्रैर्विधिः कौशो यथाक्रमं। मरीचिः। विना रूप्य-
सुवर्णेन विना ताम्रतिलैस्तथा। विना मंत्रैश्च दर्भैश्च
पितॄणां नोपतिष्ठत इति - नात्र रजतादिसमुच्चयो विव-
क्षितः। अत एव सत्यव्रतः। खड्गमौक्तिकहस्तेन कर्त्त-
व्यं पितृतर्प्पणं। मणिकांचनदर्भैर्वा न शुद्धेन कदा-
चनेति। शुद्धेन केवलेन खड्गादिरहितेनेति यावत्।
अत्र वाशब्दोपादानान्न समुच्चय इत्यर्थः। तथा मरी-

चिः याज्ञवल्क्योऽपि। तिलानामप्यलाभे तु सुव
र्णरजतान्वितं। तदभावे निषिंचेत्तु दर्भैर्मंत्रेण वा पुन-
रिति। अत्र च खड्गादिभिरङ्गुल्यो हस्तः कार्यो न तु खड्गा-
दिपात्रस्वीकरणं। तथा सति एकैकमंजलिं दद्यादित्या-
द्यंजलिविधायकवाक्यबाधापत्तेः। एवं तर्हि खड्गादि
पात्रप्रशंसापराणां वाक्यानां विध्येकवाक्यतया अप्रमा
णादप्रामाण्यं स्यादिति चेत्। नैवं। अर्घ्यदाने खड्गादि
पात्रप्रशंसापराणां वाक्यानां विध्येकवाक्यतया अ-
भावादप्रामाण्यमिति चेत्। नैवं। अर्घ्यदाने खड्गादि
पात्रविधायकवाक्यैकवाक्यत्वेन प्रशंसावाक्यानां सा
र्थकत्वान्नाप्रामाण्यं। यच्च मनुनाभिहितं। राजतैर्भाज-
नैरेषामथवा रजतान्वितैः। वार्यपि श्रद्धया दत्तमक्ष-
यायोपकल्पत इति। एतदपि श्राद्धप्रकरणोपरिपठि
तत्वादर्घ्यदानविषयमेव। अतश्च तर्पणे खड्गादिमु-
द्रिकाभिर्युक्तो हस्तः कार्यः। तथा च याज्ञव-
ल्क्यः। अनामिकाधृतं हेम तर्जन्यां रूप्यमेव च। क-
निष्ठिकाधृतं खड्गं तेन पूतो भवेन्नर इति। यच्च शंखेन त-
र्पणप्रकरण एवाभिहितं सौवर्णेन पात्रेण राजते
नौदुंबरेण खड्गपात्रेणान्यपात्रेण चोदकं पितृतीर्थे
स्पृष्टं दद्यादिति तदपि तर्पणप्रकरणादुत्कृष्यार्घ-
प्रकरणे योज्यं। अंजलिवाक्यापेक्षया प्रकरणस्य दु-

र्वैलत्वात्। अथवा वाक्यप्रकरणशिष्टाचाराणामविरोधाय यस्मिन्पात्रे धृतेऽञ्जलिः प्रशिथिलो न भवेत्ताहृक्पात्रविशिष्टेनाञ्जलिना पितृतीर्थस्पृगुदकतर्पणमपि दद्यात्। लिखितः। प्राङ्मुखो यज्ञोपवीती प्रागग्रैः कुशैर्देवतातर्पणं देवतीर्थेन कुर्यात्। देवाश्च योगयाज्ञवल्क्येनोक्ताः। ब्रह्माणं तर्पयेत्पूर्वं विष्णुं रुद्रं प्रजापतिं। देवान् छंदांसि वेदांश्च ऋषींश्चैव सनातनान्। आचार्यांश्चैव गंधर्वानाचार्यतनयांस्तथा। संवत्सरं सावयवं देवीश्चाप्सरसस्तथा। आचार्यान्व्यासादीन्। सावयवं। अवयवा मासादयः। तथा देवानुगान्नागान्सागरान्पर्वतानपि। सरितोथ मनुष्यांश्च यक्षान्रक्षांसि चैव हि। पिशाचांश्च सुपर्णांश्च भूतान्यथ पशूंस्तथा। वनस्पतीनोषधीश्च भूतग्रामं चतुर्विधं। विष्णुसमुच्चये। ततः कृत्वा निवीतं तु यज्ञसूत्रमतन्द्रितः। प्राजापत्येन तीर्थेन मनुष्यांस्तर्पयेत्पृथक्। कार्ष्णाजिनिः। सनकश्च सनंदनश्च तृतीयश्च सनातनः। कपिलश्चासुरिश्चैव वोढुः पंचशिखस्तथा। एते ब्रह्मसुताः सप्त मनुष्याः परिकीर्त्तिताः। ततश्च स्वस्वशाखानुसारेण मंडलऋषीन्प्राजापत्यादिकान् ऋषींश्च तर्पयित्वा पितृतर्पणमारभेत्॥ तत्र योगयाज्ञवल्क्यः। अपसव्यं ततः कृत्वा भूत्वा च पितृदिङ्मुख इति। तथा। सव्योत्तराभ्यां पाणिभ्या

मिति। पैठीनसिः। अपसव्यं ततः कृत्वा भूत्वा च पितृदिङ्मुखः। पितॄन् दिव्यान् दिव्यांश्च पितृतीर्थेन तर्प्पयेत्। दिव्याश्च वस्वादयः। अदिव्याः स्वपित्रादयः। ते च दिव्या अनेनैव दर्शिताः। ध्रुवो ध्रुवश्च सोमश्च आपश्चैवानिलोनलः। प्रत्यूषश्च प्रभासश्च वसवोष्टौ प्रकीर्त्तिताः। अजैकपादहिर्बुध्न्यो विरूपाक्षोथ रैवतः। हरश्च बहुरूपश्च त्र्यंबकश्च सुरेश्वरः। सावित्रश्च जयंतश्च पिनाकी चापराजितः। एते रुद्राः समाख्याता एकादश सुरोत्तमाः। इंद्रो धाता भगः पूषा मित्रोथ वरुणोर्यमा। रविर्विवस्वांस्त्वष्टा च सविता विष्णुरेव च। एते वै द्वादशादित्या देवानां प्रवरा मताः। अत्र वस्वादितर्प्पणं पृथक् स्वपित्रादितर्प्पणं च पृथगुपात्तमिति वसुरूपं पितरं तर्प्पयामीत्येवं तर्प्पणं न विधेयं अपितु नामगोत्रोच्चारणमेव। आह तु वसुरुद्रादित्यरूपत्वेनापि। अनेनैवाभिप्रायेण। स्मृत्यर्थसारे। वसुरुद्रादित्यरूपान् श्राद्धदेवतर्पयेत्पितॄन्। नामगोत्रे समुच्चार्य तिलैस्तीर्थे कुशंयत इति। अथवा श्राद्धशब्दो गौणवृत्त्या तर्प्पणेपि वर्त्तत इति वस्वादिनामसहितानामेव पित्रादीनां तर्प्पणमस्तु। यतः शिष्टाचार एवमेव प्रायशो दृश्यते। उदकग्रहणे विशेषमाह। योगयाज्ञवल्क्यः। दक्षिणे पितृतीर्थेन जलं सिंचेद्यथाविधि। दक्षिणेनैव गृह्णीयात्पितृतीर्थेन संयतः।

तथाऽसवर्णेभ्योजलं देयं नासवर्णेभ्य एव च । गोत्रना
मस्वधाकारैस्तर्प्पयेदनुपूर्वशइति । अनुपूर्वशः पित्रा
दिक्रमेण अत्र यद्यप्यसवर्णेभ्य इत्यविशेषोपादानं कृ
तं तथाप्युत्तमवर्णेन हीनवर्णंप्रति न कार्यं हीनवर्णेन
उत्तमवर्णोद्देशेन कृतेन दोषः । यतस्तु दूषणतापत्तिर्दो
षत्वेनाभिहिता स्मृतिषु हीनस्योत्कृष्टत्वं न दुष्टं उत्कृ
ष्टस्य हीनत्वं दुष्टमेव । सवर्णेभ्य इत्यविशेषोपादानं
कृतं तथाप्युत्तमवर्णेन हीनवर्णंप्रति न कार्यं हीनव-
र्णेन उत्तमवर्णोद्देशेन कृतेन दोषः । यतस्तु दूषणता-
पत्तिर्दोषत्वेनाभिहिता स्मृतिषु हीनस्योत्कृष्टत्वंन-
दुष्टं उत्कृष्टस्य हीनत्वं दुष्टमेव । सर्वण शब्दो मूर्द्धाव
सिक्ताद्दिजातीनामुपलक्षणार्थः । यद्यप्यसवर्णामा
पत्नमातृभ्रात्रादयोऽप्यसवर्णाः तथापि तत्तर्प्पणं सु
मंतु वा तेषांभ्रात्रादिसमत्वप्रतिपादनात् । पितृपत्न्यः
सर्वामातरस्तद्भ्रातरो मातुला स्तद्दुहितरश्च भगिन्य-
स्तदपत्यानि भागिनेयानीति । यत्र च समत्वापादनं तत्र
मुख्यापेक्षया किंचिन्न्यूनता भवतीति । नात्र तत्साधा
न्यमपितु स्वतन्त्रविहितसवर्णतर्प्पणानन्तमेव तत्तर्प्प
णमिति पितृपत्न्यः सर्वामातर इति न ब्रूयात् । उपात्त
श्च सर्वशब्दो न तु पितृपत्न्येव । अतः सर्वशब्दासंको-
चाय पूर्वोक्त एव युक्तः पक्षः । एतेन भीष्मतर्प्पणमपि

ब्राह्मणस्य निषिद्धमित्युक्तं भवति। जीवत्पितृकं प्र-
ति योगयाज्ञवल्क्यः। कव्यवाडनलः सोमो यम-
श्चैवार्यमा तथा। अग्निष्वात्ताः सोमपाश्च तथा बर्हिषदो
ऽपि च। यदि स्याज्जीवत्पितृक एतान्विद्वांस्तदा पितॄन्। ये
भ्यो वापि पिता दद्यात्तेभ्यो चापि मदापयेत्। एतांश्चैवम
मीतांश्च प्रमीतपितृको द्विज इति। तथा। न जीवत्पितृकः
कृष्णैस्तिलैस्तर्पणमाचरेत्। उक्ततिलतर्पणस्य क्वचि
दपवादो मरीचिनोक्तः। सप्तम्यां रविवारे च गृहे जन्मदिने त-
था। भृत्यपुत्रकलत्रार्थी न कुर्यात्तिलतर्पणं। तथा। पक्ष
योरुभयो राजन्सप्तम्यां निशि संध्ययोः। विद्यापुत्रकल-
त्रार्थी तिलांस्त्वत्र वर्जयेत्। भानौ भौमे त्रयोदश्यां नं-
दाभृगुमघासु च। पिंडदानं मृदा स्नानं न कुर्यात्तिलतर्प-
णं। स्मृत्यर्थसारे। विवाहे चोपनयने चौले सति यथा
क्रमं। वर्षमर्द्धं तदर्द्धं च नेत्येके तिलतर्पणं। तिथितीर्थ
विशेषेषु कार्यं प्रेते च सर्वथा। पिंडान्तपिंडानो दद्युः प्रेत
पिंडं विनात्र तु। अत्र विवाहादौ पितृयज्ञे च गया-
यां दद्युरेव ते। गयासाम्यं मृताहस्य केचिदाहुः पुराणगाः।
तथा। तीर्थे तिथिविशेषे च गंगायां प्रेतपक्षके। निषिद्धेपि
दिने कुर्यात्तर्पणं तिलमिश्रितमिति। असमर्थस्य संक्षेप-
तर्पणं। विष्णुपुराणे। आब्रह्मस्तंबपर्यंतं जगत्तृप्यत्वि
ति ब्रुवन्। क्षिपेत्पयोऽञ्जलींस्त्रीन्कुर्वन् संक्षेपतर्पणमि-

ति। निःपीडयति यः पूर्वं स्नानवस्त्रमतर्पिते। निराशाः पितरो यांति शापं दत्त्वा सुदारुणं। पराशरः। द्वादश्यां पंचदश्यां च संक्रांतौ रविवासरे। वस्त्रं निःपीडयेन्नैव न च क्षारेण योजयेत्। शंखः। स्वधयः सर्वभूतानि तर्प्पयेदहं द्विजः। स गच्छेत्परसंस्थानं तेजोरूपमनामयं।। इति तर्प्पणं।। अथ यमतर्प्पणं। तत्र स्कंदपुराणे कृष्णपक्षे चतुर्द्दश्यामंगारकदिने यदा। तदा स्नात्वा शुभे तोये तर्प्पयेद्यमनामभिः। वृद्धमनुः। यां कांचित्सरितं प्राप्य कृष्णपक्षे चतुर्द्दशीं। यमुनां च विशेषेण नियतो नियतेंद्रियः। यमाय धर्मराजाय मृत्यवे चांतकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च। उदुंबराय दध्नाय नीलाय परमेष्ठिने। वृकोदराय चित्राय चित्रगुप्ताय वै नमः। इति तर्प्पयेदिति शेषः।। यमाय नमः। यमं तर्पयामीति प्रयोगः।। अथ व्यासोपि। कृष्णत्रयोदश्यां चतुर्द्दश्यां वा। यमाय धर्मराजाय मृत्यवे चांतकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय चेत्येभिः सप्तभिर्नमस्कारं मंत्रैः सप्तोदकांजलीन्दद्यात्सर्वपापेभ्यः प्रमुच्यत इति। वृद्धमनुः। एकैकस्य तिलैर्मिश्रां स्त्रीन् स्त्रीन् कुर्याज्जलांजलीन्। तथा दीपोत्सवचतुर्द्दश्यां कार्यं च यमतर्प्पणं। अपरोपि विशेषः। स्कंदपुराणे। दक्षिणाभिमुखो भूत्वा तिलैः सव्यं समाहितः। देवतीर्थेन देवत्वात्ति-

लैःप्रेताधिपोयत इति॥ इतियमतर्प्पणं॥ अथ
देवतार्च्चनं॥ एवं तर्प्पणानंतरंसूर्यायार्घ्यंनिवेद्यज
ल देवंनमस्कृत्याचम्याभ्युक्ष्य गृहंगत्वाविष्ण्वादि
पूजांकुर्यात्। योगयाज्ञवल्क्यः। ततःसूर्यमुपस्था
यसम्यगाचम्य चस्वयं। अभ्युक्षणं समादाय संयता-
त्मागृहं व्रजेत्। तथाच नृसिंहपुराणे। ततोर्घ्यंभानवे
दद्यात्तिलपुष्पजलान्वितं। उत्थाप्यमूर्द्धपर्यंतंहंसः
शुचिषदुच्चरन्। जलदेवंनमस्कृत्य ततोगच्छेद्गृहंबु
धः। पौरुषेणतुसूक्तेन ततो विष्णुंसमर्चयेदिति। हारी·
तः। कुर्वीत देवतापूजांजपयज्ञादनंतरं। जपयज्ञो ब्र
ह्मयज्ञः। मरीचिः। विधाय देवतापूजांस्नानहोमादनं
तरं। अत्रपूर्वाह्णो देवतार्च्चने मुख्यः कालः। पूर्वाह्ण
एवकुर्वीत देवतानांचपूजनमिति एवकारस्मरणा
त्। माध्याह्निकानंतरकालोपि मुख्यसदृशः। तथा
कूर्म्मपुराणे। पौरुषेणतुसूक्तेन ततो विष्णुंसमर्चये·
त्। वैश्वदेवं ततः कुर्याद्बलिकर्मतथैवचेति। तथा।
कुर्वीत देवपूजांजपयज्ञादनंतरमिति ब्रह्मयज्ञानंतर
कालस्याप्युपादानात्। यदाप्रातरेव ब्रह्मयज्ञंहोमानं
तरं करोति तदा पूर्वाह्न एव। अथ तर्प्पणात्पूर्वंकाले
करोति तदा तर्प्पणानंतरमेवजलदेवतानमस्कारा
नंतरं गृहं गत्वा विष्णुपूजायां। नरसिंहपुराणे॥

विधानात्। पूज्यदेवता निगमे दर्शिताः। ब्रह्माणं विष्णुं वा सूर्यमग्निं गणाधिपं। दुर्गां सरस्वतीं लक्ष्मीं गौरीं वा नित्यमर्चयेत्। पद्मपुराणे। आदित्यं गणनाथं च देवीं रुद्रं यथाक्रमं। नारायणं विशुद्धाख्यमंते च कुलदेवताः। योगयाज्ञवल्क्यः। देवानामर्चनं कुर्याद्ब्रह्मादीनाममत्सरः। विष्णुर्ब्रह्मा च रुद्रश्च विष्णुर्देवो दिवाकरः। तस्मात्पूज्यतमं नान्यमहं मन्ये जनार्दनात्। दद्यात्पुरुषसूक्तेन यः पुष्पाण्यप एव वा। अर्चितं स्याज्जगदिदं तेन सर्वं चराचरं। अप्सु अग्नौ हृदये सूर्ये स्थंडिले प्रतिमासु च। षट्स्वेतेषु हरेः सम्यगर्चनं मुनिभिः स्मृतं। अनुष्टुभस्य सूक्तस्य त्रिष्टुबंतस्य देवता। पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः। प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे। तृतीयां वामपादे तु चतुर्थीं दक्षिणे न्यसेत्। पंचमीं वामजानौ तु षष्ठीं वै दक्षिणे न्यसेत्। सप्तमीं वामकुक्षौ तु अष्टमीं दक्षिणे न्यसेत्। नवमीं नाभिमध्ये तु दशमीं हृदये तथा। एकादशीं कंठदेशे वामबाहौ ततः परं। द्वादशीं दक्षिणे तु आस्यदेशे चतुर्दशीं। अक्ष्णोः पंचदशीं चैव षोडशीं मूर्ध्नि विन्यसेत्। एवं न्यासविधिं कृत्वा पश्चाद्यागं समाचरेत्। आद्ययावाहयेद्देवमृचा तु पुरुषोत्तमं। द्वितीययासनं दद्या

न्यासं चैव तृतीयया । अर्घ्यश्च तुर्य्या दातव्यः पं-
चम्याचमनीयकं । षष्ठ्या स्नानं प्रदातव्यं सप्त-
म्या वस्त्रमेव च । यज्ञोपवीतमष्टम्या नवम्या त्वनु-
लेपनं पुष्पं दशम्या दातव्यमेकादश्या तु धूपकं ॥
द्वादश्या दीपकं दद्यात्त्रयोदश्या निवेदनं । चतुर्दश्या
नमस्कारं पंचदश्या प्रदक्षिणं । अर्चयित्वा तु देवेशं
षोडश्या तु विसर्जयेत् । स्नाने वस्त्रे च नैवेद्ये दद्यादा-
चमनीयकमिति । एवमितरेषामपि ब्रह्मादीनां पूज
नं कार्यं तत्प्रकाशकैर्वैदिकैर्मंत्रैः । तदशक्तौ तत्तन्ना-
मधेयमंत्रैर्नमोन्तैः पूजयेत् । अथवा वेदाविरुद्धस्व-
स्वदीक्षानुसारेण वा देवतार्चनं कुर्यात् ॥ इति दे
वार्चनं ॥ अथ पूजोपयुक्तपुष्पाणि ॥ तत्र न
रसिंहपुराणे । पुष्पैरारण्यसंभूतैः पत्रैर्वा गिरिसं
भवैः । अपर्य्युषितनिःछिद्रैः प्रोक्षितैर्जंतुवर्ज्जितैः ।
आत्मारामोद्भवैर्वापि पुष्पैः संपूजयेद्धरिं । हरिमि-
त्युपलक्षणं । शमीपुष्पं बिल्वपुष्पं चंपकं नगरं-
तथा । करवीरं तथा श्वेतं पालाशं कुशपुष्पकं
वनमल्लीमशोकं च सेवतीं कुब्जमालतीं । त्रिसं
ध्यं तु तथा श्वेतं कुंदं च शतपत्रकं । मल्लिका चैव
जाती च सर्वपुष्पाद्विशिष्यते । जातीपुष्पसहस्रे-
ण यच्छेन्मालां सुशोभनां । बिल्वे विधिवदज्ञतया-

तस्य पुण्यफलं शृणु। कल्पकोटिसहस्राणि कल्पकोटिशतानि च। वसेद्धि स्म पुरे श्रीमान् विष्णुतुल्यपराक्रमः। पत्राण्यपि। अपामार्गं भृंगराजं शमीपत्रं च। खादिरं। दूर्वा च कुशपत्रं च दमनं मारुवकं न था। ततः श्रेष्ठं बिल्वपत्रं ततस्तु तुलसी वरा। एतेषां च यथालाभं पत्रैर्यश्चार्चयेद्धरिं। सर्वपापविनिर्मुक्तो विष्णुलोके महीयते। येषां न संति पुष्पाणि प्रशस्तान्यर्चने हरेः। पल्लवान्यपि तेषां स्युः प्रशस्तान्यर्चाविधौ हरेः। वीरुधानामभावेन वर्षि वा चार्चयेद्धरिं। अपराधसहस्राणि अपराधशतानि च। पद्मेनैकेन देवेशः क्षमते हेलयार्चितः। पद्मेनैकेन देवेशमभ्यर्च्य कमलापतिं। वर्षायुतसहस्रस्य पापस्य कुरुते क्षयं। अगस्तिवृक्षसंभूतैः कुसुमैरसितैः शुभैः। येऽर्चयंति च देवेशं तैः प्राप्तं परमं पदं। सुवर्णकेतकीपत्रं यो ददाति जनार्दने। कोटिजन्मार्जितं पापं दहते गरुडध्वज। सकृत्कदंबपुष्पेण हेलया हरिरर्चितः। सप्तजन्मानि देवर्षे तस्य लक्ष्मीर्न दूरगा। कुंभीपुष्पं तु देवर्षे यः प्रयच्छति केशवे। सुवर्णपलमात्रं तु पुष्पे पुष्पे भवेन्मुने। गारुडपुराणे। धात्रीफलेन यत्पुण्यं जयंत्याः समुपोषणे। खगेंद्र वल्लमेन्मर्त्यस्तुलसीपूजनेन तत्। यथाकथंचिदाहृत्य कुसुमैः पूजयेद्धरिं ॥

नाकपृष्ठमवाप्नोति नात्र कार्या विचारणा। स्कंदपुराणे
विष्णुमूर्द्धि स्थितं पुष्पं शिरसा यो वहेन्नरः। अपर्युषित
पापः स्याद्यावद्युगचतुष्टयं। पुष्पाभावे तु पत्राणि देया
नि च सुरार्चने। पत्राभावे पयो देयं तेन पुण्यमुपाप्नुते।
वर्ज्यानि च विष्णुधर्मे अभिहितानि। उग्रगंधीन्यगंधीनि
कुसुमानि न दापयेत्। अन्यायतनजातानि कंटकीनि
तथैव च। रक्तान्यकालजातानि चैत्यवृक्षोद्भवानि च
श्मशानजातपुष्पाणां दानं देवे विवर्जयेत्। अकरा
ख्यस्य पुष्पाणि तथा धत्तूरकस्य च। कृष्णं च कुटकं चा
र्कं नैव देयं जनार्दने। अकरः करीरः। शाल्मकं च शिरी
षं च वृहती गिरिमल्लिकां। सर्जकं चैव कूष्मांडं कंचनारं
च वर्ज्जयेत्। अथ शिवे वर्ज्यानि। प्रासाददीपिकायां।
जपावंधूकसिंधूरं तथा त्रैसंधिकेषु भे। दमसीकेतकी
यूथीमालती कुटजानि च। धुत्तूरांचाश्वमारश्च प्रमादे
नापि नार्पयेत्। वर्वरीसर्जपत्री च तथा च कुमुदद्वयं।
अतिपक्वान्यपक्वानि पतितानि विवर्ज्जयेत्। आरराया
न्यथगंधीनि सकीटं चोग्रगंधियत् अशुद्धपात्रपाणय
गवा सोभिः कुत्सितात्मभिः। आनीतं नार्पयेच्छंभोः
प्रमादादपि दोषकृत्। देवीपुराणे। शिवेनु वर्ज्जयेत्कु
दं उन्मत्तं च हरेः सदा। देवीनां चार्कमंदारौ आदित्ये
पिगरं तथा। विष्णुरहस्ये। न शुष्कैः पूजयेद्विष्णुं कुसु-

मैर्न्नमहीगतैः। नविशीर्णदलैर्मुक्तैर्नचैवाशुविकासितैः। आशुविकाशितैर्वल्लीविकासितैः। तथाजलंपर्युषितंत्याज्यंमत्राणिकुसुमानिच। तुलस्यागस्तिबिल्वानिर्गांगंवारिनदुष्यति। स्नानंकृत्वातुयःकश्चित्पुष्पंचिन्वतिवैद्विजः। देवतास्तन्नगृह्णन्तिभस्मीभवतिदारुवत्। एतच्चमध्यंदिनस्नानानंतरंवेदितव्यं॥

अथनित्यश्राद्धपंचमहायज्ञानांस्वरूपाणि तत्रयमः। पंचसूनागृहस्थस्यवर्त्ततेहरहःसदा॥ कंडनीपेषणीचुल्लीजलकुंभउपस्करः। एतानिवाहयन्विप्रोवध्यतेवैमुहुर्मुहुः। एतासांपावनार्थायपंचयज्ञाःप्रकीर्त्तिताः। सूनाहिंसास्थानं। कंडनुल्लूखलादि। पेषणीदृषदादि। चुल्लीपाकस्थानं। जलकुंभउदपानं। उपस्करःसूर्यादिः। वध्यतेपापेनयुज्यतइत्यर्थः। नचकंडन्यादिमितअवणान्नैमित्तिकत्वंपंचमहायज्ञानां। पंचयज्ञविधानंतुगृहीनित्यंनहापयेदितिशंखेननित्यत्वाभिधानात्। तेचयज्ञाःकंडन्याकीञ्चायांयमः। ब्रह्मयज्ञोदेवयज्ञःपितृयज्ञस्तथैवच। भूतयज्ञोनृयज्ञश्चपंचयज्ञाःप्रकीर्त्तिताः। एतल्लक्षणमाह। मनुः। अध्यापनंब्रह्मयज्ञःपितृयज्ञस्तुतर्पणं। होमोदैवोबलिर्भूतोनृयज्ञोतिथिपूजनं। अध्यापनंअध्ययनं। तर्पणंपितृतर्पणं॥

पितृश्राद्धमितियावत्। यतः स एवाह। स्वाध्यायेनार्चये
चर्षीन्होमैर्देवान्यथाविधि। पितॄन् श्राद्धैर्नॄनन्नैर्भू-
तानि बलिकर्मणेति। पितृयज्ञे विकल्पमाह। कात्याय
नः। श्राद्धं वा पितृयज्ञः स्यात्पित्र्यो बलिरथापि वेति।
नित्यश्राद्धं वा पितृयज्ञः। अथवा वैश्वदेवमध्ये पितृ-
भ्यः स्वधास्त्विति यो बलिर्दीयते स पितृयज्ञ इत्यर्थः॥
तथा बह्वृचानां गृह्ये। देवपितृभूतमनुष्यब्रह्मयज्ञाः पं-
चमहायज्ञाः। आद्याश्चत्वार एव वैश्वदेविकं बलिक-
र्मेत्याहुः अथ वा पृथगिति। बौधायनोपि। अग्न-
ये स्वाहेत्यादिषडाहुतीर्जुहोति। एष वैश्वदेवः संतिष्ठते
धर्माय स्वाहेत्यादिनमो रुद्राय पशुपतय इत्यादिभिर्बलि
हरणं बलवान्हरत्येतत्संतिष्ठते । देवेभ्यः स्वाहेत्यग्नौ
जुहोति एष देवयज्ञः संतिष्ठते। पितॄनुद्दिश्यैकं ब्राह्मणं
भोजयेदपि वा दक्षिणेनाग्निं दक्षिणाग्रान्दर्भान्संस्ती-
र्य तेषु पिण्डं ददाति पितृभ्यः स्वधास्त्वित्यपि वा
ऽपस्तत्पितृयज्ञः संतिष्ठते। उत्तरेणाग्नेः शुचौ देशे-
प्रागग्रान्दर्भान्संस्तीर्य गंधपुष्पधूपदीपैरलंकृत्य बलि
मुपहरति भूतेभ्यो नम इति भूतेभ्यस्तद्भूतयज्ञः संतिष्ठ
ते। मनुष्ययज्ञार्थं भोजयेदपि वा हंतकारं ब्राह्मणेभ्यो
ददाति मनुष्येभ्यो हंतेति। हंतकारपर्याप्तान्नदानासम
र्थस्य। काष्णाजिनिः। भिक्षां वा पुष्कलं वापि हंतकारम

यापिवेति। पुष्कलमग्रमिति पर्यायौ। भिक्षादिलक्षणं
च मनुनाभिहितं ग्रासमात्रं भवेद्भिक्षा अग्रं ग्रासचतुष्टयं
अग्रं चतुर्गुणीकृत्य हंतकारो विधीयत इति। आपस्तंब
परिशिष्टेपि। वैश्वदेवबलिहरणाशिष्टादन्नात्प्राचीना
वीती नो दक्षिणतोग्नेः पितृतीर्थेन पितृभ्यः स्वधास्त्वि
ति बलिं हरेयुः भूतयज्ञार्थं वैश्वदेवशिष्टान्नादेवोत्त
रतोग्नेर्देवतीर्थेन बलिमुपहरेयुर्भूतेभ्यो नम इति मनु
ष्ययज्ञार्थमतिथिं भोजयेदिति। अभावे संकल्पितं दद्यु
रिति। एवंविधान्यन्यान्यपि विरुद्धवचनानि ग्रंथगौर
व भयान्न लिखितानि तत्र सर्वत्र यथा प्रगास्वं व्यवस्था
॥ इति पंचयज्ञस्वरूपनिर्णयः॥ अथ नित्यश्राद्धं
मनुना दद्यादहरहः श्राद्धमिति नित्यश्राद्धं विधाय। वै
श्वदेवस्य सिद्धस्य गृह्येग्नौ विधिपूर्वकमित्यादिना पश्चा
द्वैश्वदेवविधानात्प्रथमं नित्यश्राद्धं पश्चाद्वैश्वदेव वदं-
ति केचित्। अत्रापि यज्ञेयेषां तु नित्यश्राद्धमेव पंचयज्ञा-
ंतः यानि तेषां स्वशाखानुसारेण क्रमः। केचन वै
श्वदेवानंतरं कुर्वंति पाठक्रममनाहृत्य श्राद्धविषये
मार्कंडेयपुराणे। कुर्यादहरहः श्राद्धमन्नाद्येनोद
केन वा। पितॄनुद्दिश्य विप्रांस्तु भोजयेद्विप्रमेव चेति।
अत्र विशेषमाह प्रचेताः। नामंत्रणं न होमश्च नावाह
न विसर्जने। न पिंडदानं न सुरान्नित्ये कुर्याद्द्विजोत्तमः

उपवेश्यासनं दत्वा संपूज्य कुसुमादिभिः। निर्दिश्य भोज
यित्वा तु किंचिद्दत्वा विसर्जयेत्। न विश्वान्देवान्। किंचि
द्दत्वेति दक्षिणार्थं। व्यासः। नावाहनं स्वधाकारः पिं
डाग्नौकरणादिकं। ब्रह्मचर्यादिनियमो विश्वेदेवास्तथै
व चेति। तथा तत्तु षड्गुरूपं ज्ञेयं दक्षिणा पिंडवर्जितं।
मत्स्यपुराणे। यद्येकं भोजयेद्विप्रं त्रीनुद्दिश्य पितॄंस्त
था इति। त्रीनिति मातामहादीनामपि प्रदर्शनार्थं।
अत्र कात्यायनोऽनुकल्पमाह। एकमप्याशयेद्वि
प्रं पितृयज्ञार्थसिद्धये। अदैवं नास्ति चेदन्यो भोक्ता भो
ज्यमथापि वा। अप्युद्धृत्य यथाशक्ति किंचिदन्नं यथा
विधि। पितृभ्य इदमित्युक्त्वा स्वधाकारमुदाहरेत्। एत
दुद्धृतान्नं ब्राह्मणायैव दद्यात्। तदभावे गोभ्यः। तथा च
कूर्म्मपुराणे। उद्धृत्य वा यथाशक्ति किंचिदन्नं समा
हितः। वेदतत्वार्थविदुषे द्विजायैवोपपादयेत्। तथा
सर्वेषामप्यलाभे तु दन्नं योनिवेदयेदिति। यदा ग
वामप्यलाभस्तदाग्निष्वन्नं। भिक्षुकाभावे त्वन्नं गो
भ्यो दद्यादग्नौ वा प्रक्षिपेदिति। मनुष्ययज्ञेऽप्येवमेव प्र
तिपत्तिरुक्ता। अत्राप्यशक्तस्य मनूक्तं। दद्यादहरहः
श्राद्धमन्नाद्येनोदकेन वा। अन्नाद्येनोदकेन श्राद्धार्थी
त्स्येनोदकेन। पयोमूलफलैर्वापि पितृभ्यः प्रीतिमाव
हन्निति। पयः क्षीरं। एतच्च नित्यश्राद्धं श्राद्धांतरेकेनत्र

निषतं। तथाच मार्कंडेयः। नित्यक्रियां पितॄणां तु
केचिदिच्छंति मानवाः। न पितॄणां तथैवान्ये शेषं पूर्व
वदाचरेदिति। नित्यक्रिया नित्यश्राद्धं। शेषं वैश्वदेवा
दिकं। अत्रैव व्यवस्था। यत्रामावास्या नांदीमुखश्रा-
द्धादिषु नित्यश्राद्धदेवता इष्टा भवंति न तत्र नित्यश्राद्धं।
यत्र च सांवत्सरिकादिषु नेष्टा नित्यश्राद्धदेवतास्तत्र क-
र्त्तव्यमिति। तथा च चमत्कारखंडे। नित्यश्राद्धं न कुर्वी
त प्रसंगाद्यत्र सिध्यति। श्राद्धांतरकृते न्यत्र नित्यत्वा
न्न प्रहापयेत्॥ इति नित्यश्राद्धविधिः॥ अथ
वैश्वदेवविधिः॥ तत्र प्रथमोपक्रमे आपस्तंबः।
तेषां मंत्राणामुपयोगे द्वादशाहमुभयोरधः शय्या
ब्रह्मचर्यं क्षारलवणवर्जनं चोत्तमस्यैकरात्रमुपवा
स इति। तेषां वैश्वदेवबल्यर्थमंत्राणां उपयोगः प्रथ
मोपक्रमः। उत्तमस्य ये भूताः प्रचरंतीत्यस्य मंत्रस्य उ-
पयोग एकरात्रमुपवासः। ततो वैश्वदेवप्रारंभः। तथा
सिद्धे चेति सद्भूतमिति स्वामिने प्रब्रूयात्तद्भूतं विराडन्नं
तन्मा क्षायीति प्रतिवचनमिति। ततो वैश्वदेवादिकं क-
र्म कुर्यात्। तच्च सायंप्रातः। तथा च कात्यायनः
सायंप्रातर्वैश्वदेवः कर्तव्यो बलिकर्म च। अनश्नता
पि सततमन्यथा किल्बिषी भवेदिति। एतेन पुरुषार्थत्व
मुक्तं भवति वैश्वदेवस्य। अत एव परिशिष्टे प्रवासस्थे-

तस्याप्यवश्यकर्त्तव्यता दर्शिता। प्रवसेदाहिताग्निश्चेत्कदाचित्कालपर्ययात्। यस्मिन्नग्नौ भवेत्पाको वैश्वदेवस्तु तत्र वै। मनुरपि। पुरुषार्थत्वमेवाह। वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत्। तस्मा अन्नं यथाशक्ति प्रदद्यान्न बलिं हरेत्। वैश्वदेवानंतरमतिथिपूजायां कृतायां द्वितीयोतिथिर्यद्याव्रजेदागच्छति। अन्नं च पक्वं नास्ति तदा पुनः पाकं कृत्वा तस्मै दद्यान्न बलिं हरेत्। वैश्वदेवं न कुर्यादित्यर्थः। यद्यन्नसंस्कारार्थत्वं वैश्वदेवस्य तदा पुनःकरणनिषेधो न युज्यत इति तात्पर्यं केचनान्नसंस्कारकत्वं पुरुषार्थत्वं चेत्युभयात्मकत्वमिच्छंति। अस्मिन्पक्षे उभयात्मकस्यास्य आश्रयीति संज्ञा। यान्यपूर्वविषयाणि द्रव्यसंस्कारकारीणि च कर्माणि स्विष्टकृदुत्तमप्रयाजादीनि तान्याश्रयिसंज्ञकानीति व्यवहरंति मीमांसकाः॥ एतच्च लौकिके वैवाहिकाग्न्यादिषु वा कुर्वीत। तथा च याज्ञवल्क्यः। स्मार्त्तं कर्म विवाहाग्नौ कुर्वीत प्रत्यहं गृही। दायकालाहृते वापि श्रौतं वैतानिकाग्निषु। शातातपः। लौकिके वैदिके वापि हुतोन्मृष्टे जले क्षिताविति। आहृत्योन्मृज्य जुहुयात्। लौकिकाग्नेर्यत्रान्तरकरणमाहरणं। स्मार्त्ताग्निस्त्वभ्युद्धोधनमाहरणं उन्मार्जनं भस्मापाकरणं। मनुः। वैवाहिकेऽग्नौ कुर्वीत गृह्यकर्म यथा

विधि। पंचयज्ञविधानं च पत्निं चान्वाहिकीं गृही। अत्र
विशेषः चतुर्विंशतिमते। प्रातर्होमं तु निर्वर्त्य
समुद्धृत्य हुताशनात्। शेषं महानसे कृत्वा तत्र पाकं समाच-
रेत्। समुद्धृत एव शेषः तं महानसे कुर्यादित्यर्थः। यस्मि-
न्नग्नौ पाकस्तत्रैव होमः। तथा च कूर्म्मपुराणे। य-
दि स्याल्लौकिके पाकस्ततोऽन्नं तत्र हूयते। शालाग्नौ त-
त्र वैदन्नं विधिरेष सनातन इति। एतदनुसारेणान्या-
न्यपि वचनानि व्यवस्थापनीयानि। स होमः कथमि-
त्याकांक्षायां शौनकः। अथ सायंप्रातः सिद्धस्य ह-
विष्यस्य जुहुयादग्निहोत्रदेवताभ्यः सोमाय वनस्प-
तये अग्नीषोमाभ्यामिंद्राग्निभ्यां द्यावापृथिवीभ्यां धन्वं-
तरये इन्द्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे स्वाहेति।
हविष्यं हविर्योग्यं। अग्निहोत्रदेवताः सूर्याग्निप्रजा-
पतयः। आपस्तंबः। औपासने पचने वा षड्भिराद्यैः
प्रतिमंत्रं हस्तेन जुहुयादुभयतः परिषेचनं यथा पुर-
स्तादिति। आद्यैः अग्नये स्वाहेत्यादिभिः स्विष्टकृतंतैः
उभयतः परिषेचनं कर्म्मादावंते च। कात्यायनः।
वैश्वदेवादन्नात् पर्युक्ष्य स्वाहाकारैर्जुहुयात्। ब्रह्मणे
प्रजापतये गृह्याभ्यः कश्यपायानुमतय इति।
गौतमः। अग्निर्धन्वंतरिर्विश्वेदेवाः प्रजापतिः
स्विष्टकृदिति होम इति। अत्र व्यवस्थामाह श्लोक-

कात्यायनः । उद्धृत्य हविषा सिक्त्वा हविष्येण घृतादि
ना । स्वपणं वा विधिना हुत्वा तच्छेषेण बलिं हरेदिति
हविष्येण घृतादिना । उद्धृत्य हविरासिच्यतेन ह
विषा जुहुयादित्यर्थः । घृताभावे दध्या द्यक्तं हविर्जुहुयात्
तथा च व्यासः । जुहुयात्सर्पिषाभ्यक्तं तैलक्षारवि-
वर्जितं । दध्यक्तं पयसाभ्यक्तं तदभावेम्भसा पिवेति ॥
हविष्याभावे चतुर्विंशतिमते विशेषो दर्शितः । अला
भे येन केनापि फलश्यामाकोदकादिभिः । पयो दधिघृ-
तैः कुर्याद्वै श्वदेवं स्रुवेण तु । हस्तेनान्नादिभिः कुर्यादद्भि
रंजलिनाजलैरिति । अत्रापरो विशेषः परिशिष्टे । शाकं-
वा यदि वा पत्रं मूलं वा यदि वा फलं । संकल्प येद्यदाहारे
तेनाग्नौ जुहुयादपीति । पयःप्रभृतिरसद्रव्याणां होमः
स्रुवेण । हविष्यादिकठिनद्रव्याणां तु विशेषो भिहितः
परिशिष्टे । उत्तानेन तु हस्तेन अंगुष्ठाग्रेण पीडितं । सं-
हतांगुलिपाणिः स्याद्वाग्यतो जुहुयाद्धविरिति । हवि
ष्येष्वपि मुख्यद्रव्यमाह । कात्यायनः । हविष्येषु
यवा मुख्यास्तदनुव्रीहयः स्मृताः । माषकोद्रवगौ-
रादीन्सर्वालाभेपि वर्जयेत् । गौराः । गौरसर्षपाः
। आपस्तंबः । न क्षारलवणहोमो विद्यते तथा परान्नसं
सृष्टस्य होम उदीचीनमुष्णं भस्मापोह्य तस्मिन्जुहुया
त्तद्धुतमहुतं चाग्नौ भवतीति । क्षारलवणपरान्नसं-

स्पर्शेन हविष्येणाग्निहोमो न कार्यः। अपि तूष्णं भस्मा
न्यायतनादुत्तरतोपोह्य तस्मिन् होतव्यं। उष्णं भ-
स्मेति अंगारमिश्रितं भस्मेत्यर्थः। अत एव बौ-
धायनः। अंगारात् भस्ममिश्रांस्तु उद्धृत्योत्तरतो
नलात्। जुहुयाद्वैश्वदेवं तु यदि क्षारादिमिश्रित
मिति। तथा परोक्षमसंस्कृतमग्नावधिश्रित्याद्भिः प्रो
क्षेत् देवपवित्रमित्याच क्षत इति। अधिश्रयणं पु-
नरग्नेरुपरिस्थापनमात्रमन्त्रसहितस्य वैश्वदेवपा
त्रस्य। अधिश्रित्य संस्कृतं कृत्वा प्रोक्षेदित्यन्वयः।
एतच्च सायं प्रातः कर्त्तव्यमित्युक्तं। तत्र प्रातरुपक्रमः
सायमपवर्गः। यदा सायं समंत्रककर्मकर्तृणामभा
वस्तदा पत्नी सायममंत्रकं बलिं हरेत्। तथा च म-
नुः। सायमन्नस्य सिद्धस्य पत्न्यमंत्रं बलिं हरेत्। वैश्व
देवं हि नामैतत्सायं प्रातर्विधीयत इति। अत्र वैश्वदे-
वं हि नामैतदित्येतत्पर्यंतमेकं वाक्यं सायं प्रातर्विधी
यत इत्येतदपरं वैश्वदेवस्य कालद्वयेपि कर्त्तव्यतावि
धायकं। अतः सायमेव पत्न्या बलिहरणरूपवैश्वदे
वकर्म्माधिकारः। केचन बलिग्रहणं वैश्वदेवस्याप्यु-
पलक्षणार्थमिति वर्णयंति। एवं कृतवैश्वदेवस्य ब-
हिर्बलिमाह। मनुः। शुनां च पतितानां च श्वपचां पा
परोगिणां। वायसानां कृमीणां च शनकैर्निक्षिपेद्भुवि।

अत्रमंत्रः। ये भूताः प्रचरंति दिवानक्तं वलिमिच्छंतो विद्रुत्तस्य प्रेष्याः। तेभ्यो वलिं पुष्टिकामो हरामि मपि पुष्टिं पुष्टिपतिर्दधात्विति। अत्र दिवेति दिनेनक्तमिति रात्रौ दिवाचारिभ्य इति दिवानक्तंचारिभ्य इति नक्तमित्याश्वलायन स्मरणात्। एतच्च वैश्वदेवाख्यं। कर्म्म दिवाह्नि स्तथा रात्रावपि द्विर्न कर्त्तव्यं। धर्म्मे विन्मावरेत्स्नानमाह्निकं तु पुनः पुनः। तर्पणं ब्रह्मयज्ञं च वैश्वदेवं च नाचरेदिति॥ विष्णुपुराणे। विधानात्। वैश्वदेव वलिहृती सायंप्रातः। पंचयज्ञास्तु दिवैव। यथाह जमदग्निः। वैश्वदेवं तथा रात्रौ कुर्याद्वलिहृतिं तथा। महतः पंचयज्ञांस्तु दिवैवेत्याह धर्म्मविदिति। येषांतु शाखिनां ब्रह्मयज्ञव्यतिरिक्तानां महायज्ञानां वैश्वदेवे वलिहृतौ चांतर्भावः। तेषां दिवैव वैश्वदेवाख्यं कर्म न रात्रौ यदि स्वशाखायां काल द्वयेपि विधानं नास्ति अथास्ति तदा द्विरपि भवतीति निर्णयः। द्विविधं हि वैश्वदेवादि कर्म्म। एकं मन्वादिस्मृत्युक्तं साधारणमपरं स्वस्वगृह्योक्तमिति। तत्र साधारणं स्वशाखाविरुद्धं सर्वैरपि कार्यं कर्म्मणः। सर्वशाखाधिकरणन्यायेनैकत्वात्। अन्नाप्युक्तश्चेत्स्व स्वगृह्योक्तमेव। तावतापि शास्त्रार्थस्य निष्पन्नत्वात्। एतच्च संसृष्टिनां मध्ये ज्येष्ठ एव कुर्यात्। तद

शक्त्यादिना तदनुज्ञयेतरस्याधिकर्तृत्वमस्ति। अनग्नि-
कस्य विशेषमाह। वसिष्ठः। अग्निकस्य चं यो विप्रः सो
न्नं व्याहृतिभिः स्वयं। हुत्वा शाकलमन्त्रैश्च शिष्टाद्भूत
बलिं हरेत्। अनग्निकः श्रौतस्मार्त्ताग्निरहितः यदा
वैश्वदेवादर्वाक् भिक्षुरागच्छति तदा वैश्वदेवार्थमन्न-
मुद्धृत्य भिक्षवे भिक्षां दद्यात्। तथा च व्यासः। अकृ-
ते वैश्वदेवे तु भिक्षुके गृहमागते। उद्धृत्य वैश्वदेवार्थं
भिक्षां दत्त्वा विसर्जयेत्। भिक्षुकाश्चापि तेनैव दर्शिताः
ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः। अध्वगः
क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः। इति वैश्वदे
वविधिः॥ अथ वैश्वदेवपाकनिर्णयः। तत्र नित्य
श्राद्धस्य वैश्वदेवस्य चैक एव पाकः। नित्यश्राद्धे श्रा
द्धनियमविशेषाभावात्। नवश्राद्धे त्वेकपाकत्वं कै
वनास्ति आशौचमध्ये वैश्वदेवनिषेधात्। एकादशा-
हादिकश्राद्धे तु पृथक्पाकः श्राद्धशिष्टान्नस्य ब्रा-
ह्मणेभ्यो देयत्वात्। तथा च देवलः। एकोद्दिष्टे तु शे-
षं तु ब्राह्मणेभ्यः समुत्सृजेदिति। दर्शश्राद्धं प्रकृतिः
अतस्तन्निर्णये नैव तद्विकृतीनामपि निर्णय इति
प्रकृतौ विचार्यते। किं श्राद्धार्थं वैश्वदेवार्थमेक एव
पाकः उत पृथगिति। तत्र पृथगिति ब्रूमः। तथा च लौ
गाक्षिः। पित्रर्थं निर्वपेत्पाकं वैश्वदेवार्थमेव चेति।

इयमुक्तिः। पाकस्य पृथक्त्वेकत्वे चैकरूपेति विशेषापरिज्ञा-
नादभिप्रायं विवृणोति स एवोत्तरार्द्धेन। वैश्वदेवं न पित्र्य-
र्थेन दार्शं वैश्वदेविकमिति। इतरदितरार्थेन भवतीति-
पृथक् पाकः कर्त्तव्य इत्यर्थः। न दार्शमित्यत्र दार्शशब्दे-
न तद्दिनकृतयो नित्यनैमित्तिककाम्यश्राद्धानि लक्ष्यंते
वैश्वदेविकमित्यत्र वैश्वदेवशब्देन भूतयज्ञादयः। स्व-
यं च पृथक्पाको वैश्वदेवं करोति यः। आसुरं तद्भवेच्छ्रा-
द्धं पितॄणां नोपतिष्ठत इति। नन्वेतद्वचनमुत्तरकाले-
ऽपि निषेधकं तदापि तस्य पितृपाकत्वात्। मैवं। उत्तरका-
ले पितृसंबंधस्य निवृत्तत्वात्। यदुद्देशेन परिकल्पितं
यद्वित्तस्य तदुद्देशेन त्यागे कृते तदुपभोगसमनंत-
रमेव तत्संबंधनिवृत्तेर्न्याय्यत्वात्। एवमेव शिष्टाचारे
विदृश्यते। अनेनाभिप्रायेण पैठीनसिरेवाह। श्राद्धं नि-
र्वर्त्य विधिवद्वैश्वदेवादिकं ततः। एवं चायमर्थः संपद्यते
पितृपाकात्समुद्धृत्य वैश्वदेवं करोति यः। आसुरं तद्भ-
वेच्छ्राद्धमिति। यतः श्राद्धात्पूर्वं मध्ये वा निषेधस्तत-
स्तस्माद्धेतोः श्राद्धं निर्वर्त्य ततस्तच्छिष्टान्नाद्वैश्वदे-
वादिकं कर्त्तव्यमिति। अत्र च वचनस्थादिशब्देन नि-
त्यश्राद्धमपि गृह्यते। तेन यच्छाखायां नित्यश्राद्धस्य
पंचयज्ञांतःपातित्वं नास्ति तच्छाखायां श्राद्धपाक-
शेषेण पृथक्पाकेन वा नित्यश्राद्धं वैश्वदेवात्प्रागेव।

अत्रौभयत्रापि मार्कंडेयः। ततो नित्यक्रियां कुर्या-
दिति। ततः श्राद्धशेषात नित्यक्रिया नित्यश्राद्धादि। त-
था। पृथक्पाकेन नैत्यः स्यादिति। यदि ब्राह्मणा विस-
र्ज्जनांते वैश्वदेवस्तदा तच्छेषेण इतरत्र पृथगिति नि-
र्णयः॥ इति वैश्वदेवपाकनिर्णयः॥ अथ वैश्व-
देवकालनिर्णयः॥ तत्र साग्निः श्राद्धात्पूर्वमेव वै-
श्वदेवं कुर्वीत। तदाह लौगाक्षिः। पक्षांते कर्म्म नि-
र्वर्त्त्य वैश्वदेवं च साग्निकः। पिंडयज्ञं ततः कुर्यात्ततो
न्वाहार्यकं बुध इति। पक्षांतमन्वाधानं। अन्वाहार्यकं
दर्शश्राद्धं। ननु वैश्वदेवस्य पक्षांतपिंडपितृयज्ञम-
ध्यविधिवलादेव साग्निककर्तृत्वावगतेः पुनः सा-
ग्निकशब्दोपादानमपार्थकमिति चेन्न्।मेवं। अन्वाधा-
नपिंडपितृयज्ञकर्त्तॄणामनग्नेर्निवृत्त्यर्थत्वेन सा-
र्थकत्वात्। देवलोपि वैश्वदेवानंतरमेव पिंडपितृय-
ज्ञादिकर्त्तव्यतामाह। अकृते वैश्वदेवे तु स्थालीपाक-
प्रकीर्त्तितः। अन्यत्र पिंडयज्ञात्तु सोपराह्णे विधीयत इ-
ति। स्थालीपाकशब्देन स्थालीपाकसाध्यकर्म्मा-
ण्युच्यंते। एतानि यज्ञादीनि कर्म्माणि वैश्वदेवात्पू-
र्वमेव कर्त्तव्यानि। पिंडपितृयज्ञस्यापि स्थालीपाक-
साध्यत्वेन तस्यापि पूर्वत्र कर्त्तव्यतायां प्राप्तायामप-
वादः। अन्यत्रेपि। पिंडपितृयज्ञादन्यत्रेत्यर्थः॥

दर्शश्राद्धस्य पिंडपितृयज्ञानंतर्यमाह। मनुः। पिंड
यज्ञं तु निर्वर्त्य विप्रश्चंद्रक्षयेग्निमान्। पिंडान्वाहार्य
कं श्राद्धं कुर्यान्मासानुमासिकमिति। एवं च यानि श्रा-
द्धात्पूर्वं वैश्वदेवकर्त्तव्यताप्रतिपादकानि वचनानि तानि स
र्वाणि लौगाक्षिवचनानुसारेण श्रौताग्निमद्विषयाणि
व्यवस्थापनीयानि। साग्निकस्याप्येकादशाहश्राद्धे
पश्चादेव। संप्राप्ते पार्वणश्राद्धे एकोद्दिष्टे तथैव च। अ-
ग्रतो वैश्वदेवः स्यात्पश्चादेकादशेऽहनीति परिशिष्टे
विशेषविधानात्। तथा सात्यकायनोपि। श्राद्धे सागे
व नियमात औपासनाग्नेरनग्नेस्वार्थात्प्रतिषेधाश्च
यानि श्राद्धमध्ये विकिरांते अन्यो ब्राह्मणविसर्ज्जनां-
ते। तत्र मध्ये कर्त्तव्यता। ब्रह्मांडपुराणे। वैश्वदेवाहुती
रग्नावर्वाक् ब्राह्मणभोजनात्। जुहुयाद्भूतयज्ञादि श्राद्धं कृत्वा
तु तत्स्मृतमिति। ब्राह्मणभोजनादर्वाक् अग्नौकरणा-
नंतरमित्यर्थः। अत्र भूतयज्ञादेः श्राद्धानंतरकर्त्तव्य
ताभिधानादस्मिन्प्रयोगे यानि भूतयज्ञोत्तरभावी-
नि कर्म्माणि संबद्धक्रमाणि तानि तदाप्युत्कर्षन्याये
नोत्कृष्टानि श्राद्धांते कर्त्तव्यानि। न तु भूतयज्ञात्पूर्व
भावीन्युर्वभावीन्युत्कृष्टव्यानि। यच्छाम्नायां बलिह
रणादिकमेव भूतयज्ञादि तेषां बलिहरणादिकस्यै
वोत्कर्षः। येषां तु बलिहरणादिव्यतिरिक्ताभूत

यज्ञाः तेषां वहिर्बलिव्यतिरिक्तभूतयज्ञादिके तेषां बलि
हरणादिकस्यैवोत्कर्षः येषांतु बलिहरणादिव्यतिरि·
क्ता भूतयज्ञावधिकानां बलिहरणादीनामपि श्राद्धम
ध्ये कर्त्तव्यता भवतीति विवेकः। नचैवं मन्तव्यं। प्रारब्धे
पित्र्ये कर्म्मण्यसमाप्ते तन्मध्ये कर्मांतरमयुक्तमिति।
निष्कर्षिन्यायेनाविरोधात्। अतएव दृश्यते पूर्वेद्यु·
र्निमंत्रितेषु ब्राह्मणेषु श्राद्धापरिसमाप्तावेव सायं
प्रातर्होमकरणं द्वितीयः कालः। भविष्यत्पुराणे
पितॄन्संतर्प्य विधिवद्बलिं दत्वा विधानतः। वैश्वदे
वं ततः कुर्यात्पश्चाद्ब्राह्मणभोजनं। बलिरत्र विकि
रसंज्ञकः। यतस्तत्रैव। ये अग्निदग्धा मंत्रेण भूमौ·
यन्निक्षिपेद्बुधः। जानीहि तं बलिं वीर श्राद्धकर्म्मणि
सर्वदेति। पश्चाद्ब्राह्मणभोजनं भूरिभोजनं। तृती·
यः कालो ब्राह्मणविसर्ज्जनांते। सच मत्स्यपुराणे
दर्शितः। उच्छेषणंतु तत्तिष्ठेद्यावद्विप्रा विसर्ज्जि·
ताः। वैश्वदेवं ततः कुर्यान्निवृत्ते पितृकर्म्मणि। म·
नुरपि। पूर्वार्द्धेतदेव। ततो गृहबलिं कुर्यादिति ध
र्म्मो व्यवस्थित इति। बलिशब्दो वैश्वदेवप्रदर्शना
र्थ इति मतं मेधातिथेः भविष्यत्पुराणे। कृत्वा श्रा
द्धं महाबाहो ब्राह्मणांश्च विसर्ज्य च। वैश्वदेवादि
कं कर्म्म ततः कुर्यान्नराधिप इति। इति वैश्वदेव

कालनिर्णयः॥ अथातिथिपूजा॥ तत्र विष्णुपुराणे॥ ततो गोदोहमात्रं तु तिष्ठेत्कालं गृहांगणे॥ अतिथिग्रहणार्थाय तदूर्द्धं वा यदिच्छया। वैयाघ्रपद्यः। अचिंतितमनाहूतं वैश्वदेव्य उपस्थितं। विजानीयान्नैकग्रामनिवासिनं। क्षुधार्त्तस्तृषितश्चैव स्नातो गृहमुपागतः। प्रयत्नेन तु संपूज्यः सोतिथिः स्वर्गसंक्रमः। दुष्टो वा यदि वा द्वेष्यो मूर्खः पंडित एव वा। संप्राप्तो वैश्वदेवांते सोतिथिः स्वर्गसंक्रमः। न पृच्छेद्गोत्रचरणौ न स्वाध्यायव्रतानि च। चित्ते तं भावयेत्तं वै सर्वदेवमयो हि सः। विष्णुः अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्त्तते। स तस्य दुःकृतं दत्वा पुण्यमादाय गच्छति। याज्ञवल्क्यः दिनेतिथौ तु विमुखे गते यत्पातकं भवेत्। तदेवाष्टगुणं प्रोक्तं सूर्योढे विमुखे गते। कृष्णयः गोग्रासं च कुर्वीत नित्यमेव समाहितः। गवां कंडूयनं स्पर्शं ग्रासमाह्निकमेव च। मार्कंडेयपुराणे अस्नाताशी मलं भुंक्ते अजपः पूयशोणितं। अहुत्वा तु क्रमीन्भुंक्ते अदत्वा विषभोजनं। आत्मार्थं पचनं यस्य रत्यर्थं यस्य मैथुनं। वृत्त्यर्थं यस्य चाधीतं निःफलं तस्य जीवितं॥ अथ भोजनविधिः॥ तत्र देवलहारीतौ॥ आहारं तु रहः कुर्यान्निर्हारं चैव सर्वदा। गुप्ताभ्यां लक्ष्म्युपेतः स्यात्प्राकाश्ये हीयते श्रियः। मनुः अजु-

स्पृश्य द्विजो नित्यमन्नमद्यात्समाहितः। आपस्तम्बः यस्तु भोजनशालायां भोक्तुकाम उपस्पृशेत्। आसनस्थो न चान्यत्र स विप्रः पंक्तिदूषकः। भोजनशालायां भोक्तुकामस्सन्नासनस्थो वा अन्यत्र अनासनस्थितो वानचोपस्पृशेत्। यस्तूपस्पृशेत्स पंक्तिदूषक इत्यन्वयः। याज्ञवल्क्यः। बालस्ववासिनीवृद्धगर्भिण्यातुरकन्यकाः। संभोज्यातिथिभृत्यांश्च दंपत्योः शेषभोजनं। यमः। विप्रः स्वर्गपरो नित्यमर्चयेत्पितृदेवताः गुरून तिथिवालांश्च तर्प्पयेत्पूर्वमेव तु आत्मानं तर्प्पयेत्पश्चात्त्रियतो वाग्यतः शुचिः। स्त्रीशूद्रं तर्प्पयेत्पश्चादेष धर्मः सनातनः। व्यासः। पंचार्द्रो भोजनं कुर्यात्प्राङ्मुखो मौनमास्थितः। विष्णुः। न भुवि आसनांतरितायां क्षितावुपविश्येति। आसनेवर्ज्यान्याह प्रचेताः। गोपाकृष्णमयं भिन्नं तथा पालाशपिप्पलं। लोहबद्धं सदैवार्कं वर्जयेदासनं बुधः। ब्रह्मपुराणे। उपलिप्ते समे स्थाने शुचौ शुद्धासमान्विते। मंडलं गोमयेनस्यादथवा गोरमृत्स्नया। तत्र विशेषमाह शंखः। चतुःकोणं द्विजाग्र्यस्य त्रिकोणं क्षत्रियस्य तु। मंडलाकृति वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतं। व्यासस्तु शूद्रस्यार्द्धचंद्राकृतिं मन्यते। चतुरस्रं त्रिकोणं च वर्तुलं चार्द्धचंद्रकं। कर्त्तव्यमानुपूर्व्येण ब्राह्मणादिषु मं

डलं। हारीतः। न कार्ष्णायसे मृन्मये वा पात्रेऽश्नीयात्।
मनुः। न पादौ धावयेत्कांस्ये कदाचिदपि भाजने। न
भिन्नभांडे भुंजीत न भावप्रतिदूषिते। भिन्नभांडनिषे
धस्ताम्राद्व्यतिरिक्तविषयः। तथा च पैठीनसिः।
ताम्ररजतसुवर्णशंखशुक्त्यश्मस्फटिकानां भिन्नमभि
न्नमिति। ताम्रपात्रं यतिविषयं। गृहस्थस्य निषिद्धत्वात्
। तथा च वृद्धमनुः। ताम्रपात्रैर्न भुंजीत भिन्नकांस्ये
मलाविले। पलाशपद्मपत्रेषु गृही भुक्त्वैंदवं चरेत्।
पलाशो वल्ली पलाश इति स्मृत्यर्थसारकारः। एक
एव तु यो भुंक्ते विमले कांस्यभाजने। चत्वारि तस्य व-
र्द्धंते आयुः प्रज्ञा यशो बलं। अत्रिः। आसने पादमा
रोप्य यो भुंक्ते ब्राह्मणः क्वचित्। मुखेन चान्नमश्नाति
तुल्यं गोमांसभक्षणं। मुखेन गावदित्यर्थः। बौ
धायनः। भोजनं हवनं दानमुपहारप्रतिग्रहः। ब-
हिर्जानु न कार्याणि तद्वदाचमनं स्मृतं। हारीतः।
मार्जनार्चने बलिकर्म भोजनानि च देवतीर्थेन कुर्यात्
वृद्धमनुः। न पिबेन्न च भुंजीत द्विजः सव्येन पाणिना।
नैकहस्तेन च जलं शूद्रेणावर्जितं पिबेत्। मार्कंडे
यः। पादप्रसारणं कृत्वा न च वेष्टितमस्तकः। विष्णुः
नाश्नीयाद्भार्यया सार्द्धं नाकाशेन ततोत्थितः। प्राया
नः प्रौढपादश्च कृत्वा चैवावसक्थिकं। आकाशे यंत्रा

दौ। अत्र विशेषमाह मार्कंडेयः॥ न्यस्तपात्रेन भुंजीत पंचग्रासान्महामुने। शेषमुद्धृत्य भोक्तव्यमिति उद्धृत्य मंत्रादौ पात्रं निक्षिप्येत्यर्थः। पित्र्यर्थभोजने तु भूमौ पात्रस्थापनमावश्यकं। पित्र्यर्थे तु न लुप्यत इत्यत्रैव वाक्यशेषे तेनैवाभिधानात्। पादाशेपितपादः प्रौढपादः। ब्रह्मपुराणे। पंचग्रासांस्तु भुंजीत क्वचिद्देशमनिसंकटे। पात्रमुद्धृत्य शेषं तु भक्षयेत्संकराद्भयात्। पित्रे कर्मणि भुंजानो भूमौ पात्रं न चालयेत्। विष्णुः। न भिन्नभाजने नोत्संगे न भुविन पाणौ। उत्संगे ऊर्वोरुपरि पात्रं स्थापयित्वा। वसिष्ठः सर्वाभिरंगुलीभिरश्नीयात् पाणिं च नावधनुयात्। मार्कंडेयः। यस्तु पाणितले भुंक्ते यः सवायुं समश्नुते। अंगुलिं चोद्धरे द्यस्तु गोमांसाशनवस्मृतं। सवायुं सशब्दमित्यर्थः। विष्णुः। नोच्छिष्टो घृतमादद्यात्। आदित्यपुराणे। नोच्छिष्टो गृह्यैदाचन। नार्द्रवासा नार्द्रशिरा न चायज्ञोपवीतवान्। एवं च सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितं। नांतरा भोजनं कुर्यादग्निहोत्रसमो विधिरिति मनुनायत्सायं प्रातरित्युपात्तं तन्नु रात्रिदिनयोर्ग्रहणार्थं न तु संध्याकालनियमार्थं न संध्ययोरिति निषेधात्। अग्निहोत्रसाम्यविधानाद्दिवा रात्रौ

चाहि भोजनं निषिद्धमेव। एवं पूर्वोक्तप्रकारेण शुचौ दे-
श उपविष्ट उक्तनियमयुक्तश्च भूत्वा व्याहृतिभिर्गायत्र्या
चान्नमभिमंत्र्याभ्युक्ष्य परिषिच्य धर्मराजादिबलिं द-
त्वा आपोशानक्रियां कृत्वा पंचग्रासान्गृहीत्वा भोजना
नंतरमनग्नीकरणादिकं विधायाचमनं कुर्यात्॥ त
था च गोभिलः॥ अथातः प्राणाहुतिकल्पो व्याहृति
भिर्गायत्र्या वाभिमंत्र्य ऋतं त्वा सत्येन परिषिंचामी
ति सायं सत्यं त्वर्तेन परिषिंचामीति प्रातः अंतश्च
रसि भूतेषु गुहायां विश्वतो मुखः। त्वं यज्ञस्त्वं व-
षट्कारस्त्वं ब्रह्मा त्वं प्रजापतिः। आपो ज्योती रसो
मृतं ब्रह्म भूर्भुवः सुवरोम् अमृतोपस्तरणमसीत्यपः
पीत्वा दश होतारं मनसानुस्मृत्य त्वरत्वं च ग्रा-
सान्गृह्णीयात्। प्राणाय स्वाहेति गार्हपत्यमेव तेन
जुहोत्यपानाय स्वाहेत्यन्वाहार्यपचनमेव तेन जुहो
ति व्यानाय स्वाहेत्याहवनीयमेव तेन जुहोत्युदा
नाय स्वाहेति सभ्यमेव तेन जुहोति समानाय स्वा-
हेत्यावसथ्यमेव तेन जुहोतीति। शौनकस्तु विशेष
माह। स्वाहांताः प्रणवाद्याश्च नाम्ना मंत्रास्तु वाय
वः। जिह्वया च गृसेदन्नं दशनैर्न संस्पृशेत्। त-
र्जनीमध्यमांगुष्ठलग्ना प्राणाहुतौ भवेत्। मध्यमा
नामिकांगुष्ठैरपाने जुहुयाद्बुधः। कनिष्ठिकानामिकां

गुष्ठैर्व्याने तु जुहुयाद्धविः । तर्जनीं तु बहिः कृत्वा उदाने जु-
हुयाद्बुधः । समाने सर्वहस्तेन समुदाहुतिर्भवेत् । भ-
विष्यत्पुराणे । भोजनात्किंचिदन्नाग्रं धर्मरा-
जाय वै बलिं । चित्राय चित्रगुप्ताय प्रेतेभ्यश्चेदमुद्ध-
रेत् ॥ ब्रह्मपुराणे ॥ हस्तेन लंघयेन्नान्नं सोदकेन क-
दाचन । दंभाद्यो लंघयेदन्नं तेनान्नं निहतं भवेत् ॥
विष्णुपुराणे ॥ अश्नीयात्तन्मनो भूत्वा पूर्वं तु मधुरं
रसं । लवणाम्लौ तथा मध्ये कटुतिक्तादिकांस्ततः । प्रा-
क्द्रवं पुरुषोऽश्नीयान्मध्ये तु कठिनाशने । अंते पुनर्द्र-
वाशी तु बलारोग्ये न मुंचति ॥ जठरं पूरयेदर्द्धमन्नै-
र्भागं जलस्य च । वायोः संचारणार्थाय चतुर्थमव-
शेषयेत् ॥ आदिपुराणे । एकपंक्तेरनुस्थाने मध्ये-
वेदाचमेत्परः । तदा शेषं विहायैव विप्रः सम्यगुप-
स्पृशेत् । एकपंक्तिस्थितानां सर्वेषां भोजनेऽपरि-
समाप्त इत्यर्थः ॥ पंक्तिभेदमाह बृहस्पतिः ॥ अ-
ग्निना भस्मना चैव स्तंभेन सलिलेन च । द्वारेणैव
च मार्गेण पंक्तिभेदो बुधैः स्मृतः । ग्रासनियममाहाप-
स्तंबः । अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः । द्वात्रिं-
शतं गृहस्थस्य अमितं ब्रह्मचारिणः । आहिताग्निरनड्वां-
श्च ब्रह्मचारी च ते त्रयः । अश्नंत एव सिद्ध्यंति नैषां सिद्धिरन-
श्नतां । यदा गृहस्थस्योपवासः । आपस्तदा बोधायनोक्तं

द्रष्टव्यं। आहिताग्निहोत्रमंत्रांस्तु निरुद्धो भोजने जपेत्। न्दे
ताग्निहोत्रमंत्रांस्तु द्रव्यालाभे जपेदिति। निरुद्धो भोजन
इति उपवासेन भोजनरहित इत्यर्थः। पुलस्त्यः। भो
जनं तु न निःशेषं कुर्यात्प्राज्ञः कथंचन। अन्यत्र दधि-
सक्त्वाज्यपललक्षीरमध्वपः। भोजनानंतरं। देवलः
भुंक्त्वोच्छिष्टं समादाय सर्वस्मात्किंचिदाचमेत्। उच्छिष्ट
भागधेयेभ्यः सोदकं निर्वपेद्भुवि। अत्र मंत्रः। रौरवे पुण्य
निलये पद्मार्बुदनिवासिनां। अर्थिनामुदकं नित्यमक्ष
य्यमुपतिष्ठत्विति। गद्यव्यासः। ततस्त्वक्षः सन्नमृतापि
धानमसीत्यपः प्राश्य तस्माद्देशान्मनागपाश्रित्य विधि
वदाचामेत्। अपां प्राशने श्लोकव्यासः। हस्तं प्रक्षा
ल्य गंडूषं यः पिबेत्पापमोहितः। स दैवं चैव पित्र्यं च आ
त्मानं चैव सादयेत्। अर्द्धं पीत्वा तु गंडूषं अर्द्धं त्याज्यं मही
तले। रसातलं गतान्नागांस्तेन प्रीणाति नित्यशः। देवलः
आचम्य च ततः कार्यं दंतकाष्ठस्य भक्षणं। भोजने दंतल
ग्नानि निर्हृत्याचमनं चरेत्। दंतलग्नमसंहार्यं लेपं मन्ये
त दंतवत्। न तत्र बहुशः कुर्याद्यत्नमुद्धरणं प्रति। दंतलग्नं
कालांतरे स्यान्नाच्युतं यत्न त्यक्त्वैव शुचिर्नाचामेत्॥
तथा च याज्ञवल्क्यः। एवमशुचास्यगते दंतसक्ते त्य-
क्त्वा ततः शुचिः। मनुर्निगिरन्नपि शुचिरित्याह। दंतवद्दं
तलग्नेषु जिह्वास्पर्शे शुचिर्न तु। परिच्युतेषु च स्थानान्नि-

गिरन्नेवतच्छुचिः। परित्यागनिगिरणयोर्विकल्पः॥
स्थानचलनात्प्राक् जिह्वाघट्टनेपि शुचिरित्याह। गौत-
मः। दंतश्लिष्टेषु दंतवदन्यत्र जिह्वाभिमर्शनात् प्राक्
च्युतेर्जिह्वाभिघट्टने दोषो नास्तीत्यर्थः। एवं दंतधावना
नंतरं। देवलः। आचांतो हृदयदेशमभिमृशति प्रा-
णानां ग्रंथिरसि रुद्रो मा विशांतकस्तेनान्नेनाप्याय-
स्वेति। पुनराचम्य दक्षिणे पादांगुष्ठे पाणिं निश्रावय
ति अंगुष्ठमात्रः पुरुषो गुष्ठं च समाश्रितः। ईशः सर्वस्य
जगतः प्रभुः प्रीणातु विश्वभुक्। ततः करादिकमस्पृ
शन् जानुनी संस्पृशेत्। तथा च व्यासः। मा करेण करं
स्पृशीर्माजं घे मा च चक्षुषी। ऊरू संस्पृश कौंतेय भर्त्त
व्यास्ते महाजनाः। ऊरू जानुनी। जानुनी स्पृश राजेंद्र
भर्त्तव्या वहवोप दीति नैवाभिधानात्। मार्कंडेयः॥
भूयो प्याचम्य कर्त्तव्यं ततस्तांबूलभक्षणं। श्रवणं
चेतिहासस्य ततः कुर्यात्समाहितः। याज्ञवल्क्यो
पि। अहः शेषं समासीत शिष्टैरिष्टैश्च बंधुभिरि-
ति॥ इति भोजनविधिः॥ अथ भोज्याभोज्यद्र
व्याणि॥ तत्र याज्ञवल्क्यः। अनर्चितं वृथामांसं
केशकीटसमन्वितं। शुक्तं पर्युषितोच्छिष्टं श्वस्पृष्टं
पतितेक्षितं। उदक्यास्पृष्टसंघुष्टपर्यायान्नानि वर्जयेत्।
गोघ्रातं शकुनोच्छिष्टं पदा स्पृष्टं च कामतः। अनर्चि-

तं अवद्वा पूर्वकं दत्तं। वृथामांसं अनिषिद्धेऽपि मांसे अविहितकालसंपादितं। शुक्तं कालेनाम्लीभूतं। पर्युषितं रात्र्यंतरितं एतच्च दध्यादिव्यतिरिक्तं। नपर्युषितमन्यत्र रागषाडवधुक्रदधिगुडगोधूमयवपिष्टविकारेभ्य इति शंखस्मरणात्। यद्दुष्यदीयते तत्संघुष्टान्नं। अत्र प्रतिप्रसवः। अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितं। अस्नेहा अपि गोधूमयवगोरसविक्रयाः। शंखः। अपूपाः सक्तवो धानास्तक्रं दधि घृतं मधु। एतत्पण्येषु भोक्तव्यं भांडलेपो न चेद्भवेत्। भक्ष्याणि भक्ष्याः पंचनखाः सेधागोधाकच्छपशल्यकाः। शशश्च मत्स्ये ष्वपि हि सिंहतुंडकरोहिता। भक्षणकालमाह। प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्यया। देवान् पितॄन्समभ्यर्च्य खादन्मांसं न दोषभाक्। प्रोक्षितं यागे प्रोक्षणाख्यसंस्कारेण संस्कृतं। द्विजकाम्यया ब्राह्मणभोजनार्थं यत्संपादितमतिथिपूजार्थं तदुच्यते यत्तु गौतमवचनं। अक्षतागोपशुश्चैव श्राद्धे मांसं तथा मधु। देवराच्च सुतोत्पत्तिः कलौ पंच विवर्ज्जयेदिति। तत्र श्राद्धे मांसं वर्ज्जयेदिति निषेधः कलियुगे ब्राह्मणकर्तृकश्राद्धविषयः। मुन्यन्नं ब्राह्मणस्योक्तं मांसं क्षत्रियवैश्ययोः। मधुप्रधानं शूद्रस्येति श्राद्धप्रकरणे पुलस्त्येन विशेषाभिधानाच्च। द्विजदेवतापित्रुद्देशेन

कृतस्य यः शेषस्तस्य त्वदृष्टभक्ष्यता नास्ति। नदोषभागित्युपादानादस्य भक्षणे प्रत्यवायो नास्तीति यतो गम्यते। उक्तप्रकारव्यतिरेकेण भक्षणे दोषमाह। वसेत्स नरके घोरे दिनानि पशुरोमभिः। संमिता-नि दुराचारो यो हंत्यविधिवत्पशून्। परित्यक्तमांसस्य फलमाह। सर्वान्कामानवाप्नोति हयमेधफलं तथा। गृहेपि निवसन्विप्रो मुनिर्मांसविवर्जनात्। इति भोज्याभोज्यद्रव्याणि॥ अथ भोज्याभोज्यद्रव्यप्रसंगाद्भोज्यान्नाअभोज्यान्नाश्चपि प्रदर्श्यंते। तत्र गौतमः प्रशस्तानां स्वकर्मसु द्विजातीनां ब्राह्मणो भुंजीतेति। प्रशस्तानामित्यपि स्वकर्मसु प्रशस्तानां निष्ठातानां स्वकर्मनिरतानामिति यावत्। याज्ञवल्क्योपि। परपाकरुचिर्न स्यादनिंद्यामंत्रणादृते इति। यमदग्निपैठीनसी॥ ब्राह्मणस्य सदाश्नीयात् क्षत्रियस्य च पर्वसु। प्रकृतेषु चवैश्यस्य शूद्रस्य न कदाचन। अत्रापि ब्राह्मणादयः स्वकर्मनिष्ठा एव। पर्वसु पूर्णिमादिषु। प्रकृतेषु प्रक्रमविशेषेषूत्सवेषु गोमंगलादिषु। तथा। अमृतं ब्राह्मणस्यान्नं क्षत्रियस्य पयः स्मृतं। वैश्यस्य त्वन्नमेवान्नं शूद्रस्य रुधिरं स्मृतं। अभोज्यान्ना याज्ञवल्क्येन दर्शिताः। अग्निहीनस्य विप्रस्य नान्नमद्यादनापदि। कदर्यबद्धचौराणां क्लीबरंगावतारिणां

वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणां। एषा
मन्नं न भोक्तव्यं सोमविक्रयिणस्तथेति। अग्निहीनः
श्रौतस्मार्त्ताग्निरहितः शूद्रादिः सत्यप्यधिकारेऽग्नि
हीनो ब्राह्मणादिश्च। कदर्यो लुब्धवद्धो निगडादिना
वैणो वीणावादनजीवी। वार्धुष्यं निषिद्धवृद्ध्युपजी-
वनं। आत्मस्तुतिपरनिंदाकरणं च। तथा च विष्णुः
यस्तु निंदेत्परं जीवं प्रशंसत्यात्मनो गुणान्। स वै वा-
र्द्धुषिको नाम ब्रह्मवादिषु गर्हित इति। गणाक्षीनद्ध
याजकः। शूद्रस्य न कदाचन। अग्निहीनस्य नान्नम
द्यादनापदीत्यादिभिः शूद्रस्याभोज्यान्नत्वे प्राप्ते
प्रतिप्रसवमाह। याज्ञवल्क्यः। शूद्रेषु दासगोपा
लकुलमित्रार्द्धसीरिणः। भोज्यान्नो नापितश्चैव य
श्चात्मानं निवेदयेत्। दासा गर्भदासादयः। गोपालो
गोप्रतिपालनजीवी। कुलमित्रं वंशपरंपरायतः। अ
र्द्धसीता क्षौरकर्त्तापि। यश्च शूद्रो क्रीत एव वाङ्मनः
कायकर्म्मभिरात्मा नद्विजाय निवेदयति। तवाहमस्मि-
ति ददाति। स आत्मनिवेदयत। एते दासादयो यदी
यास्तस्यैव ते भोज्यान्नाः। यथाहारीतः। कुलमित्रं
कुलपुत्रो भेदः शिष्यकः सुहृत्। भवेद्यस्य सुखं
लाभो भयत्राता च यो भवेत्। कुलपुत्रः कुलमित्र
पुत्रः। भवेद्यस्य यस्य संबंधी भवेदित्यर्थः। अत्रस्त

शूद्रः सर्वत्रान्वेति। एते दासादयोपि स्वविहितनित्यक-
र्मनिरता एव भोज्यान्नाः। तथा च मनुः। नाद्याच्छूद्र-
स्य पक्वान्नं विद्वानश्राद्धिनो द्विजः। आददीताममेतस्मा-
दवृत्तावेकरात्रिकं। अश्राद्धी नित्यश्राद्धरहितः। एतच्च
नित्यकर्मप्रदर्शनार्थं। एकरात्रिकमेकाहःपर्याप्तं। प-
क्वान्नान्यपि विशेषतः। सुमंत्वंगिरसो गोरसं चैव सक्तूं-
श्चैतैलं पिण्याकमेव च। अपूपान्भक्षयेच्छूद्राद्यच्चा-
न्यत्पयसा कृतं। हारीतः। कंडुपक्वं स्नेहपक्वं पायसं द-
धि सक्तवः। एतान्यशूद्रान्नभुजो भोज्यानि मनुरब्रवीत्
एवं च यानि शूद्रान्ननिषेधकानि वचनानि तानि परिग-
णितशूद्रपरिगणितपक्वान्नव्यतिरिक्तविषयाणि। या-
नि च दासादिलक्षणानि पराशरस्मृतावभिहितानि-
तानि च न शूद्राभिप्रायेण। तथा सति परस्परविरोधात्
लक्षणानि च। शूद्रकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृ-
तः। संस्कारे तु भवेद्दासस्त्वसंस्कारे तु नापितः। क्षत्रिया
शूद्रकन्यायां सुतो जातस्तु नामतः। गोपालस्तु स विज्ञे-
यो भोज्यो विप्रैर्न संशयः। वैश्यकन्यासमुत्पन्नो ब्रा-
ह्मणेन तु संस्कृतः। कुलमित्रातिथिर्ज्ञेयो भोज्यो वि-
प्रैर्न संशयः। क्षत्रकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृ-
तः। तदर्द्धिकस्तु विज्ञेयो भोज्यो विप्रैर्न संशयः। गोपाल-
स्य क्षत्रियो जनकः। अन्येषां तु ब्राह्मणाः। अत्र यद्यपि

दासनापितगोपालानां मातृद्वारा शूद्रत्वमुपपन्नं तथापि
कुलमित्रार्द्धसीरिणो नैमातृद्वारापि। गततश्च क्वचि-
न्मातृद्वारा शूद्रत्वं क्वचिन्नेति एते शूद्रेषु भोज्यान्ना इ-
त्यनेन विरोधः स्यात्। किंच मूर्द्धावसिक्तादिज्यात्यतःपा
तित्वादेतेषां न शूद्रत्वं। तथा चैतेषां शूद्रत्वे मूर्द्धावसिक्ता
दिजातिप्रतिपादकवचनैः सह विरोधः स्यात्। लक्षणा-
वाक्यानां त्वयमभिप्रायः। शूद्ररूपदासादीनां भोज्या-
न्नत्वकथनप्रसंगात् डित्थडवित्थसंज्ञान्तराणीव दा-
सादिसंज्ञा अपि संतीति प्रदर्शनार्थमिति। अत एव सुतो
ज्ञानस्तु नामतः। गोपालस्तु स विज्ञेय इत्यत्र नामत इति
ग्रहणं कृतं। किंच। आत्मनिवेदकस्य कुंभकारादेश्च केव
लशूद्रत्वात्तन्न्यायेनेतरेषामपि शूद्रत्वमेव युक्तं ॥
इति भोज्याभोज्यान्ननिर्णयः ॥ अथ शयनवि-
धिः ॥ तत्रांगिराः ॥ तथा च याज्ञवल्क्योपि ॥ उपा-
स्य पश्चिमां संध्यां हुत्वाग्नींस्ताननुपास्य च। भृत्यैः परिवृ
तो भुक्त्वा नातितृप्तोथ संविशेत्। चकारो वैश्वदेवादि
समुच्चयार्थः। एतच्च पाकान्तरेण न दिवावशिष्टेन।
तथा च विष्णुपुराणे। पुनः पाकमुपादाय सायमप्य
वनीपते। वैश्वदेवनिमित्तं वै पत्न्या सार्द्धं बलिं हरेत्।
व्यासः। शुचौ देशे विविक्ते तु गोमयेनोपलेपिते। प्रागु
दक्प्रवणे चैव संविशेत्तु सदा बुधः। तथा मंगल्यं पूर्णकुं

मंत्रं शिरःस्थाने निधाय तु। वैदिकैर्गारुडैर्मंत्रैः रक्षां कृत्वा स्वपेत्ततः। विष्णुपुराणे। नच्छेच्छय्यामस्फुटितामपि-दारुमयीं नृप। हारीतः। सुप्रक्षालितचरणः सर्वतो रक्षां कृत्वा सुप्रणाममिति पठन् शय्यामधिष्ठाय रात्रिसूक्तं जप्त्वा विष्णुं नमस्कृत्य सर्वापसर्पभद्रं ते इत्येतं श्लोकद्वयं जप्त्वेष्टदेवतास्मरणं कृत्वा समाधिमास्थायान्यांश्च वैदिकान्मंत्रान्मानसिकीं जप्त्वा मंगलश्रुतिं शंखं च श्रावन् दक्षिणाशिराः स्वपेदिति। दक्षिणाशिरा इति प्रदर्शनार्थं। अत एव पुराणे। प्राच्यां दिशि शिरः शस्तं याम्यायामथवा नृप। सदैव स्वपतः पुंसो विपरीतं तु रोगद-मिति। मार्कंडेयः। शून्यालये श्मशाने च एकवृक्षे चतुःपथे। महादेवगृहे चापि मातृवेश्मनि न स्वपेत्। प्रचेताः। न संध्यायां शयीत न देवसमीपे न वेदसमाप्तौ नाशुचिर्न नग्नो न विशीर्णखट्वायां न भूतयक्षगृहायतनेषु न श्मशानवल्मीकमहावृक्षच्छायासु चेति। विष्णुः। नार्द्रपादः स्वपेन्न पलाशशयने न पंचदारुकृते न गजभग्नकृते न विद्युद्दग्धकृते नाग्निप्लुष्टे न पठसिक्तद्रुमजेन वा लमध्ये नारिमध्ये न धान्यगोगुरुहुताशसुराणामुपरि नोच्छिष्टो न दिवेति। तथा निद्रामसमयमासाद्य तांबूलं वदनात्त्यजेत्। पर्यंकात्प्रमदा माल्यात्पुंष्पुष्पाणि मस्तकात्। गरप्रमादयत्नाहि भयदाः सर्व

दाइसे। इह मदनपारिजाते मदनक्षितिपालदानजल
रुहे। स्तवकस्तृतीय आसीदामोदाकृष्टपंडितभ्रमरः
मतिर्येषां शास्त्रे प्रकृतिरसमी रााया व्यवहृतिः पराशी
लं श्लाघ्यं जगति कुजवस्ते कतिपये। चिरं चिन्ने तेषां सुकु
रुतलमूते स्थितिमियादियं व्यासारराय प्रवरमुनिशिष्य
सभगोतिः॥ इति पंडितपारिजातकद्वारमल्ले
त्यादिविरुदराजीविराजमानस्य श्रीमदनपाल
स्य निबंधे तृतीयस्तवकः॥

अथ शयनानंतरप्राप्तगर्भाधानादिसंस्का
रः। तत्र गर्भाधानोपयुक्तित्वेन प्रथमं ऋतुकालो निरू
प्यते। याज्ञवल्क्यः। षोडशर्तुर्निशाः स्त्रीणां तस्मि
न्युग्मासु संविशेत्। ब्रह्मचार्येव पर्वाण्याद्याश्चतस्र
स्तु वर्जयेत्। स्त्रीणां षोडश निशा ऋतुः गर्भाधानयो
ग्यः कालः। तत्रोक्तविधिना गच्छन् ब्रह्मचार्येव। चतुर्द
श्यष्टमी चैव अमावास्या च पूर्णिमा। चत्वार्येतानि प
र्वाणि रविसंक्रांतिरेव च। मनुः। अमावास्यामष्टमीं
च पूर्णमासीं चतुर्दशीं। ब्रह्मचारी भवेन्नित्यमप्यृतौ-
स्नातको द्विजः। तथा। तासामाद्याश्चतस्रस्तु निंदितै
कादशी तथा। त्रयोदशी च शेषास्तु अप्रशस्ता दश रात्र
यः। एकादशीत्रयोदश्योर्ऋतोर्नपक्षस्य। हारीतस्तु च-
तुर्थरात्रावपि गर्भाधानमिच्छति। चतुर्थे ह्नि स्नाता

यांयुग्मासु च गर्भाधानं तदुपेतं ब्रह्म गर्भं संदधातीति
तथा शुद्धा भर्तुश्चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला । दै-
वे कर्म्मणि पित्र्ये च पंचमेऽहनि शुद्ध्यतीति । ततश्चतु
र्थ्यां स्त्रीगमनस्य विहितप्रतिषिद्धत्वात् विकल्पः । स
च व्यवस्थितः । रजो निवृत्तौ चतुर्थ्यां विधिः । तदनुवृ
त्तौ प्रतिषेधः । अनेनैवाभिप्रायेणाह मनुः । रजस्युपरते
साध्वी स्नानेन स्त्री रजस्वलेति । साध्वी गर्भाधानादिविहि
तकर्म्मयोग्येत्यर्थः । याज्ञवल्क्यः । एवं गच्छन् स्त्रि
यं क्षामां मघां मूलं च वर्जयेत् । सुस्थ इन्दौ सकृत्पु-
त्रं लक्षण्यं जनयेत्पुमान् । सकृत् एकस्यां रात्रावेक
वारमेव गच्छेदित्यर्थः । पुमान् उक्तनियमयुक्तः अप्र
तिहतपुंस्त्वो भवेत् । ज्योतिःशास्त्रे । पित्र्यं पौष्णं
नैर्ऋतं चापि धिष्ण्यं त्यक्त्वेति । पित्र्यं मघा पौष्णं रेवती
नैर्ऋतं मूलं । ऋतुगमने स्नानमाहापस्तंबः । ऋतौ
तु गर्भशंकित्वात्स्नानं मैथुनिनः स्मृतं । अनृतौ तु स
दा कार्यं शौचं मूत्रपुरीषवत् । द्वावेतावशुची स्यातां दं
पती शयनं गतौ । शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान् । प्रसंगाद्रजस्वलाव्रतानि । तत्र वसि-
ष्ठः । त्रिरात्रं रजस्वलाऽशुचिर्भवति । सानांज्यान्ना
भ्यज्यान्नाप्सु स्नायादधः शयीत न दिवा सुप्यान्न रज्जुं सृ
जेन्न मांसमश्नीयान्न ग्रहान्निरीक्षेत न हसेन्न किंचि

दाचरेदखर्वेण पात्रेणापिवेदंजलिना वापात्रेण लोहितायसेन वेति। खर्वो वा महत्त्वः। अयंच वामहस्तस्य निषेधः केवलस्यैव। अथवा अखर्वं पात्रं मृण्मयपात्रम्। लोहितायसं ताम्रं। स्नानानंतरं पुनरपि रजोदर्शने विशेषमाह। हारीतः। रजस्वला यदि स्नाता पुनरेव रजस्वला। अष्टादशदिनादर्वागशुचित्वं न विद्यते। एकोनविंशतेरर्वागेकाहं स्यात्ततो द्व्यहं। विंशात्प्रभृत्युत्तरेषु त्रिरात्रमशुचिर्भवेदिति। अष्टादशदिनादर्वाक् सप्तदशदिनाभ्यंतरमित्यर्थः। एवमुत्तरत्रापि। इयंच गणना रजोदर्शनदिनादारभ्य। यत्तूक्तं। चतुर्दशादिनादर्वागशुचित्वं न विद्यत इति तत्तु स्नानप्रभृतीन विरोधः। प्रौढयौवनयायास्तु अष्टादशदिनाभ्यंतरे रजोदर्शने पि त्रिरात्रमशुचित्वं ॥ इतिऋतुकालनिर्णयः ॥

अथ गर्भाधानं ॥ तत्र विष्णुपुराणे। ऋतावुपगमः शस्तः स्वपत्न्यां मनुनाद्विजइति। मंत्रवद्धानं द्विजातिविषयं। तेच मंत्रा गोभिलेनोक्ताः। ऊर्द्ध्वं त्रिरात्रात्संभव इत्येके यदृतुमती भवत्युपरतशोणिता तदा संभवकाल इत्युपक्रम्य दक्षिणेन पाणिनोपस्थमभिमृशेदिष्णुर्योनिं कल्पयत्वित्येतयर्चा गर्भं धेहि सिनीवालीति च समाप्तेः संभ-

वत्तः। स्त्रीणां बहुत्वे ऋतुयौगपद्ये च वगमनक्रम-
माह। देवलः। यौगपद्ये तु तीर्थानां विप्रादिक्रमशो
व्रजेत्। रक्षणार्थमपुत्राणां ग्रहणक्रमशोपि वेति
तीर्थमृतुः। विप्रादिक्रमो वर्णक्रमः। ग्रहणक्रमो वि-
वाहक्रमः। ननु च वर्णक्रमेणैव विवाहोपीति पुन
रपि ग्रहणक्रमोपादानमनर्थकमिति चेत्। मैवं।
प्रथमतः स्ववर्णादिक्रमेण ऊढदारस्य दैवादन्यतर
वर्णदारांतरितस्य पुनस्तद्वर्णकन्यकां परिणीतस्य
सवर्णापुत्रवतो दारेषु ऋतुकालयौगपद्ये विवाह
क्रमेण गमनं नियम्यत इति ग्रहणक्रमोपादानस्य
सार्थकत्वात्। पराशरः। ऋतुस्नातां तु यो भार्यां
सन्निधौ नोपगच्छति। घोरायां भ्रूणहत्यायां युज्यते
नात्र संशयः। असंनिधौ तु न दोषः। सन्निधानेपि स्व-
स्थस्यैवायं नियमः। यः स्वदारानृतुस्नातान्स्वस्थः
सन्नोपगच्छतीति स्मरणात्। अयं च ऋतुगम-
ननियमः अजातपुत्रस्यैव मनुना ज्येष्ठस्य प्राश-
स्त्याभिधानादितरेषां कामजत्वनिर्देशाच्च
ज्येष्ठेन जातमात्रेण पुत्री भवति मानव इति। य-
स्मिन् ऋणं संनयति येन चानंत्यमश्नुते। स एव
धर्म्मजः पुत्रः कामजानितरान्विदुरिति॥ इति ग-
र्भाधानं॥ अथ पुंसवनं॥ तत्र याज्ञवल्क्यः

गर्भाधानस्मृतौ पुंसः सवनं स्पंदनात्पुरेति। पुंसवनमित्यनुवृत्तौ पारस्करः। मासे द्वितीये तृतीये वा यदहः पुंसा नक्षत्रेण चंद्रमा स्यादिति। पुंसा नक्षत्रेण पुंनक्षत्रेण। तानि च रत्नकोशे दर्शितानि। हस्तो मूलं श्रवणः पुनर्वसुर्मृगशिरस्तथा। पुष्या। पुंसंज्ञितेषु कार्येष्वेतानि शुभाधिष्ण्यानीति। बृहस्पतिस्तु जाते गर्भस्पंदने पुंसवनमाह। सवनं स्पंदिते शिशावितिं। अत्र यथाशाखं व्यवस्था॥ इति पुंसवनं॥ अथ सीमंतोन्नयनं॥ तत्र याज्ञवल्क्यः। षष्ठेऽष्टमे वा सीमंत इति। शंखः। गर्भस्पंदने सीमंतोन्नयनं। यावद्वा प्रसव इति। सांख्यायनगृह्ये सप्तमे मासि प्रथमगर्भे सीमंतोन्नयनमिति। आपस्तंबः। सीमंतोन्नयनं प्रथमे गर्भे चतुर्थे मासीति। बैजवापः। अथ सीमंतोन्नयनं मासि चतुर्थे षष्ठे पंचमे वेति। लौगाक्षिः। तृतीये गर्भमासे सीमंतं कारयेदिति। अत्र विशेषमाह। शौनकः। आपूर्यमाणपक्षे यदा पुंसा नक्षत्रेण चंद्रमा युक्तः स्यादिति। पुंसवनसीमंतोन्नयने स्त्रीसंस्कारौ। अत एव सकृत्कर्तव्याविति केचन। पारस्करः। पुंसवनवत्सीमंतोन्नयनं प्रथमगर्भ इति। तथा च देवलोपि। सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता इति। हारीतः। सकृत्संस्कृतसं-

स्काराः सीमंतेन द्विजस्त्रियः। यंयंगर्भंप्रसूयंते सस्सर्वः संस्कृतोभवेदिति। विष्णुः। सीमंतोन्नयनं कर्म्म न स्त्री संस्कारइष्यत। केचिद्गर्भस्य संस्काराः नाभेंगर्भेप्रयुंजत इति। अत्रापि स्वस्वगृह्यानुसारेण व्यवस्था। अकृतसीमंतायाः प्रसवे सत्यत्र तोको विशेषः। स्त्री यदाऽकृतसीमंता प्रसवेत्तु कथंचन। गृहीतपुत्रा विधिवत्पुनः संस्कारमर्हतीति॥ इति सीमंतोन्नयनं॥ अथ जातकर्म्म॥ तत्र विष्णुः। जातकर्म्म ततः कुर्यात्पुत्रे जाते यथोदितं। यथोदितं स्वगृह्योक्तविधिनेत्यर्थः। तत्र स्नानानंतरं। जाते पुत्रे पितुः स्नानं सचेलं तु विधीयत इति संवर्त्तस्मरणात। एतच्च स्नानं रात्रावपि भवति। यदाह व्यासः। रात्रौ स्नानं न कुर्व्वीत दानं चैव विशेषतः॥ नैमित्तिकं तु कुर्व्वीत स्नानं दानं च रात्रिष्विति। नैमित्तिकदानान्यपि सस्वाह। गृहणे ग्रहणसंक्रांतियात्रार्त्ति प्रसवेषु च। दानं नैमित्तिकं ज्ञेयं रात्रावपि न दुष्यतीति जातकर्म्म च नाभिनालच्छेदनात्पूर्वमेव। तथा च मनुः। प्राङ्नाभिवर्द्धनात्पुंसो जातकर्म्म विधीयत इति॥ जैमिनिः। यावन्न छिद्यते नालं तावन्नाप्नोति सूतकं छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते। यच्च विष्णुधर्म्मोत्तरे। अच्छिन्ननाभ्यां कर्त्तव्यं श्राद्धं वै पुत्रजन्मनि। आशौचोपरमे कार्यमथवा नियतात्मभिरिति। तच्च कर्तृद्रव्याद्य

भावे वेदितव्यं ॥ तथा च वैजवापः ॥ जन्मनोनन्तरं का
र्यं जातकर्म यथाविधि। दैवादतीतकालं चेदतीते सूतके
भवेदिति। तच्च श्राद्धमामेन। अत एव प्रचेताः। स्त्रीशूद्रः
श्वपचश्चैव जातकर्मणि चाप्यथ। आमश्राद्धं सदा कुर्या
द्विधिना पार्वणेन त्विति। आमाभावे हेम्ना। तथा च
व्यासः। द्रव्याभावे द्विजाभावे प्रवासे पुत्रजन्मनि॥
हेमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्वला। द्रव्याभावेऽश
मद्रव्यालाभे। यस्य भार्येत्ययमंशः श्राद्धस्तवके व्याख्या
तोऽप्रतिगृह्यश्च नाभिवर्द्धनात्पूर्वं जातदहवो। यथाह
शंखः। कुमारप्रसवे नाड्यामच्छिन्नायां गुडतिलहि
रण्यवस्त्रगोधान्यप्रतिग्रहेष्वदोषस्तदहस्त्वेके कुर्व
त इति। तथा। सर्वेषां सकुल्यानां द्विपदश्चतुष्पदं धान्या
नि हिरण्यानि दद्यादिति। आशौचमध्येप्येतत्कार्य
मित्याह प्रजापतिः। आशौचे तु समुत्पन्ने पुत्रजन्म य
दा भवेत्। कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुद्ध्य
तीति। ज्योतिःशास्त्रे। मृदुध्रुवचरक्षिप्रभेष्वेषामुदये
पि वा। गुरौ शुक्रेऽथवा केन्द्रे जातकर्म च नाम चेति। एत
द्दैवाज्जातकर्मनामकरणोत्कर्षे वेदितव्यं। अनुत्क
र्षे तु नायं नियमः। निमित्तानंतरभावित्वान्नैमित्तिकस्य
॥ इति जातकर्म ॥ अथ नामकरणं ॥ तत्र म
नुः॥ नामधेयं दशम्यां तु द्वादश्यां चास्य कारयेत्।

पुण्ये इति यो मुहूर्त्ते वा नक्षत्रे वा गुणान्विते। याज्ञवल्क्य
ऽहन्येकादशे नामेति। भविष्यत्पुराणे। नामधेयं द
शम्यां तु केचिदिच्छन्ति पार्थिव। द्वादश्यामपरे रात्र्यां मा
से पूर्णे तथा परे। अष्टादशेऽहनि तथा वदन्त्यन्ये मनीषि-
णः। गृह्यपरिशिष्टे। जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्स
रे वेति। शंखः। अशौचे तु व्यतिक्रान्ते नामकर्म्म विधीयत
इति। न चायं नियमः। तथा च। नामधेयं दशम्यामित्यादि
वचनविरोधात्। ततश्चाहन्येकादशे नामेत्यादीनां विव
क्षितार्थत्वमेव तेनाशौचमध्येपि कार्यं स्वगृह्यानुसारेण
चैते पक्षा व्यवस्थिता विज्ञेयाः। शंखलिखितौ। दशा
म्यामुत्थाप्य पिंडवर्द्धनं पितॄणां तत्र सान्निध्यमिति श्रुतेः
ब्राह्मणेनाहुतिः पूर्वं पितॄननुमान्य तदहरेव नामकरणं
कुर्याद्देवतानक्षत्राभिसंबद्धं पित्रा वा कुर्यादन्यो वा कुलवृ
द्धश्चतुरक्षरं त्र्यक्षरं द्व्यक्षरं वा घोषवदाद्यंतरंतस्थं पुंनामि
कामन्तं स्त्रीणामेवं कृते नास्ति शुचि तत्कुलं भवतीति।
अयमर्थः। दशमेऽहनि सूतिकां पूर्वशय्यात उत्थाप्य पिं-
डवर्द्धनमिति। कर्म्म नाम तत्कुर्यात्। तत्र चायं क्रमः। ब्रा-
ह्मणेन पूर्वमाहुतिं दत्त्वा पितॄननुमान्याभ्युदयश्राद्धेन
पूजयित्वा पितातदभावे सान्निध्यादिनाऽन्यो नामकु
र्यात्। तत्र नियमः। चतुरक्षरमित्यादि। वर्गतृतीयचतु-
र्थानि यान्यक्षराणि ककारश्चतान्यादौ कृत्वा यरलवा

ऽन्तस्थास्तान्मध्ये कुर्यादिति। वैजवापः। पिता नाम करोत्येकाक्षरं द्व्यक्षरं त्र्यक्षरं चतुरक्षरमपरिमितं वेति। अत्र सम संख्या पुंसः। शंखः। अयुग्माक्षरम माकारांतं पुंल्लियै तद्धितमिति। शंखः। ईकारांतं स्त्री-णामिति। स्वकुलसंबद्धं वा नाम कुर्यात्। तथा च शंखः कुलदेवतासंबद्धं पिता नाम कुर्यादिति। कुलसंबद्धं देव-तासंबद्धं वेत्यर्थः। मनुः मंगल्यं ब्राह्मणस्य स्यात्क्षत्रियस्य बलान्वितं। वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितं मंगलबलधननिंदाप्रतिपादकानि क्रमेण नामानि भवं-तीत्यर्थः। यथा। भद्रशर्म्मा शक्तिपालो धनपुष्टो हीनदास इति। यमस्तूत्तरपदनियममाह। शर्म्मा देवश्च विप्रस्य वर्म्मा त्राता च भूभुजः। भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत्। अंते निरस्तकशब्दप्रदर्शनार्थं। अतः श-क्तिपाल इत्यादि शब्दा भवंति॥ इति नामकरणं॥

अथ निष्क्रमणं॥ तत्र। भविष्यत्पुराणे। उत्तरार्द्धे मनुरपि। द्वादशे हनि राजेंद्र शिशोर्निष्क्रमणं गृहात्। चतुर्थे मासि कर्त्तव्यं तथान्येषां मतं विभो। अत्र विशेषमाह। यमः। ततस्तृतीये कर्त्तव्यं मासि सूर्यस्य दर्शनं। चतुर्थे मासि कर्त्तव्यं शिशोश्चंद्रस्य दर्शनं॥ लौगाक्षिः। तृतीयेहूमासं आदित्यस्य दर्शनमिति। अत्रापि पूर्ववदेव व्यवस्था। सुरेश्वरः। जीवभार्गवसौ

स्यानां शिशुनिष्क्रमणक्रिया। दिवसे शस्यते नित्यमा
युर्वृद्धिधनव्रजाः। अश्विनी रेवती हस्त धनिष्ठा रोहि
णी तथा। श्रवणं पुष्यसंयुक्तं मृगे गोत्तरफाल्गुनी।
अनुराधोत्तराषाढा तथा चैव पुनर्वसुः। इमानि भानि शा
स्तानि शिशुनिष्क्रमणे विधौ॥ इति निष्क्रमणं॥
अथ कर्णवेधः॥ ज्योतिःप्रकाशे॥ कार्त्तिके पौषमा
से वा चैत्रे वा फाल्गुनेपि वा। कर्णवेधं प्रशंसंति शुक्लप-
क्षे शुभे दिने। सुनक्षत्रे शुभे चंद्रे सुस्थे शीर्षोदये शुभे।
दिनच्छिद्रव्यतीपातविष्टिवैधृतिवर्जिते। शिशोरजात
दंतस्य मातुरुत्संगसर्पिणः। सौचिको वेधयेत्कर्णौ सू
च्या द्विगुणसूत्रया। हस्ताश्विनी स्वाति पुनर्वसूच।
तिष्येंदु चित्रा हरि रेवती षु। चंद्रेनुकूले गुरुशुक्रवारे क-
र्णौ तु वेध्यौ च मरेज्यलग्ने। अयं च कर्णवेधः कुल
क्रमागतकाले कर्त्तव्यः॥ इति कर्णवेधः॥ अ-
थान्नप्राशनं॥ तत्र मनुः। षष्ठेन्नप्राशनं मासि
यद्वेष्टं मंगलं कुले॥ लौगाक्षिः। षष्ठे मासेन्नप्रा
शनं जाते षु दंते षु वेति। यमः। ततोऽन्नप्राशनं मा-
सि षष्ठे कार्यं यथाविधि। अष्टमे वाथ कर्त्तव्यमिति।
शंखः। संवत्सरेन्नप्राशनमिति। व्यवस्था पूर्वव-
त्। अत्र विशेषो मार्कंडेयपुराणे। देवतापुर-
तः स्यस्य धात्र्युत्संगगतस्य च। अलंकृतस्य दात-

व्यमन्त्रं पात्रेय कांचने । मध्वाज्यकनकोपेतं प्राशयेत्स्या
यमं सुतं । तदनंतरं शिशोर्जीविकापरीक्षाप्रकारमाह
सप्रव । देवाग्रतोथ विन्यस्य शिल्पभांडानि सर्वशः । शा
स्त्राणि चैव शस्त्राणि ततः पश्येत्सुलक्षणं । प्रथमं य
त्स्पृशेद्बालस्ततो भांडं स्वयं तदा । जीविका तस्य बालस्य
तेनैव तु भविष्यतीति ॥ इत्यन्नप्राशनं ॥ अथ चू
डाकर्म्म ॥ तत्र मनुः । चूडाकर्म्म द्विजातीनां सर्वेषा
मेव धर्म्मतः । प्रथमेब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात् ।
यमः ॥ तथा संवत्सरे पूर्णे चूडाकर्म्म विधीयते । द्वितीये
वा तृतीये वा कर्त्तव्यं श्रुतिचोदनात् । शंखलिखितौ
तृतीये वर्षे चूडाकर्म्म पंचमे वा । लौगाक्षिः । तृतीय-
स्य वर्षस्य भूयिष्ठे गते चूडाः । कारयेत् दक्षिणतः क
मुजा वसिष्ठानामुभयतो त्रिकश्यपानां मुंडा भृगवः पं
च चूडा अंगिरसो वाजिमेके मंगलार्थं शिखिनोन्ये यथा
कुलधर्म्मं वा शुद्धपक्षस्य पुण्याहे पर्वणि वेति । कमु-
जा चूडा । वाजिः केशपंक्तिः । मंगलार्थमिति । अन्ये तु मंग-
लार्थं शिखामात्रं यत्र क्वचन कुर्वंति । अत्रापि यथागृह्यं
व्यवस्था । व्यासः । अश्विनी श्रवणा स्वाति चित्रा पुष्य
पुनर्वसु । धनिष्ठा रेवती ज्येष्ठा मृग हस्तेषु कारयेत् । क्षौर
मिति शेषः । तथा । नक्षत्रे तु न कुर्वीत यस्मिन्जातो भवे
न्नरः । न प्रोष्ठपदयोः कार्यं नैवाग्नेये च भारत । दारुणे

पु च सर्वेषु दुष्टतारांश्च वर्जयेत्। अन्ये तिथिवारादिविशेषा उपनयनप्रकरणोक्ता द्रष्टव्याः॥ इति चूडाकर्म

॥ अथ स्त्रीसंस्कारः॥ तत्र मनुः। अमंत्रिका तु कार्येयं स्त्रीणामावृदशेषतः। संस्कारार्थं शरीरस्य यथाकालं यथाक्रमं। आवृत जातकर्मादिक्रिया। यथाक्रममित्यभिधानात्क्रमातिक्रमो न कर्त्तव्य इत्युक्तं भवति अत एव कालातिक्रमे कात्यायनेन प्रायश्चित्तमभिहितं। देवतानां विपर्यासे जुहोतिषु कथं भवेत्। सर्वप्रायश्चित्तं हुत्वा क्रमशो जुहुयात्पुनः। संस्काराश्चाभियुज्येरन्स्वकालाच्चेत्कथंचन। हुत्वैतदेव कर्त्तव्यायेतूपनयनादधः। सर्वप्रायश्चित्तमपि स एवाह सर्वप्रायश्चित्तं पंचभिः प्रत्यृचं त्वं नो अग्न इति द्वाभ्याम याश्चाग्नेयेते शतमुदुत्तममिति चेति। उपनयनकालातिपन्नौ तु व्रात्यस्तोमाद्येव। एतेष्वेकैकलोपे पादकृच्छ्रः चौललोपेत्वर्द्धकृच्छ्रः। स्त्रीसंस्कारे गोभिलो विशेषमाह। तूष्णीं पेताः क्रिया स्त्रीणां मंत्रेण तु होम इति॥ इति स्त्रीसंस्कारः

अथ विद्यारम्भः

॥ तत्र मार्कण्डेयः। प्राप्तेऽथ पंचमे वर्षे अप्रसुप्ते जनार्दने। षष्ठीं प्रतिपदं चैव वर्जयित्वा तथाष्टमीं। रिक्तां पंचदशीं चैव सौरिभौमदिने तथा। एवं सुनिश्चिते काले विद्यारंभं तु कारयेत्। पूजयित्वा हरिं लक्ष्मीं देवीं चैव सरस्वतीं। स्वविद्यासूत्रकारांश्च स्वां विद्यां च विशेषतः। एते

षामेव देवानां नाम्ना तु जुहुयाद्धुतं दक्षिणाभिर्द्विजेन्द्राणां
कर्त्तव्यं चात्र पूजनं। प्राङ्मुखो गुरुरासीनो वारुणाशा
मुखं शिशुं। अध्यापयेत प्रथमं द्विजाशीर्भिः सुपूजितं
ततः प्रभृत्यनध्यायान्वर्जनीयान्विवर्जयेदिति। अस्य च
शिशोः कामचारवादभक्षाः। यथाह गौतमः। प्रागु-
पनयनात्कामचारवादभक्षा इति। कामचारोऽप्यपत-
नीयकर्मस्वेव। तत्र पादो बालेषु दातव्य इत्यादि प्राय
श्चित्तस्मरणात्॥ इति गर्भाधानादिसंस्काराः॥
ब्रह्मचार्याश्रमो गृहस्थाश्रमश्चेति द्वावाश्रमौ सधर्म्मौ वि
स्तरेण प्रतिपादितौ। अथ तृतीयाश्रमः प्रस्तूयते
तत्र शंखः। गृहस्थस्तु यदा पश्येद्वलीपलितमात्म
नः। अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत्। पुत्रे
दारान्विनिक्षिप्य तया वानुगतो वने। अग्नीनुपचरेन्नि
त्यं वन्यमाहारमाहरेत्। यदाहारो भवेत्तेन पूजयेत्पितृ
देवताः। तेनैव पूजयेद्विद्वानतिथिं समुपागतं। ग्रामा
दाहृत्य वाश्नीयादष्टौ ग्रासान्समाहितः। स्वाध्यायं च त-
था कुर्याज्जटाश्च बिभृयात्तथा। तपसा शोषयेन्नित्यं स्व
कं चैव कलेवरं। आर्द्रवासास्तु हेमंते ग्रीष्मे पंचतपास्त-
था। प्रावृष्याकाशशायी च नक्ताशी च सदा भवेत्। चतुर्थ
कालिको वा स्यात्। षष्ठकालिक एव वा। कृच्छ्रैर्वापि नये-
त्कालं ब्रह्मचर्यं च पालयेत्। एवं नीत्वा वनं कालं द्विजो

त्रह्माश्रमी भवेदिति ॥ अथ चतुर्थाश्रमः ॥ तत्र प्रथमं त्रै
वर्णिकेषु को वाधिक्रियत इति विचार्यते। तत्र छंदोगसूत्रका
रः। त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमा इति।
तथाऽपरार्के। ऋणत्रयमपाकृत्य निर्ममो निरहंकृतिः
ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रव्रजेद्गृहात्। धर्मविश्-
तावपि। ब्राह्मणः क्षत्रियो वैश्यस्ततो गच्छेद्वनं कृती। सं
न्यसेत्पापनाशाय सर्वभूतदयापरः। इति त्रैवर्णिकस्या
धिकारमेतानि वाक्यानि विदधति। अतस्त्रैवर्णिका-
नामपि तुर्याश्रमेऽस्त्येवाधिकारः॥ यत्तु जाबालश्रु-
तिः। ब्राह्मणाः प्रव्रजंतीति। तस्य द्वयं गतिः। ब्राह्मण
शब्दः प्रदर्शनार्थः। अतः क्षत्रियवैश्यावप्युपलक्ष
यति। तेन न विरोध इति। अथवा ब्रह्म वेदस्तन्निमित्त
दध्ययनवान्ब्राह्मण इति व्युत्पत्त्या ब्राह्मणशब्दो व
र्णत्रयपरः। एतेन आत्मन्यग्नीन्समारोप्य ब्राह्मणः
प्रव्रजेद्गृहादित्यादिमन्वादिवचनान्यपि व्याख्याता
नि। यच्च दत्तात्रेयवचनं। मुखजानामयं धर्मो यद्विष्णो
र्लिंगधारणं। बाहुजातोरुजातानां नायं धर्मो न विद्य
त इति। तथा। गतिस्तुर्याश्रमे नास्ति बाहुजोरुजयोः क्व-
चित्। तुर्याश्रमे गतिः प्रोक्ता मुखजानां स्वयंभुवेति च।
एतदपि वचनद्वयं वस्तुतो न विरुध्यते। मुखजा ब्राह्म
णाः। बाहुजाः क्षत्रियाः। ऊरुजा वैश्याः एतेषामयं धर्मो

लिंगधारणात्मको न विद्यते। लिंगलक्षणं चिह्नं विदं
डैकदंडरूपं। तथाच दक्षः। मेखलाजिनदंडेन ब्रह्म
चारीति लक्ष्यते। गृहस्थो यतिश्चिवेदाद्यैर्नखरोमैर्वना
श्रितः। त्रिदंडेन यतिश्चैव लक्षणानि पृथक् पृथगिति।
त्रिदंडग्रहणमेकदंडस्यापि प्रदर्शनार्थं। एवंविधं लिंगं
क्षत्रियवैश्ययोर्नेति दंडधारणनिषेधादेव नाश्रमनि
षेधः। तथा गतिस्तुर्याश्रमे नास्तीत्यस्यायमेवार्थः। ग-
तिर्ज्ञानं। सर्वे गत्यर्था ज्ञानार्था इति स्मरणात्। ज्ञा-
नं च ज्ञापकनिष्ठत्वात्। अत एव ज्ञापककार्यं तत्। तेन
ज्ञानरूपेण कार्येण कारणं ज्ञापकं दंडधारणं लक्ष्य
ते। तथाचैतदुक्तं भवति। क्षत्रियवैश्ययोर्ज्ञापकं दंड
धारणं नास्तीति लिंगनिषेध एव न त्वाश्रमनिषेधः।
दंडधारणं वहिरंगं। विषयविराग एव मुख्यः। विरागा
भावेऽधिकाराभावात्। यच्च धर्मविवृतावेव वचनांतरं
संन्यसेद्ब्राह्मणः सम्यक् स्यान्न क्षत्त्रो भवेन्नृपः। वानप्र-
स्थो भवेद्वैश्य एवं वर्णक्रमः स्मृत इति। अत्रापि ब्राह्म
णः सम्यक् संन्यसेदिति सम्यक् शब्दोपादानात् ब्रा-
ह्मणस्य वहिरंगभूतदंडधारणोपेत एव संन्यासो न तु
तद्रहित इति गम्यते। तथाच क्षत्रियवैश्ययोस्तद्रहि
तस्याश्रमो भवतीत्यर्थादुक्तं भवति। अन्यथा खंडोग
सूत्रकारादिवचनविरोधापत्तेः। अयं च तात्पर्यार्थः।

अबाधेनोपपत्तौ बाधोनन्याय्य इति न्यायेन श्रुतिस्मृ
तिवाक्यविरोधपरिहाराय विधिवाक्यानामाश्रमस्वरू
पविधौतात्पर्यं निषेधकवाक्यानां तु दंडग्रहणमात्र
निषेधेतात्पर्यं। तस्मात्क्षत्रियवैश्ययोर्दंडग्रहणमात्र
निषेधो नत्वाश्रमनिषेध इति। एवं प्राप्तेभिधीयते। श्रुति
स्मृतिविरोधे तु श्रुतिरेव बलीयसी। अतः श्रुत्यनुसारेणा
व्यवस्थात्र विधीयते। ब्राह्मणः प्रव्रजेतीति। अत्र ब्राह्म
णशब्दस्य ब्राह्मणत्वं जातिर्वाच्योर्थः ब्राह्मणोद्देशे
न च प्रव्रज्या विधीयते उद्देश्यविशेषणमेवाविवक्षितं
हविरुभयत्ववत्। ननूद्देश्यमविवक्षितं तस्मादिह ब्रा
ह्मणोद्देशेन संन्यासविधानादुद्देश्यस्य ब्राह्मणत्वस्य
हविर्वद्विवक्षितत्वात् तस्यैव प्रव्रज्याधिकारो नान्यस्य
ननु यदि भवेत् ब्राह्मणशब्दस्य ब्राह्मणत्वं जातिर्वा-
च्योर्थः तर्हि तस्योद्देशत्वेन विवक्षितत्वात् क्षत्रियवैश्य
योः प्रव्रज्यायां मानाभावादनधिकारः न च तथा ब्राह्मण
त्वजातिरर्थः। अपितु ब्रह्म वेदः तन्निष्ठास्तदध्ययन
वंतो ब्राह्मणा इति वेदाध्ययनवत्त्वमेकोनुगतो धर्मः
स च ब्राह्मणशब्दस्यार्थः। तथा च वेदाध्ययनवत्त्वरू
पेणैकेनोपाधिना ब्राह्मणक्षत्रियवैश्यास्त्रयोपिक्रो
डीकृता भवेयुः। एवं च ब्राह्मणोद्देशेन प्रव्रज्याविधा-
नात्त्रयाणामपि वर्णानां तत्राधिकारोस्तीति चेत् मैवं।

यथा क्षत्रियशब्दस्य क्षत्रियत्वं वैश्यशब्दस्य वैश्य
त्वं गोशब्दस्य च गोत्वमर्थस्तथा ब्राह्मणशब्दस्या-
पि ब्राह्मणत्वमेवार्थ इति शेषः जैमिनि वादरायणादि
भिरंगीकृतं तथा हन्येत । अथोक्तव्याघातभयाद्ब्राह्म-
णशब्दस्य ब्राह्मणत्वं वेदाध्ययनवत्त्वं चोभयमपि
वाच्यत्वेन परिकल्प्येत ततः न्यायश्चानेकार्थत्वमि-
ति तान्त्रिकैरनेकार्थत्वमेकशब्दस्य निषिद्धं । तेन न्याये
न सह विरोधः प्रसज्येत । अथैवं ब्रूषे । अन्यायश्चानेका
र्थत्वमिति न्याये जाग्रत्यपि गवादिशब्दानां यथानेका
र्थत्वं एवं ब्राह्मणशब्दस्याप्यनेकार्थत्वमस्त्विति ॥
नचैतदुचितं । अगतिका हीयं गतिर्यदनेकशक्तिकल्प
नयाप्यनेकार्थत्वमंगीकुर्वतेन ब्राह्मणशब्दस्य । अ-
त एवाभिधानकारैरपि गवादिशब्दानामनेकशक्तिक
ल्पनयाप्यनेकार्थत्वमंगीकुर्वतेन ब्राह्मणशब्दस्य ।
अत एवाभिधानकारैरपि गवादिशब्दा अनेकार्थव-
र्गेपि परिगणिताः । तेषामपि व्यवहारः शब्दश्लेषादि
ष्वेव न शास्त्रार्थनिर्णये । शास्त्रार्थपरिज्ञाने तु प्रसिद्धा
र्थस्यैव ग्रहणं नेतरस्य । इतरस्यापि ग्रहणे गोपशुविधा
यकवाक्येपि सास्नाद्युपेतगोपिंडव्यतिरिक्तस्यापि ग्रह
णं स्यात्तन्न गृह्यते । तस्माच्छास्त्रार्थनिर्णयेषु प्रसि
द्धार्थस्यैव ग्रहणं युक्तं विपरीतार्थपोनकवाक्यशेषाद्य

भावे। अतोनेकशक्तिकल्पनादोषभयात् ब्राह्मणशब्दस्य
ब्राह्मणत्वजातिरेवार्थः। ननु च जायमानो वै ब्राह्मणस्त्रिभि
र्ऋणवा जायत इत्यत्र ब्राह्मणशब्दो यथा वर्णत्रयपर ए
वमत्राप्यस्त्विति चेत्। मैवं। दृष्टांतदार्ष्टांतिकयोर्वैषम्या
त्। तथा हि। ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया
पितृभ्य इति वाक्यशेषे ब्रह्मचर्यादिभिः ऋण्यादिऋणत्रया
पाकरणप्रतीतेर्ब्रह्मचर्यादिषु चैवर्णिकस्याधिकारात् फल
चमसवन्मुखत्वान्नरेण जायमानो वै ब्राह्मण इत्यत्रापि त्रैव-
र्णिकानुभवेप्यायुज्यते न त्रैवर्णिकपरत्वं। प्रकृते तु वाक्यशे
षाद्यभावान्न त्रैवर्णिकपरत्वं। किं च। पाठनाकाले नावय
वव्युत्पत्त्या लक्षणया वा क्षत्रियवैश्ययोर्ब्राह्मणशब्दे
न ग्रहणाय्यं। ततः पूर्वमेव लब्धात्मिकाया रूढेः प्राबल्याद्वि
धेश्च विनार्थत्वान्न चरमप्रतीतयौगिकार्थस्वीकरणमुचि
तं। ततश्चौदुंबरीं स्पृष्ट्वोद्गायेदिति श्रुत्या विरुद्धमौदुंबरीस
र्वा वेष्टयितव्येति स्मृतिवचनं यथा विरोधाधिकरणे अप्र-
माणमित्युक्तं॥ एवं ब्राह्मणाः प्रव्रजंतीति जाबालश्रुति
विरुद्धं त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमा इ-
त्यादिकं स्मार्त्तं वचनजातमप्रमाणमेव। यद्वा श्रुतिवि-
रुद्धस्यापि स्मार्त्तवचननिचयस्य सर्वथाऽप्रामाण्यप-
रिजिहीर्षया श्रुत्यनुकूल एवार्थः परिकल्पनीयः। तत्त्र
याणां वर्णानां वेदमधीत्य चत्वार आश्रमा इतिच्छंदो

णसूत्रस्यायमर्थः। त्रयाणां वर्णानां यथोचितं चत्वार
आश्रमा इति। आचित्यं च श्रुत्यविरोधाय ब्राह्मण
स्यैव तुर्याश्रमाधिकारविधौ नान्यथा। त्रैवर्णिकानां
संन्यासो विद्यते नात्र संशयः। शिखायज्ञोपवीतानां
त्यागपूर्वकं दण्डग्रहणमिति ब्रह्माण्डपुराणवचनमपि ठं
दोरसूत्रेण समानार्थं। यच्च ब्रह्मवैवर्तवचनं। वैराग्यो
त्पत्तिमात्रेणैव संन्यासे परियुज्यते। रागवांस्तु विप्रोपि
वेदवेदाङ्गविन्न इति। वेदवेदाङ्गविन्नोपि विप्रो राग
वांश्चेत्संन्यासेन परियुज्यत इत्यन्वयः। एवं च विप्रस्य
विरक्तस्यैवाधिकारः अभिहितो भवेत्। न क्षत्रियादेः।
यच्च स्मृत्यन्तरं। कृत्वाश्रयमपाकृत्य निर्ममो निरहंकृ-
तिः। ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रव्रजेद् गृहादिति
अस्यायमभिप्रायः। गृहात्प्रव्रजेत्तत्वानप्रस्थाश्रमं ग-
च्छेत। प्रव्रज्याशब्दो यद्यपि संन्यासे रूढस्तथापि श्रुति
विरोधपरिहारार्थमत्र तृतीयाश्रमपरः अस्यापि वैराग्य
हेतुकत्वात्। यद्वा यदा ब्राह्मणः स्ववृत्त्या न जीवेत्।
क्षत्रियवृत्तिमाश्रितः। तत्राप्यजीवन् वैश्यवृत्तिं तत
अतामापदं निस्तीर्योपि न वर्णान्तरवृत्तिं परित्यजति।
किं तु तत्रैव वृत्तावावस्थितः। न दा तत्तत्क्षत्रियादिवृत्ति
जीवनः स एव ब्राह्मणः क्षत्रिय इति वैश्य इति च व्य
पदिश्यते शास्त्रानभ्यनुज्ञातकालेपि क्षत्रादिवृत्ति

निरतत्वात्। तस्यापि व्रजेद्गृहादिति प्रव्रज्याधिकारं द
र्शयति। अत एव ब्राह्मणाः क्षत्रियो वाथ वैश्यो वा प्रव्र-
जेद्गृहादित्यत्र शब्दरूपात् ब्राह्मणस्यैवाधिकारं नेत-
रं क्षत्रियवैश्ययोर्ग्रहणं क्षत्रियः सवैश्य इत्यानंत-
र्यप्रतिपादनाद्यमर्थो गम्यत इत्यर्थः। एतेन ब्राह्म-
णाः क्षत्रियो वैश्यस्ततो गच्छेद्ध्रुवं गृही। संन्यसेद्वा यथा
शांत इत्येतदपि व्याख्यातं। एवं च मनुदत्तात्रेयादिव
चनान्यप्यनुकूलानि भवेयुः। तस्माच्छ्रुतिविरोधपरि
हारायोक्तरीत्यान्यान्यपि विरुद्धवचनानि नेयानि।
यच्च जडभरतं प्रत्युपदेशः पैंगिरहस्ये। यदि मृत्योः प-
रं शांतमनामयं शाश्वतं पदमिच्छसि तत्परमहंसो
भवाहेति। अत्रेदं चिंत्यं। किं जडभरतं प्रत्येवोपदेश
उत तल्लक्षणया क्षत्रियमात्रं प्रति। आद्ये जडभरतस्यै
वेति नेतरक्षत्रियप्राप्तिः। किञ्च। जडभरतोपि प्रैषोच्चा
रणपूर्वकमाश्रमं गृहीतवानिति न क्वापि श्रूयते। अ-
तो ब्राह्मणः प्रव्रजेदित्येतदनुरोधात् परमहंसो भवेत्य-
स्यायमर्थः। परमहंसः निर्ममो भवेति। नापि द्वितीयः।
तत्र हि लक्षणा। सा च न युक्ता। न विधौ लक्षणेति भ
ट्टगुरुप्रभृतिभिर्विधौ लक्षणानिषेधात्। विधिरिति
तदन्वादी प्रष्टव्यः। किं विधित्सुर्विधिः। उत प्राप्ते कर्मण्य
धिकारिकविधिरिति। पक्षद्वयेपि लक्षणासन्निर्दुर्वा

रा। ननूद्देश्येलक्षणानविध्यंशो ऽतोनदोषइति चेत्। तर्हिलक्षणोद्देशोपिनयुक्तेति ब्रूमः। तथाहि। संबंधानुपपत्तिर्ह्यांहिलक्षणा। नचानुपपत्तिः। पूर्वोक्तरीत्यावाक्यस्यार्थांतरपरत्वेनाप्युपपत्तेः। यावज्जाबालश्रुतिर्जनकयाज्ञवल्क्यसंवादे तत्र परमहंसानामसंवर्तकारुणिश्वेतकेतुदुर्वासोऋभुनिदाघजडभरतदत्तात्रेयरैवतकप्रभृतयः इति। अत्रापि विधायकप्रत्ययाभावात्परमहंससदृशधर्मवंतइति अहंकारममतयोरभावात्परमहंसाइति व्यपदिश्यंते तस्मात्सिद्धंब्राह्मणस्यैवाधिकारइति॥ अथयतिधर्माः॥ तत्रयाज्ञवल्क्यः॥ सर्वभूतहितःशांतस्त्रिदंडीसकमंडलुः। एकारामःपरिव्रज्यभिक्षार्थीग्राममाश्रयेत। त्रिदंडीत्यनेनैकदंडोपिगृह्यते। अनेनैवाभिप्रायेणमनुः। वाग्दंडोथमनोदंडःकर्मदंडस्तथैवच। यस्यैतेनियतादंडाः सत्रिदंडीति कथ्यते। बौधायनः। एकदंडीत्रिदंडीवेति। चतुर्विंशतिमते। एकदंडीत्रिदंडीवासर्वसंगविवर्जितः। तेचदंडावैणवाः। तथाचस्मर्यते। प्राजापत्येष्ट्यनंतरंवैणवान्दंडान्मूर्द्धप्रमाणान्दक्षिणेनपाणिनाधारयेत्सव्येनसोदकंकमंडलुमिति। वसिष्ठः। मुंडोऽममोपरिग्रहइति। मस्करिवान्केशान्निकृत्यवि-

सृज्य यज्ञोपवीतमिति काठकश्रुतिः। तथा परिशि
ष्टेपि। अथ यज्ञोपवीतमप्सु जुहोति भूः स्वाहेत्य-
थ दंडमादत्ते सखे मा गोपायेति। देवलः। काषा
यी मुंडस्त्रिदंडी कमंडलुपवित्रपादुकासनकंथा
मात्र इति। कण्वः। एकरात्रं वसेद्ग्रामे नगरे पंचरात्र
कं। वर्षाभ्योन्यत्र वर्षासु मासांस्तु चतुरो वसेत्॥ म
त्स्यपुराणे। अष्टौ मासान्विहारः स्यात् यतीनां
संयतात्मनां। एकत्र चतुरो मासान्वार्षिकान्निवसे
त्पुनः। अविमुक्ते प्रविष्टानां विहारस्तु न विद्यते। न दे
हो भविता तत्र दृष्टं शास्त्रे पुरातन इति। मनुः। वि
धूमे सन्नमुसले व्यंगारे भुक्तवर्ज्जने। वृत्ते शरावसं-
पाते नित्यं भिक्षां यतिश्चरेत्। तथा। एककालं चरेद्भि
क्षां प्रसज्जेन्न तु विस्तरे। भैक्षप्रसक्तो हि यतिर्विषये
ष्वपि सज्जति। अत्राशक्तं प्रति वसिष्ठः। ब्राह्मण
कुले वा यल्लभेत तद्भुंजीत सायं प्रातर्मधुमांसवर्ज्य
मिति। तथा। सप्तागाराण्यसंकल्पितानि चरेत्।
संवर्त्तः। अभिक्षाः समादाय स मुनिः पंच सप्त वा।
अद्भिः प्रक्षाल्य ताः सर्वास्ततोश्नीयाच्च वाग्यतः।
मनुः। यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः।
आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान्। अत्रैव
यः प्रणवः। अत एव स्मृत्यंतरं। एकाक्षरं परं ब्रह्म।

प्राणायामः परं तपः। उपवासात्परं भैक्षं दयादाना
द्विशिष्यत इति। तथा। नाभिनंदेत मरणं नाभिनंदे
त जीवितं। कालमेव प्रतीक्षेत निर्देशं भृतको यथा
अभिवादांस्तितिक्षेत नावमन्येत कंचन। न चेमं दे
हमाश्रित्य वैरं कुर्वीत केनचित्। याज्ञवल्क्यः।
यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च। सलि
लं शुद्धिरेतेषां गोवालैश्चावघर्षणं। इयं च शुद्धि
र्भिक्षाचरणादिप्रयोगांगभूतानुपरमेध्याद्युपहति
विषयाऽमेध्याद्युपहतौ तु द्रव्यशुद्धिप्रकरणेव
क्ष्यमाणमनुसंधेयं। एतच्चैतदुक्तं भवति। य-
दा भिक्षाचरणादिकं कर्म करिष्यमाणस्तदा तत्त
त्कर्मोपयुक्तमृदादिपात्राणि गोवालैश्चावघृष्य
प्रक्षाल्य तत्तत्कर्म कुर्यादिति। मनुरपि। अतै-
जसानि पात्राणि तस्य स्युर्निर्व्रणानि च। तेषाम-
द्भिः स्मृतं शौचं चमसानामिवाध्वरे। भोजनम
पि पात्रांतराभावे तत्रैव कार्यं। तथा च देवलः।
तद्वै संगृहीत्वैकांते तेन पात्रेणान्येन वा तूष्णीं भुंजी
तेति। एवं कुर्वतः फलमाह। याज्ञवल्क्यः। सन्नि
रुद्धेन्द्रियग्रामं रागद्वेषौ प्रहाय च। भयं हत्वा च भू
तानाममृतीभवति द्विज इति। इह मदनपारिजाते म-
दन क्षितिपालदानजलरुहे। स्तवकश्चतुर्थोऽगा-

सौदामोदाकृष्टपरिदृतभ्रमरः । मतिर्येषां शास्त्रे प्रकृतिरमणीया व्यवहृतिः परा शीलं म्लाघ्यं जगति ऋजवस्ते कति पये। चिरं चिन्ने तेषां मुकुरतलभूते स्थितिमियादिर्यव्या सारराय प्रवरमुनिशिष्यस्य भणितिः ॥ इति पंडितपारिजातकेदारमल्लेत्यादिविरुदराजी विराजमानस्य श्रीमदनपालस्य निबंधे मदनपारिजाताभिधेये चतुर्थस्तवकः ॥४॥

उक्ता वर्णाश्रमधर्माः ॥ अधुना तद्धर्म्मसंकोचनिमित्ताशौचकालो निरूप्यते । तत्र च प्रथमं गर्भस्रवादिकालः ॥ मासचतुर्याभ्यंतरे स्रावः । पंचमषष्ठयोश्च पातः । सप्तमादिषु प्रसवः । तथा च स्मृत्यंतरं । आचतुर्थाद्भवेत्स्रावः पातः पंचमषष्ठयोः अत ऊर्द्धं प्रसूतिः स्याद्दशाहं सूतकं भवेदिति । तत्र मासत्रयादर्वाक् स्रावे त्रिरात्रमाशौचं । संस्रवे गर्भस्य त्र्यहं वेति गौतमस्मरणात् । मरीचिरपि । गर्भस्रावे यथामासमचिरे तूत्तमे त्रयः । राजन्ये तु चतूरात्रं वैश्ये पंचाहमेव तु । अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्त्तिता इति । अचिरमासत्रयाभ्यंतरगर्भस्रावे । उत्तमे ब्राह्मणे । अत्र राजन्ये तु चतूरात्रमित्याद्यविवक्षितार्थं । स्रावे मातुस्त्रिरात्रं स्यात्सपिंडाशौचवर्जनं । पाते मातुर्यथामासं पित्रादीनां दिनत्रयमिति तेनैवाभिधा-

नात्। यस्त्वचिरस्रावे राजन्यादिषु चतूरात्रादिः तर्हि पाते
मातुर्यथामासमित्ययुक्तं स्यात्। वैश्यशूद्रयोरचिरस्रा
वे पंचाहाष्टाहौ पंचममासपाते तु पंचाहमेवेति विप्रति
षिद्धं। ननु पाते मातुर्यथामासमिति द्वितीयं मरीचिवचनं
ब्राह्मणव्यतिरिक्तविषयमस्तु एवं च क्षत्रियादिष्वधिका-
शौचं परिकल्प्यते। ततश्च न मरीचिवचनयोः परस्परवि
रोधः अत एव ऋष्यशृंगोपि। अत्र त्रिरात्रं विप्राणामाशौ
चं संप्रदृश्यते। तत्र शूद्रे द्वादशाहं षड्रात्रं क्षत्रवैश्ययो
रिति कल्पनाप्रकारमुपदिशति। नैतत्समंजसं। मरीचि
वचनयोरेव विरोधांतरस्य दुष्परिहरत्वात्। तथाहि। ग-
र्भस्रावे यथामासमचिरं तूत्तमे त्रय इति। स्रावे मातुस्त्रिरा
त्रं स्यादिति च वाक्यद्वयं। तत्र स्रावे मातुरित्येतस्य विरोधपरि-
हाराय अचिरे तूत्तमे त्रय इत्येतद्विषय एवोपसंहरणीयं
तथा च चतुर्थे मासि स्रावे त्रिरात्रापेक्षयाधिकं। सार्द्धं त्रि-
रात्रमाशौचं कल्पनीयं। अचिरस्रावत्वाभावात्। पाते मा-
तुर्यथामासमिति पंचमषष्ठयोर्यथामासाशौचाभिधा-
नात्। ततश्च गर्भस्रावे यथामासमिति चतुर्थमासेपि दिनचतु
ष्टयाशौचाविधानं विरुध्येत। अथात्र स्रावशब्दः पातपरः
तर्हि पाते मातुरित्यनेन पौनरुक्त्यं स्यात्। अतः स्ववचन
विरोधपरिहाराय रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशु
ध्यतीत्यादिवचनानुसारेण राजन्ये तु चतूरात्रमित्यादि

वचनविशेषस्याविवक्षितार्थत्वमनिच्छतापि मरीचिनांगीकर्त्तव्यं। अतश्च सर्ववर्णसाधारणमेव मासत्रयादर्वाक् गर्भस्रावे त्रिरात्राशौचं। अथवा आपदि न्यूनकल्पानुसरणमनापदि चतूरात्रादिकमिति व्यवस्था विज्ञेया। स्रावे तु सपिंडानामाशौचं नास्ति पितुस्तु स्नानमेव। सपिंडाशौचवर्जनमिति मरीचिस्मरणात्। स्नानमात्रमेव पुरुषस्येति वृद्धवसिष्ठस्मरणाच्च। चतुर्थमासप्रभृति सप्तमपर्य्यंतं यावंतो गर्भधारणमासास्तावंति दिनानि शुद्धिहेतुः। तथा च याज्ञवल्क्यः। गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणं। अत्र स्रवतिर्द्रवद्रवसाधारणे पतने वर्त्तते। अत्र च यातरूपे पंचमषष्ठमासस्रावे पित्रादीनां दिनत्रयमाशौचं। पाते मातुर्यथामासं पित्रादीनां दिनत्रयमिति मरीचिस्मरणात्। यदुक्तं यमेन। अजातंते तनये मृते गर्भच्युते तथा। सपिंडानां तु सर्वेषामेकरात्रमशौचकमिति। एतच्च गर्भपात एकाहविधानं गुणवत्पित्रादिविषयं। यत्तूक्तमादिपुराणे॥ सद्यःशौचं सपिंडानां गर्भस्य पतने सतीति तत्तु द्रवरूपगर्भस्य मासचतुष्टयाभ्यंतरपतने। एवमन्यान्यपि वचनान्यनुसंधेयानि॥ इति गर्भस्रावाशौचं॥ अथ जननाशौचं॥ सप्तममासप्रभृति प्रसवरूपत्वात्पूर्णाशौचमेव भवति। तत्र मृतजाते जातमृते वा सपिंडा

नां जन्मनिमित्तं संपूर्णं शौचमस्त्येव। यथाह हारीतः। जातमृते मृतजाते वा सपिंडानां दशाहमशौचमिति। दशाहमिति तत्तदहर्गणशौचोपलक्षणं। यत्तु जाते मृते जातकुलस्य सद्यः शौचमिति बृहद्विष्णुवचनं तत्तु शिशुमरणनिमित्ताशौचाभावप्रतिपादनपरं न प्रसवहेतुकस्य। मरणनिमित्ताशौचमपि स्नानादपैति सपिंडानां न स्वरूपतो भावः। सद्यः शौचमिति स्नातस्य शुद्ध्यभिधानात्। नाभिच्छेदात्प्राङ्मरणे मातुः संपूर्णं सूतकं। पित्रादीनां तु जन्मनिमित्ताशौचं त्रिरात्रं। तथा च बृहन्मनुः। जीवन्जातो यदि ततो मृतः सूतक एव तु। सूतकं सकलं मातुः पित्रादीनां त्रिरात्रकं। ततः तदनंतरमेव नाभिवर्द्धनादर्वागित्यर्थः। अत्राप्यग्निहोत्रार्थं सद्यः शौचमस्त्येव अग्निहोत्रार्थं स्नानोपस्पर्शनात्सद्यः शौचमिति शंखस्मरणात्। नाभिवर्द्धनोत्तरकालं शिशूपरमे पित्रादीनां जननाशौचं संपूर्णमेव। तथा च जैमिनिः। यावन्न छिद्यते नालं तावन्नाप्नोति सूतकं। छिन्ने नाले ततः पश्चात्सूतकं तु विधीयत इति। जनननिमित्तमस्पृश्यत्वं मातुर्दशाहादिकं पितुस्तु सचैलस्नानादस्पृश्यत्वमपगच्छति। तथा च संवर्त्तः। जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते। माता शुद्ध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः। अत्र पुत्र इत्यपत्यपरं। अतः स्त्र्यपत्येपि समुत्पन्ने पितुः स्नानं भवति। यथा गर्भाधानप्रकायां मरतुकालगमने स्नानमेवं जमनेपि समानम्। पितुर

षिस्त्रा नाहश्यत्वनिवृत्त्याभिधानात्सपिंडानामस्पृश्यत्वं नास्त्येव अतो न तेषां स्नानमपि। तथाचांगिराः। सूतके सूतिकावर्ज्जं संस्पर्शो न निषिध्यत इति। अहश्चार्थकार्येषु पैठीनसिर्विशेषमाह सूतिकां पुत्रवतीं विंशतिरात्रेण कर्माणि कारयेन्मासेन स्त्री जननीमिति। प्रथमषष्ठदशमदिवसेषु दानप्रतिग्रहाधिकारमाह व्यासः सूतिकावासनिलया जन्मदानाम देवताः। तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्त्तिता। प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा। त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनि। वृद्धयाज्ञवल्क्योपि। तत्र सर्वं प्रतिग्राह्यं कृतान्नं तु न भक्षयेत्। भक्षयित्वा तु तन्मोहाद्द्विजश्चांद्रायणं चरेत्। मार्कण्डेयः। रक्षणीया तथा षष्ठी निशा तत्र विशेषतः रात्रौ जागरणं कार्यं जन्मदानां तथा बलिः। पुरुषाः शस्त्रहस्ताश्च नृत्यगीतैश्च योषितः। रात्रौ जागरणं कुर्युर्दशम्यां चैव सूतकं इति॥ इति जननाशौचं॥ अपत्यानुपनीताशौचं। तत्र नामकरणात्प्राक् सद्यः शौचमेव। यदाह शंखः। प्राङ्नामकरणात्सद्यः शुद्धिरिति नामकरणानंतरमप्युदकदानं वैकल्पिकं। तथाच मनुः। नात्रिवर्षस्य कर्त्तव्या बांधवैरुदकक्रिया। जातदंतस्य वा कुर्युर्नाम्नि वापि कृते सति॥ उदकक्षियेति तत्साहचर्यादग्निदानमपि लक्षयति॥

ततश्च नामकरणादूर्ध्वं दंतजननादर्वागग्निसंस्कारेकृ-
तेप्यकृतेपि मातापित्रोस्त्रिरात्रं। बालानामदंतजातानां
त्रिरात्रेण शुद्धिरिति कश्यपस्मरणात्। तथा वैजिकाद-
भिसंबंधादनुरुंध्यादघं त्र्यहमित्यत्र वैजिकादिति विशेषो
पादानाच्च। एवमुपनयनपर्यंतं मातापित्रोस्त्रिरात्रमे-
व। इतरेषां सपिंडानामग्निसंस्कारेकृते एवैकमाशौचं।
अदंतजाते तनये शिशौ गर्भच्युते तथा। सपिंडानां तु
सर्वेषामेकरात्रमशौचकमिति यमस्मरणात्। स च सं-
स्कारस्तूष्णीमेव। तूष्णीमेवोदकं कुर्यात्तूष्णीं संस्कारमे
व चेति लौगाक्षिस्मरणात्। जानाति चेद्भवति तदा
तन्मथिताग्निना। तदभावे तु निषिद्धलौकिकाग्निना
दाहः। अग्निसंस्काराभावे सद्यः शौचं। आदंतजन्मनः
सद्य इति याज्ञवल्क्यस्मरणात्। अग्निसंस्काररहि
तस्योनद्विवर्षस्य निखननमेव। तथा च याज्ञव-
ल्क्यः। ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः। आ
श्मशानादनुव्रज्य इतरो ज्ञातिभिर्मृतः। इतरः पूर्ण
द्विवर्षः। अत्र विशेषमाह। ऊनद्विवार्षिकं प्रेतं निद
ध्युर्बांधवा बहिः। अलंकृत्य शुचौ भूमावस्थिसंच
यनादृत इति। बहिर्ग्रामाद्बहिः। अस्थिसंचयनादृ
ते। अस्थिसंचयनरहितायां भुवीत्यर्थः। अन्ये त्वेवं
वर्णयंति अस्य शिशोरस्थिसंचयनं कार्यमिति।

एतदनुपपन्नं। अस्थिसंचयनशास्त्रैरेवात्। उपपादि-
तं चैतत्प्रपंचेनास्माभिर्मिताक्षराटीकायां सुबोधिन्यां
[illegible]मैः। ऊनद्विवार्षिकं प्रेतं घृताक्तं निखनेद्भुवि। यमगा-
थां गायमानो यमसूक्तमनुस्मरन्निति। जातदंतस्य प्रथ-
मवर्षेऽकृतचूडस्य वर्षत्रयाभ्यंतरे मृतस्याग्निसंस्का-
रस्य चूडाकरणानंतरं नियतत्वात्त्रिरात्रमेव। अत एव
वशिष्ठः। ऊनद्विवर्षे प्रेते गर्भपतने वा सपिंडानां त्रि-
रात्रमेवेति। वर्षत्रयादूर्ध्वं चूडाभावेपि अग्निसंस्कारो
नियतस्तथा त्र्यहमाशौचं। नात्रिवर्षस्य कर्तव्या बांध-
वैरुदकक्रिया इति मनुनात्रिवर्षन्यूनस्य संस्कारनिषेधेन
त्रिवर्षस्याभ्यनुज्ञानात्। अंगिरसा च न्यूनत्रिवर्षरूप-
कालापेक्षयानैशिकमभिधानादत ऊर्ध्वं त्र्यहाभिधा-
नाच्च। विप्रे न्यूनत्रिवर्षे तु मृते शुद्धिस्तु नैशिकीति। य-
द्यप्यकृतचूडो वै जातदंतस्तु संस्थितः। दाहयित्वा तथा-
प्येनमाशौचं त्र्यहमाचरेत् इति च। स्त्रीणाममकृतचूडा-
नां मृतौ सद्यःशौचं। अकृतचूडायां तु कन्यायां सद्यःशौ-
चमित्यापस्तंबस्मरणात्। कृतचूडानामपि वाग्दाना-
दर्वाक् मृतावेकाहः। यदाह याज्ञवल्क्यः। अहस्त्व-
दत्तकन्यासु बालेषु च विशोधनमिति। अदत्ता वाग्दा-
नरहिता। कन्यकानां सापिंड्यं पुरुषत्रयपर्यंतमेव। तथा
च वशिष्ठः। अप्रत्तानां तु स्त्रीणां त्रिपुरुषी विज्ञायत इति

त्रिपुरुषानंतरं समानोदकाशौचं कल्प्यं। एतच्चाशौचविषयमेव। विवाहे त्वन्यथा। तथैव पूर्वं प्रतिपादितत्वात्। वाग्दानादूर्द्ध्वं विवाहसंस्कारात्प्राक् पतिकुले पितृकुले च त्रिरात्रं। यदाह मरीचिः। वारिपूर्वं प्रदत्ता तु या नैव प्रतिपादिता। असंस्कृता तु सा ज्ञेया त्रिरात्रमुभयोः स्मृतमिति। या तु प्रतिपादिता वाग्दत्ता वारिपूर्वं नैव प्रतिपादितेत्यन्वयः। उभयोः प्रतिपितृपक्षयोः। विवाहानंतरं तु विष्णुः संस्कृतासु स्त्रीषु नाशौचं पितृपक्षे तत्प्रसवमरणे चेत्पितृगृहे स्यातां तदैकरात्रं त्रिरात्रं चेति। प्रसवे एकरात्रं मरणे त्रिरात्रमिति विवेकः। एतच्च वयोविशेषकृतमशौचं सर्ववर्णसाधारणं। तथा चांगिराः॥

अविशेषेण वर्णानामर्वाक् संस्कारकर्मणः। त्रिरात्रं तु भवेच्छुद्धिः कन्यास्वह्ना विधीयत इति। ऋष्यशृंगोऽपि। अविशेषेण सर्वेषां वर्णानामनुपूर्वशः। त्रिरात्रात्तु भवेच्छुद्धिरिति। व्याघ्रपादोऽपि। तुल्यं वयसि सर्वेषामिति। यत्त्वंगिरसाभिहितं विप्रे न्यूने त्रिभिर्वर्षैर्मृते शुद्धिस्तु नैशिकी। द्व्यहेन क्षत्रिये शुद्धिस्त्रिभिर्वैश्ये मृते तथा। तथान्यदपि तेनैवाभिहितं निर्वृत्तचूडके विप्रे त्रिरात्राच्छुद्धिरिष्यते। निवृत्ते क्षत्रिये षड्भिर्वैश्ये नवभिरुच्यते। शूद्रे त्रिवर्षन्यूने तु मृते शुद्धिस्तु पंचभिः। अत ऊर्द्ध्वं मृते शूद्रे द्वादशाहो विधीयते। षड्वर्षांतमतीतो यः [illegible]

सम्रियते यदि। मासिकं तु भवेच्छौचमित्यांगिरसभाषितामति। षड्वर्षांतमतीतो य इत्यनेन च हारीतवचनं विरुध्यते। वचनं तु। आमौंजिबंधनाद्विप्रः क्षत्रियश्च धनुर्ग्रहात्। आप्रतोदग्रहाद्वैश्यः शूद्रो वस्त्रहयग्रहादिति। मौंजीबंधनाद्यनंतरं मृतः पूर्णाशौचनिमित्तं भवतीत्यर्थः। शूद्रा वस्त्र हयग्रहणयोग्यो द्वादशादिवर्षदेशीय एवन षड्वर्षदेशीय इति शूद्रस्य षड्वर्षानंतरं मासिकाशौचाभिधानमांगिरसं हारीतेन विरुध्यते। तस्मादहूनामनुग्रहो न्याय्य इति मत्वा यनेकस्मृतिपर्यालोचनया विश्वरूपधारेश्वरमेधातिथिविज्ञानेश्वरप्रभृतिभिराचार्यैर्वयोवस्थाशौचं सर्ववर्णसाधारणमेवेति व्याख्यातं। अथवांगिरसऋष्यशृंगवचनान्यधिकाशौचप्रतिपादकान्यनापद्विषयतया व्यवस्थापनीयानि ॥ अथ जननमरणाशौचे वर्णनियमेन कालनियमः ॥ तत्र मनुः॥ दशाहं शावमाशौचं सपिंडेषु विधीयते। जनने प्येवमेव स्यान्निपुणां शुद्धिमिच्छतामिति। महागुरोस्त्वाश्वलायनोक्तो विशेषः। द्वादशरात्रं वा महागुरुष्वेतच्च विप्रविषयं। क्षत्रियादिविषये तु याज्ञवल्क्यः दानाध्ययने वर्जयेरन्निति ॥ पुत्रानुत्पाद्य संस्कृत्य वेदार्थं ग्राहयित्वा वृत्तिं च यो

विदधाति स महागुरुः। एतच्च विप्रविषयं। क्षत्रिया-
दिविषये तु याज्ञवल्क्यः। क्षत्रस्य द्वादशाहानि वि-
शः पंचदशैव तु। त्रिंशद्दिनानि शूद्रस्य तदर्द्धं न्यायव-
र्त्तिन इति। पाकयज्ञद्विजशुश्रूषादितः शूद्रो न्याय-
वर्त्तीतस्य तदर्द्धं मासार्द्धं पराशरांगिरःशातातपव-
शिष्ठैः क्षत्रियस्य दशाहेन एकादशाहेन पंचदशरा-
त्रेण वा वैश्यस्य द्वादशाहेन विंशतिरात्रेण च शूद्रस्य
विंशतिरात्रेण सर्वेषां च वर्णानां दशाहेन च सूतके
मृतके शुद्धिरित्यभिहितं तल्लोकसमाचाराभावाद-
नादरणीयमिति केचनमन्यंते। अथवा देशाचारतो
व्यवस्था विज्ञेया। उत गुणवदगुणवद्विषये यथाक्र-
मं न्यूनाधिककर्त्तांश्रयणेन नियमस्तूल्यत्वादिप्रभ-
त्येव। विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशं। यच्छे-
षं दशरात्रस्य तावदेवाशुचिर्भवेदिति मनुस्मरणात्
अत्र शृणुयादित्युपादानात् श्रवणमेव निमित्तमिति
गम्यते। यच्छेषं दशरात्रस्येत्यनेन चोत्पत्त्यादि प्रभृ-
त्येव कालनियमोवगम्यते। तथा निर्दशं ज्ञातिमर-
णं श्रुत्वा पुत्रस्य जन्म चेत्यत्रापि श्रवणस्यैवोपादा-
नात्। नृपादिहतानां शास्त्राविहितमार्गेणात्मघा-
तिनां पाखंड्यादिप्रेतानां च संबंधिनो ये सपिंडास्ते-
षां सद्यः शौचं। तथा च याज्ञवल्क्यः हतानां नृपगो-

विप्रैस्त्वक्षं चात्मघातिनां। अन्वक्षं सद्यः शौचमित्य-
र्थः। नृपेण प्रमादहते दशाहादिकमेव। क्रोधादयु-
द्धहते सद्यः शौचं युद्धक्षतेन कालांतरहतस्यैकाहः
। अत्र च गौतमः। गोब्राह्मणहतानामन्वक्षं राज-
क्रोधाच्चायुद्धइति। क्रोधग्रहणं प्रमादव्यापादित-
निरासार्थं। तथा। ब्राह्मणार्थे विपन्नाये योषितां गो-
ग्रहे पिवा। आहवेपि हतानां च एकरात्रमशौचकं।
क्षत्रधर्मेण संग्रामांगणमृतस्य सद्यः शौचं। तदाह
मनुः। उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च। सद्यः
संतिष्ठते यज्ञस्तथाशौचमिति स्थितिः। यज्ञः पिंड-
दानादिरूपः संतिष्ठते समाप्तो भवतीत्यर्थः। दक्षेण
दशपक्षाः सूतके मृतके चोपन्यस्ताः। सद्यः शौचं स-
थैकाहं त्र्यहं चतुरहस्तथा। षड्दशाहो द्वादशाहश्च प-
क्षो मासस्तथैव च। मरणांतं तथा चान्यद्दशपक्षा-
स्तु सूतके। सूतकशब्द आशौचोपलक्षणार्थः।
अत्र सद्यः शौचादि षडहपर्यंतपक्षा यायावरादीनां
यदिनाद्यन्न निर्वहति तादृशप्रतिगृह्याग्निहोत्रादिवि-
षयाः। तत्तच्छ्रौतस्मार्तविषयत्वेनापि वचनस्यच-
रितार्थत्वात्। दशाहादिकपक्षास्तु ब्राह्मणादिव-
र्णविषयाः। मरणांतिकविषयस्तु दक्षेणैव दर्शि-
तः स्नात्वा चाप्यहुत्वा च अदत्वाश्नंस्तथा द्विजः॥

एवंविधस्य विप्रस्य सर्वदा सूतकं भवेत्। व्याधितस्य
कदर्यस्य ऋणग्रस्तस्य सर्वदा। क्रियाहीनस्य मूर्खस्य
स्त्रीजितस्य विशेषतः। व्यसनाशक्तचित्तस्य पराधीन
स्य नित्यशः। श्राद्धत्यागविहीनस्य भस्मांतं सूतकं भ-
वेत्। श्राद्धत्यागः श्राद्धकरणं। एतच्च जननं मरणं रजो
दर्शनं वा यद्युदयोत्तरकाल एव निष्पन्नं तदा तद्दिनप्र-
भृत्येव दशाहादिकालनिर्णयः। यदा चाहनिग्रहरादि
केऽतिक्रांते च जन्यां वा जननादिकमर्द्धरात्रात्प्राग्भवति
तदाहर्दिनैकदेशव्यापित्वेप्याशौचस्य तद्दिनप्रभृत्ये
व गणनेत्येकः कल्पः। रात्रिं त्रेधा विभज्य प्रथमभाग
द्वये चेत्पूर्वदिनप्रभृत्येवेत्यपरः प्रागुदयात्पूर्वदिन
प्रभृत्येवेति तृतीयः। यदाह कश्यपः। उदिते तु यदा
सूर्ये नारीणां दृश्यते रजः। जननं वा विपत्तिर्वा यस्या
हस्तस्य शर्वरी। अर्द्धरात्रावधिः कालः सूतकादौ विधी
यते। रात्रिं कुर्यात्त्रिभागां तु द्वौ भागौ पूर्व एव तु। उत्तमां
शः प्रभाते न युज्यते मृतं सूतके। रात्रावेव समुत्पन्ने
मृते रजसि सूतके। पूर्वमेव दिनं ग्राह्यं यावन्नाभ्युदि-
तो रविरिति। अत्र देशाचारः प्रमाणं। अत्र जनने पूर्व
मेव कर्त्तव्यताभिहिता सांप्रतमिन्त्या विधीयते। तत्र
मनुः। न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण हारयेत्। अ-
स्वर्ग्या ह्याहुतिः सास्याच्छूद्रसंस्पर्शदूषिता। स्वेषु-

त्तिस्तत्त्वस्य विवक्षितार्थे ऽस्वर्ग्यत्वादिदोषकथनात्
तथा। दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत्। पश्चिमो
त्तरपूर्वैस्तु यथायोगं द्विजातयः। यथायोगमिति वैश्या
दिप्रतिलोमक्रमेण। अत एव स्वामिप्राय प्रकरणार्थप्र-
यत्नतः शूद्र एवोपात्तो वचने। हारीतः। न ग्रामाभिमुखं
प्रेतं निर्हरेयुः। याज्ञवल्क्यः। स दग्धव्य उपेतश्चेदाहि
ताग्न्यावृतार्थवत्। उपेतः उपनीतः। शूद्रस्तु वस्त्रद्वयग्र
हणयोग्यकालीना उपनीतसदृशाः। उपनीतस्य लौकि
काग्निना। अनाहिताग्नेः स्वगृह्याग्निना। आहिताग्ने-
स्त्वैतानाग्निभिरिति। लौकिकाग्निश्च चंडालाग्न्यादि
व्यतिरिक्तः। तथा च देवलः। चंडालाग्निरमेध्याग्निः
सूतिकाग्निश्च कर्हिचित्। पतिताग्निश्चिताग्निश्च न शिष्ट
ग्रहणोचितेनेति। स्वगृह्योक्तविधिनाऽसौ स्वर्गाय लो
काय स्वाहेति हुत्वा दग्धव्यः। प्रचेताः। स्नानं प्रेतस्य
पुत्राद्यैर्वस्त्राद्यैः पूजनं ततः। नग्नदेहं दहेन्नैव किंचिद्देयं
परित्यजेत्। किंचिच्छववस्त्रैकदेशं श्मशानवासिभ्यो
देयं परित्यजेदित्यर्थः। निगमः। संध्यायां वा तथा रात्रौ
दाहः पाथेयकर्म्म च। न च श्राद्धं च नो कुर्यात्कृतं निष्फ-
लतां व्रजेत्। दाहानंतरं प्रचेताः। प्रेतस्य बांधवा यथाव
द्धमुदकमवतीर्य नोद्धर्षयेयुरुदकांते प्रसिंचेयुरपस-
[illegible] पवीतवामसे दक्षिणाभिमुखा आद्यगा

स्योदङ्मुखाः प्राङ्मुखाश्च राजन्यवैश्ययोरिति। याज्ञवल्क्यः। सप्तमाद्दशमाद्वापि ज्ञातयोऽभ्युदयं त्वपः। अपनः शोशुवदयमनेन पितृदिङ्मुखाः। सप्तमदिवसादर्वाग्दशमदिवसादर्वाक्। ज्ञातय एकगोत्रसपिंडाः समानोदकाश्च। एतच्च विषमदिनेषु कार्यं। तथाच गौतमः। प्रथमतृतीयपंचमसप्तमनवमेषूदकक्रियेति। वशिष्ठः। सव्योत्तराभ्यां पाणिभ्यामुदकक्रियां कुर्वीरन्निति।

उदकदाने संख्यानियममाह। याज्ञवल्क्यः। सकृत्प्रसिंचेत्युदकं नामगोत्रेण वाग्यताः। नामगोत्रेणोपलक्षितमुदकं। नामगोत्रमुच्चार्योदकं सिंचेयुरित्यर्थः। प्रचेताः। त्रिःप्रसेकं कुर्युः प्रेतस्तृप्यत्विति। तथा। दिने दिने जलांजलीन्पूर्णान्प्रदद्यात्प्रेतकारणात्। तावद्वृद्धिश्च कर्त्तव्या यावत्पिंडः समाप्यते। यावद्दशमः पिंडः समाप्यत इत्यर्थः। यमस्तु विशेषांतरमाह। सचैलस्तु ततः स्नात्वा शुचिः प्रयतमानसः। पाषाणांतत आदाय विप्रे दद्याद्दशांजलीन् द्वादश क्षत्रिये दद्याद्वैश्ये पंचदश स्मृताः। विंशच्छूद्राय दातव्यास्ततः संप्रविशेद्गृहं। एतच्चोदकदानं मृते मातामहे आचार्ये चोद्दिश्य नियमेन कार्यं। सख्यादिषु सत्यामिच्छायां कार्यमसत्यां न। यथाह याज्ञवल्क्यः। एवं मातामहाचार्यप्रेतानामुदकक्रिया। एवं पूर्वोक्तप्रकारेण नित्यतयेत्यर्थः। कामोदकं-

सखिप्रत्तास्वस्त्रीयश्वशुरर्त्विजां। कामोदकमित्युपादा-
नादिच्छाभावेऽकरणे दोषो नास्तीति गम्यते। पिंडदा-
नप्रकारमाह। याज्ञवल्क्यः। पिंडयज्ञावृता देयं प्रेता-
यान्नं दिनत्रयं। जलमेकाहमाकाशे स्थाप्यं क्षीरं च
मृन्मये। पिंडयज्ञावृता पिंडयज्ञप्रक्रियया प्राचीना-
वीतित्वतिलदर्भादिसहितस्वरूपया। आकाशे शिक्या-
दौ। प्रचेताः। प्रेतस्नाहीत्युदकं स्थाप्यं पिब चेदमिति
क्षीरमिति। पिंडदानं चासंस्कृतानां भूमौ संस्कृतानां तु
कुशेषु। असंस्कृतानां भूमौ पिंडं दद्यात्संस्कृतानां कु-
शेष्विति प्रचेतःस्मरणात्। पाषाणे पिंडो देयः। त-
थाच शंखः। भूमौ माल्यं पिंडं पानीयमुपले वा दद्यु-
रिति। याज्ञवल्क्येन पिंडत्रयमेवाभिहितं। विष्णुस्तु-
यावंत्याशौचदिनानि तावत्पिंडदानमाह। यावदाशौ-
चं तावत्प्रेतस्योदकं पिंडं च दद्युरिति। पारस्करः। प्रेते-
भ्यः सर्ववर्णेभ्यः पिंडान्दद्युर्दशैव तु। एवं पिंडोदक-
दाने गुरुलघुकल्पावाम्नातौ। तत्र यद्यप्यन्यतरय-
ज्ञानुष्ठानेपि शास्त्रार्थसिद्धिः तथापि गुरुकल्पे प्रेतो-
पकारातिशयः कल्प्यः। अन्यथा गुरुतरुतरयज्ञा-
नुष्ठानानुपपत्तेः। एवं दत्तस्य पिंडस्य प्रतिपत्तिक-
र्माह बृहत्प्रचेताः। वाग्यताः प्रयताश्चैव तिष्ठेयुः पिं-
डसन्निधौ। ततो वाष्पेनिवृत्तेस्य नद्यां तु प्रक्षिपेच्च

लमिति। तदभावे अश्मस्नोदकाशयेषु प्रक्षिपेत्। यत्र चाशौचमध्ये ह्रासस्तत्रापि दशपिंडा दातव्याः। आशौचमध्ये ह्रासेपि पिंडान्दद्याद्दशैवत्विति शातातपस्मरणात्। तथा त्रिरात्राशौचे पारस्करः। प्रथमे दिवसे देयास्त्रयः पिंडाः समाहितैः। द्वितीये चतुरो दद्यादस्थिसंचयनं तथा। पिंडे द्रव्यादिनियममाह शुनःपुच्छः। फलमूलैश्च पयसा शाकेन च गुडेन च। तिलमिश्रं तु दर्भेषु पिंडं दक्षिणतो हरेत्। द्वारदेशे प्रदातव्यो देवतायतनेषु वा। तूष्णीं प्रसेकं पुष्पं च धूपं दीपं तथैव च। शालिना सक्तुभिर्वापि शाकैर्वाप्यथ निर्वपेत्। प्रथमेह्नि यत्ननेषु वा। तूष्णीं प्रसेकं पुष्पं च धूपं दीपं तथैव च। शालिना। गव्यं तदेव स्याद्दशाहिकमिति। कर्तृनियमो गृह्यपरिशिष्टे। असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्। प्रथमेह्नि यो दद्यात्स दशाहं समापयेत्। दशाहपर्यंतमेवायं नियमः। अतस्तन्मध्ये देशांतरस्थितसन्निहितसपिंडपुत्राद्यागमनेपि प्रथमदिवसोपक्रांतेनैव दशपिंडा दातव्याः। न पुत्रादिभिः सपिंडैरपि। दशाहानंतरकृत्यमेकादशाहादिकं तु सन्निहितसपिंडेन पुत्रादिनैव कार्यं। पुत्राद्यभावे प्रथमप्रक्रांतेनैव। सपिंडीकरणे तु विशेषः। स च श्राद्धस्तवके वक्ष्यते॥ उदकदा-

ननु सर्वैः सपिंडादिभिः कार्यं। पिंडदानं त्वेकेनैव पुत्रादिना। पुत्रबहुत्वे त्वितरानुमत्या ज्येष्ठेनैव पातित्यादिदोषरहितेन। अनेनैवाभिप्रायेण। मरीचिः सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतं। द्रव्येण चाविभुक्तेन सर्वैरेव कृतं भवेति। अविभक्तानां तु द्रव्यमविभक्तमेव। विभक्तैस्तु स्वस्वप्रांशापेक्षया। स्वाद्धनात्किंचिदौर्ध्वदेहिकोपयुक्तमुद्धृत्य तज्ज्येष्ठाय निवेदनीयं। तदा च तद्द्रव्यमविभक्तमिव भवतीति द्रव्येण चाविभक्तेनेत्यस्य निर्वाहः। विभक्तेषु द्रव्यसमीकरणेनैकस्य कर्तृत्वं षोडशश्राद्धादावेव न सांवत्सरिकादौ। पिंडदानादिष्वधिकारिक्रममाह शंखः। पितुः पुत्रेण कर्तव्या पिंडदानोदकक्रिया। पुत्राभावे तु पत्नी स्यात्तदभावे तु सोदरः। गौतमः। पुत्राभावे सपिंडा मातृसपिंडाः शिष्याश्च दद्युस्तदभावे ऋत्विगाचार्यौ। अत्र शंखवचनानुरोधेन पुत्राभावे पत्नी तदभावे सपिंडा इति क्रमः। पुत्राश्च द्वादशविधा औरसादयः। अत एवौरसादिपुत्रपरिगणनानंतरं। याज्ञवल्क्यः पिंडदोंशहरश्चैषां पूर्वाभावे परः पर इति। तत्रापि औरसाभावे पौत्रः तदभावे प्रपौत्रस्तदभावे पुत्रिकादिक्रमः। अत एव स्मृतिसंग्रहे। पुत्रः पौत्रश्च तत्पुत्रः पुत्रिकासुत एव चेति। ऋष्यशृंगः। पुत्रेषु वर्तमानेषु ना-

न्यं वै कारयेत्स्वयं। आनुकल्प्याद्यपुत्रस्य श्राद्धं कुर्यात्तनाभिकः। बौधायनः। अपुत्रस्य स्त्रिया कार्यं पिंड श्राद्धं तथोदकं। क्रियालोपो न कर्त्तव्यः प्रेतस्य गतिकांक्षिभिः। यदा त्वनुपनीतः। पुत्रः संस्कार्त्ता पत्नी वा तदाग्निदानमेव समंत्रकं कार्यं। तथा च कात्यायनः। असंस्कृतेन पत्न्या च ह्यग्निदानं समंत्रकं। कर्त्तव्यमितरत्सर्वं कारयेदन्यमेव हीति। अत्र विशेषमाह सुमंतुः। अनुपेतोपि कुर्वीत मंत्रवत्पैतृमेधिकं। यद्यसौ कृतचूडः स्यात्यदि स्याच्च त्रिवत्सरः। वर्षत्रयानंतरं चूडाभावेपि सर्वमौर्ध्वदैहिकं मंत्रवत्कुर्यात्। वर्षत्रयादर्वाक् कृतचूडोपि प्राक्श्लोकोक्तसर्वं मंत्रवत्कुर्यात्। यद्यप्राक्तः अकृतचूडो वा तदाग्निदानमेव मंत्रवत्कुर्यादिति व्यवस्था। शंखः। भार्यापिंडं पतिर्दद्याद्भर्त्रे भार्या तथैव च। श्वश्र्वादेस्तु स्नुषा कुर्यात्तदभावे तु सोदरः। भार्यापिंडमित्यादि पुत्राद्यभावविषयं। बीजिक्षेत्रिणो विषये मरीचिः। स्वगोत्रे वान्यगोत्रे वा यो भवेद्विधवासुतः। पिंडश्राद्धविधानं च क्षेत्रिणो प्राग्विनिर्वपेत्। " बीजिने तु ततः पश्चात्क्षेत्री जीवति चेत्क्वचित्। बीजिनेद्यादौ च मृते पश्चात्प्रदीयते। उभौ यदि मृतौ स्यातां बीजिन्यादौ तदा ददत्। क्षेत्रिणायादौ न दत्तं स्याद्बीजिने नो पतिष्ठते। क्षेत्रिणे दत्वा बीजिने दत्तं तद्बीजिने नो

पतिस्तत इत्यर्थः। एतच्च विधवानियोगं विधाय त्वनि-
योगस्तद्विषयं। अनियोगस्थले तु नारदोक्तं द्रष्टव्यं।
जाता ये त्वनियुक्तायामेकेन बहुभिस्तथा। अरिक्थ
भाजस्ते सर्वे बीजिनामेव ते सुताः। दद्युस्ते बीजिने पिंडं
माता चेत् शुल्कतो हृता। अशुल्कोपनतायां तु पिंडदा
वोढुरेव त इति। पिंडदा बीजिनः पिंडमात्रमेव तेषां न
पिंडत्वे दानाद्यधिकारः। ते सुता वोढुरेव क्षेत्रिण एवे-
त्यर्थः। पिंडदा वोढुरेव त इत्यपि पाठः। सपिंडत्वे सत्य
पिंडत्वे सत्यपि ब्रह्मचर्यादिभिः पिंडोदकदानादिकं न
कर्त्तव्यं। तथा च याज्ञवल्क्यः। न ब्रह्मचारिणः कु-
र्युरुदकं पतितानच। उदकमिति। पिंडदानस्याप्युप
लक्षणं ब्रह्मचारिण उदकदानादिनिषेधो मातापि-
त्रादिव्यतिरिक्तविषयः। तथा च शंखः। आचार्यपि
त्रुपाध्यायान्निर्हृत्यापि व्रती व्रती। सकटान्नं च ना-
श्नीयान्न च तैः सह संविशेत्। व्रती ब्रह्मचारी व्रत्येव ना-
स्य ब्रह्मचर्यव्रतभ्रंश इत्यर्थः। स ब्रह्मचारी कटान्न
माशौचान्नं नाश्नीयात्। निर्हृत्येत्यनेन दाहादौर्ध्वदेहि
कं सकलमपि लक्ष्यते। मात्रादिव्यतिरिक्तविषये म
नुः। आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात्। समा
प्ते तूदकं कुर्यात् त्रिरात्रमशुचिर्भवेत्। आदिष्टी ब्रह्म-
चारी केचन भक्तांत प्रायश्चित्त आदिष्टीति मन्यन्ते।

व्रते समाप्ते तूदकं दत्त्वा दिनत्रयमशुचिः स्यादित्यर्थः।
वृद्धमनुः। क्लीबाद्या नोदकं कुर्युस्तेनाव्रात्या विधर्मि-
णः। गर्भभर्तृद्रुहश्चैव सुराप्यश्चैव योषितः। पूर्वोक्तब्र-
ह्मचार्यादिव्यतिरिक्तैरपि सपिंडैर्मृतपाषंड्याद्युद्देशे
नोदकादिकं न कार्यं। तथा च याज्ञवल्क्यः। पाषंड्य-
नाश्रिताः स्तेना भर्तृघ्न्यः कामगादिकाः। सुराप्य आत्म
त्यागिन्यो नाशौचोदकभाजनाः। वेदबाह्यलिंगधा
रणं पाषंडं। अनाश्रिताः। अधिकारे सत्यप्याश्रमवि
शेषरहिताः स्तेना ब्राह्मणस्वर्णव्यतिरिक्तोत्तमद्रव्य
हारिणः। पाषंड्यादिमरणस्याशौचादिनिमित्तत्वा
भावात्तन्मरणे सति सपिंडैरुदकादि न कर्त्तव्यमि
त्यर्थः। सुराप्यहत्यादिषु लिंगमविवक्षितमुद्देश्य-
गतत्वात्। आत्मत्यागिषु विशेषमाह गौतमः।
प्रायोनाशकशस्त्राग्निविषोदकोद्बंधनप्रपतनैश्चे-
च्छतामिति। प्रायो महाप्रस्थानं। अनाशकमनशनं
प्रपतनं शैलशिखरादवपातः। इत्यादिभिर्निमित्तैः
शास्त्राविहितमार्गेणेच्छापूर्वकं मृतानामाशौचादि
कं न कर्त्तव्यमित्यर्थः। अंगिराः। चांडालादुदकात्सर्पा
त् ब्राह्मणाद्वैद्युतादपि। दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापक
र्मिणां। उदकं पिंडदानं च प्रेतेभ्यो यत्प्रदीयते। नोपतिष्ठ
ति तत्सर्वमंतरिक्षे विनश्यति। मनुः। वृथासंकरजाता-

नां प्रव्रज्यासु च तिष्ठतां। आत्मनस्त्यागिनां चैव निवर्त्ततोदकक्रिया। वृथा संकरजातानामिति वृथाजाताः पंचमहायज्ञादिरहिताः। संकरजाताः प्रतिलोमजाः। प्रमादात्पूर्वोक्तनिमित्तैर्मरणे विघत एवाशौचादिकं अत एवांगिराः। अथ कश्चित्प्रमादेन म्रियेताग्न्युदकादिभिः। तस्याशौचं विधातव्यं कर्त्तव्या चोदकक्रिया। चांडालादिहताहिताग्नेरस्थ्यादीनां प्रतिपत्तिकर्म च स्मृत्यंतरेऽभिहितं। वैतानं प्रक्षिपेदप्सु आवसथ्यं चतुष्पथे। पात्राणि तु दहेदग्नौ यजमाने तथामृते। वृथामृतः अविहितमार्गेण मृतः ॥ तथा ॥ आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया। तेषामपि तथा गंगातोये संस्थापनं मतं। गंगेति पुण्यनद्युपलक्षणं। एवं पूर्वोक्तनिंदितमरणमृतानां स्नेहादिनाग्न्या चौर्ध्वदैहिककरणे स्मृत्यंतरे प्रायश्चित्तमाम्नातं। कृत्वाग्निमुदकं स्नानं स्पर्शनं वहनं कथं। रज्जुच्छेदाश्रुपातं च तप्तकृच्छ्रेण शुध्यतीति। एतच्च बुद्धिपूर्वे प्रत्येकाग्न्यादिकरणे। अबुद्धिपूर्वके तु संवर्त्तः। एषामन्यतमं प्रेतं यो वहेत दहेत वा। कटोदकक्रियां कृत्वा कृच्छ्रं सांतपनं चरेत्। यच्च सुमंत्वादिभिर्मासं भैक्ष्याहारत्रिषवणं च। तथा एकरात्राभोजनादिकं चाभिहितं तत्प्राक्तविषये देशकालाद्यनुसारेण योजनीयं। यत्तु रक्षादिर्लुप्तभिष-

क्रियस्तस्यात्महननमप्यनुज्ञानमादिपुराणादिषु
वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः। आ
त्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः। तस्य त्रि
रात्रमाशौचं द्वितीये त्वस्थिसंचयः। तृतीये तूदकं दत्वा च
तुर्थे श्राद्धमाचरेत्। तथा। गच्छेन्महापथं वापि तुषा
रगिरिमादरात्। प्रयागवटशाखायां देहत्यागं करो
ति वा। स्वयं देहविनाशस्य काले प्राप्ते महामतिः। उत्त
मान्प्राप्नुयाल्लोकान्नात्मघाती भवेत्क्वचित्। एतेषामधि
कारस्तु सर्वेषां सर्वजंतुषु। नराणामथ नारीणां सर्व
वर्णेषु सर्वदा। आशौचं स्यात्त्र्यहं चैषां वज्रानलहतेषु
च। वाराणस्यां म्रियेद्यस्तु प्रत्याख्यातभिषक्क्रियः। प्र
णवं तारकं ब्रूते नान्यथा कस्यचित्क्वचित्। विवस्वान्।
सर्वेंद्रियविमुक्तस्य स्वव्यापाराक्षमस्य च। प्रायश्चित्त
मनुज्ञातमग्निपातो महापथः। धर्मार्जनासमर्थस्य कर्तु
पापांकितस्य च। ब्राह्मणाप्यनुज्ञातं तीर्थप्राणविमो
क्षणं। धर्मार्जनासमर्थस्य द्वादशवार्षिकादिरूपप्रा
यश्चित्तासमर्थस्य। सर्वं शास्त्राविहितमार्गेणाहतानां
चांडालादिहतानां च संवत्सरादूर्ध्वं दैहिकं कार्यं। त
था षड्त्रिंशन्मते। गोब्राह्मणहतानां च पतितानां त
थैव च। ऊर्ध्वं संवत्सरात्कुर्यात्सर्वमेवौर्ध्वदैहिकं। अत्रा
परं विशेषमाह। पराशरः। चांडालेन श्वपाकेन गोभि

र्विप्रो हतो यदि। आहिताग्निर्मृतो विप्रो विशेषेणात्मघात-
कः। दहेत्तं ब्राह्मणं विप्रो लोकाग्नौ मंत्रवर्जिते। दग्ध्वा-
स्थीनि पुनर्गृह्य क्षीरेण क्षालयेत्ततः। स्वेनाग्निना स्वमं-
त्रेण पृथगेतत्पुनर्दहेत्। संवत्सरादर्वागपि तत्त्वत्याया-
नुसारेणाहिगुणादिकं प्रायश्चित्तं विधाय नारायणब-
लिं च कृत्वौर्ध्वदैहिकं कार्यं आयुषश्च नित्यत्वेन संव-
त्सरानंतरमौर्ध्वदेहिकादिलोपप्रसंगात्। तच्च नाराय-
णबलिं कृत्वा तथा च वृद्धयाज्ञवल्क्यच्छागलेयौ। ना-
रायणबलिः कार्यो लोकगर्हाभयान्नरैः। तथा तेषां भ-
वेच्छौचं नान्यथेत्यब्रवीद्यमः। नारायणबलौ कृते
ऊर्ध्वदेहिककरणे शुद्धिर्भवतीत्यर्थः। सर्पहते तु विशेषः
संवत्सरं यावत्पंचम्यां नागपूजां विधाय तदनंतरं नारा-
यणबलिं कृत्वा सौवर्णनागं प्रत्यक्षां गां च व्यासोद्देशे-
न ब्राह्मणाय दत्वौर्ध्वदैहिकं कुर्यात्। नारायणब-
लिस्वरूपं च विष्णुनाभिहितं। एकादशीं समासाद्य शुक्ल-
पक्षस्य वै तिथिं। विष्णुं समर्चयेद्देवं यमं वैवस्वतं तथा।
दशपिंडान्घृताभ्यक्तान्दर्भेषु मधुसंयुतान्। तिलमिश्रा-
न्प्रदद्याद्वै संयतो दक्षिणामुखः। विष्णुबुद्धौ समासाद्य
नद्यंभसि ततः क्षिपेत्। नामगोत्रगृहं तत्र पुष्पैरभ्यर्चनं
तथा। धूपदीपप्रदानं च भक्ष्यभोज्यं तथापरं। निमंत्रयेत
विप्रान्वै पंच सप्त नवापि वा। विद्यातपःसमृद्धान्वै कुलो-

त्पन्नान्समाहितान्। अपरेहनि संप्राप्ते मध्याह्ने समुपो-
षितः। विष्णोरभ्यर्चनं कृत्वा विप्रांस्तानुपवेशयेत्। उ-
दङ्मुखानन्यथा ज्येष्ठं पितृरूपमनुस्मरन्। मनो निवेश्य
विष्णौ वै सर्वं कुर्यादतंद्रितः। आवाहनादि यत्प्रोक्तं देव
पूर्वं तदाचरेत्। तृप्तानज्ञात्वा ततो विप्रांस्तृप्तिं पृष्ट्वा य-
था विधि। हविष्यव्यंजनेनैव तिलादिसहितेन च। पंच
पिंडान्प्रदद्याच्च दैवं रूपमनुस्मरन्। प्रथमं विष्णवे दद्या-
द्ब्रह्मणे च शिवाय च। यमाय सानुचराय चतुर्थं पिंड
मुत्सृजेत्। मृतं संकीर्त्य मनसा गोत्रपूर्वमतः परं। विष्णो
र्नाम गृहीत्वैनं पंचमं पूर्ववत्क्षिपेत्। विप्राणां चाप्यवि-
धिवद्दक्षिणाभिः समर्चयेत्। एवमन्यतमं विप्रं हिरण्ये-
न समर्चयेत्। गवा वस्त्रेण भूम्या च प्रेतं तं मनसा स्मरन्। त
तस्तिलांभो विप्रास्तु हस्तैर्दर्भसमन्वितैः। क्षिपेयुर्गोत्रपू-
र्वं नु नाम बुद्धौ विवेश्य च। हविर्गंधतिलांभस्तु तस्मै दद्युः
समाहिताः। मित्रभृत्यजनैः सार्द्धं पश्चाद्भुंजीत वाग्यतः।
भविष्यत्पुराणे। सुवर्णभारनिष्पन्नं नागं कृत्वा त-
थैव गां। व्यासाय दत्त्वा विधिवत्पितुरानृण्यमाप्नुवा-
निति। उदकादिदानानंतरं कर्तव्यमाह। याज्ञवल्क्यः
कृतोदकान्समुत्तीर्णान्मृदुशाद्वलसंस्थितान्। स्ना
तानपवदेयुस्तानितिहासैः पुरातनैः। अपवदेयुः नो-
धयेयुः। इतिहासस्वरूपं च। मानुष्ये कदलीस्तंभनिः

सांसारमार्गगां। करोति यः स संमूढो जलबुद्बुदसंनि-
भ इति। तथा न रोदितव्यमपीत्याह स एव। श्लेष्मा-
श्रु बांधवैर्मुक्तं प्रेतो भुंक्ते यतो वशः। अतो न रोदितव्यं
हि क्रियाः कार्याः स्वशक्तित इति। इति ह्यासम्र वणा
नंतरं किं कर्त्तव्यमित्यत आह। इति संश्रुत्य गच्छेयुर्गृ-
हं बालपुरःसराः। विदश्य निंबपत्राणि नियता द्वारि वे-
श्मनः। आचम्याग्न्यादि सलिलं गोमयं गौरसर्षपा-
न्। प्रविशेयुः समालभ्य कृत्वाश्मनि पदं शनैः। धर्मा-
र्थं प्रेतनिर्हरणादिकं कुर्वतामपि स्नानानंतरं प्राशनाना-
यम्य निंबपत्रदशनप्रभृति गृहप्रवेशांतकर्मकरणेन स-
द्यःशुद्धिः। यतः स एवाह। प्रवेशनादिकं कर्म प्रेतसंस्प-
र्शिनामपि। इच्छतां तत्क्षणाच्छुद्धिं परेषां स्नानसंय-
मात्। पराशरः। अनाथं ब्राह्मणं प्रेतं ये वहंति द्विजा-
तयः। पदे पदे यज्ञफलमानुपूर्व्याल्लभंति ते। न तेषा-
मशुभं किंचित्पापं वा शुभकर्मणां। जलावगाहना-
नेषां सद्यः शौचं विधीयते। यस्तु स्नेहादिवशान्निर्ह-
त्य तदन्नमश्नाति तद्गृहे च निवसति तस्य दशाहाच्छु-
द्धिः यस्तु पूर्ववदेव निर्हृत्य तद्गृहे वसति न तदन्नमश्ना-
ति स त्रिरात्रात् शुद्ध्येत् यश्च निर्हरणादिकमेव करो-
ति न तद्गृहवासं न च तदन्नभोजनं स त्वेकाहात्। त-
था च मनुः। असपिंडं द्विजं प्रेतं विप्रो निर्हृत्य बंधुवत्

विशुद्ध्यति त्रिरात्रेण मातुराप्तांश्च बांधवान्। यद्यन्नमत्ति
तेषां तु दशाहेनैव शुद्ध्यति। अनदन्नन्नमह्नैव न चेत्तस्मिन्
गृहे वसेत्। एतच्च सजातीयविषयं। विजातीयविषये तु
गौतमोक्तो विशेषः। अवरश्चेद्वर्णः पूर्ववर्णमुपस्पृशे-
त्पूर्वो वावरं तत्र शावोक्तमाशौचमिति। उपस्पृशेन्निर्हरे-
त्। हीनवर्णश्चेदुत्कृष्टं निर्हरति उत्कृष्टश्चेन्नीचं तत्र
निर्हरणीयाशौचदिनैः शुद्धिः। ब्राह्मणश्चेत् शूद्रं नि-
र्हरति तदा मासेन शुद्धिः शूद्रश्चेद्ब्राह्मणं तदा दशभि-
र्दिनैरित्यनेन प्रकारेणानुसंधेयं। ब्रह्मपुराणे। ब्रा-
ह्मणस्त्वन्यवर्णानां न करोति कदाचन। कामान्मोहा-
द्भयाल्लोभात्कृत्वा तज्जातितां व्रजेत्। पुत्राः कुर्वंति-
विप्राय क्षत्रविट्शूद्रयोनयः। सतादृशेभ्यः पुत्रेभ्यो न
करोति कदाचन। राज्ञि मृतेऽसपिंडे तु निरपत्ये पुरोहि-
तः। मैत्री वा तदशौचं तु चीर्त्वा पश्चात्करोति सः। अ-
नपत्ये अविद्यमानसपिंडे च राजनि मृते सपुरोहितस्त-
स्मै राज्ञे श्राद्धं कुर्यात्। तत्प्रयुक्ताशौचं चीर्त्वेत्यर्थः।
शवसंस्पर्शनिमित्तत्वाशौचं स्पर्शवतएव न तद्भार्यादी-
नां तद्द्रव्याणां च। तथा चांगिराः। आशौचं यस्य संसर्गा-
दापतेद्गृहमेधिनः। क्रियास्तस्य न लुप्यंते गृह्याणां च-
न तद्भवेत्। क्रियावैतानोपासनाद्याः गृह्याणां गृहम-
वानां। अतिक्रांताशौचेप्येवमेव। अतिक्रांते दशाहे-

तु पश्चाज्जानाति चेद्दुहीत्रिरात्रं सूतकं तस्य न तद्दत्तस्य
कर्हिचित् इति स्मरणात्। त्रिरात्रमिति मातापितृव्यति
रिक्तविषयं। आशौचिनां नियमविशेषो याज्ञवल्क्ये-
न दर्शितः। क्रीतलब्धाशना भूमौ स्वपेयुस्ते पृथक्क्षि
तौ। क्रीताशना अयाचितलब्धाशना वा भवेयुरिति नि-
यमादर्थाद्वैतदभावे अनशनं सिद्धं। दिनत्रयपर्यंतमयं
नियमः। तथा च वसिष्ठः। गृहान्व्रजित्वा अप्रस्तरे
त्र्यहमनश्नंत आसीरन्क्रीतोत्पन्नेन वा वर्त्तेरन्निति।
आशौचिनां शयनार्थस्तृणमयः प्रस्तर अप्रस्तर इत्यु
च्यते। मनुः। अक्षारलवणान्नाः स्युर्निमज्जेयुश्च ते
त्र्यहं। मांसाशनं च नाश्नीयुः शयीरंश्च पृथक्क्षिता-
विति। गौतमः। अधःशय्यासनिनो ब्रह्मचारिणः स-
र्वे इति। तथा। वपनं दुःखानुभाविभिः सर्वैः सपिंडैः पुत्रैरेव
वा स्वस्वदेशानुसारेण प्रथमदिनप्रभृति विषयदिनेषु
अथवा सप्तदिनेष्वपि श्राद्धप्रदानात्पूर्वं कर्त्तव्यं। यदा
ह्यापस्तंबः। अनुभाविनां च परिवापनमिति अनुभा
विनोल्पवयसः सपिंडाः पुत्राश्च। तथा। द्वितीयेह्नि-
कर्त्तव्यं क्षुरकर्म प्रयत्नतः। तृतीये पंचमे वापि सप्तमे-
वा प्रदानतः। तथा। गंगायां भास्करक्षेत्रे मातापित्रो
र्गुरोर्मृते। आधानकाले सोमे च वपनं सप्तसु स्मृतं इति
देवलः। दशमेहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत्। तत्र

त्याज्यानि वासांसि केशश्मश्रुनखानि चेति। प्रथमादि-
दिनेषु कृतक्षौरस्यापि शुध्यर्थं दशमदिनेपि वपनं क-
र्त्तव्यं। दशमदिनमिति सूतकांतोपलक्षणं। अंते च वा-
ससां त्याग इति स्मरणात्। सूतकांतकर्त्तव्यवासस्त्या-
गसाहचर्या हचर्यात्केशश्मश्र्वादित्यागोपि सूतकां-
ते कर्त्तव्यः। अस्थिसंचयनदिनमपि वैकल्पिकं। तत्र
संवर्त्तः। प्रथमेह्नि तृतीये वा सप्तमे नवमे तथा। अस्थि-
संचयनं कार्यं दिने तद्गोत्रजैः सह। विष्णुः। चतुर्थे दि-
वसेस्थिसंचयनं कुर्यात्तेषां च गंगांभसि प्रक्षेपः। तथा
द्वितीये त्वस्थिसंचय इति च। अत्र च स्वस्वगृह्यानुसा-
रेण व्यवस्था। अस्थिसंचयनदिवसे च श्मशानवासि-
देवतोद्देशेन पूजा कर्त्तव्या। अस्पृश्यत्वलक्षणाशौ-
चनिवृत्तिकालनियममाह। देवलः। दशाहादित्रि-
भागेन कृते संचयने क्रमात्। अंगस्पर्शनमिच्छंति
वर्णानां तत्वदर्शिनः। त्रिचतुःपंचदशभिः स्पृश्या-
वर्णाः क्रमेण तु। अस्थिसंचयने कृत एव स्वाशौच-
त्रिभागाच्छुद्धिः। न त्वस्थिसंचयनाभाव इति तात्प-
र्यं। तथा च स्मर्यते। अस्थिसंचयनादूर्द्ध्वमंगस्पर्शो
न दुष्यतीति। एतदुपनीतविषयं। अनुपनीते त्वस्थि-
संचयनमंतरेण स्वाशौचत्रिभागात्स्पृश्यत्वं। तदा-
ह देवलः। स्वाशौचकालाद्विज्ञेयं स्पर्शनं तु विभागतः

शूद्रविट्क्षत्रविप्राणां यथाशास्त्रप्रचोदितमिति। कर्मानधिकारलक्षणं त्वाशौचं स्वस्ववर्णाशौचकालानंतरं स्नानादिभिरपगच्छति। एतच्चाशौचमाहिताग्नेः संस्कारदिनप्रभृति अनाहिताग्नेस्तु मरणदिनप्रभृति अस्थिसंचयनं तूभयोरपि संस्कारदिनप्रभृतीति विवेकः। तथा चांगिराः। अनग्निमत उत्क्रांते साग्नेः संस्कारकर्मण इति। पैठीनसिरपि। अनग्निमत उत्क्रांते शौचादि द्विजातिषु। दाहादग्निमतो विद्याद्विदेशस्थे मृते तथेति। साग्निकस्य दाहप्रभृत्येवाशौचादिति तत्पुत्रादीनामासंस्कारात्संध्यादिकर्मलोपो नास्ति। आशौचे नित्यनैमित्तिकयोर्निवृत्तिः पारस्करेण दर्शिता नित्यानि विनिवर्त्तेरन्वैतानवर्जं शालाग्नौ चैके अन्यएतानि कुर्युरिति। अत्र नित्यशब्देनावश्यकनैमित्तिकानामप्युपसंग्रहः। अतो वैतानानां स्मार्त्तानां च कर्मणां प्रतिप्रसवे नैमित्तिकस्यापि प्रतिप्रसवः काम्यानां तु सर्वत्र सर्वथा निवृत्तिः। वितानोऽग्नीनां विस्तारः त्रेताग्निः तत्र क्रियमाणानि नित्याग्निहोत्रादीनि वैतानानितानि वर्जयित्वा नित्यानि विनिवर्त्तेरन्नित्ययं निषेधो नित्याग्निहोत्रादिषु न प्रवर्त्तत इत्यर्थः। अतः स्वयमेव कुर्यात्। शालाग्निः गृह्याग्निः तत्संबंधिनां सायंप्रातर्होमस्थालीपाकादीनां याज्ञिकी कर्त्तव्यताक-

णामकरणं वाप्ण स्वार्थ इत्यर्थः। यदा च करणयत्न स्वीकारः तदा अन्ये असपिंडा एतानि कुर्युः। अन्येनासपिंडेनैतानि कारयेदित्यर्थः। तत्रापि स्वदव्यत्यागात्मकं प्रधानं स्वयमेव कुर्यान्न स्यादन्यनिष्पाद्यत्वात्। पुलस्त्यः। संध्याग्निष्टिं चरुं होमं यावज्जीवं समाचरेत्। तत्य जेत्सूतके वापि त्यजनाच्छेदधोद्विजः। इष्टिराहिताग्नेर्दर्शपूर्णमासादिका। चरुरनाहिताग्नेः स्थालीपाकादिरूपः। जातूकर्ण्यः। सूतके तु समुत्पन्ने स्मार्त्तं कर्म्म कथं भवेत्। पिंडयज्ञं चरुं होमं असगोत्रेण कारयेत्। पिंडयज्ञः पिंडपितृयज्ञः। चरुः श्रवणाकर्माश्वयुज्यादिकः स्थालीपाकश्च। असगोत्रः असपिंडः। सपिंडनिषेधस्याशौचनिमित्तत्वात् आशौचरहितेन ब्रह्मचारिणा सपिंडेन होतव्यमिति गम्यते। बृहस्पतिः। सूतके मृतके चैव अशक्तौ श्राद्धभोजने। प्रवासादिनिमित्तेषु हावयेन्न तु हापयेत्। अग्निसाध्यत्वेपि वैश्वदेवस्य निवृत्तिस्तथा पंचयज्ञादीनामपि। तथा च संवर्त्तः। विप्रो दशाहमासीत वैश्वदेवविवर्ज्जितः। पंचयज्ञविधानं तु न कुर्यान्मृत्युजन्मनोरिति। एवं चोक्तनित्यनैमित्तिकव्यतिरेकेणेतरेषां नित्यनैमित्तिकानामपि निवृत्तिः। यत्तु नर्द्धानं प्रतिगृह्यो होमः स्वाध्यायश्च निवर्त्तत इति तत्काम्यहोमाभिप्रायं वैश्वदेवाभिप्रायं वा ॥

संध्याविषये विष्णुपुराणे। सर्वकालमुपस्थानं संध्ययोः
पार्थिवेष्यते। अन्यत्र सूतकाशौचविभ्रमातुरभीतितः। सूतके
आशौचे च संध्यायाः स्वरूपतः परित्यागः अपितु मंत्रोच्चा
रणपूर्विकायाः। पुलस्त्येन प्राणायामरहितमानसिक
संध्यानुज्ञानात्। सूतके मृतके चैव संध्याकर्म समाचरे-
त्। मनसोच्चारयेन्मंत्रान्प्राणायाममृते द्विज इति। अं-
जलिप्रक्षेपस्तु सावित्रीमुच्चार्य कार्यः। तथा च पैठीन-
सिः। सूतके सावित्र्या चांजलिं प्रक्षिप्य प्रदक्षिणं कृत्वा
सूर्यं ध्यायन्नमस्कुर्यादिति। सूतकादौ ग्रहणे जाते स्ना
नाद्यादौ न दोषः। तथा च वृद्धवसिष्ठः। चंद्रसूर्यग्रहे
स्नायान्मृतके सूतके तथा। अस्नायी मृत्युमाप्नोति स्ना
यी मृत्युं न विंदति। तथा। मृतके सूतके चैव न दोषो राहु
दर्शने। तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यत इति।
सूतके मृतके वाऽसपिंडैरसमानोदकैश्चाशौचान्नं न भोक्त
व्यं। यदाह यमः। उभयत्र दशाहानि कुलस्यान्नं न भु-
ज्यते। उभयत्र सूतके मृतके वा। सकुल्यानां तु न दोषः।
सूतके तु कुलस्यान्नमदोषं मनुरब्रवीदिति तेनैवोक्तत्वा
त्। अत्र विशेषः षट्त्रिंशन्मते। उभाभ्यामपरिज्ञाते सूतकं
नैव दोषकृत्। एकेनापि परिज्ञाते भोक्तुर्दोषमुपावहेत्
उभाभ्यां दातृभोक्तृभ्यां। यद्यपि दात्रा सूतकाद्यनभिज्ञा-
ने सतु सूतकं नास्ति। ज्ञानस्य वजननादेर्निमित्तत्वात्

तथापि दातृपरिज्ञानमन्तरेण केवलभोक्तृज्ञानेपि वचना
द्भोजनदोषो भोक्तुरेव। उपपत्तिश्च दातृज्ञानं सूतकादिश
ष्टौ निमित्तं भोक्तृज्ञानं भोजननिवृत्तौ निमित्तं। सूतकादि
स्वरूपनिष्पत्तिरेकोंऽशः। तत्ज्ञानं चापरः एतदुभयं वि
शिष्टं निमित्तं। एतं च निमित्तैकदेशस्य प्रसवादेर्भोक्तृज्ञा
तत्वादेकदेशविभावितन्यायेनान्यस्यापि संभाव्यमान
त्वात्केवलभोक्तृज्ञानेपि भोजननिवृत्तिः। यदा तु दात्रा-
ज्ञातं न भोक्त्रा तदापि भोक्तुरेव वचनाद्दोषः न दातुर्भोजन
निमित्तो दोषः। अपि तु सूतकान्नभोजयितृत्व दोषोस्त्ये
व। अयं च भोजयितृत्वनिमित्तो दोषः सूतके मृतके च वि
हित प्रथमादिदिननवश्राद्धदिनव्यतिरिक्तकाले विज्ञेयः
तत्काले विहितत्वात्। ब्रह्मपुराणे। अपि दातृगृहीत्रो
रसूतके मृतकेथवा। अविज्ञाते न दोषः स्याच्छ्राद्धादि
षु कदाचन। विज्ञाते भोक्तुरेव स्यात्प्रायश्चित्तादिकं क्र
मात्। बृहस्पतिः। विवाहोत्सवयज्ञेषु त्वन्तरा मृतसू-
तके। पूर्वसंकल्पितार्थेषु न दोषः परिकीर्तितः। षट्त्रिं-
शन्मते। विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके परैर-
न्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः। भुंजानेषु तु विप्रेषु
त्वन्तरा मृतसूतके। अन्यगेहोदकाचांताः सर्वे ते शुच
यः स्मृताः। मरीचिः। लवणे मधुमांसे च पुष्पमूलफ-
लेषु। शाककाष्ठतृणेष्वप्सु दधिसर्पिःपयस्सु च। तिलौ

षधाजिने चैव पक्वापक्वे स्वयंग्रहः। पुष्पेषु चैव सर्वेषु नाशौ
चं मृतसूतके। स्वयंग्रहः स्वाम्यनुज्ञातो गृह्णीयादित्यर्थः
पक्वापक्व इति पक्वं भक्ष्यजातमपक्वं तंडुलादिकं। इदं चात्र
सत्रप्रवृत्तादेव ग्राह्यं नान्यस्मात्। तथा चांगिराः। सत्र
सत्रप्रवृत्तानामाममन्नं न गर्हितं। भुक्त्वा पक्वान्नमेतेषां त्रि
रात्रं तु पयः पिबेत्। अत्र भक्ष्यव्यतिरिक्तौदनादिविषये प
क्वशब्दः। इतरथा मरीचिवचनेन विरोधात्। व्रतादिप्रा
रब्धेषु सत्सु पश्चाच्चेत्सूतकादिकं भवति तदा तावन्मात्रे
सूतकाभावः। व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे। प्रा
रंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः। नांदीमुखं विवा
हादौ श्राद्धे पाकपरिक्रिया। प्रारंभाभावेपि कन्यायास्व-
धार्यत्वे सन्निहितलग्नात्वराभावे च विष्णुनैवाभ्यनुज्ञा
दत्ता। अनारब्धविशुद्ध्यर्थं कूष्मांडैर्जुहुयाद्घृतं। गां द-
द्यात्पंचगव्याशी ततः शुध्यति सूतकी। कूष्मांडैः कूष्मां
डमंत्रैः। अथानुलोमजविजातीयसपिंडाशौचं। तत्र
बौधायनः। क्षत्रविट्शूद्रजातीया ये स्युर्विप्रस्य बांध
वाः। तेषामशौचे विप्रस्य दशाहाच्छुद्धिरिष्यते। तेषा
माशौचे क्षत्रादिजननादिनिमित्ताशौचे। हारीतः।
दशाहाच्छुध्यते विप्रो जन्महानौ स्वयोनिषु। षड्भि-
स्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनिषु। विष्णुः। क्षत्रिय-
स्य विट्शूद्रेषु सपिंडेषु षड्रात्रत्रिरात्राभ्यां। वैश्यस्य शूद्रे

सपिंडे षड्रात्रेण शुद्धिः। हीनवर्णानां तूत्कर्षेषु सपिंडेषु-
जातेषु मृतेषु वा तदाशौचव्यपगमे शुद्धिः। बौधायनो
क्तमनापद्विषयं हारीताद्युक्तं त्वापद्विषयमिति व्यवस्था
एतेषां तु सापिंड्यं त्रिपुरुषमेव। पिंडस्त्रावर्त्तते त्रिष्वि-
ति सापिंड्यप्रकरणेऽभिहितत्वात्। अपरो विशेषश्चाप
स्तंवेनोक्तः। क्षत्रविट्शूद्रजातीनां यच्चेन्मृतकसूतके
तेषां तु पैतृकं शौचं विभक्तानां तु मातृजं। पितृगृहावस्थि-
तानां तदविभक्तानां पितृजातीयमाशौचं विभक्तानां तु
मातृजात्यभिहितमित्यर्थः प्रतिलोमानां तु सूतकादिकं
नास्त्येव। प्रतिलोमा धर्महीना इति स्मरणात्। मूत्रपुरी
षोत्सर्गवन्मलापकर्षणार्थं शौचं कुर्यात्॥ अथ समा
नोदकाशौचं॥ तत्र मनुः। दशाहं शावमाशौचं सपि
ण्डेषु विधीयते। जननेप्येवमेवस्यान्निपुणां शुद्धिमिच्छ-
तां। जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते। एको-
दकः समानोदकाः ते च सप्तपुरुषोर्ध्वभाविनः। समानो
दकभावानुवृत्तिश्च यावज्जन्मनाम्नोर्विज्ञानं। तथा-
च मनुः। सपिंडता तु पुरुषे सप्तमे विनिवर्त्तते। समानो
दकभावस्तु जन्मनाम्नोरवेदने। निवर्त्तत इत्यन्वयः।
अथ प्रोषितमरणे जनने चाशौचं। तत्र निर्दशाज
ननश्रवणे पितुः सचैलस्नानाच्छुद्धिः। यदाह मनुः
निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च। सवासा जल

माशुद्ध्यशुद्धो भवति मानवः। पुत्र इति संबंधसूचकशब्द त्वात्पितुरेव स्नानं सपिंडानां तु दशाहादिके व्यतीते सूतकं नास्त्येव। अत एव॥ देवलः। नाशुद्धिः प्रसवाशौचे व्यतीतेष्वहःस्वपि। प्रोषितमरणे तु याज्ञवल्क्यः। प्रोषिते कालशेषः स्यात्। देशांतरस्थसपिंडमरणे दशरात्राद्याशौचकाले वानतिक्रांते दशरात्रादिशेषं यावदाशौचं भवति। न श्रवणप्रभृति पुनर्दशाहादिकमित्यर्थः। दशाहाद्यनंतरं मासत्रयपर्यंतं त्रिरात्रं। ततः षण्मासपर्यंतं पक्षिणी ततो नवमादर्वागेकाहः ततः संवत्सरपर्यंतं स्नानोदकदानाभ्यामेव शुद्धिः संवत्सरानंतरं स्नानेनेति विवेकः। यदाह वृद्धवसिष्ठः। मासत्रये त्रिरात्रं स्यात् षण्मासे पक्षिणी तथा। अहस्तु नवमादर्वागूर्द्ध्वं स्नानेन शुद्ध्यति। स्नानं स्वचरितमुदकदानमप्याक्षिपति। मनुः। संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यति। स्पृष्ट्वा स्नात्वेत्यर्थः। अन्यानि यानि विरुद्धवचनानि तानि तानि पूर्वोक्तविषय एव योज्यानि। एतन्मातापितृव्यतिरिक्तविषयं। अत एव पैठीनसिः। पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः। श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत्। दशाहमिति च द्वादशाहाद्युपलक्षणं। सूतकी भवेदित्यनेन प्रेतकार्यकर्त्तव्यतां दर्शयति। सापत्नमातरि तु विशेषो दक्षेणोक्तः।

पितृपत्न्यामपेतायां मातृवर्गे द्विजोत्तमः। संवत्सरे व्य-
तीते तु त्रिरात्रमशुचिर्भवेत्। एतच्च वक्ष्यमाणादेशांत-
रलक्षणरहितदेशांतरस्थामृतौ। देशांतरमृते तु स-
पिंडे मासत्रयादर्वागपि सद्यः शौचं। देशांतरमृतं श्रुत्वा
क्लीवे वैखानसे यतौ। मृते स्नानेन शुध्यंति गर्भस्रावे च गो-
त्रिण इति स्मरणात्। देशांतरलक्षणमाह वृद्धमनुः।
महानद्यंतरं यत्र गिरिर्वा व्यवधायकः। वाचो यत्र विभि-
द्यंते तद्देशांतरमुच्यते। बृहस्पतिः। देशांतरं वदंत्येके
षष्टियोजनमायतं। चत्वारिंशद्वदंत्यन्ये त्रिंशदन्ये तथै-
व च। अत्र च देशाचारतो व्यवस्था। स्मृत्यर्थसारे तु अ-
स्यथा। तद्यथा। स्त्रीपुरुषयोः परस्परं चैवं सवर्णोत्तम-
सपत्नीषु चैवं। एवमित्यनेन मातापितृवत्पूर्णं शौचमे-
वेति ग्रंथकारः पराममृष्टवान्। देशांतरे कालांतरे च हीन-
वर्णीयामातुः सपत्न्यामुपनीतोपरमरणे। एतच्च वयो-
वस्थाशौचवत्सर्ववर्णसाधारणं। तथा च व्याघ्र-
पादः। तुल्यं वयसि सर्वेषामतिक्रांते तथैव च। उप-
नीते तु विषमं तस्मिन्नेवातिकालजं। अयमर्थः। ज-
न्मप्रभृत्युपनयनादर्वाचीने वयसि यदा शौचं तत्स-
र्वेषां ब्राह्मणादीनां तुल्यं। यच्च दशाहादिके अति-
क्रांते तदपि तुल्यं। उपनीतोपरमे दशद्वादशेत्यादि-
रूपेण विषमं। तस्मिन्नेव उपनीतोपरम एवातिकाल

जमतिक्रान्ताशौचं भवति न पुनर्वयोवस्थाशौचातिक्रम
इति ॥ अथ प्रोषितमृतदाहविधिस्तदाशौचं च
प्रोषितादिमृतशरीरालाभे तदस्थिभिः प्रतिकृतिं कृ-
त्वा अस्थ्नामप्यलाभे स्वस्वगृह्योक्तप्रकारेण पर्णशरैः
प्रतिकृतिं कृत्वा दाहः कार्यः । तत्राहिताग्निर्यदि प्रोषित
मृतस्तदा दशाहद्वादशाहादिकमेवाशौचं भवति ।
तथा च वसिष्ठः । आहिताग्निश्चेत्प्रवसन्म्रियेत पुनः
संस्कारं कृत्वा शववच्छौचमिति । अनाहिताग्नेस्त्रिरात्रम
शुचिर्भवेदिति स्मरणात् । अथोपाध्यायाद्युपरमे ।
तत्र सन्निधानेऽहरित्यनुवृत्तौ याज्ञवल्क्यः । गुर्वे
तेवास्यनूचानमातुलश्रोत्रियेषु च । गुरुः उपाध्यायः ।
एकग्रामनिवासिनः संनिहितश्रोत्रियस्यैतदाशौचं ।
तथा चाश्वलायनः । एकाहं सब्रह्मचारिणि समा
नग्रामीणे च श्रोत्रिय इति । सब्रह्मचारी एकाचार्योप-
नीतः । आचार्यविषये मनुः । त्रिरात्रमाहुराशौचमाचा
र्ये संस्थिते सति । तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थि
तिः । सन्निहितगुरावच्छ्रोत्रियसन्निहितमातुलाद्यु-
परमे मनुरेव । श्रोत्रिये तूपसंपन्ने त्रिरात्रमशुचिर्भवेत् । मा
तुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च । उपसंपन्नो मै
त्र्यादियुक्तो गुणयुक्तो वा ॥ बृहस्पतिः । अहं माता
महाचार्यश्रोत्रियेष्वशुचिर्भवेत् । वृद्धमनुचेताः ॥ सं

स्थिते पक्षिणीं रात्रिं दौहित्रे भगिनीसुते। संस्कृते तु त्रिरा-
त्रं स्यादिति धर्मो व्यवस्थितः। पित्रोरुपरमे स्त्रीणां मूढानां
तु कथं भवेत्। त्रिरात्रेणैव शुद्धिः स्यादित्याह भगवान्य-
मः। श्वशुरयोश्च भगिन्यां च मातुलान्यां च मातुले।
पित्रोः स्वसरि तद्वच्च पक्षिणीं क्षपयेन्निशां। तथा। मा-
तुले श्वशुरे मित्रे गुरौ गुर्वंगनासु च। आशौचं पक्षिणीं
रात्रिं मृता मातामही यदि। विदेशस्थभगिन्यादिषु स्ना-
नाच्छुद्धिः। तथा च वृद्धविष्णुः। भगिन्यां संस्कृता-
यां तु भ्रातर्यपि च संस्कृते। मित्रे जामातरि प्रेते दौहित्रे भगि-
नीसुते। शालके तत्सुते चैव सद्यः स्नानेन शुद्ध्यति। अ-
त्र भ्रात्रपेक्षया भगिन्याः तदपेक्षया च भ्रातुः स्नाना-
च्छुद्धिः न तु भ्रातुर्भार्यांतरापेक्षया। तस्य तु पूर्वोक्तरी-
त्या निर्दशादिमरणे ज्ञेयं। तथा सन्निधाने। ग्रामे-
श्वरे कुलपतौ श्रोत्रिये च तपस्विनि। शिष्ये पंचत्वमा-
पन्ने शुचिर्नक्षत्रदर्शने। अत्र शिष्यश्रोत्रियौ निर्गुणौ
दिवा चेदाशौचमापतति तदा नक्षत्रदर्शनाच्छुद्धिः
रात्रौ चेत्समानन्यायत्वात्सूर्यदर्शनाच्छुद्धिः। असपि-
ण्डस्वेश्मनि मृत एकरात्रं। वृद्धविष्णुः। ग्राममध्यगतो
यावच्छवस्तिष्ठति कस्यचित्। ग्रामस्य तावदाशौचं
निर्गते शुचितामियात्। अनेनैव न्यायेन नगरेऽपि स्व-
सवीथ्यां यावच्छवस्तिष्ठति तावदाशौचमिति ज्ञेयं

उक्तप्रकारेणान्येपि गुरुलघ्वाशौचकल्प्याः सन्निहितविदेशस्थापेक्षयागुणवद्गुणापेक्षया व्यवस्थापनीयाः॥ क्षेत्रजादिषु याज्ञवल्क्यः। अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च। अहोरात्रमित्यनुवर्त्तते। अनौरसेषु क्षेत्रजदत्तकादिषु जातेषु मृतेषु च प्रतिलोमव्यतिरिक्तमन्यमाश्रिता अन्यगताः। प्रतिलोमाश्रितासु त्वाशौचाभाव एव। एतच्चासन्निधाने। सन्निधौ तु विष्णुः अनौरसेषु पुत्रेषु जातेषु च मृतेषु च। परपूर्वासु भार्यासु प्रसूतासु मृतासु च। अत्र च त्रिरात्रमित्यनुवर्त्तते। परः पूर्वः पतिर्यासां भार्याणां ताः परःपूर्वाः एवंविधाः स्वैरिण्याद्याः यमाश्रितास्तस्यापि त्रिरात्रमित्यर्थः। भार्यापुत्रशब्दयोः संबंधिशब्दत्वात् यस्य च भार्या यस्य च पुत्रस्तस्यैवाशौचं। सपिंडानां तु सद्यःशौचं। तथा च प्रजापतिः। अन्याश्रितेषु दारेषु परपत्नीसुतेषु च। गोत्रिणः स्नानशुद्धाः स्युस्त्रिरात्रेणैव तत्पिता। एतच्च सपिंडानां स्नानाच्छुद्धिः यत्र तु पितुस्त्रिरात्रं तत्र सपिंडानामेकाहः। एतदेव मरीचिः। सूतके मृतके चैव त्रिरात्रं परपूर्वयोः। एकाहस्तु सपिंडानां त्रिरात्रं यत्रैव पितुः। स्वदेशराजनि मृते मनुः। प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितः। ज्योतिषा सह वर्त्तत इति सज्योतिः अह्नि चेदस्तमानपर्यंतं। रात्रौ चेदुदयपर्यन्त

मित्यर्थः। राज्ञां विषयविशेषे आशौचाभावमाह। महीपतीनां नाशौचं हतानां विद्युता तथा। गोब्राह्मणार्थे संग्रामे यस्य चेच्छति भूमिपः। महीपतीनामाशौचाभावस्तु असाधारणप्रजापरिपालनप्रशांतिकपौष्टिकादौ। नित्यनैमित्तिकादिषु तु पूर्वोक्तैव व्यवस्था। यस्य मंत्रिपुरोहितादेरनन्यसाध्यमंत्राभिचारादिविषये राजा इच्छति तेन तद्विषये आशौचं न कार्यं। सूपकारादीनामप्यनन्यसाध्ये कर्मणि सद्यः शौचं। यदाह प्रचेताः कारवः शिल्पिनो वैद्या दासीदासास्तथैव च। राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्त्तिताः। कारवः सूपकारादयः। शिल्पिनश्चैल्लनिर्णेजकचित्रकारादयः तेषां च स्वीयस्वीयासाधारणकर्म्मस्वेव सद्यः शौचं नान्यत्र। तथा च विष्णुः। न राज्ञां राजकर्मणि न च व्रतिनां व्रते न सत्रिणां सत्रे न कारूणां कारुकर्म्मणि। शातातपः। मूल्यकर्म्मकराः शूद्रा दासीदासास्तथैव च। स्नाने शरीरसंस्कारे गृहकर्मण्यदूषिताः। एतदपि तद्विषयं। तथा। सद्यः स्पृश्यो गर्भदासो भक्तदासश्च ब्राह्मणः। चिकित्सको यत्कुरुते तदन्येन न शक्यते। तस्माच्चिकित्सकः स्पर्शे शुद्धो भवति नित्यशः॥ अथानुगमनाशौचं॥ तत्र याज्ञवल्क्यः ब्राह्मणो नानुगंतव्यो न शूद्रो न द्विजः क्वचित्॥

अनुगम्यामतिस्नात्वा स्पृष्ट्वाग्निं घृतभुक्शुचिः। द्वयं च-
स्नानादिजन्या शुद्धिः समानोत्कृष्टजातीयानुगमने। ब्रा-
ह्मणेन क्षत्रियानुगमने कृते वसिष्ठोक्तं। मानुषास्थि-
स्निग्धं स्पृष्ट्वा त्रिरात्रमाशौचमस्निग्धे त्वहोरात्रं शवा-
नुगमने चैवमिति। एवमित्यनेनाहोरात्रमतिदिश्यते।
वैश्यानुगमने पक्षिणी परिकल्पनीया। क्षत्रियापेक्षया
न्यूनत्वात्। शूद्रापेक्षयाधिकत्वात्। ब्राह्मणस्य शूद्रानु-
गमने। पराशरः। प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदु-
र्बलः। अनुगच्छन्नीयमानं स त्रिरात्रेण शुध्यति। त्रि-
रात्रे तु ततश्चीर्णे नदीं गत्वा समुद्रगां। प्राणायामशतं
कृत्वा घृतं प्राश्य विशुध्यति। अनेनैव न्यायेन क्षत्रियस्य
वैश्यशूद्रयोरनुगमने क्रमेणैकाहः पक्षिणी च वैश्यस्य
शूद्रानुगमने एकाह इत्यनुसंधेयं। पुलस्त्यः। कृच्छ्रपादो-
ऽसपिंडस्य प्रेतालंकरणे कृते। अज्ञानादुपवासः स्या-
दशक्तौ स्नानमिष्यते। ज्ञाने तु द्विगुणं। पारस्करः। मृत-
स्य बांधवैः सार्द्धं कृत्वा तु परिदेवनं। वर्जयेत्तदहोरात्रं दा-
नं श्राद्धादिकर्म च॥ अथाशौचसन्निपाते निर्णयः
तत्र यस्याशौचस्य यावान्कालस्तन्मध्ये तत्समस्य न्यू-
नस्य वा सन्निपाते पूर्वाशौचशेषेण शुद्धिरन्तरापतित-
स्य। तथा च याज्ञवल्क्यः। अंतरा जन्ममरणे शेषा-
होभिर्विशुध्यति। स्वल्पाशौचमध्ये दीर्घाशौचसन्नि-

पाते पूर्वशेषेण न शुद्धिः। यदाह शंखः। स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि। न पूर्वेण विशुद्धिः स्यान्मातुः कुर्यात्तु पक्षिणीम्। पितुः शेषेणेति। पित्राशौचकाले नैव शुद्धिर्न मात्राशौचशेषेणेत्यर्थः। पित्राशौचकालमध्ये माता यदि म्रियेत तदा पित्राशौचसमनंतरं मातुः पक्षिणीं कुर्यादिति तात्पर्यं। ब्रह्मपुराणे। आद्यं भागद्वयं यावत्सूतकस्य तु सूतके। द्वितीये पतिते चाद्यात्सूतकच्छुद्धिरिष्यते। अत ऊर्द्ध्वं द्वितीयान्तात्सूतकान्ताच्छुचिः स्मृता। एवमेव विचार्यं स्यान्मृतके सूतकान्तरे। अस्यार्थः सूतकस्य संबंधि चरमाहोरात्रस्य यदाद्यभागद्वयं दिवसस्य चतुर्धा विभागे यदहो भागात्मकं। तत्र द्वितीये सूतके पतिते आद्यात्सूतकाच्छुद्धिः। अत ऊर्ध्वं मस्तमयानंतरं सूतकांतरपाते द्वितीयसूतकान्ताच्छुद्धिरिति। अमुमेवाभिप्रायं प्रकटयन् द्वितीयसूतकान्तमप्याह। गौतमः। रात्रिशेषे सति द्वाभ्यां प्रभाते तिसृभिस्तथा। रात्रिमात्रावशेषेण पूर्वाशौचशेषेणाशुद्धिः। अपितु तदनंतरं द्वाभ्यां रात्रिभ्यां प्रभाते रात्रेः पश्चिमयामे जननादिसन्निपाते तिसृभी रात्रिभिः शुद्धिर्न पूर्वशेषेणैव। शातातपः। रात्रिशेषे द्व्यहाच्छुद्धिर्यामशेषे शुचिस्त्र्यहात्। इयं च शुद्धिः सूतिकामग्निदं च हित्वेतरसपिंडानां सूतिकामग्निदं हित्वेत्यघसंग्रहे स्मरणात्। शातातपः

अंतर्दशाहे जननात्पश्चात्स्यान्मरणं यदि। प्रेतमुद्दिश्य
कर्त्तव्यं पिंडदानं स्वबंधुभिः। प्रारब्धे प्रेतपिंडे तु मध्ये चे
ज्जननं भवेत्। तथैवाशौचपिंडांस्तु शेषान्दद्याद्यथावि
धि। एवमेव शावाशौचसन्निपातेपि। प्रजापतिः। आ
शौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत्। कर्तुस्तात्कालि-
की शुद्धिः पूर्वाशौचेन शुध्यति। जातकर्मादिकर्मणि
तात्कालिकी शुद्धिः॥ अथ दहनकालेग्निनाशे॥
तत्र यमः॥ यजमाने चितारूढे पात्रन्यासे तथाकृते।
वर्षाद्यभिहते चाग्नौ ततः पृच्छामि याज्ञिकाः। शेषं ल-
भ्या अरणिप्रभृतिकाष्ठशेषं लब्धेनैवाप्युत्पादनसम
र्थेन निर्मथ्य कृत्वाग्निमुत्पादनेनाग्निना दहेत्। अरण्या
दिकाष्ठशेषालाभे दग्धशेषकाष्ठस्य संबंधी यो मथि-
ताग्निस्तेन। तस्याप्यभावे अप्सु प्रक्षिपेदित्यर्थः। एवमनाहि
ताग्नेरपि न्यायस्य समानत्वात्। अयं तु विशेषः। आर-
ण्यभावात्तन्मथाभावादिति॥ अथ दशाहमध्ये द-
र्शपाते॥ तत्र भविष्यत्पुराणे। प्रवृत्ताशौचतन्त्र-
स्तु यदि दर्शः प्रपद्यते। समाप्य चोदकं पिंडान् स्नानमात्रं
समाचरेत्। आशौचसमाप्तिपर्यंतमिति शेषः। ऋष्य-
शृंगः। आशौचमंतरा दर्शो यदि स्यात्सर्ववर्णि-
तं। समाप्तिं प्रेततन्त्रस्य कुर्यादित्याह गौतमः। पैठी-
नसिः। आद्येन्दावेव कर्त्तव्याः प्रेतपिंडोदकक्रियाः।

द्विरब्दे तु कर्त्तारः पुनः प्राप्तं समश्नुते। द्विरब्दे चेद्द्व
ये। एकः प्राचीनः क्षीणश्चेद्द्वः अपरो भावी वृद्धिमान्।
एवं सामान्येन मातापितृविषयेऽपि दर्शएव पिंडोदकदा
नादिकं तत्र समाप्तिप्रसक्तौ श्लोकगौतमः। अंतर्दशाहे
दर्शश्चेत्तत्र सर्वं समापयेत्। पित्रोस्तु यावदाशौचं दद्या
त्पिंडं तिलांजलीन्। पित्रोरित्येव शेषः। मनुः। पित्रोरा
शौचमध्येऽपि यदि दर्शः समापयेत्। तावद्देवोत्तरं तत्र
पर्यन्तस्येच्छया हात्ययमिति। गालववचनं। तस्यत्वयमर्थः
पित्राशौचमध्येऽपि दर्शपाते समाप्तिरुत्तरतंत्रस्यापि चेत्
किमुतान्याशौचमध्य इति पितृव्यतिरिक्तसपिंडविषये उत्त
रतंत्रस्यादर्शकसमाप्तिप्रदर्शनार्थं न पुनः पितृविष
येऽपि नियमार्थमिति। भवतु वा पितृविषयेऽपि नियामकं
तथाप्यस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्नत्वित्यने-
न न्यायेन शिष्टाचारसहकृतेन पित्रोस्तु यावदा
शौचमित्यनेन गौतमवचनेन गालववचनं बाध्यत
इति पित्राशौचमध्ये दर्शपातेऽपि यावदाशौचं पिंडा
दिकं दद्यात्। इतरेषां तु दर्शावधिकमेवोत्तरसमापन
मिति विवेकः। अथवा क्षेत्रजस्य बीजिपितृविषयं दत्त
कादिपुत्राणां प्रतिग्रहीत्रादिमातापितृविषयं गालवव
चनं गौतमवचनं तु औरसपुत्रिकापुत्रमातापितृविष-
यं। अथवा औरसादीनां सर्वेषामपि स्वमातापितृविषये

आपदनापत्कल्पाध्ययनेन व्यवस्था विज्ञेया ॥ अथ
देशांतरगतस्य जीवद्वार्त्तानाकर्णने ॥ तत्र पितृवि-
षये जातूकर्ण्यः । पितरि प्रोषिते यस्य न वार्त्ता नैव चागतिः ।
ऊर्द्ध्वं पंचदशाद्वर्षात्कृत्वा तत्प्रतिरूपकं । कुर्यात्तस्य-
च संस्कारं यथोक्तविधिना ततः । पितृव्यतिरिक्तविषये ।
बृहस्पतिः । यस्य न श्रूयते वार्त्ता यावद्द्वादशवत्सरं । कु-
शपुत्रकदाहेन तस्य स्यादवधारणं । अस्य चैं पितृमेधि-
कारंभकालनियमस्त्वज्ञातमरणादिनस्य सांवत्सरिक-
कालनियमवद्विज्ञेयः । स च श्राद्धप्रकरणे वक्ष्यते । एवं
पैतृमेधिके कृते यदि जीवन्नागच्छेत्तदा तं घृतकुंभे स्नाप-
यित्वा शुभलग्ने उत्थाप्य जातकर्मादिभिश्चूडाकरणांतैः
संस्कृत्य पुनरुपनयनविधानेनोपनीयकंचनपर्वते द्वाद-
शाहं अशक्तौ त्रिरात्रं वा व्रतं कारयित्वा स्नानानंतरं पूर्वस्थि-
तभार्यां तदभावे अन्यां वोद्वाहयेत् । ततश्च स अग्नय आ-
युष्मपुरोडाशमष्टकपालं कुर्यादिति विहितामिष्टिमा-
युष्मतीं कृत्वाग्न्याधानं कृत्वा व्रात्यस्तोमेनेष्ट्वा तथै-
न्द्राग्नेन पशुना चेष्ट्वा अग्नीनादध्यात् । यदाह वृद्धम-
नुः । जीवन्यदि समागच्छेद्घृतकुंभे नियोज्य तं । उद्धृत्य
स्नापयित्वास्य जातकर्मादि कारयेत् । द्वादशाहं व्रतं कुर्या-
त्त्रिरात्रमथवास्य तु । स्नातोद्वहेत्तां भार्यामन्यां वा तद-
भावतः । अग्नीनाधाय विधिवद्व्रात्यस्तोमेन वा यजेत् ।

अथैं द्राग्नेन पशुनाग्निरिंगत्वा चतवनु। इष्टिमायुष्मतीं कु-
र्यादीप्सितां स्वरु.लूंस्तत इति। आहिताग्नेर्यत्र पुरोडाशा-
स्तत्रानाहिताग्नेश्चरुः। तथा च गृह्यप्रायश्चित्ते। यस्याहि-
ताग्नेः पुरोडाशास्तस्यानाहिताग्नेश्चरव इति॥ इह मदन
पारिजाते मदनक्षितिपालदानजलरूढे। स्तबकः पंच
मश्चासीदामोदाकृष्टपंडितभ्रमरः। मतिर्येषां शास्त्रेप्र-
कृतिरमणीया व्यवहृतिः। पराशीलंभ्रत्वाध्यं जगति स्र-
जवसेकनिपये। चिरं चित्ते तेषां मुकुरतलमूलेस्थितिमियादि-
यं व्यासारराघवप्रवरमुनिशिष्यस्य भणितिः॥ इति
पंडितपारिजातकेदारमल्लेत्यादिविरुदराजा
विराजमानस्य श्रीमदनपालनिबंधे मदनपारि
जाताभिधे पंचमस्तवकः॥

॥ दशाहादिरूपकालापगमेनाशौचस्तबके कु-
लव्यापिनो शुद्धिरभिहिता तदनंतरमिह स्तबके। द्रव्य
शुद्धिरभिधीयते॥ तत्र याज्ञवल्क्यः। सौवर्णराज
ताब्जानामूर्द्धपात्रग्रहाश्मनां। शाकरज्जुमूलफलवा-
सोविदलचर्मणां। पात्राणां चमसानां च वारिणा शु-
द्धिरिष्यते। सौवर्णं सुवर्णविकारः। राजतं रजतविकारः
अब्जं शंखशुक्तिमुक्ताफलादि। ऊर्ध्वपात्रं यज्ञियोलू-
खलादि। ग्रहाऐंद्रवायवादयः। अश्ममादृषदादि। मू-
लमार्द्रकादि। विदलं वेणुदलादि। विदलग्रहणांतद

कारणां छत्रादीनामुपलक्षणार्थं। चर्माऽजादीनां।त
च्चतद्विकारणां चरत्रादीनामुपलक्षणार्थं। पात्राणि
प्रोक्षणपात्रादीनि स्नेहरहितानि। चमसा होतृचमसा
दयः। एषां तेपरहितानां मूत्राद्युच्छिष्टस्पर्शमात्रे वारि-
णा शुद्धिः प्रक्षालनाच्छुद्धिः तथा। चरुस्रुकस्रुवसस्ने
हपात्राण्युष्णेन वारिणा। चरुः मृन्मयी चरुस्थाली
स्रुक् जुह्वादि। स्रुवः प्रसिद्धः सस्नेहपात्राणि प्राशि
त्रहरणादीनि। लेपरहितानि चर्वादीनि उष्णेन वारि
णा शुध्यंति। सौवर्णादीनां लेपरहितानामेव पूर्वो
क्तशुद्धिः। तथा च मनुः। निर्लेपं कांचनं भांडमद्भि
रेव विशुध्यति। अब्जमश्ममयं चैव राजतं चानुपस्कृतं।
अनुपस्कृतं उपस्कृतमुत्कीर्णरेखाद्युपेतं। न उपस्कृ
तं रेखादिरेखा तेषु मूत्राद्युच्छिष्टावस्थानरहितमित्यर्थः
काकमुखदूषितपात्रस्य शुद्ध्यंतरमाह। पुराणः। का
कश्वानिमुखावमृष्टं निर्लिखेच्छूपदमुखावमृष्टं
पात्रं न प्रयुंजीतेति। निर्लेखनं शस्त्रेरुपरितनावय
वापकर्षणं तत्क्षणमिति यावत्। यच्चापस्तंबेनोक्तं
गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि च। शुध्यं
ति दशभिः क्षारैः श्वकाकोपहतानि चेति। एतच्च स्व-
ल्पोपहतिविषयं। अत्र च क्षारो भस्म। एवं सर्वत्र न्यू-
नाधिकशौचकल्पनाः स्वल्पाधिकोपहतिविषयत्वे-

नयवस्थापनीयाः। उक्तेन वारिणा शुध्यंतीत्यनुवृत्तौ। याज्ञवल्क्यः। स्फ्यशूर्पाजिनधान्यानां मुसलोलूखलानसां। स्फ्यः काष्ठछुरिका यज्ञांगं। अनः शकटं। अत्र पुनः जिनग्रहणं यज्ञांगाजिनमात्रार्थं। एतेषामुक्तेन वारिणा वक्ष्यमाणमृदादिष्वन्यतमसहितेन शुद्धिरित्यर्थः।
बौधायनः। तैजसानां मूत्रपुरीषशुक्रासृक्कुणपसमवैरत्यंतवासितानां मासमावर्त्तनं स्वल्पसंसर्गे तु परिलेखनं स्पर्शमात्रोपघाते तु त्रिः सप्तकृत्वो भस्मना परिमार्जनमतैजसानामेवंभूतानामुत्सर्ग इति। अग्निसंयोगेन द्रवीकरणमावर्त्तनं। भस्मना परिमार्जनं कांस्यविषयं। यत्तु याज्ञवल्क्येन सौवर्णराजताब्जानामित्युपक्रम्य वारिणा शुद्धिरिष्यत इति केवलोदकमेवोपात्तं तदपि मृदादिसहितमेव वारि शुद्धिहेतुरिति ज्ञेयं। अत्र विशेषमाह हारीतः। अद्भिः कांचनरजतशंखशुक्तीनां ताम्रगुणवर्जनं स्नेहवैवर्ण्योपहतानां यवगोधूमकल्कायमाषमसूरमुद्गगोमयचूर्णैर्धावनं अम्लसवणाभ्यां ताम्राणां भस्मना कांस्यानां प्रणागतैललसिकतावघर्षणैः कार्ष्णायसानां शिलावघर्षणमार्जनैर्मणिमयानामिति। गुणांलोहतैक्ष्णसाधनं। ताम्रगुणवर्जनं ताम्रधापकर्षणं स्नेहवैवर्ण्योपहतं उच्छिष्टादिसंस्नेहेन विवर्णं यथा भवति तथोपहतमित्यर्थः। यवादिचूर्णानामेकार्थत्वाद्विकल्पः

उदकस्य तु सर्वत्र शोधनद्रव्यैः सह समुच्चयः। पूर्वः। सूति
कोच्छिष्टभांडस्य सुरामद्यहतस्य च। त्रिः सप्तमार्जनाच्छु
द्धिर्न तु कांस्यस्य तापनं। सूतिकोच्छिष्टादिभिः कांस्यव्य
तिरिक्ततैजसानामल्पकालोपघाते यवचूर्णादिभिर्मार्ज
नं शुद्धिहेतुः। कांस्यस्य तथा न। अपितु तापनं मार्जनं च
शुद्ध्यापादकमित्यर्थः। प्रतिमार्जनमुदकप्रक्षालनमा
वर्तते। द्विजातिभुक्तोच्छिष्टं स्पर्शे तु गव। ब्रह्मक्षत्रवि
शां चैव सकृत्संमार्जनाच्छुचिः। चतुर्थेन तु यद्भुक्तं चतु
र्भिस्तत्र मार्जनं। अग्नौ प्रक्षिप्य गृह्णीयाद्धस्तौ प्रक्षाल्य य
त्नतः। गोघ्रं गे तु च संस्पृष्टं तस्मात्तं शुचितामियात्। आप
स्तंबः। गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि च।
मणिमुक्ताप्रवालानां शुद्धिः प्रक्षालनेन तु। एतदल्पो
पहतिविषयं। मृद्भांडानामल्पोपहतौ। याज्ञवल्क्यः
पुनःपाकान्महीमयमिति। महोपहतौ तु परित्याग
एव। तथा च मनुः। मद्यैर्मूत्रपुरीषैर्वा ष्ठीवनैः पूय-
शोणितैः। संस्पृष्टं नैव शुध्येत पुनःपाकेन मृन्मयमि-
ति। स्मृत्यंतरं। भस्मना शुध्यते कांस्यं सुरया यन्न लि-
प्यते। सुरामूत्रपुरीषैस्तु शुध्यते तापलेखनैः। सुरादिग्र-
हणं शुक्रशोणितादीनामप्युपलक्षणार्थं। तथा। ता
म्रमम्लेन शुध्येनन चेदामिषलेपनं। आमिषेण तु यल्लि
प्तं पुनर्दाहेन शुध्यति। आदिपुराणे। सुवर्णरूप्यशं-

त्वाश्मशुक्तिरत्नमयानि च । कांस्यायस्ताम्ररैत्यानि त्रपु
सीसमयानि च । निर्लेपानि च शुध्यंतीति केवलेन जलेन तु
शूद्रोच्छिष्टानि शोध्यानि त्रिधा क्षाराम्लवारिभिः । अत्र द्र-
व्यत्रित्वात्त्रिधा त्रिप्रकारं मार्जनं न तु त्रिर्मार्जनं । शाता-
तपेन दशकृत्वो मार्जनविधानात् । गवाघ्रातेषु कांस्येषु
शूद्रोच्छिष्टेषु चा पुनः । दशभिर्भस्मभिः शुद्धिः श्वकाको-
पहतेषु च । एतच्च भस्मभिः शोधनं श्वकाकाद्युपहतौ
भूमौ सप्तरात्रनिखननानंतरं । तथा । सूतिकाशववि-
ण्मूत्ररजस्वलहतानि च । प्रक्षेप्तव्यानि तान्यग्नौ यद्य-
घातत्सहेदपि । यद्द्रव्यं यावदग्निप्रक्षेपं सहते यावता
ऽग्निप्रक्षेपेण न नश्यति तावत्कुर्यादित्यर्थः । बौधा-
यनः । तैजसानां मूत्राद्युपघाते पुनःकरणं गोमूत्रे वा सप्त
रात्रं परिवासनं । लेपनिर्हरणाशक्तौ पुनःकरणं । अन्य-
था गोमूत्रे वास इति व्यवस्था । अंगिराः । गंडूषं पादशौ-
चं च यः कुर्यात्कांस्यभाजने । षण्मासं भुवि निक्षिप्य पु-
नराकारमादिशेत् । पुनराकारं पुनःकरणं । तथा । लो-
हानां दहनाच्छुद्धिर्भस्मना गोमयेन च । दहनात्खन-
नाद्वापि शैलानामंभसापि वा । काष्ठानां तक्षणाच्छु-
द्धिर्मृद्गोमयजलैरपि । याज्ञवल्क्यः । तक्षणं दारुशृं-
गास्थ्नां गोवालैः फलसंभुवां । मार्जनं यज्ञपात्राणां
पाणिना यज्ञकर्मणि । उच्छिष्टस्नेहादिलिप्तानामे-

तेषां मृदुदकादिभिर्लेपानपाये तत्क्षणं लेपयुक्तावयवापनयनं शुद्धिः। फलसंभूवांनारिकेलादिफलैः संभूतानां प्रक्षालनेनापः अतल्लेपानां गोवालैरवघर्षणं शुद्धिः। यज्ञपात्राणां स्रुवादीनां प्रक्षालनादिभिः कृतशौचानां दर्भैर्दर्भपवित्रेण वा कर्माङ्गत्वसिद्ध्यर्थं हस्तेन मार्जनं कर्तव्यं ततो यज्ञकर्मणि विनियोजनीयानीत्यर्थः। हारीतशातातपौ। संहतानां तु पात्राणां यद्येकमुपहन्यते। तस्यैव शोधनं प्रोक्तं न तु तत्स्पृष्टिनामपि। शंखः। मलसंयोगजं तज्जं यस्य येनोपहन्यते। तस्य तच्छोधनं प्रोक्तं सामान्यं द्रव्यशुद्धिकृत्। यस्य शोध्यद्रव्यस्योच्छिष्टादिसंयोगजं। तज्जं स्वभावजं वा मलं येन भस्मादिनोदकसहितेनोपहन्यते तस्य तच्छोधनं भवतीत्यर्थः॥ इति तैजसादिपात्रशौचं॥ अथ वस्त्रादेः॥ तत्र यमः। यदि मूत्रपुरीषाभ्यां रेतसा रुधिरेण वा। चैलं समुपहन्येत तस्य शुद्धिः प्रक्षालयेत्तु तत्। यद्भस्मा न शुध्येत्तु वस्त्रं चोपहतं दृढं। छेदनं तस्य खण्डस्य यावन्मात्रमुपहन्यते। एतच्च छेदादिना शुध्यापादनमत्यन्ताप्राप्योत्तमवस्तुविषयं छिन्नं दग्धयोरपि परित्यागविधानात्। दरिद्रस्य त्वनुत्तमेष्वपि छेदादिना शुद्धिः। व्यासः। वस्त्रं पटं भस्मा शुध्येद्दग्धं वैदलमेव च। रज्ज्वादिकं चातिदुष्टं त्याज्यं तन्मात्रमेव च। वेणुवेत्रनडाग्रादिविकारो वैदलं शूर्पादि॥

यदातुबहूनिधान्यवासः।प्रभृतीनिराशीकृतानि चंडाला-
दिभिःस्पृष्टानि तत्रापि स्पृष्टान्यल्पानि अस्पृष्टानि च
स्पृष्टापेक्षयाधिकानि तत्र स्पृष्टमात्रमुद्धृत्य तस्योक्त
प्रक्षालनादिभिःशुद्धिःकार्याऽवशिष्टस्य प्रोक्षणाच्छु-
द्धिः। अनेनैवाभिप्रायेण याज्ञवल्क्यः। प्रोक्षणं संह-
तानांच बहूनां धान्यवाससां। तथा स्मृत्यंतरमपि। व-
स्त्रधान्यादिराशीनामेकदेशस्य दूषणे। तावन्मात्रं समु-
द्धृत्य शेषं प्रोक्षणमर्हति। शेषस्य प्रोक्षणादेव शुद्धिः। य-
दा पुनः स्पृष्टानि बहूनि अस्पृष्टानि चान्यानि तदा सर्वेषा-
मपि प्रक्षालनमेव। यदाह मनुः। अद्भिस्तु प्रोक्षणं
शौचं बहूनां धान्यवाससां। प्रक्षालनेन त्वल्पानाम-
द्भिः शौचं विधीयते। राशिगतं बहुत्वं च पुरुषग्राह्यभा-
रादूर्ध्वं वेदितव्यं। अनेको धार्ये दारुशिले भूमिसमे द्व-
ति बौधायनेनानेकोद्धार्येप्येवं द्रव्यांतरस्य स्वल्पशौच-
त्वदर्शनात्। याज्ञवल्क्यः। सोषैरुदकगोमूत्रैः शुध्य-
त्याविककौशिकं। सश्रीफलैरंशुपट्टं सारिष्टैः कुतपं त-
था। सगौरसर्षपैः क्षौममिति। ऊषं मृत्तिकाविशेषः। त-
त्सहितेनोदकेन गोमूत्रेण वाविककौशिकं शुध्यति ऊ-
र्णामयमाविकं। कृमिप्रभवं तसरीपट्टादि कौशिकं। यत्क-
लवंतं तु कृतमंशुपट्टं श्रीफलं बिल्वफलं। पार्वतछाग-
लोमकृतः कुतपः। अरिष्टफलं फेनकं। आतसीसूत्रनि-

र्मितं क्षौमं। एतच्चाधिकोपघाते। अल्पोपघाते तु प्रोक्षणमेव। द्रव्याविनाशेनैव शुद्धेरिष्टत्वादेतेषां क्षालनासहत्वाच्च। अत एव देवलः। कौशेयकुतपपट्टक्षौमदुकूलजाः। अल्पशौचा भवंत्येते शोषणप्रोक्षणादिभिः। तान्येवामेध्ययुक्तानि क्षालयेच्छोधनैः स्वकैः। तूलिकामुपधानं च पुष्परक्तांबरं तथा। शोषयित्वातपे किंचित्करैः संमार्जयेन्मुहुः। पश्चात्तु वारिणा प्रोक्ष्य विनियुंजीत कर्मणि। तान्यप्यतिमलिनानि यथावत्परिशोधयेदिति। तूलिकोपधाने चोर्णादिमये ऊर्णादिनिर्मितानामेव प्रक्षालनेन सर्वरूपनाशात्। पुष्परक्तग्रहणं प्रक्षालनासहहरिद्रादिरक्तस्यापि प्रदेशनार्थं एतदुक्तं भवति। यत्कुसुंभादिरागरक्तं क्षालनासहं तदातपशोषणादिना शुध्येत्। यच्च मांजिष्ठादिरक्तं कालेन न विनश्यति तत्प्रक्षालनेनैव नातपशोषणमात्रेण। आपस्तंबः। शुनोपहतं चैलमवगाहेत प्रक्षाल्य वा तं देशमग्निना संस्पृश्य पुनः प्रक्षाल्य पादौ वाचम्य प्रयतो भवति। वस्त्रसहितस्यैव नाभेरूर्ध्वं स्पर्शेऽवगाहः अधस्ताच्चेत्प्रक्षालनमिति विवेकः। प्रचेताः। चैलानामुपहतानामुत्स्वेदनं गंधलेपापनयनं तन्मात्रच्छेदनं वा नवानां वाससामभ्युक्षणादिति। उत्स्वेदनं क्वाथनं। नवानां वाससां यच्चाक्षुण्णानां। शंखलिखितौ उपहतानां प्रोक्षणमिति। अहतं यंत्रविमुक्तं। शंखः॥

शयनासनयानानां संहतवच्चौवं संहतवत्तराशीभूत
द्रव्यवत्। अनेनप्रोक्षणाच्छुद्धिरित्युक्तं भवति। अंगिरा
स्तु शयनादीनामपि संहतशब्दवाच्यत्वमाह। शयनास
नयानानि रोमवंधानि यानि चावस्त्राणि तानि सर्वाणि सं
हतानि प्रचक्षते॥ इति चैलादिशुद्धिः॥ अथ धान्या
देः॥ तत्र बौधायनः॥ व्रीहयः प्रोक्षणादद्भिः शाकमू-
लफलानि च। तन्मात्रस्यापहाराद्वा निस्तुषीकरणेन वा
विशुः। असिद्धस्यान्नस्य यन्मात्रमुपहन्यते। तन्मात्रमु-
त्सृज्य शेषस्य कंडनप्रक्षालने कुर्यात्। अल्पद्रव्यविषय
मेतत्। बहूनां तु काश्यपोक्तं द्रष्टव्यं प्रोक्षणपर्यग्निकरणा
वगाहनैर्व्रीहियवगोधूमानां विमर्षणप्रोक्षणैः फलीकृता
नां निघर्षणक्षालनप्रोक्षणैः शमीधान्यानामिति। अस्या-
र्थः। अनेकपुरुषोद्धार्याणां व्रीहियवगोधूमानां प्रोक्षण
पर्यग्निकरणावगाहनैः शुद्धिः। पर्यग्निकरणमग्न्यभिमर्श
नं। अवगाहनं प्रक्षालनं। अत्र प्रोक्षणादीनि सर्वाणि
सर्वत्र दोषाल्पत्वमहत्त्वापेक्षया योज्यानि न यथासंख्यं।
व्रीह्यादितंडुलानां फलीकृतानां विमर्शनेन प्रोक्षणेन च
शुद्धिः। विमर्शनमल्पानां बहूनां प्रोक्षणं। कंडनेन शुक्ली-
कृतानि रक्तक्षुद्रकणाश्च तंडुलाः फलीकृता इत्युच्यंते।
विमर्शनं पाणिभ्यां निर्मलीकरणं। शमीधान्यानां कोशी-
धान्यानां मुद्गादीनामेकपुरुषोद्धार्याणां निर्घर्षणं मर्दनं त-

तोल्पानां दलनेन। अनेकपुरुषोद्धार्याणां प्रोक्षणान्। य-
च्चतंडुलांस्तु परित्यज्येदिति तदल्पं ताल्पपरिमाणविष
यं। आदिपुराणे। गृहदाहे समुत्पन्ने दग्धे च पशुमानुषे
अभोज्यस्तद्गतो व्रीहिर्धातुद्रव्यस्य संग्रहः। मृन्मयेनाव
वद्धानां मध्ये भुवि च तिष्ठतां। यवमाषतिलादीनां न दोषं
मनुरब्रवीत्। ततः संक्रममाणोग्नौ स्थाने स्थाने च दह्यते
न च प्राणिवधो यत्र केवलं गृहदीपनं। तत्र द्रव्याणि स
र्वाणि गृह्णीयादविचारयन्। शंखः। पुष्पफलानां विष्किरा
वधूतानां प्रक्षालनमभ्युक्षणमित्येके। पर्णानामद्भिः प्र
क्षालनं सक्तुरुपयुक्तानामुत्सर्गः। विष्किरा ग्राम्यकुक्कु-
टादयः। अवधूतं पादावकीर्णं। विष्किरावधूतानामि-
ति सर्वत्रान्वेति। बौधायनः। असंस्कृतायां भूमौ न्यस्ता-
नां प्रक्षालनं परोक्षहृतानामभ्युक्षणमेवं क्षुद्रसमिधाम
संस्कृतानाममेध्याद्युपहतानामेकपुरुषोद्धार्याणां। क्षु
द्रसमिधां यज्ञियत्वेन प्रसिद्धपलाशादिव्यतिरिक्तापामा
र्गादिसमिधां। विष्णुः। मृत्पर्णतृणकाष्ठानां श्वभिक्षां
डालवायसैः। स्पर्शने विहितं शौचं सोमसूर्याग्निमारु
तैः। तथा। प्रोक्षणेन तु पुस्तकमिति च। व्यासः। रथ्या
कर्दमतोयानि नावः पथि तृणानि च। मारुतेनैव शुध्यं-
ति पक्वेष्टकचितानि च॥ इति धान्यादिशौचं॥ अथ
सिद्धान्नादेः॥ तत्र मनुः। पक्षिजग्धं गवा घ्रातमवधू-

तमवक्षुतं। दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुध्यति।
भक्ष्य पक्षिजग्धविषयमेतत्। अवधूतं यस्योपरि वासो
वधूतं। पक्षिभिरुत्क्षिप्योत्क्षिप्य त्यक्त्वा। अवक्षुतं य-
स्योपरि क्षुतं कृतं। मृद्ग्रहणमुदकभस्मनोरपि प्रदर्श-
नार्थं। तथा च याज्ञवल्क्यः। सलिलं भस्म मृद्वापि
प्रक्षेप्तव्यं विशुद्धय इति। यच्च पाकानंतरं केशकीटै-
र्दूषितं तस्यापि मृद्वादिप्रक्षेपेण शुद्धिः। यच्च केशकी
टादिभिः सह पक्वं तत्परित्याज्यमेव। अनेनैवाभिप्राये
ण गौतमः। नित्यमभोज्यं केशकीटावपन्नमिति। परा-
शरः। पक्वं द्रोणादिकं त्वन्नं काकश्वाद्युपघातितं। या-
समुद्धृत्य तन्मात्रं यत्तु लालाकृतं भवेत्। हेमोदकेन
चाभ्युक्षेद्राजतेनांबुनाथवा। अग्निज्वालोपसंस्पर्शा
त्सुवर्णमधुसर्पिषा। विप्राणां ब्रह्मघोषेण पूतं भोज्यं
च तद्भवेत्। द्रोणः षट्पञ्चाशदधिकं पलशतद्वयं। य-
च्च जमदग्निनाभिहितं। अन्नमेकाहिकं पक्वं श्वकाका-
द्युपघातितं। केशकीटावपन्नं च तदप्येवं विशुध्यति।
क्रीतस्यापि विदुष्ट एष एव मनीषिभिरिति। तदल्पध
नविषयं। वसिष्ठः। देवद्रोण्यां विवाहेषु यज्ञेषु प्रकृ
तेषु च। काकैः श्वभिश्च संस्पृष्टमन्नं तन्न विवर्जयेत्॥
तन्मात्रमन्नमुद्धृत्य शेषं संस्कारमर्हति। देवद्रोणी दे
वयात्रा। एतद्ग्रहणं बह्वन्नकार्यप्रदर्शनार्थं। प्रकृते

षु प्रस्तुतेष्ववश्यंभावि सर्वोत्सवेषु। संस्कारमपि स ए-
वाह। द्रवाणां प्लावनेनैव घनानां प्रोक्षणेन च। त्यागे
न मुखसंस्पृष्टमन्नं तच्चुचितामियात्। घनाः पर्पटवटका-
दयः। द्रव्याणां प्लवनेनैवेत्येषा शुद्धिर्गोरसस्य। यदा-
ह शंखः। अपणां घृततैलानां प्लावनं गोरसस्य च।
भांडानि प्लावयेदद्भिः शाकमूलफलानि च। अपणास-
मवेसजातीयद्रव्यप्लावनेन वाशुद्धिः। तथा। घृतदधि-
पयस्तक्राणामाकरभांडस्थितानां न दोषः। तथा। आ-
धारदोषे तु नयेत्याज्या त्याज्यं तदंतरं द्रवं। घृतं च पायसं क्षीरं तथैवे-
क्षुरसो गुडः। शूद्रभांडस्थितं तक्रं तथा मधु न दुष्यति
यमः। आममांसं घृतं क्षौद्रं स्नेहाश्च फलसंभवाः। म्ले-
च्छभांडस्थिता दुष्या निष्क्रांताः शुचयः स्मृताः। एतच्चा-
करभांडविषयं। अनाकरेपि द्रोणाधिकान्नोपसेचनसम-
र्थघृतादिविषयमिति। ततो न्यूनस्यापि देशकालाद्यपे-
क्षयाऽपणादिभिः शुद्धिर्भवति। यदाह बौधायनः।
देशं कालं तथात्मानं तथा द्रव्यप्रयोजनं। उपपत्तिमं-
वस्थां च ज्ञात्वा शौचं प्रकल्पयेदिति। शातातपः।
गोकुले कुंडशालायां तिलचक्रेक्षुयंत्रयोः। अमीमां-
स्यानि शौचानि स्त्रीषु बालातुरेषु च। कुंडशालाय-
ज्ञशाला। शंखः। निर्यासानां गुडानां च लवणानां
तथैव च। कुसुंभकुसुमानां च ऊर्णाकार्पासयोस्तथा

शोषात्तु कथिता शुद्धिरित्याह भगवान्यमः। निर्यासा हिं
गुप्रभृतयः। इदं स्वल्पपरिमाणविषयं। बहूनां तु बौ-
धायनोक्तं। बहूनां कुसुंभकार्पासगुडलवणानां स-
र्पिषां कठिनीभूतानां चंडालादिस्पर्शे शोषणेनैव शु-
द्धिरिति। अत्यल्पत्वे परित्यागः। तत्रापि। देशकाला
द्यपेक्षया परित्यागः। मनुः। उच्छिष्टेन तु संस्पृष्टो द्रव्य
हस्तः कथंचन। अनिधायैव तद्द्रव्यमाचांतः शुद्धता-
मियात्॥ इति सिद्धान्नादिशुद्धिः। अथ भूम्यादेः
त्रिविधा चाशोध्या भूमिः। तथा च देवलः। यत्र प्रसूयते
नारी म्रियते दह्यते थवा। चंडालाध्युषितं यत्र यत्र मूत्रादि
संगतिः एवं कश्मलभूयिष्ठा भूरमेध्या प्रकीर्त्तिता। श्व
शूकरखरोष्ट्राद्यैः संस्पृष्टा दुष्टतां व्रजेत्। अंगारतुषके
शास्थिभस्माद्यैर्मलिना भवेत्। एवं त्रिविधाया अपि शु
द्धिप्रकारमाह स एव। पंचधा वा चतुर्धा वा भूरमेध्या विशु·
ध्यति। यत्र मनुष्या दाह्यः यत्र चंडाल अध्युषितं एवंविधा
अमेध्या भूः पंचधा पंचभिर्दहनगंधार्द्रतादापनयनक्ष
यकालगोक्रमणसेकोल्लेखनैः शुध्यति। यत्र वा मनु-
ष्या जायंते म्रियंते वा अत्यंतविष्ठादिसंगतिर्वा तस्य द·
हनवर्जितैः पूर्वोक्तैश्चतुर्भिरेव शुद्धिः। दुष्टान्विता त्रिधा
द्वेधा शुध्यते मलिनैकधा। श्वशूकरखरादिभिः स्पृष्ट्वै·
कं मिलित्वा वा चिरकालमधिवासितायां दुष्टायां भुव

भिर्भिर्गोक्रमसेकोल्लेखनैः उष्ट्रग्रामकुक्कुटादिभिश्चि
रकालमधिवासिता यादुष्टाया मलिना या भुव उल्ले-
खनेनैकेन शुद्धिः। अत एव याज्ञवल्क्यः। भूशुद्धि-
र्मार्जनाद्दाहात्कालाद्गोक्रमणात्तथा। सेकादुल्लेखनाच्चैव गृहं
मार्जनलेपनात्। मार्जनं संमार्जन्या तृणादीनामप
सारणं। दाहस्तृणकाष्ठाद्यैः। कालः गंधलेपादि म-
यो यावता भवति सः। सेकः प्रवर्षणेन क्षीरगोमूत्र गो-
मयोदकैर्वा। उल्लेखनं खननं तक्षणं वा। लेपनं गोमयादि
भिः। अत्र भूग्रहणेनैव सिद्धे पुनर्गृहग्रहणं प्रतिदिनं मा
र्जनलेपनसाध्यर्थं। मार्जनमनुलेपनं च सर्वत्र समुद्दि
श्यते। यमः। खननात्पूरणाद्दाहाद्दाहाद्धि वर्षणाल्लेपना
त्। गोभिराक्रमणात्कालाद्भूमिः शुध्यति सप्तभिः।
एतच्च पूर्वोक्तहेतुभिः पुनःपुनर्दुष्टभूविषये समस्तं शुद्धि
हेतुः। अन्यत्र व्यस्तं यथायोग्यं। तथा। गोचर्ममात्रमब्बिं
दुर्गोः शोधयति पातितः। समूढमसमूढं वा यत्र ले-
पो न दृश्यते। यत्रैकादशशता व उपविंशति तावान्भूता
गो गोचर्म। गोः पृथिव्याः समूढं कृतसंमार्जनं अथवा
गोः पुच्छसंबंधवान्भुवि पतित उदकबिंदुर्गोचर्ममा
त्रं शोधयति गोपुच्छं स्पर्शयित्वा तेनोदकेन संकेकृते ए
केन बिंदुनेयती भूः शुद्धा भवतीत्यर्थः। संवर्त्तः। गृह
शुद्धिं प्रवक्ष्यामि अंतःस्थशवदूषणे। प्रोत्सृज्य मृन्मयं-

मांडं सिद्धमन्नं तथैव च । गृहादपास्य तत्सर्वं गोमयेनोपले-
पयेत् । गोमयेनोपलिप्याथ छागेनाघ्रापयेद्बुधः । ब्राह्म-
णैर्मंत्रपूतैश्च हिरण्यकुशवारिणा । सर्वमभ्युक्षयेद्वेश्म
ततः शुध्येदसंशयं । ऊर्ध्वं तु शावोपघाते भित्तिनस्तरां
सूर्यरश्मिप्रवेशाग्निज्वालाभिमर्शनं च । छिन्नाकृमि-
कीटाद्याक्रांताना माच्छादयेत् मेध्यां मृदमाहृत्येत्यर्थः ।
इति भूम्यादिशुद्धिः ॥ अथोदकादिशुद्धिः ॥ व्या-
सबृहस्पती । भूमिष्ठमुदकं मेध्यं वैतृष्ण्यं यत्र गोर्भवेत् ।
अव्याप्तं चेदमेध्येन तद्वदेव शिलागतं । देवलः । अ-
विगंधारसोपेता निर्मलाः पृथिवीगताः । अक्षीराश्चैव
गोपानादापः शुद्धिकराः स्मृताः । उद्धृता वाप्रशस्ताः
स्युः शुद्धैः पात्रैर्यथाविधि । एकरात्रोषितास्ताः स्युस्त्यजेदापः
समुद्धृताः । ताहृति सर्वमाम्नागोतृप्तिमात्रपर्याप्ताश्चल्पा
एवापः परामृश्यंते । अतो बहूदकात्तटाकादेरुद्धृता-
नां रात्र्युषितानां न दोषः । तटाकादेरुद्धृता अप्यापोरा-
त्रावनुषितोदकांतरसंभवतु शुद्धा एव । तथा । अक्षो-
भ्याणि तडागानि नदीवापीसरांसि च । चंडालाद्यशु-
चिस्पर्शे तीर्थतस्तु परिवर्जयेत् । तीर्थं उदकावतरणमार्गः ।
बृहस्पतिः । मृतपंचनखात्कूपादत्यंतोपहतात्त-
था । अपः समुद्धरेत्सर्वाः शेषं वस्त्रेण शोधयेत् । वह्नि-
प्रज्वालनं कृत्वा कूपे पक्वेष्टकाचिते । पंचगव्यं न्यसेत्प-

श्वान्नवतोयसमुद्भवे। हारीतः। वापीकूपतडागेषु मा
नुषं शीर्यते यदि। अस्थिचर्मविनिर्मुक्तैर्दूषितैश्च खरा
दिभिः। उद्धृतं तज्जलं सर्वं शोधनं परिमार्जनं। अस्थिच
र्मविनिर्मुक्तैः चिरकालवासेन विशीर्णैरित्यर्थः। देव-
लः। उद्धरेदुदकं सर्वं पंचपिंडान्मृदस्तथा। अचिरका
लोपघाते स्वल्पोपघातेपि हारीतः। घटानां शतमुद्धृ
त्य पंचगव्यं क्षिपेत्ततः। श्वभिः श्वपाकचंडालैर्दूषिते-
षु विशोधनं। आपस्तंबः। उपानतश्लेष्मविण्मूत्र
स्त्रीरजो मद्यमेव च। एभिर्विदूषिते कूपे कुंभांषष्टिमुद्ध
रेत्। विष्णुः। जलाशयेष्वप्यल्पेषु स्थावरेषु महीतले-
कूपवत्कथिता शुद्धिर्महत्सु च न दूषणं। स्थावरेषु प्रवा-
हरहितेषु। शातातपः। अंत्यैरपि कृते कूपे सेतौ वा-
प्यादिके तथा। तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्य-
ते। यमः। चंडालभांडसंस्पृष्टं कूपगतं जलं। गोमूत्रया-
वकाहारस्त्रिरात्रेणैव शुध्यति। तथा। नदी वेगेन शुध्यति
काश्यपः। दृतीनां रंजनं शुद्धिः। दृतिश्चर्मकोशः। रंजनं
कषायद्रव्येण शोधनं। यमः। प्रपास्वरण्ये घटगंध
कूपे द्रोण्यां जलं कोशगतास्तथापः। ऋतेपि शूद्रात्तदपे
यमाहुरापद्गतः कांक्षितवत्पिबेत्तत्। अयमर्थः। यद्य
पि शूद्रव्यतिरिक्तब्राह्मणादिवर्णसंबंधिप्रपादितया-
पितद्गतं जलं धर्मार्थे दीयमानमनापदि न पेयं आप-

दितुपेयं। यदि चेदरण्यगतं प्रपादिद्रोणी अश्मादिमयी
जलपा सर्वसाधारणी। कोशोद्धृतिः। अजा गावो महिष्य·
श्च ब्राह्मण्यश्च प्रसूतिकाः। दशरात्रेण शुध्यंति भूमिष्ठं च न·
वोदकं। बौधायनः। आत्मशय्यासनं वस्त्रं जायापत्यं
कमंडलुः। शुचीन्यात्मनः एतानि परेषामशुचीनि च।
हारीतः। स्वानुपपत्तौ शुच्यं तद्धीय समामनंति संस्पर्शे
सचैलं स्नानमेवं ह्याहेति। अयमर्थः। स्वीयशय्याद्यला
भे मुहूर्तेनकंवलादिना तत्स्वकीयं शय्यादिकमंतर्द्धीयो
पयोक्तव्यं यतः पतितादेः शय्यादिस्पर्शे सचैलं स्नानं
विधीयत इति। एतच्च बलात्पतितादिशय्यादिस्वीकार
प्राप्तौ वेदितव्यं॥ इत्युदकादिशुद्धिः॥ अथ शुद्धाप
वादः॥ तत्र मनुः॥ नित्यं शुद्धः कारुहस्तः पण्ये
यच्च प्रसारितं। ब्रह्मचारिगतं भैक्षं नित्यं मेध्यमिति स्थि
तिः। ब्रह्मचारीति विहितभिक्षावृत्तीनामुपलक्षणार्थे
भिक्षावृत्तावधिकारिणमाह मनुः। सांतानिकं यक्ष्य·
माणमध्वगं सार्ववेदसं। गुर्वर्थं पितृमात्रर्थं स्वाध्याया·
र्थ्यपतापिनः। न चैतान्स्नातकान्विद्याद्ब्राह्मणान्ध
र्मभिक्षुकान्। संतानप्रयोजनः सांतानिकः। दत्तसर्व·
स्वः सार्ववेदसः। रोग्युपतापी। यावता रथ्याप्रसर्पणा
दिरूपेणोपघातेन विना भैक्षं न सिध्यति तन्मात्रापवादो
त्र द्रष्टव्यः। तथा। श्वभिर्हतस्य यन्मांसं शुचि तन्मनुर·

मपीत्। क्रव्याद्भिश्चहतस्यान्यैश्चण्डालाद्यैश्च दस्युभिः।
क्रव्यादः श्येनादयः। दस्यवो व्याधाः। मक्षिका विप्रुषः
छाया गौरश्वः। सूर्यरश्मयः॥ रजो भूर्वायुरग्निश्च स्पर्शे
मेध्यानि निर्दिशेत्। मक्षिका गृहणाम वर्जनीयस्य शुनां
दंशादीनामुपलक्षणार्थं। विप्रुषश्च विज्ञाताकाराः। छा-
यानिषिद्धव्यतिरिक्ता। रजोपि निषिद्धेतरत्। शीलादेवाः
पवित्राणि ब्राह्मणानाम कल्पयन्। अद्भिरद्भिर्निर्णि
क्तं यच्च वाचा प्रशस्यते। एतच्चोपघातसंदेहे विज्ञेयं।
शंखः। नारीणां चैव वत्सानां शकुनीनां शुना मुखं। रतौ
प्रस्रवने वृक्षे मृगयायां सदा शुचिः। यमः। मुखतो गौरमे
ध्याजो मुखतस्तथा। पृष्ठतो गौर्गजः स्कंधे सर्वतोश्वः शुचि
स्तथा। अदुष्टं काञ्चनं गावः स्त्रीमुखं कुनपं क्षुरं। न दूषयं
ति विद्वांसो यज्ञेषु चमसं तथा। काञ्चनस्यालंकरणीभूतस्य
स्वेदादिदोषाभावप्रतिपादनपरं। उच्छिष्टाद्युपहतस्य-
शुध्यभिधानात्। आकराः शुचयः सर्वे शकुनिः फल
पातने। श्वा मृगग्रहणे मेध्यः स्त्रीमुखेषु वा रुणी। आक-
राः सुराकरव्यतिरिक्ताः। आकराः शुचयः सर्वे जपित्वा सु-
राकरमिति पैठीनसि स्मरणात्। ब्राह्मणभार्याया अ-
पि शूद्रायाः पीतमद्याया बुद्धिपूर्वकं गंधरसास्वादनरहि
तं मुखं रतिसंसर्गे शुद्धमेवेत्यर्थः। दधिसर्पिः पयः क्षौद्रं भां
डे दोषो न विद्यते। मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिः

मार्जारस्याशुचित्वं कर्मकालादन्यत्र तत्र स्नानविधानात् ॥
अत्रिः । मधुपर्के च सोमे च अप्सु प्राणाहुतीषु च । नोच्छिष्ट-
स्य भवेद्दोषस्त्वत्रेश्च वचनं यथा । अप्सु भोजनानंतरममृता
पिधानमसीति अपनयनीकरणार्थं या आपो गृह्यंते ताः । मधु-
पर्कोच्छिष्टत्वं मंत्रोच्चारविषयं । बृहस्पतिः । पादौ शुची
ब्राह्मणानामजाश्वस्य मुखं शुचिः । गवां पृष्ठानि मेध्यानि स-
र्वगात्राणि योषितां । उपहतिरहितब्राह्मणचरणस्पृष्टं वस्तु
शुद्धमित्यर्थः । एवं ब्राह्मणव्यतिरिक्तचरणस्पर्शो दोषावह
इत्युक्तं भवति । अनुष्ठासंततताचारावातोद्धूताश्च रेणवः । स्त्रि-
यो वृद्धाश्च बालाश्च न दुष्यंति कदाचन । षट्त्रिंशन्मते । तांबूले
च फले चैव भुक्तस्नेहावशिष्टके । दंतलग्नस्य संस्पर्शे नोच्छि-
ष्टस्तु भवेन्नरः । दंतलग्ने तु विशेषो भोजनप्रकरणेऽभिहितः ।
त्वग्भिः पत्रैर्मूलफलैस्तृणकाष्ठमयैस्तथा । सुगंधिभिस्तथा द्र-
व्यैर्नोच्छिष्टस्तु भवेद्द्विजः । याज्ञवल्क्यः । मुखजा विप्रुषो
मेध्यास्तथाचमनविंदवः । श्मश्रु चास्यगतं दंतसक्तं त्यक्त्वा
ततः शुचिः । मुखजा विप्रुषः श्लेष्मविंदवो मुखनिर्गताः आचम-
नप्रापका न भवंति । अत्र विशेषमाह गौतमः । न मुख्या विप्रुष
उच्छिष्टं कुर्वंति न चेदंगे निपतंतीति । बृहस्पतिः । द्राक्षेक्षुयं-
त्राकरकारुहस्ता गोदोहनीयंत्रविनिःसृतानि । बालैरथस्त्री-
भिरनुष्ठितानि प्रत्यक्षदृष्टानि शुचीनि तानि । यंत्रविनिःसृता
नि द्राक्षरसादीनि बालैः स्त्रीमिश्रकृतानि रथ्याप्रसर्पणा

द्भिर्निमित्तैर्येन्नाचमनप्राप्तिस्तन्नाचमनमकृत्वापि यान्यन्यवस्तुस्पर्शपाकादीनि कृतानि तानि प्रत्यक्षतो दृष्टान्यपि शुद्धानि। स्वल्पोपहतियुक्तैर्बालकैस्तथा स्त्रीभिश्च दृष्टानि कृतानि च प्रत्यक्षतो दृष्टान्यशुचिभिः कृतानीति ज्ञातान्यपि शुध्यंतीत्यर्थः॥ इह मदनपारिजाते मदनक्षितिपालदानजलरूढे। स्तवको हि षष्ठ आसीदामोदाकृष्टपंडितभ्रमरः। मतिर्येषां शास्त्रे प्रकृतिरमणीया व्यवहृतिः परा शीलं श्लाघ्यं जगति कृजवस्ते कतिपये। चिरं चित्ते तेषां मुकुरतलभूते स्थितिमियादियं व्यासाररायप्रवरमुनिशिष्यस्य भणितिः॥ इति पंडितपारिजातके दारमल्लेत्यादिविरुदराजीविराजमानस्य श्रीमदनपालस्य निबंधे मदनपारिजाताभिधे षष्ठस्तवकः॥

इत्थमाशौचादिरूपकालापगमेन कुलव्यापिनी शुद्धिरभिहिता। तदनंतरं च श्राद्धविधेः क्रमप्राप्तत्वेपि शुद्धिप्रसंगात्पूर्वस्तवके द्रव्यशुद्धिर्निरूपिता सांप्रतं प्रासंगिकं परिसमाप्य क्रमप्राप्तश्राद्धविधिरेव प्रतन्यते। तत्रादौ श्राद्धमहिमा॥ तत्र याज्ञवल्क्यः॥ आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च। प्रयच्छंति तथा राज्यं प्रीता नृणां पितामहाः। मार्कंडेयपुराणे। तान्सर्वान्यजमानो वै श्राद्धं कुर्याद्यथाविधि। समाप्यायते वत्सयेन मृगाश्चतत्स्तन्नप्रकिरणं मनुमनुष्यैः क्रियते भुवि। तेन तृप्तिमुपा-

यांति ये पिशाचत्वमागताः। यदंबु स्नानवस्त्रोत्थं भूमौ पतति
पुत्रक। तेन ये तरुतां प्राप्तास्तेषां तृप्तिः प्रजायते। यास्तु गात्रां
बुकणिकाः पतंति धरणीतले। ताभिराप्यायनं तेषां ये देव
त्वं कुले गताः। ये चादंताः कुले वालाः क्रियायोग्या ह्यसं-
स्कृताः॥ विपन्नास्ते तु विकिरसंमार्जनजलाशिनः। भुक्त्वा
चाचमतां यच्च जलं यच्चांघ्रिसेचने। ब्राह्मणानां तथैवा-
न्येन तृप्तिं प्रयांति वै। तेन नैके कुले तत्र तत्तद्योन्यंतरं गताः
[illegible]स्याप्यायनं वत्स सम्यक्श्राद्धक्रियावतां॥ अथ श्राद्ध
स्वरूपं॥ तत्रापस्तंबः॥ अथैतन्मनुः श्राद्धशब्दं कर्म
प्रोवाच प्रजानिःश्रेयसार्थं तत्र पितरो देवता ब्राह्मणस्त्वाह
वनीयार्थे मासि मासि कार्यमपरपक्षस्यापराह्णः श्रेयानिति
श्राद्धमिति शब्दो वाचको यस्य तत्कर्म श्राद्धशब्दं। तस्मि-
न्कर्मणि देवताः पितरो वसुरुद्रादित्यरूपाः। ब्राह्मणस्त्वाह
वनीयवत्त्यक्तद्रव्यप्रतिपत्तिस्थानत्वादाहवनीयस्था-
ने भवतीत्यर्थः। एतदुक्तं भवति। पित्रुद्देशेन त्यक्तस्य द्रव्य-
स्य ब्राह्मणस्वीकरणांयत् एतद्विशिष्टं श्राद्धस्य प्रधानं रूपमिति।
अत्र पितृदेवताके कर्मणि मुख्यः श्राद्धशब्दः यथा नित्याग्निहो-
त्रेऽग्निहोत्रशब्दः। देवश्राद्धादौ गौणः प्रयोगः स च तद्धर्मप्राप्त्यर्थः
यथा कुंडपायिनामयने मासमग्निहोत्रं जुहोतीत्यग्निहोत्रश-
ब्दप्रयोगो नित्याग्निहोत्रधर्मप्राप्त्यर्थः। अग्नीषोमीयं पशुमाल
भेतेत्यत्र यथाग्निःसोमश्चमिति लैकदेवतानथात्र पित्रादीनां

नमिलितानां देवतात्वमपितु प्रत्येकमेव। पित्रे पितामहाय प्रपितामहायेति विष्णादिभिः पृथक् पृथक् चतुर्थ्येकवचनांतत्वेन निर्देशात्। यस्तु पितृभ्यो दद्यादित्यादिवचने षु चतुर्थी बहुवचन निर्देशः स चाभिधानसौकर्यार्थैक विभक्त्यंतत्वेन निर्देशो गर्गा भोज्यंतामितिवत्। यथा गर्गाः प्रत्येकमेव भोज्या एवं पितरोपि प्रत्येकमेव। तस्मान्न व्यासज्यवृत्ति देवत्वमपितु प्रत्येकमेव। तथान सपत्नीकस्यापि पित्रादेर्देवतात्वं। प्रापकप्रमाणाभावात्। स्वभर्तृपिंडांशेनैव पत्नीनां तृप्तिविधानात् भर्तुः प्राधान्यं पत्नीनां च प्राधान्यमिति समप्रधानत्वाभावात्। तथा च शातातपः। नस्त्रीणां पृथग्दद्यादवसानदिनादृते। स्वभर्तृपिंडमात्राभ्यस्तृप्तिरासां यतः स्मृतेति॥ अथ श्राद्धभेदाः॥ तत्र विश्वामित्रः॥ नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिंडनं। पार्वणं चेति विज्ञेयं गोष्ठ्यां शुद्ध्यर्थमष्टमं। कर्मांगं नवमं प्रोक्तं दैविकं दशमं स्मृतं। यात्रास्वेकादशं प्रोक्तं पुष्ट्यर्थे द्वादश स्मृतमिति। एतल्लक्षणानि च॥ भविष्यत्पुराणे॥ अहन्यहनि यच्छ्राद्धं तन्नित्यमिति कीर्तितं। वैश्वदेवविहीनं तदशक्तावुदकेन तु। एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते। तदप्यदैवं कर्तव्यमयुग्मान्भोजयेद्द्विजान्। कामाय विहितं का-

मार्याविहृतकास्यमभिप्रेतार्थसिद्धये। पार्वणेनविधानेनतदप्युक्तंस्व-
गाथिपवृद्धौयत्क्रियतेश्राद्धंवृद्धिश्राद्धंतदुच्यते। सर्वंप्रदक्षिणं
कार्यंपूर्वाह्णेचोपवीतिना। गंधोदकतिलैर्युक्तंकुर्यात्पात्र
चतुष्टयं। अर्घार्थंपितृपात्रेषुप्रेतपात्रंप्रसेचयेत्। येसमा
नाइतिद्वाभ्यामेतत्ज्ञेयंसपिंडनं। नित्येनतुल्यंशेषं-
स्यादेकोद्दिष्टंस्त्रियाअपि। अमावास्यांयत्क्रियतेत
त्पार्वणमितिस्मृतं। क्रियन्तेवापर्वणियत्तत्पार्वणमिति
स्थितिः। गोष्ठ्यांयत्क्रियतेश्राद्धंगोष्ठीश्राद्धंतदुच्यते। ब
हूनांविदुषांसंपत्सुखार्थंपितृतृप्तये। क्रियतेशुद्धयेय
त्तुब्राह्मणानांतुभोजनं। शुद्ध्यर्थमितितत्प्रोक्तंवैनते
यमनीषिभिः। निषेककालेसोमेचसीमंतोन्नयनेत-
था। ज्ञेयंपुंसवनेचैवश्राद्धंकर्मांगमेवच। देवानुद्दि-
श्ययच्छ्राद्धंतत्तुदैविकमुच्यते। हविष्येणविशिष्टेन
सप्तम्यादिषुयत्नतः। गच्छेद्देशांतरंयस्तुश्राद्धंकु-
र्यात्तुसर्पिषा। यात्रार्थमितितत्प्रोक्तंप्रवेशेचनसंशा-
यः। शारीरोपचयेश्राद्धमर्थोपचयएवच। पुष्ट्यर्थ
मेतद्विज्ञेयमौपचयिकमुच्यते। वृद्धिःपुत्रजन्मविवा
हादिः। नित्येनावश्यकेनैकोद्दिष्टेनपार्वणेनचतुल्यं
शेषमंगजातंभवति। सपिंडीकरणस्योभयात्मक-
त्वात्। एकोद्दिष्टंस्त्रियाअपिएकोद्दिष्टंसपिंडीकरणं।
उभयात्मकस्यैकदेशेननिर्देशः। क्रियन्तेवापर्वणियत्

अन्नपर्वसंक्रांत्यादि। गोष्ठीश्राद्धं श्राद्धगोष्ठ्यां क्रियमा-
णमायांतस्य संगस्य च श्राद्धं तद्गोष्ठीश्राद्धं। कल्पतरौ त्वन्य
था। गोष्ठीश्राद्धकर्तृसमुदायः। संपत्सुखार्थमिति। संप
च्छ्राद्धसामग्री। तया यत्सुखं तदर्थं। अयमर्थः। बहूनां
विदां केनापि निमित्तेन युगपत्तीर्थश्राद्धादिके कर्त्तव्यत
या प्राप्ते देशकालादिवशात्पृथक्पाकाद्यसंभवे संभूय
श्राद्धसामग्रीसंपादनेन यच्छ्राद्धं क्रियते तद्गोष्ठीश्राद्धमि-
ति। निषेककालेत्यादि। एतच्च श्रौतस्मार्त्तसकलकर्मो
पलक्षणं। एतच्च वृद्धिश्राद्धवत्कर्त्तव्यं। कर्मांगं वृद्धिवत्
कृतमिति पारस्करेणाभिधानात्। कर्मांगसंज्ञाकरणम-
करणे कर्मवैगुण्यद्योतनार्थं। दैविकं तु नित्यश्राद्धवत्कु
र्यात्। अत एव दैविकमित्यनुवृत्तौ पारस्करः। तन्नित्य
श्राद्धवत्कुर्याद्द्वादश्यादिषु यत्नत इति। गच्छन्देशांतर-
मिति। तीर्थयात्रार्थं देशांतरगमनसमये यात्रां कृत्वा पु-
नर्गृहप्रवेशे चेति ज्ञेयं। सर्पिषा सर्पिःप्रधानकेन। तथा
शरीरोपचये। शरीरोपचयनिमित्तरसायनादिप्रयोग
काले॥ अथाधिकारिणः॥ तत्राशौचस्तवके पुत्रा-
द्यास्त्वधिकारिणो निरूपिताः। सांप्रतं केषुचित्कर्मविशेषे
षु केषां च नाधिकारो निरूप्यते॥ तत्र विष्णुपुराणे प-
राशरः। पूर्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः क्रियाः
त्रिप्रकाराः क्रिया ह्येतास्तासां भेदान् शृणुष्व मे। आद्या-

द्वादशाहाच्च मध्येयाः स्युः क्रिया मताः। पूर्वास्तामध्यमा
मासि मास्येकोद्दिष्टसंज्ञिताः। प्रेते पितृत्वमापन्ने सपिंडी
करणादनु। क्रियंते याः पित्र्याः प्रोच्यंते तान्नृपोत्तराः। पि-
तृमातृसपिंडैस्तु समानसलिलैस्तथा। तत्संघातगतै-
श्चैव राज्ञा वा धनहारिणा। पूर्वाः क्रिया मध्यमाश्च पुत्रा
द्यैरेव चोत्तराः। दौहित्रैर्वा नरश्रेष्ठ कार्यास्तत्तनयैस्तथे-
ति। पूर्वाः क्रिया मध्यमाश्च कर्तव्या इत्यर्थः। पुत्राद्यैर्भ्रा
तृसंतत्यंतैः पुत्रः पौत्रः प्रपौत्रो वा तद्वद्भ्रातृसंततिरिति
तैनेवोक्तत्वात्। दौहित्रे तु भविष्यत्पुराणे विशेषः। व्य-
थान्वतस्योपि सुतः पितुः कुर्यात्क्रियां नृप। उदकाद्यां मह्य
बाहो दौहित्रोपि तथार्हति। एवंच साक्षाच्च ब्रह्मचारिणा
उदकदानादिकर्तृत्वविधिर्नास्ति तत्र व्रतलोपो भवतीति
गम्यते। मातामहश्राद्धाधिकारे पुलस्त्यः। मातुः पितृ-
रमारभ्य त्रयो मातामहाः स्मृताः। तेषां तु पितृवच्छ्राद्धं
कुर्युर्दुहितृसूनवः। पितृवच्छ्राद्धं पार्वणं। तथा। पितरो
यत्र पूज्यंते तत्र मातामहा ध्रुवं। अविशेषेण कर्तव्यं वि-
शेषान्नरकं व्रजेत्। सर्वत्र पितृश्राद्धे मातामहश्राद्धमपि
कर्तव्यमित्यर्थः। अत्र कंचिदपवादमाह कात्याय-
नः। कर्षूसमन्वितं मुक्त्वा तथान्यच्छ्राद्धषोडशं। प्रत्या
ब्दिकं च शेषेषु पिंडाः स्युः षडिति स्थितिः। कर्षूसमन्वितं
सपिंडीकरणं। अयं च विवेकः। यस्तु धनहारी दौहित्रः

सनव श्राद्धादिकमपि कुर्यात्। इतरस्तु अमावास्यादौ ष-
ड्दैवतं कुर्यात्। तत्र मातामहश्राद्धाकरणे प्रत्यवैतीति न
तु सपिंडीकरणादाविति॥ अथामश्राद्धाधिकारिणः
तत्र कात्यायनः। आपद्यनग्नौ तीर्थे च प्रवासे पुत्रजन्म-
नि। आमश्राद्धं प्रकुर्वीत भार्यारजसि संक्रमे। यस्य यजमा
नस्य भार्या ऋतुमती तत्र पाककर्त्रभावे नित्यनैमित्तिकश्रा
द्धेषु मासिकसांवत्सरिकव्यतिरिक्तेषु स यजमान आम
श्राद्धाधिकारी भवतीत्यर्थः। यच्चापरपक्षमध्ये प्रतिपदा
दिष्वत्यंतमदिनमेव श्राद्धं क्रियते। तन्नित्यकाम्यत्वेनो
भयात्मकं। तथासति तत्रैत्केचलनित्यत्वबुद्ध्यानुष्ठीये-
त अथ च यजमानभार्यारजस्वलात्वस्य च दिनांतरे ब्रा-
ह्मणाद्यसंभवः पाककर्त्रंतरासंभवश्च तदामावास्याश्रा
द्धवदेवामान्नेव कुर्यात्। अथ कामनयानुष्ठीयते तदा-
यदा शक्नुयात्तदा कुर्यादिति श्राद्धार्थं मुख्यपाकानिष्प
त्तौ पंचमाहादिषु कर्तव्यं। एवं सकलपक्षश्राद्धे पंच-
म्यादिपक्षश्राद्धे दशम्यादिपक्षेऽप्येवं वेदितव्यं। बौधा-
यनः। संक्रमेऽन्नद्विजाभावे प्रवासे पुत्रजन्मनि। हेम-
श्राद्धं पाकासंभवे ब्राह्मणासंभवे वा भवति। अत्र शि-
ष्टाचारः प्रमाणं। एवं तीर्थश्राद्धे च। सुमंतुः। पाकाभा
वेऽधिकारः स्याद्विप्रादीनां नराधिप। अपत्नीनां महा
बाहो विदेशगमनादिभिः। सदा चैव तु शूद्राणामाम-

श्राद्धं विदुर्बुधाः। आत्मनो देशकालाभ्यां वैक्लवे समुपा
गते। आपद्यनग्नौ तीर्थे च प्रवासे यज्ञसंभवे। चंद्रसू-
र्यग्रहे चैव दद्यादामं विशेषतः। जमदग्निः। यावत्स्या
त्साग्नियं युक्त उत्सन्नाग्निरथाग्नियः। आमश्राद्धं तथा कु
र्याद्धस्तेग्नौ करणं भवेत्। प्रचेताः। स्त्रीशूद्रः स्वपच
श्चैव जातकर्मणि चाप्यथ। आमश्राद्धं तथा कुर्याद्विधि
ना पार्वणेन तु। स्वपचः स्वयंपचः॥ हारीतः। श्राद्ध
विघ्ने द्विजातीनामामश्राद्धं प्रकीर्त्तितं। अमावास्यादि-
नियतं माससंवत्सरादृते। मासिकमाब्दिकं च पक्का-
न्नेनैव कर्त्तव्यमिति। यमः। शूद्रस्य सर्वदामान्नमेव।
आमश्राद्धे विशेषमाह। व्यासः। आमं दद्यात्तु कौंते
य दद्यादन्ने चतुर्गुणं। यानि च द्वैगुण्यविधायका-
नि वचनानि तानि चातुर्गुण्यदानाशक्तौ वेदितव्यानि
चातुर्गुण्यं च पुरुषाहारापेक्षया। तथा। सिद्धान्ने तु
विधिर्यः स्यादामश्राद्धेप्यसौ विधिः। आवाहनादि
सर्वः स्यात्पिंडदानं च भारत। दद्याद्यद्द्विजातिभ्यः शृ
तं चाशृतमेव वा। तेनाग्नौ करणं कुर्यात्पिंडांस्तेनैव नि-
र्वपेत्। षड्त्रिंशन्मते। आमश्राद्धं यदा कुर्यात्पिंडदानं
कथं भवेत्। गृहपाकात्समुद्धृत्य सक्तुभिः पायसेन वा
पिंडदानं भवतीति शेषः। आमद्रव्यगृहपाकसक्तुपा
यसेषु यथालाभं व्यवस्था। एतच्चामश्राद्धं हेमश्राद्धं

च पार्वणश्राद्धाधिकारिणा पार्वणवद्देवकर्त्तव्यं। य
च्चांगं साक्षान्निषिद्धं यच्च लुप्तप्रयोजनं। तन्निवर्त्तते।
केषुचिन्मंत्रेषूहोपि भवति। अत एव मरीचिः। आ
वाहने स्वधाकारे मंत्रा जह्याविसर्जने। अन्यकर्मण्य
नूह्याः स्युरामश्राद्धविधिः स्मृतः॥ अयमर्थः। आ
वाहने आवाहनमंत्रेषु शाचुशात आवह पितॄन्हविषे-
अत्तवे इत्यत्र अत्तव इति पदस्थाने स्वीकर्त्तव इति प-
दस्योहा कर्त्तव्यः। स्वधाकारे नमो वः पितर इष्व इत्या
दिमंत्रे इष इति पदस्थाने आमद्रव्याय इति पदस्योहः
विसर्जनमंत्रे वाजे वाजे इति मंत्रे तृप्ता यात पथिभिर्देवयानै
रित्यत्र तृप्ता इति पदगत क्त प्रत्ययस्थाने लोट् प्रत्ययो
हेन तृप्यतइत्यूहः कार्यः। अन्यकर्मणि विक्षोहव्यं रक्ष
सेत्याशौह इति॥ अथ श्राद्धदेशः॥ तत्र मनुः। शु-
चिदेशं विविक्तं च गोमयेनोपलेपयेत्। दक्षिणाप्रव
णं चैव प्रयत्नेनोपपादयेत्। स्रनः शुचितीर्थदेशं गृह
प्रदेशं वा अन्यकृताशुचिपरिहारार्थं विविक्तं केशादि
रहितं कृत्वा गोमयेनोपलेपयेत्। तद्देशं शुद्धनादि
भिर्दक्षिणाप्रवणां दक्षिणां दिशं प्रत्युदकादिसर्पण
योग्यं कुर्यादित्यर्थः। यत्तु शंखेन कृत्रिमभूनिषेधः कृ
तः गोगजाश्वादिपृष्ठेषु कृत्रिमायां तथा भुवि। न कु-
र्याच्छ्राद्धमेतेषु पारक्यादिषु भूमिष्विति। अयं च निध

उन्नताकृत्तवेदिकादिविषयः। विष्णुधर्मोत्तरे। दक्षि-
णाप्रवणे देशे तीर्थादौ वा गृहेऽपि वा। भूसंस्कारादिसंयु-
क्ते श्राद्धं कुर्यात्प्रयत्नतः। तीर्थमृषिसेवितं सलिलं। आ
दिशब्दो ऋषिसेविताश्रमादिपरः। यमः। परकीयप्रदे
शेषु पितॄणां निर्वपेत्तु यः। तद्भूमिस्वामिपितृभिः श्राद्ध
कर्म्म विहन्यते। परकीयप्रदेशाः परपरिगृहीतगृहाः न
तु तीर्थादयः। तेषामस्वामिकत्वेन सर्वसाधारण्यात्।
तथा च पुराणे स्मर्यते। अटवी सर्वतः पुण्या नदीती
र्णानि यानि च। सर्वाण्यस्वामिकान्याहुर्न हि तेषु परि-
ग्रहः। वनानि गिरयो नद्यः तीर्थान्यायतनानि च। देव
खाताश्च न स्वामी तेषु विद्यत इति। आयतनानि देवादि-
सेवितानि। गर्त्ता अकृत्रिमाः क्षेत्रविशेषा ब्रह्मयोन्याद-
यः। यमः। रूक्षं कृमिहतं क्लिन्नं संकीर्णं निष्टगंधकं
देशं त्वनिष्टशब्दं च वर्जयेच्छ्राद्धकर्म्मणि। अग्निदग्ध
मक्लिगंधं च रूक्षं। कर्द्दमसहितं क्लिन्नानुपयुक्तवस्त्वंत-
रेण कीर्णं संकीर्णं। पूतिगंधकमदावाह्रदातीरे सर्वमानं
त्यमश्नुते। गंगाद्वारे प्रयागे च नैमिषे पुष्करे तथा। स-
न्निहत्यां गयायां च दत्तमक्षयतां व्रजेत्। अन्येऽपि कास्य
देशाः स्मृतिपुराणेभ्यो विज्ञेयाः विस्तरभयान्नेह प्रद-
र्शिताः। अथ श्राद्धकालाः॥ तत्र याज्ञवल्क्यः
अमावास्याष्टका वृद्धिः कृष्णपक्षोऽयनद्वयं। द्रव्यं ब्रा-

ह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः। व्यतीपातो गजच्छाया ग्रहणं चंद्रसूर्ययोः श्राद्धं प्रति रुचिश्चैव श्राद्धकालाः प्रकीर्त्तिताः। अमावास्या कृष्णपक्षस्य पंचदशीति तिथिः अष्टका आश्वलायनोक्ताः। हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका इति। विष्णुस्तु त्रयमेवाह अमावास्याः तिस्रोऽष्टकास्तिस्रोऽन्वष्टका माघी प्रोष्ठपदी ऊर्ध्वकृष्णात्रयोदशीं व्रीहिभिर्यवैर्वा गजच्छायात्रयोदशी। बृहद्विष्णुवाक्ये: पित्र्यत्रयोदशी सैव। वायुपुराणे। पित्र्यदानाय मूले स्युरष्टकास्तिस्र एव च। कृष्णपक्षे वरिष्ठा हि पूर्वा चैंद्रीति भाष्यते। प्राजापत्या द्वितीया स्यात्तृतीया वैश्वदेविकी। आद्यापूपैः सदा कार्या मांसैरन्या भवेत्तथा। शाकैः कार्या तृतीया स्यादेष द्रव्यगतो विधिः। पित्र्यदानाय मूले स्युरिति। मूले प्रधानस्थान इत्यर्थः। ब्रह्मपुराणे। ऐंद्र्यां तु प्रथमायां च शाकैः संतर्पयेत्पितॄन्। प्राजापत्यां द्वितीयायां मांसैः शुद्धैश्च तर्पयेत्। शुद्धैः प्रशस्तैः वैश्वदेव्यां तृतीयायामपूपैश्च यथाक्रमं। वर्षासु मध्ये शाकैस्तु चतुर्थ्यामेव सर्वदा। अत्र शाकादीनां विकल्पः स्वस्वशाखानुसाराद्विज्ञेयः। वृद्धिः पुत्रजन्मादिः। कृष्णपक्षः प्रसिद्धः। तस्य च श्राद्धकालत्वं प्रतिपदाद्यपराह्णद्वारेण। अयनद्वयं दक्षिणोत्तरात्मकं। द्रव्यं श्राद्धार्हं तस्य प्राप्तिर्यस्मिन्काले। तथा पंक्तिपावनस्य ब्राह्मण

स्य संपत्तिर्लाभो यत्र स श्राद्धकालः। विषुवन्मेषतुलयोः सूर्यसंक्रमः। सूर्यसंक्रमः सूर्यस्य राशे राश्यंतरगमनं। संक्रांतिग्रहणेनैवाप्त विषुवतोरपि ग्रहणं सिद्धे पुनरुपादानं फलाधिक्यद्योतनार्थं व्यतीपातो योगविशेषः पारिभाषिको वा। तथा च वृद्धमनुः। श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके। यद्यमा रविवारेण व्यतीपातः स उच्यते। नागदैवतमश्लेषा। सर्पमस्तक इति संबध्यते। मस्तके प्रथमपादे यदि चंद्रः स्यादित्यर्थः। यद्वा मस्तके मृगशिरः। गजच्छाया हस्तिच्छाया। तथा च श्रुतिः काठकी एतद्धि देवपितॄणां चायनं यद्धस्तिच्छाया। पारिभाषिकी वा तथा च स्मर्यते। यदेंदुः पितृदैवत्ये हंसश्चैव करे स्थितः तिथिर्वैश्रवणी या च गजच्छायेति सा स्मृता। पितृदैवत्यं मघा। हंसः सूर्यः। करो हस्तनक्षत्रं वैश्रवणी त्रयोदशी एतत्त्रितययोगो गजच्छाया इत्यर्थः। ग्रहणमुपरागः। चंद्रसूर्ययोः। यदा कर्तुः श्राद्धं प्रति रुचिर्भवति सोपि श्राद्धकालः। चशब्दात् युगाद्योपि गृह्यंते। एते श्राद्धकालाः अमावास्यादिश्राद्धानां वृद्धिश्राद्धादिव्यतिरिक्तानामपराह्णकालसाध्यत्वात् अमावास्यायाश्चतुर्दशीप्रतिपद्विद्धत्वे कदा श्राद्धमित्याकांक्षायामपराह्णव्यापित्वाव्यापित्वमुखेन श्राद्धकालो निरूप्यते। तत्र च तद्धुपयोगित्वेन पक्षांतसंज्ञकान्वाधानकालः। अन्वाधानंपि

इ पितृयज्ञो दर्शश्राद्धमित्येतत्त्रितयं वाजसनेयिव्यतिरि-
क्तानामेकस्मिन्दिने कर्त्तव्यमित्येतत्प्रथममुपपादया-
मः ॥ तत्र पर्वकालनिर्णयः । पर्व दर्शः पौर्णमासी च
अस्मिन्प्रकरणे मध्याह्नप्रापणे । यदा पर्वप्रतिपदोः संधि-
र्मध्याह्ने ततः प्राग्वा भवेत् । यदा संधिदिने यागः तत्पूर्वदिने
ऽन्वाधानं । यदाह गोभिलः । आवर्त्तने यदा संधिः पर्व-
प्रतिपदोर्भवेत् । तदहर्यागमिच्छेत परतश्चेत्परेऽहनि । पर्व-
प्रतिपदोः संधिरर्वागावर्त्तनात् यदि । तस्मिन्नहनि यष्ट-
व्यं पूर्वेद्युः स्यादुपक्रमः । उपक्रमः अन्वाधानं । यदाम-
ध्याह्नात्परतः संधिस्तदा संधिदिने न्वाधानं परेद्युरिष्टिः ॥
तथा च गोभिलः । आवर्त्तनात्परः संधिर्यदि तस्मिन्नु-
पक्रमः । परेद्युरिष्टिरित्येष पर्वद्वयविनिर्णयः । मध्याह्ना-
त्प्राक् प्रतिपत्पर्वसंधावपि संधिदिने न्वाधाय परेद्युरिष्टि-
र्वाजसनेयिशाखिनां । यदाह लौगाक्षिः । अपराह्णे थवा
सायं यदि पर्व समाप्यते । उपोष्य तस्मिन्नहनि श्वो भूते
याग इष्यते । आवर्त्तनादधः संधिर्यद्यन्वाधापनदिने ।
परेद्युरिष्टिरित्याहुर्विप्रा वाजसनेयिनः । पर्वप्रतिपत्संधि-
परिज्ञानोपायमाह कात्यायनः । परे ह्नि घटिका न्यूना-
स्तथैवाभ्यधिकाश्च याः । क्षिप्त्वा तदर्द्धं पूर्वस्मिन्ह्रासवृद्धी
प्रकल्पयेत् । लौगाक्षिरपि । तिथेः परस्या घटिकाश्च-
याः स्युर्न्यूनास्तथा वाभ्यधिकाश्च तासां । अर्द्धं वियोज्यं-

चतथाप्रयोज्यं ह्रासे च वृद्धौ प्रथमे दिने स्यात्। परस्यास्तिथेः प्रतिपदः पूर्वतिथ्यपेक्षया न्यूना घटिकास्तन्मध्येऽर्द्धं प्रथमदिने पर्वणि वियोज्यं। अर्द्धं पर्वदिनाद्वियोज्यं अर्द्धहानिः पर्वदिने ज्ञेयेत्यर्थः। एवं वृद्धावर्द्धं योज्यं। एतदुक्तं भवति। सूर्योदयानंतरभाविन्यो याः पर्वप्रतिपद्घटिकास्ता एकीकृत्य द्वेधा विभज्यार्द्धं पूर्वदिने अर्द्धं परदिने च योज्यमिति। यागकालमाह वृद्धशातातपः। पर्वणो यश्चतुर्थोंशो आद्याः प्रतिपदस्त्रयः। यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः। यदा मध्याह्नादूर्द्धं संधिस्तदा तस्मिन्दिनेन्वाधाय परेद्युरिष्टौ क्रियमाणायां कदाचित्प्रतिपच्चतुर्थांशोपि यागकाले भवति तदा चतुर्थांशस्य वचनांतरैर्निषिद्धत्वात्कथमित्याकांक्षायां शातातपः। संधिर्यस्य पराह्णे स्याद्यागं प्रातः परेहनि। कुर्वाणः प्रतिपद्भागे चतुर्थेपि न दुष्यतीति। अयमभिप्रायः। पर्वणो यश्चतुर्थोंशो आद्याः प्रतिपदस्त्रयः। इत्युक्तकालसंभवे निषेधकवचनैश्चतुर्थभागो निषिध्यते उक्तकालासंभवे त्वनेन वचनेन चतुर्थभागोप्यंगत्वेन विधीयत इति। ननु यदा मध्याह्ने तत्समीपवर्त्तिनि पूर्वकाले वा संधिस्तदा संधिदिन एव यागविधानात् ग्रीष्मादिकाले च मध्याह्नस्य षोडशसप्तदशदंडात्मकत्वात् अमावास्यायां सूर्योदयात्प्रागिष्यारंभविधानात् इष्टेश्च द्वियामसाध्यत्वात् उपक्रांत-

स्यकर्मणो विधिमंतरेण मध्ये मध्ये विरम्य व्यापारानुपप
त्तेश्च सेष्टिर्दर्श एव समाप्येत। तथा च। प्रतिपद्यप्रतिष्ठायां
यदि चेष्टिः समाप्यते। पुनः प्रणीय कृत्स्नेष्टिः कर्त्तव्याद्या
गवित्तमैरिति वचनेन विरोधः प्रसज्यत इति चेत्। मैवं।
यदा सूर्योदयामपि पाठबाधिक्यवशादमावास्यायामे
व समाप्येत तद्विषयमपदस्य वचनस्य। संधिमुभयतो यजे
तेत्यादीनामपि वाक्यानामयमेव विषयः। इयं चोक्तवि-
षये प्रतिपदीष्टिसमाप्तिराहिताग्नेरेव नानाहिताग्नेः। त-
स्य तु स्थालीपाक एव नेष्टिः स च सूर्योदयानंतरमेवारं
भणीया। तथा स्वल्पकालसाध्यश्च प्रयोग प्राचुभावस्य
च शास्त्रे विधानान्मध्ये विरामासंभवः। विराममंतरेण च
प्रतिपदि समापयितुं न शक्यः। न ह्यशक्यं विदधाति शा
स्त्रं। तस्मात्प्रतिपद्यप्रविष्टायां यदि चेष्टिः समाप्यत इत्ये
तदनाहिताग्निविषयं न स्पृशति। पौर्णमास्यां तु विशेष
माह। कात्यायनः। संधिश्चेत्संगवादूर्ध्वमर्वाग्गावर्त्त-
नाद्भवेत्। सा पौर्णमासी विज्ञेया सद्यः कालविधौ तिथि
रिति। तत्रैवान्वाधानं तत्रैव याग इत्यर्थः। अमावास्या
यां विशेषमाह। वृद्धशातातपः। द्वितीयात्रिमूहूर्त्ता
चेत्प्रतिपद्यापराह्लिकी। अन्वाधानं चतुर्द्दश्यां परतः
सोमदर्शमादिति। एतदप्यावर्त्तनेनतः पूर्वं वा संधौ च-
तुर्द्दश्यामन्वाधानविधानविषयं। यच्च लौगाक्षि-

वचने। चीनं प्राप्तौ पवस्तस्य यागस्य चतुरो विदुः। श्रा
वं श्रावुन्सृजेदंत्यौ यागे च व्रतकर्म्मणीति। यागे प्रतिपदं
त्यांशस्य अन्वाधाने चतुर्द्दश्यंत्यांशस्य वर्ज्यत्वमुक्तं। न
च प्रतिपदश्चतुर्थांश निषेधस्य व्यवस्था प्रामदर्शिता च च-
तुर्द्दश्यास्तु आवर्त्तनोक्षरकालं पर्वप्रतिपत्संधौ निषेधः
यदान्वाधानदिने प्रातर्विस्मरणादिनान्वाधानादिकं न क
रोति तदा समारोपितान्ग्निश्चेत्पुनरपि समारोप्य प्रत्यक्षाग्नि
श्चेदग्निं विहृत्य भोजनात्प्रागन्वाधानादिकं कुर्यात्। तत्रा
प्यसंभवे सायं तत्राप्यसंभवे यागदिने प्रातः पथिकृदिष्टिं
चरुं कृत्वा सद्यः कालविधिनान्वाधाय पश्चादियागं कु-
र्यात्। पौर्णमास्यां तु येषां प्राग्विना सर्वदा सद्यः काल
विधिरनुज्ञातस्तेषां न पथिकृदिष्टिः येषां सर्वदा सद्यः का
लविध्यनुज्ञानं नास्ति किंतु क्वचिदेव तत्रानुज्ञातस्तूक्ते
तेषां पूर्वोक्त एव विधिः। एवं प्रकृतौ यागकालोभिहितः
अथ विकृतियागस्य विधीयते। यत्र संपूर्णे स पंचद-
शी प्रतिपच्च तत्र प्रकृत्यन्वाधानदिने विकृतियागं समाप्या
नंतरं प्रकृतेरन्वाधानादिकं कुर्यात्। यदा पशुना यदि सो-
मेन यजेतामावास्यायां पौर्णमास्यां वा यजेत त्यागस्तं दे-
न प्रकृतिकालप्राप्तौ सत्यामपि पुनरमावास्यादिकालवि
धानात्। यत्र मध्याह्नात्ततः पूर्वं वा पर्वसंधिः तदा संधिदिने
प्रकृतियागानंतरं विकृतियागं कुर्यात्। मध्याह्नादूर्ध्वं संधौ-

तुनत्र संधिदिने प्रकृतेरन्वाधानादिकं विधाय विकृतियागं च
तत्रैव कृत्वा परेद्युः प्रकृतियागः कर्त्तव्यः। तथा च कात्या
यनः। आवर्त्तनात्प्राग्यदि पर्वसंधिः कृत्वा तु तस्मिन्प्रकृ-
तिं विकृत्याः। तदैव यागः परतो यदि स्यात्तस्मिन्विकृत्याः
प्रकृतेः परेद्युरिति॥ अथान्वाधानपिंडपिंडयज्ञदर्श
श्राद्धानामेकदिनकर्त्तव्यता निरूप्यते॥ तत्र लौ-
गाक्षिः॥ यज्ञांतं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः॥
पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुधः। यज्ञांतं कर्मान्वा
धानं। पिंडयज्ञः पिंडपितृयज्ञः। अन्वाहार्यकं दर्शकं दर्श
श्राद्धं। तथा स्मृत्यंतरमपि। पिंडयज्ञावृता दर्शश्राद्धे पिं
डान्विनिक्षिपेत्। पिंडयज्ञस्य कालस्तु दर्शश्राद्धे भवेदि
ति। मनुरपि। पितृयज्ञं तु निर्वर्त्य विप्रश्चंद्रक्षयेग्निमान्।
पिंडान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकं। मासानुमासि
कं प्रतिमासि भवं। अत एव नित्यं। पिंडपितृयज्ञश्चाना
हिताग्नेरपि कर्त्तव्यः। आपस्तंबेनाहिताग्नेः पिंडपितृय-
ज्ञं विधाय एवमनाहिताग्नेरित्यनेन वाक्येनानाहिताग्ने
रप्यतिदेशात्। अत आहिताग्नेर्गृह्याग्नेश्च द्वयोरप्यन्वा-
धानपिंडपितृयज्ञदर्शश्राद्धानि कर्त्तव्यानि तान्येकस्मि
न्दिने पूर्वोक्तवचनबलान्निष्पाद्यानीति सिद्धं॥ अथा
पराह्णकालः। द्वेधा त्रेधा पंचधा पंचदशधा वा दिनस्या
हर्भागं विभजंति। स्कंदपुराणे। आवर्त्तनात्तु पूर्वाह्णो

ह्यपराह्णस्ततः परः। ख्याता तपः। पूर्वाह्णो मध्याह्णोप-
राह्णः पूर्वाह्णो देवानां मध्याह्णो मनुष्याणामपराह्णः
पितृणामिति। व्यासः। मुहूर्त्तत्रितयं प्रातस्तावानेव-
च संगवः। मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्तादृशः
सायाह्नमुहूर्त्तश्च सर्वकर्मसुगर्हितः। व्यासः। रौद्रश्चैत्र-
श्च मैत्रश्च तथा सारटवः स्मृतः। सावित्रश्च जयंतश्च गां
धर्वः कुतपस्तथा। रौहिणश्च विरिंचश्च विजयो नैर्ऋतस्त-
था। महेंद्रो वारुणश्चैव भटः पंचदशाः स्मृता इति। अत्र
द्वेधा विभागः शुक्लपक्षे पैतृककर्म्मणि दैविके च माद्यः
एतच्च शुक्लपक्षश्राद्धकालप्रकरणे ज्ञास्यते। परिशेषा
त्यंचधा विभागः पंचदशधा विभागश्चामावास्याश्राद्धा
दिषु ग्राह्यः। अथामावास्याश्राद्धे पूर्वोत्तरविद्धाग्र-
हणे निर्णयः। द्विविधामावास्या शुद्धा विद्धा चेति। वि-
द्धा तु चतुर्विधा चतुर्दश्यामेवापराह्णसंवद्धा न प्रतिपदी
ति प्रथमः। पक्षः। प्रतिपद्येवापराह्णिकी न चतुर्दश्यामि-
ति द्वितीया। उभयत्रापराह्णसंवद्धेति तृतीयः। उभयत्राप
राह्णासंवद्धेति चतुर्थः। तत्र शुद्धायामसंशयः। या तु विद्धा
चतुर्दश्यामेवापराह्णसंवद्धा न प्रतिपदि सा पूर्वैव ग्राह्या-
सर्वैरपि। तथा च जाबालिः। पूर्वाह्णे चेदमावास्या ना
पराह्णे भवेद्यदि। भूतविद्धैव सा ग्राह्या पित्र्ये कर्म्मणि स-
र्वदा। पूर्वाह्णव्यापिनी अपराह्णं न व्याप्नोतीत्यर्थः॥

अन्वाधानं पिंडपितृयज्ञोपि भूतविद्धायामेव। द्वितीया
त्रिमुहूर्त्ता चेत्प्रतिपत्सापराह्णिकी। अन्वाधानं चतुर्दश्या-
मिति। वृद्धशातातपस्मरणात्। अमावास्यायाम-
पराह्णे पिंडपितृयज्ञ इति अमावास्यासंबद्धापराह्णस्यै-
वाश्वलायनेन पिंडपितृयज्ञांगत्वविधानात्। ननु चा-
पस्तंबेनामावास्यायां यदहश्चंद्रमसं न पश्यंतीत्युपक्र-
म्यापराह्णकालं पिंडपितृयज्ञांगत्वेन विधायाधिवृक्षसू-
र्ये चेति कालांतरमपि विहितमतोऽपराह्णानुसारेणश्रा-
द्धकालनिर्णयः कथमिति चेत्। उच्यते। यदा साग्निक-
स्य जीवत्पितृकस्य दैवात्पिंडपितृयज्ञकालोऽपराह्णो
व्यतिक्रांतस्तदधिवृक्षसूर्योपि कालोंगमिति विधीय-
ते। युक्तं चैतत्। स केवलं पिंडपितृयज्ञेऽधिक्रियते न द-
र्शश्राद्धे तस्मात्तस्य स कालः। प्रमीतपितृकस्य दर्श-
श्राद्धं प्रसज्येत। तच्च निषिद्धं तस्मात्पूर्वोक्त एव विष-
यः स्वीकार्यः। यदा प्रतिपद्येवापराह्णिकी न चतुर्दश्यां
तदा प्रतिपद्येव। यदाह हारीतः। अपराह्णः पि-
तॄणां तु यापराह्णानुयायिनी। सा ग्राह्या पितृकार्ये तु
न पूर्वाह्णानुयायिनी। बौधायनः। मध्याह्नात्परतो
यत्र चतुर्दश्यानुवर्त्तते। सिनीवाली तु सा ज्ञेया पितृ-
कार्ये तु निष्फला। अत्र त्रेधा विभक्तदिनमध्यभागप-
रो मध्याह्नशब्दः मध्याह्नात्परतः सायंकालद्-

त्यर्थः। कार्ष्णाजिनिः। भूतविद्धा ममावास्यां मोहाद्ज्ञानतोपि वा। श्राद्धकर्मणि ये कुर्युस्तेषामायुः प्रहीयते। मोहो विपरीतज्ञानं। अज्ञानमप्रतीतिः। अत्रैवान्वाधाने-पिंडपितृयज्ञश्च। यानूभयत्रापराह्णसंबद्धा सा तु त्रिप्रकारा तिथेः क्षयोपेता वृद्ध्युपेता साम्योपेता चेति। तत्र तिथिक्षयपक्षे पिंडपितृयज्ञाधिकारिणामाहिताग्नीनामौपासनाग्नीनां च भूतविद्धा। सत्यप्यधिकारे उत्सन्नाग्नीनां तथा विधुराणां स्त्रीणां शूद्राणां च प्रतिपन्मिश्रिता। तथा च कार्ष्णाजिनिः। सिनीवाली द्विजैर्ग्राह्या साग्निकैः पितृकर्मणि। स्त्रीभिः शूद्रैः कुहूर्ग्राह्या तथा चानग्निकैर्द्विजैः। साग्निरौपासनाग्निरपि। तस्यापि पिंडपितृयज्ञविधानात्। तस्य चापराह्णसाध्यत्वात्। तिथिक्षयपक्षे च अपराह्णे स्पृष्टचतुर्दशी तुरीययामे दर्शघटिकानुप्रवेशादपराह्णे उत्तरदिनापेक्षया पूर्वदिन एवाधिकामावास्या संस्पर्शात् अन्वाधानं विधाय पिंडपितृयज्ञानंतरमन्वाहार्यकं भूतविद्धायामेव कर्त्तव्यं। अनेनैवाभिप्रायेण॥ बौधायनः। चतुर्दशी चतुर्यामे अमा यत्र न दृश्यते। श्वोभूते प्रतिपद्यत्र भूतकव्यादिकी क्रियेति। अयमर्थः। चतुर्दशी चतुर्यामे चतुर्दश्या उत्तरार्द्धे चतुर्यामे अपराह्णस्पर्शेऽमा गणितेन न दृश्यते। अपि तु तिथिक्षयवशात् प्रविष्टा दृश्यत इति तात्पर्यं श्वोभूते प्रेषु-

रपराह्णे प्रतिपद्दृश्यते तत्र चतुर्दश्यामेवेति। अनग्निका उत्सन्नाग्न्यादयः। तेषां चान्वाधानं पिंडपितृयज्ञयोरधिकाराभावात्कुह्वामेव श्राद्धं तिथिवृद्धिप्रक्रमे साम्ये च सर्वेषां परैव। यदाह प्रचेताः॥ दृष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूर्मता। सिनीवाली कुहूश्चैव अस्तुत्युक्ते पितृकर्मणि। स्यातां ते यदि मध्याह्नाच्छ्राद्धं तत्र कथं भवेत्। तिथिक्षये सिनीवाली तिथिवृद्धौ कुहूर्मता। साम्येपि च कुहूर्ज्ञेया वेदवेदांगवेदिभिः। मध्याह्नात्स्यातां मध्याह्नादुपरि अपराह्णे भवेतामित्यर्थः। अत्रापि यत्रापराह्णे अधिकस्पर्शस्तत्रैव पिंडपितृयज्ञो दर्शश्राद्धं च। अन्वाधानस्य पिंडपितृयज्ञपूर्वभावित्वेन तत्रैव प्रातरन्वाधानं। यदा त्वपराह्णाधिकसंस्पर्शवशात्पूर्वविद्धायां परविद्धायां वा पिंडपितृयज्ञदर्शश्राद्धप्राप्तिः॥ अथ च पर्वकालनिर्णयवशात्। पिंडपितृयज्ञदर्शश्राद्धकालव्यतिक्रमोन्वाधानस्य तदा कर्मद्वयानुरोधेन यत्र पितृयज्ञदर्शश्राद्धे तत्रैवान्वाधानं। बहूनामनुग्रहोन्याय्य इति न्यायेनानेकानुग्रहस्य न्याय्यत्वात्। तथा च पर्वतृतीयांशे प्रतिपच्चतुर्थांशेपि यागानुष्ठानप्राप्तौ न विरोधः। एवं च पर्वतृतीयांशे प्रतिपच्चतुर्थांशे च यागनिषेधकवचनान्येवंविधस्थलव्यतिरिक्तविषये योज्यानि। उभयत्रापराह्णसंबंधिनीति चतुर्थः पक्षः। स्या-

तु सर्वेषां परैव तत्रापराह्णव्यापित्वेपि कुतपकालसंबंधि-
त्वात्। तथा च हारीतः। भूतविद्धाप्यमावास्या प्रतिपन्मि-
श्रिता पिता। पित्र्ये कर्मणि विद्वद्भिर्ग्राह्या कुतपकालिकी-
ति। श्लोकगौतमोपि। पूर्वाह्णे चेत्प्रतिपदो भूते सायमा-
यदि। आरभ्य कुतपे श्राद्धं रौहिणं नैव लंघयेत्। प्रतिप-
दि पूर्वाह्णे कुतपेनापराह्णे। भूते सायंकाल एव नापराह्णे
तदा प्रतिपदि कुतपकालसंबंधित्वात् तत्र कुतपे श्राद्ध-
मारभ्य कुर्यात्। रौहिणं न लंघयेत् इति तात्पर्यार्थः।
कुतप उदयमारभ्याष्टमो मुहूर्त्तः। आपस्तंबस्तु प्रकारां-
तरेणाह। कुतपाद्यान्मुहूर्तास्त्रीन्यदा चरति। भास्करः
स कालः कुतपस्तत्र पितॄणां दत्तमक्षयमिति। ननु पूर्वो-
क्तेषु यस्नेषु क्वचन भूतविद्धापि पिंडपितृयज्ञादिषु गृही-
ता मानयुक्ता तत्र चंद्रदर्शनसंभवात्। चंद्रादर्शने च पि-
तृयज्ञो विहित आपस्तंबेन। अमावास्यायां यदहश्चंद्र-
मसं न पश्यंतीति। उच्यते। अदर्शनं नाम कलाक्षये चं-
द्रस्य न चक्षुर्व्यापारागोचरत्वं तथा सति उदयादूर्ध्वं प्र-
हरमात्रं चतुर्दशीव्याप्तावपि चंद्रस्य चक्षुर्गोचरत्वात्त-
त्र पिंडपितृयज्ञादि न स्यात्। तथा चापराह्णे पिंडपितृय-
ज्ञादिविधायकवाक्यविरोधः प्रसज्येत। अतः अदर्शनश-
ब्दः क्षयपरः। तथा च कात्यायनः। पिंडान्वाहार्यकं श्राद्धं
क्षीणे राजनि शस्यत इति। क्षयोपि कदा भवतीत्यपेक्षा

यां स एव। अष्टमेंशे चतुर्दश्याः क्षीणो भवति चंद्रमाः।
अमावास्याष्टमेंशे च पुनः किल भवेदणुः। आग्रहायणाय
मावास्यात्तथा ज्येष्ठस्य या भवेत्। विशेषमस्यां ब्रुवते चंद्र
चारविदो जनाः। अत्रेंदुराद्ये प्रहरे वतिष्ठते चतुर्थभागोन-
कलावशिष्टः। तदंत एव क्षयमेति कृत्स्न एवं ज्योतिश्चक्र
विदो विदंति। आग्रहायणी मार्गशीर्षामावास्या। आद्ये-
प्रहरेऽमावास्यायाः। तदंतेऽमावास्यांते। अत्र केचि-
देवं वर्णयंति आग्रहायणीज्येष्ठामावास्ययोः। परेद्युरप-
राह्णाव्यापित्वे पूर्वेद्युरमावास्यायामपराह्णे पिंडपितृयज्ञ
इत्याः प्रबलावशिष्टत्वात् परे तु क्षयशब्दस्य संकोचमा
त्रमेव। वाक्यविरोधापेक्षया च संकोचः श्रेयान्। तर्हि ज्यो
तिःशास्त्रे आग्रहायण्यां ज्येष्ठ्यां च चन्द्रक्षयं प्रति विशे
षोक्तिः किमर्थेति चेत्। उच्यते। अन्यमासेषु द्वितीयाया-
आद्यतृतीयमुहूर्त्तचरमभागे चंद्रदर्शनं भवति मार्ग-
शीर्षज्येष्ठयोस्तु तथा न किंतु अमावास्यायां अष्टमांशे
क्षीणत्वात् द्वितीयाया आद्यतृतीयमुहूर्त्तानंतरं चतुर्थ
पंचमादिमुहूर्त्तेषु चंद्रदर्शनमित्येतत्प्रतिपादनार्थं।
ज्योतिःशास्त्रस्य कालग्रहचारादिविषयत्वात्। श्राद्ध-
कर्म्मविधिप्राधान्याभावाच्च। अयं च संगृहीतार्थः। यत्र
पूर्वोक्तरीत्या भूतविद्धा ह्यादिषु ग्राह्या तद्व्यतिरिक्तवि-
षया तिथिर्भूतविद्धायामन्वाधानपिंडपितृयज्ञदर्शश्राद्ध

निषेधकवाक्यानि। यत्रचोक्तरीत्या प्रतिपच्चुन्मिश्रिताया मन्वाधानादीनितद्व्यतिरिक्तविषयाणिप्रतिपद्विद्धायाममावास्यायामन्वाधानादिनिषेधकवाक्यानीति। यत्तुहारीतवचनं। कन्यामकरमीनेषु तुलायां मिथुनेतथा। भूतविद्धैवसर्वेषां पूज्या भवतियत्नतः इति तद्व्रतविषयं। अतएवजाबालिः। तुलायांमकरे मीनेकन्यायांमिथुनेप्यमा। भूतविद्धाव्रतेग्राह्या शेषेषु प्रतिपद्युतेति। अमावास्यायामिवअष्टकामन्वंतरयुगाद्यपरपक्षेपि श्राद्धकालनिर्णयोविज्ञेयः। अत्रपिंडपितृयज्ञाभावात्कुतपएवश्राद्धस्योपक्रमः। अमावास्यांत्वपराह्णे पिंडपितृयज्ञानंतरंदर्शश्राद्धं। यानिच शुक्लपक्षश्राद्धानिपौर्णमास्यां वैशाखतृतीयादिषुचविहितानितुकुतपकालप्राधान्येनानुष्ठेयानि। एतदुक्तंभवति। यथामावास्यायामपराह्णप्राधान्येनतिथेः क्षयेपूर्वावृद्धौ साम्येचपरा। तत्राप्यल्पत्वमहत्वाभ्यां निर्णयः। एवंकुतपप्राधान्येननिर्णयइति अनेनैवाभिप्रायेण मार्कंडेयः। शुक्लपक्षस्य-पूर्वाह्णे श्राद्धंकुर्याद्विचक्षणः। कृष्णपक्षापराह्णेतुरौहिणंतुनलंघयेत् इति। अत्रपूर्वाह्णे शब्दो द्वेधाविभक्तस्याह्नः पूर्वभागपरः। यद्यप्यत्र सामान्येनपूर्वाह्णइत्युपात्तं। तथापिपित्र्येकर्मणिविद्धद्विग्राह्याकुत

पकालिति पैतृककर्म्मणां गत्वात्कुतपकालस्य तत्सं
स्पृष्ट एव पूर्वाह्णांत्यभागो ग्राह्यः। आवर्त्तनसंनिकृष्ट।
कालं शुक्लपक्षश्राद्धोपक्रमेणमित्यर्थः। मध्याह्नोपि
कुतपः। तथा च स्मर्यते। कुंयत्र गोभिः कार्त्स्न्येन गो
पतिस्तापयेत्क्षणे। स कालः कुतपो नाम श्राद्धं तत्र प्रदी
पत इति॥ अथ मृताहकालः॥ तत्र मासस्य सौरादिभेदे
न भिन्नत्वात्कुत्र को मासो ग्राह्य इत्याकांक्षायां गार्ग्यः
विवाहादौ स्मृतः सौरो यज्ञादौ सावनः स्मृतः। आब्दिके पि
तृकार्येपि चांद्रो मासः प्रशस्यते। स्कंदपुराणे। अभ्यु-
दये रवेर्मासश्चांद्रः स्यात्पितृकर्म्मणि। यज्ञे सावनमि
त्याहुरार्क्षं सर्वव्रतेषु च। आर्क्षं नाक्षत्रं। नक्षत्रविशेषे
प्रतिमासं साव्रतेष्वित्यर्थः। अस्य श्लोकस्यायमर्थः।
यज्ञाब्दौ मास संवत्सरसाध्ययज्ञव्रतप्रायश्चित्तक्रि-
यादिषु। माससाध्या यज्ञाः मासं दर्शपौर्णमासाभ्यां
यजेते मासं वैश्वदेवेन कुंडपानामयने मासमग्निहो
त्रं जुहोतीत्यादिवाक्यैर्विहिताः। माससाध्यानि व्रतानि
मासोपवासादीनि। माससाध्याः प्रायश्चित्तक्रियागो
घ्ने च सततब्रह्मचारी मासमेकं पयोव्रत इत्यादि वचनै
र्विहिताः। संवत्सरसाध्या यज्ञाः गवामयनादिसंज्ञकाः
सत्रयागाः। संवत्सरसाध्यानि व्रतानि अजस्य तु नाम्नी
यादित्यादि श्रुतिविहितानि। अजः संवत्सरः। अत्राग्न

मोदनपयःप्रभृतीनां। संवत्सरसाध्याः प्रायश्चित्तक्रि
या द्वादशवार्षिकाद्याः। आब्दिके सांवत्सरिको पितृ-
कार्ये षाण्मासिकश्राद्धादौ ऽपि शब्दाद्यद्व्यतिरि
के माससंवत्सरसाध्यदेवकार्ये। तथा च पितामहः।
दैवे कर्मणि पित्र्ये च मासाश्चान्द्रमसः स्मृताः। एषां च
मासानां भेदो ब्रह्मसिद्धांते ऽभिहितः। दर्शाद्दर्शश्चांद्र
स्त्रिंशद्दिवसस्तु सावनो मासः। रविसंक्रांतिचिह्नः सौरो
मासो निगद्यते तज्ज्ञैः। तथा। चांद्रः शुक्लादिदर्शा
न्तः सावनस्त्रिंशता दिनैः। एकराशौ रविर्याव-
त्कालं मासः स भास्करः। सावनाद्यहोरात्रव्यवस्था
पि ब्रह्मसिद्धांते। सावनं स्यादहोरात्रमुदयादोदया
द्रवेः। सौरं त्रिंशांस्तु राश्यंशांस्तिथिसंभोगमैन्दवं। या
वता कालेन रविर्मेषादिराशीनां त्रिंशसंख्यमंशं भुं
क्ते स कालः सौराहोरात्रः चंद्रस्य प्रतिपदादितिथि
संभोगपरिमितः कालश्चांद्राहोरात्र इत्यर्थः। एवं प्रा
संगिकं परिसमाप्य प्रकृतमनुसरामः। क्षयाहे वि-
शेषः स्मृत्यन्तरे। मासपक्षतिथिस्पृष्टे यस्मिन्प्रो
म्रियतेऽहनि। प्रत्यब्दं तु तथाभूतं क्षयाहं तस्य तं वि-
दुरिति। तिथिश्चांद्राहोरात्रः। सा च यदा शुद्धा तदा
न संशयः। यदा तु विद्धा तदा यत्र सायाह्ने त्रिमुहूर्त्त
व्यापिनी चेत्स्यान्मृताहस्य यदा तिथिः। पूर्वविद्धैव कर्त्तव्या

त्रिमुहूर्त्ता भवेद्यदि। सायं त्रिमुहूर्त्तेत्यर्थः। यत्तु कार्ष्णाजि-
निनोक्तं अस्तमनवेलायां कलामात्रापि या तिथिः। सैव
प्रत्याब्दिके ज्ञेया नापराऽपुत्रहा न देति। तत्पूर्वविद्धा प्रशं-
सार्थं। कलामात्रापि ग्राह्या किमुत त्रिमुहूर्त्तेति। यत्तु दिनां-
ते पंच नाड्यस्तु पुण्याः प्रोक्ता मनीषिभिः। उदये च तथा पि-
त्र्ये दैवे वैवतु कर्मणीति। तत्तु सायंकालात्यंतनाडीनां
पुण्यत्वं प्रतिपादयति। न तु षष्ठनाड्या अपुण्यत्वप्र-
तिपादनपरं। नारदीयपुराणेपि। पारणे मरणे नृणां
तिथिस्तात्कालिकी मता। पित्र्येऽस्तमयवेलायां स्पृष्टा
पूर्णा निगद्यते। अस्तमयवेलायां सायंकाले मुहूर्त्तत्रययु-
क्तेत्यर्थः। श्रुतिरपि। तस्मात्पितृभ्यः पूर्वेद्युः क्रियत इति
तथा पूर्वाह्णो वै देवानां मध्यंदिनो मनुष्याणामपराह्णः
पितृणामिति। त्रेधा विभक्तस्याह्नस्तृतीयभागात्मके अ-
पराह्णे मुहूर्त्तत्रयव्यापित्वादपराह्णसंबद्धापि सा तिथि
र्भवति। सा तिथिः सकला ज्ञेया यस्यामस्तंगतो रविः॥
इत्येकदेशव्यापित्वेपि संपूर्णत्वमस्तीति कृत्वा कुतपस-
बोपक्रमः। तस्य सकलपितृश्राद्धशेषत्वात्। एवं च यानि
पूर्वविद्धाप्रापकाणि तानि त्रिमुहूर्त्तविद्धाविषयाणि वि-
ज्ञेयानि। यदा पूर्वेद्युः सायंकाले मुहूर्त्तत्रयव्यापित्वं-
नास्ति तदा परविद्धैव ग्राह्या। तथा च गोभिलः। त्रिमु-
हूर्त्ता न चेद्ग्राह्या परैव कुतपे हि सेति। यदा पूर्वेद्युः सायं-

कालेत्रिमुहूर्त्तव्यापिनी तिथिर्द्वैधवशात्परेद्युरप्यस्तम-
यगामिनी तदापरेद्युरेव। तत्र कुतपाःस्तमयोःसंबंधात्
तथा च मरीचिः। ह्यपराह्णव्यापिनी स्यादाब्दिकस्य प
दा तिथिः। महती यत्र तद्विवृद्धौ प्रशंसंति महर्षयः। यत्र
सायंकाले पूर्वेद्युस्त्रिमुहूर्त्तव्यापिनी परेद्युःसायंकालेपि
वर्त्तते न त्वस्तमयसमये तदा पूर्वेद्युः। यदाह नारदः।
दर्शं च पौर्णमासं च पितुः सांवत्सरं दिनं। पूर्वविद्धमकुर्वा
णो नरकं प्रतिपद्यते इति। अतः श्रुंशग्राह्विकया मृततिथे
रस्तमयसंबद्धाया एवोपादानं कृतं अप्यस्तमयवेला
यामित्यादिभिर्वचनैरतः पूर्वेद्युरेवयुक्तं। अयं सामान्य
निर्णयः विशेषस्तु कालनिर्णये द्रष्टव्यः। एवं षाण्मासि
कादिष्वपि ज्ञेयं तेषामपि मृतसदृशपक्षस्पृष्टतिथिकर्त्त-
व्यत्वाविशेषात्। एकोद्दिष्टेत्वयं विशेषः। मध्यंदिने ऽप
क्रमः कर्त्तव्यमिति। तथा च स्मर्यते। पूर्वाह्णे दैविकं क
र्म अपराह्णे तु पैतृके। एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमि
त्तकमिति। यानि च मृताहव्यतिरिक्तान्यापरपक्षिककारु
णयश्राद्धादीन्येकोद्दिष्टानि शास्त्रहतस्य चतुर्दश्येकोद्दि
ष्टश्राद्धं च तानि मध्याह्नकालस्य प्रधानत्वात्तत्काला-
धिकस्पर्शवत्यां प्रतिपदादितिथौ कर्त्तव्यानि। तेषां मृतस-
दृशपक्षस्पृष्टतिथिकर्त्तव्यता नियमस्याभावात्। निय-
माभावश्च शुक्लपक्षमृतस्य चतुर्दशी व्यतिरिक्ततिथिमृ-

तस्यापि तत्र श्राद्धकरणात्। मृततिथेस्तु सायाह्ने त्रिमुहू-
र्त्तव्यापिन्या वचनोपात्तत्वात् पूर्वोक्तैव व्यवस्था। यत्रो-
भयमध्याह्नकालसंस्पर्शाभावस्तत्र पूर्वेद्युरेव। पितृकार्ये
पूर्वविद्धायाः प्रशस्तत्वात्। मृताहकालनिर्णयप्रसंगा
द्ग्रहणदिने आब्दिकप्राप्तौ विशेषोऽभिधीयते। तत्र यदा
ग्रहणदिने सांवत्सरिकं प्राप्तं तदान्नासंभवे आमेन तद
संभवे हेम्ना वा कुर्यात्। यदाह गोभिलः। दर्शे रविग्रहे
पित्रोः प्रत्याब्दिकमुपस्थितं। अन्नेनासंभवे हेम्ना कुर्या-
दामेन वा सुत इति। अत्र दर्शे रवि पितृ सुत शब्दाः प्रदर्श
नार्थाः। न्यायस्य समानत्वात्। अतश्चंद्रग्रहणेऽप्यावश्य
कसपिंडाद्युद्देशेन श्राद्धाधिकारिणा आमः श्राद्धादिकं
कर्त्तव्यं। एवं मासिकेऽपि ज्ञेयं। एवं च श्राद्धविघ्ने द्विजातीना
मामश्राद्धं प्रकीर्त्तितं। अमावास्यादिनियतं माससंवत्सरा
दृतइति मासिकं सांवत्सरिकविषये यो यमामश्राद्धनिषे
धः संग्रहणव्यतिरिक्तविषयः। मृताहे प्राप्ते यस्य भार्या रज
स्वला भवति स तस्मिन्नेव दिने नैव श्राद्धं कुर्यात् नामेन का
लांतरे वा। यच्च स्मृत्यंतरे। आब्दिके समनुप्राप्ते यस्य
भार्या रजस्वला। पंचमेऽहनि तत् श्राद्धं न कुर्यात्तन्मृतेऽह
नि। तद्भर्तुः प्रत्याब्दिके अपुत्रा पत्नी स्वयमेव कर्त्री यदि
रजस्वला भवेत्। तद्विषयमेतद्वचनं। अपुत्रा तु यदा भा
र्या संप्राप्ते भर्त्तुराब्दिके। रजस्वला भवेत्सा तु कुर्यात्तत्पं-

वमेहनीतिमौनमस्मरणात्॥ अथमृताहापरि ज्ञानेकालः॥ तत्र बृहस्पतिः॥ नज्ञायतेमृताहश्चेत्प्रमीते प्रोषितेसति। मासश्चेत्तत्रविज्ञातस्तद्दर्शेस्यान्मृताहनि। मृताहनि मृतदिनेयत्कर्त्तव्यंतत्तत्रविज्ञातमासदर्शेविज्ञातमासामावास्यायांकर्त्तव्यमित्यर्थः। यदामासोनविज्ञातोविज्ञातंदिनमेवतु। तदामार्गशिरेमासिमाघेवातद्दिनेभवेत्। दिनमासौनविज्ञातौमरणस्ययदापुनः। प्रस्थानदिनमासौतुग्राह्यौपूर्वोक्तयादिशा। प्रस्थानदिनमासाविज्ञानेश्रवणाद्दिनंनिर्णयामृते। अत्रदिनशब्दस्तिथिपरः। मरीचिः। श्राद्धविघ्ने समुत्पन्नेऽविज्ञातेमृताहनि। कुर्यादन्नेनकृष्णायामेकादश्यांविधुक्षये। श्राद्धविघ्नेप्रमादादिनासांवत्सरिकमासिकविघ्नेतत्तिथ्यतिक्रमेजातेतदनंतरभाविकृष्णैकादश्यांदर्शेवाकर्त्तव्यमित्यर्थः। आशौचेनसूतकेनच श्राद्धविघ्नेसत्याशौचादिकेव्यतीतेकर्त्तव्यं। तत्राप्यकरणेतदनंतरकृष्णैकादश्यांदर्शेवाकर्त्तव्यं॥ तथा चऋष्यशृंगः। देवेपितॄणांश्राद्धेतुआशौचंजायतेयदा। आशौचेतुव्यतिक्रांतेश्राद्धंतेभ्यःप्रदीयते। यत्तुवचनं। तदहश्चेन्नमुच्येतकेनचित्सूतकादिना सूतकानंतरंकुर्यात्पुनस्तदहरेवचेति। एतच्चसूतकानंतरंप्रमादादिनाऽकरणेमासांतरेतदहोऽपिकालइति

प्रदर्शनार्था। अतस्तदहरेकादशी दर्शश्चेति गौणकालाः
तत्र च प्रत्यासन्नः कालो ग्राह्य इति विवेकः॥ अथामश्रा
द्धकालनिर्णयः॥ तत्रात्मनो देशकालानां विप्लवे-
समुपस्थिते। आमश्राद्धं द्विजैः कार्यं शूद्रेण तु सदैव ही-
ति। द्विजस्य देशविप्लवादिषु शूद्रस्य तु सर्वदा आमश्रा
धिकारः। एतदुक्तं भवति शूद्रस्यामश्राद्धं नित्यं द्विजस्य
नैमित्तिकमिति। नित्यत्वं चैवं। भार्यारतः शुचिर्भृत्यभर्ता
श्राद्धक्रियापरः। इत्यादिवचनैः शूद्रस्य श्राद्धाधिकारे स
त्यपि सुमंतुना न पक्वं भोजयेद्विप्रान्सच्छूद्रोऽपि कदाचन।
भोजयन्प्रत्यवायी स्यान्न च तस्य फलं लभेदिति ब्राह्मणभो
जने निषिद्धे कथं श्राद्धप्रयोग इत्यपेक्षायामामश्राद्धं द्विजैः
कार्यं शूद्रः कुर्यात्सदैव हीत्यनेनामान्नगुणो विधीयते।
अथवा ब्राह्मणभोजने निषिद्धे अर्थाद्भोजनोपयुक्तं संनि
हितमामान्नमेव प्राप्तमिति गुणस्यान्नस्य प्राप्तत्वादनू
द्यते। शूद्रः कुर्यात्सदैव हीति। अतः शूद्रस्यामश्राद्धं नि-
त्यं। अथोच्यते ब्राह्मणभोजनं भावन्निषिद्धं निषेधश्च प्रा
प्तिपूर्वकः प्राप्तिश्च विधिपूर्विका। एवं च विधिनिषेधयोः
शास्त्रगम्यत्वात्षोडशिग्रहणाग्रहणवद्विकल्पः।
तथा च पक्षे भोजनं पक्षे आमान्नमिति न नित्यत्वमिति
नैतत्सारं रागतः प्राप्तस्यापि कलंजभक्षणादेर्निषिद्धत्वा
त्। यदि रागतः प्राप्तावपि विकल्पः कलंजभक्षणमपि

विकल्पेन। तस्मात्साधूक्तं शूद्रस्यामश्राद्धं नित्यमिति। ए-
वं नित्यत्वे सिद्धे ऽऽमश्राद्धं तु पूर्वाह्ण इति शातातपवच-
नं शूद्रकर्तृके नित्ये द्विजकर्तृके चानित्ये ऽऽमश्राद्धे पूर्वा-
ह्णकालस्यांगत्वं बोधयितुं नालं नित्यानित्यसंयोगविरोधा-
त्। तस्मादनित्ये द्विजकर्तृके वतिष्ठते। नित्यं तु श्राद्धांगभूता-
पराह्णसंबद्धत्वादपराह्णे कर्त्तव्यं। अनेनैवाभिप्रायेण शा-
तातपेनोक्तं। मध्याह्नात्परतो यस्तु कुतपः समुदाहृतः।
आममात्रे तत्रैव पितृणां दत्तमक्षयमिति। अतः शूद्रोऽपरा-
ह्णे द्विजः पूर्वाह्णे। एवं व्यवस्थायां क्रियमाणायां शाता-
तपवचनयोरेव परस्परविरोधोऽपि परिहृतः स्यात्। यस्त्व-
मावास्यायां पिंडपितृयज्ञाधिकारी द्विजस्तस्य पिंडपितृ-
यज्ञकालानुरोधेन पिंडान्वाहार्यकमामश्राद्धमप्यपरा-
ह्ण एव न पूर्वाह्णे। एवंच यः कैश्चिदुक्तं शूद्रोऽपि पूर्वाह्णे कुर्या-
दिति। तच्चिंत्यं। तद्यथा। त एवं वर्णयंति। शूद्रकर्तृकाम-
श्राद्धे पूर्वाह्णकालस्योपदेशात एव स्वीकार इति महद्वैष-
म्यं। तस्मादस्मदुक्तरीतिरेवानुसरणीया। एतच्च यस्मिन्
दिने ऽमावास्यादिश्राद्धं विहितं तत्रैव पूर्वाह्णे यदा तिथेर्दि-
नद्वयसंबंधस्तदा कुतपकालीनन्यूनाधिकसंबंधवशान्नि-
र्णयः। कुतपस्य पितृश्राद्धं तत्र कुर्याद्द्विमुहूर्त्तोऽपि वा भवेदि-
ति। एतदपि प्रातःकालीनं त्रिमुहूर्त्तमध्ये द्विमुहूर्त्तमध्ये
वा कर्त्तव्यताप्रतिपादनपरं न त्वमावास्यादितिथेस्तावन्

मात्रत्वेपितत्रैवकर्त्तव्यताप्रतिपादनपरंनत्वमावास्यादिति
थेस्तावन्मात्रत्वेपितत्रैवकर्त्तव्यतापरंतथासति पूर्वेद्युःपूर्वा
ह्नकुतपादिस्पर्शेसत्यपिपरेद्युरेवश्राद्धप्रसक्तेस्तथाचानेक
वाक्यविरोधःतस्मात्पूर्वोक्तैवव्यवस्था॥ अथश्राद्धकाल
प्रसंगादावश्यकनित्यनैमित्तिकश्राद्धासंभवेप्रत्या
म्नातं। देवलः। यदेवतर्पयत्यद्भिराहिताग्निर्दिनेदिने।पि
तॄंस्तेनैवचाप्नोतिदार्शिकादिक्रियाफलं।पिंडमात्रंप्रदातव्यम·
भावेद्रव्यविप्रयोः।श्राद्धाहनितुसंप्राप्तेभवेन्निरशनोपिवा।
निरशनत्वंचपिंडदानासंभवे।पात्राभावेपरंकृत्वापितृयज्ञ
विधिंश्राद्धविधिमन्त्राभावेपरंकृत्वापितृयज्ञविधिंनरः।नि·
र्दिश्याप्यन्नमुद्धृत्यपचपात्रंततोगतिः।पिमन्त्रसंकल्पपर्यंतं
कृत्वायत्रपात्रंब्राह्मणस्तंदेशंप्रतितदन्नंनीत्वातस्मैदद्या
दित्यर्थः।सर्वाभावेक्षिपेदग्नौगवेदद्याद्दद्याप्सुवा।नतुप्रा·
प्तस्यलोपोस्तिपैतृकस्यविशेषतः।सर्वाभावेउत्तममध्यमरू·
पपात्राभावे। वृद्धवसिष्ठः।अग्निनावादहेत्कक्षंश्राद्धका
लेसमागते।तस्मिन्वोपवसेदह्निजपेद्वाश्राद्धसंहितां।विष्णु
पुराणे।सर्वाभावेवनंगत्वाकक्षामूलप्रदर्शकः।सूर्यादिलो
कपालानामिदमुच्चैःपठेन्नरः।नमेस्तिवित्तंनधनंनचान्य
च्छ्राद्धोपयोग्यस्वपितॄन्नतोस्मि।तृप्यंतुभक्त्यापितरोमयैतौभु
जौकृतौवर्त्मनिमारुतस्य।इत्येतत्पितृभिर्गीतं भावाभावप्र
योजनं।यःकरोतिकृतंतेनश्राद्धंभवतिपार्थिव।भावाभावौद्रव्य

ब्राह्मणादिसङ्ख्या वा सङ्ख्या वै। एषु पक्षेषु द्रव्यशक्त्याद्यपेक्ष
याविकल्पः। अथ परपक्षविषयं किंचिल्लिख्यते
याज्ञवल्क्यवचने विहितान्यमावास्याद्यातीनि का
निचिन्नित्यानि कानिचिन्नैमित्तिकानीत्यावश्यकानि।
एतान्येव फलसंयोगात्काम्यानि। अतोऽग्निहोत्रादिवदु
भयात्मकानि। तत्र कृष्णपक्षद्वयेन सामान्यागतेस
वितरियान्यहानि तु षोडशक्रतुभिस्तानि तुल्यानि तेषु
दत्तमथाक्षयं। शुक्लपक्षप्रतिपदमंतर्भाव्य षोडशसंख्या
पूरणं। तथा। अश्वयुक्कृष्णपक्षे तु श्राद्धं कार्यं दिने दिने।
त्रिभागहीनं पक्षं वा त्रिभागं त्वर्द्धमेव वा। अश्वयुक्कृष्णप
क्ष इति पौर्णमास्यंतमासाभिप्रायं। दिने दिने प्रतिदिनं
समस्तेपि पक्ष इत्यर्थः। त्रिभागहीनं पंचमीमारभ्य क-
र्तव्यमित्यर्थः। आद्यास्तत्र तिथयः चतुर्दशी चेति ही-
यंते अतस्त्रिभागहीनता। एवं त्रिभागपक्षे त्रिभागं द-
शमीमारभ्य अर्द्धमष्टमीमारभ्य। द्रव्यशक्त्यपेक्षया वि-
कल्पः। यमः। आषाढीमवधिं कृत्वा यः पक्षः पंचमो
भवेत्। तत्र श्राद्धं प्रकुर्वीत कन्यास्थोऽर्को भवेन्नवा। क
दाचिन्मलमासात्परपक्षोपि पंचमो भवतीति तत्रापि श्रा-
द्धमपक्रोभृगुः। एकराशिस्थिते सूर्ये यदा दर्शद्वयं भवेत्।
हव्यकव्यक्रियाहंता तदा ज्ञेयोऽधिमासकः। वृद्धिश्राद्धं त-
था सोममग्न्याधेयमहालयं। राज्याभिषेकं काम्यं च न कुर्या-

ह्रानुलंघितइति। महालयमापरपक्षश्राद्धं। यदुक्तंयमेन। कन्यास्थोर्कोभवेन्नवेति। तत्पक्षोपक्रमाभिप्रायं। अतःप क्षस्यादिमध्यावसानेषु क्वचनकन्यागतान्वयेन भवितव्यं अनेनाभिप्रायेण प्रशाखापतिः। नभस्यस्यापरेपक्षेतिथिषोडशकंतुयत्। कन्यागतान्वितंचेत्स्यात्सकालःश्राद्धक र्मस्विति। कार्ष्णाजिनिः। आदौमध्येवसानेवायत्रकन्यांव्रजेद्रविः। सपक्षःसकलःपूज्यःश्राद्धषोडशकंप्रति। अत्रषड्दैवत्यंश्राद्धं। तदाहगौतमः। पितरोयत्रपूज्यंते तत्रमातामहाअपि। अविशेषेणकर्त्तव्यंविशेषान्नरकं व्रजेत्। महालयेमातृश्राद्धंपृथग्वासहवाभवति। अत एवापरार्केगयामहालयादौतुपृथक्सहवास्वभर्तृभि रिसिद्धमिति। स्मृत्यर्थसारेपि। तत्रमातृश्राद्धंपृथक्प्रश स्तमियतिनासह। तथाअष्टकासुचवृद्धौचगयायांचमृ तेहनि। मातृश्राद्धंपृथक्कुर्यादन्यत्रपतिनासहेति। पृ थ्वीं। अन्वष्टकातथामातृश्राद्धंचैवमृतेहनि। एकोद्दि ष्टंतथामुक्त्वास्त्रीषुनान्यत्पृथग्भवेत्। एकोद्दिष्टशब्देन प्रेतत्वविमुक्त्यापादकंषोडशश्राद्धंसपिंडीकरणमुच्य ते। नत्वष्टकादौन्येकोद्दिष्टानिकार्याणीत्यभिधीयतेतत्र विश्वेदेवपूर्वकश्राद्धविधानात्। अत्रापरपक्षआचार्या द्युद्देशेनैकस्मिन्दिनेक्रमेणवाश्राद्धंकर्त्तव्यं। तथाच तुर्विंशतिमते। आचार्यगुरुशिष्येभ्यःसखिज्ञातिभ्य

एवच। तत्पत्नीभ्यश्चसर्वाभ्यस्तथैवचजलांजलीन्।पिं
डान्नेभ्यःसदादद्याद्द्याद्वादपदेनरः।तीर्थेषुचैवसर्वेषु
माघमासेमघासुच।एकस्मिन्नाह्नरोगसर्वेनानार्यादी
न्प्रपूजयेत्।दशाहादशावापिंडान्दद्यादकर्तानतु।
नैयोगिकोविधिर्नूनंपक्षेवैपंचमेस्मृतः।तस्मिन्दत्तेहं
विर्नूनंपितृणामक्षयंभवेत्।एकस्मिन्नाह्नरागृत्ये त-
दसमर्थेविषये।यद्वैकस्मिन्दिनेतदालेवएवपाकः॥
तथाचभृगुः।एककालेगतासूनांवहूनामथवाहूयोः
तंत्रेणाश्रपणंकृत्वाकुर्यात्श्राद्धंपृथकपृथक्।पूर्वकस्य
मृतस्यादौद्वितीयस्यततःपुनः।तृतीयस्यततःकुर्यादि
त्यभिधायोक्तंसन्निपातेक्षयंक्रमइति।सन्निपातएक-
स्मिन्समयेनानाश्राद्धकर्त्तव्यताप्राप्तिः।एतेषामेकोद्दि
ष्टमेव।तथाचसुमंतुः।सपिंडीकरणादूर्ध्वंयत्रयत्रप्र
दीयते।भ्रात्रेभगिन्यैपुत्रायस्वामिनेमातुलायच।मि-
त्रायगुरवेश्राद्धमेकोद्दिष्टंनपार्वणं॥अथकाम्य
कालः॥तत्रमनुः।कुर्वन्प्रतिपदिश्राद्धंसुरूपान्
लभतेसुतान्।कन्यकांतुद्वितीयायांतृतीयायांतुवेदि
नः।पशून्क्षुद्रांश्चतुर्थ्यांतुपंचम्यांशोभनान्सुतान्।
षष्ठ्यांद्युतंकृषिंवापिसप्तम्यांलभतेनरः।अष्टम्यामपि
वाणिज्यंलभतेश्राद्धदःसदा।स्यान्नवम्यामेकखुरं
दशम्यांद्विखुरंवहु।एकदश्यांतथारूप्यंब्रह्मवर्चस्विनः

सुतान्। द्वादश्यां जातरूपं च रजतं कुप्यमेव च। ज्ञातिश्रेष्ठ्यं त्रयोदश्यां चतुर्दश्यां तु क्रुप्रजां। प्रीयन्ते पितरश्चास्य ये शस्त्रेण हता रणे। पक्षत्यादि विनिर्दिष्टान् विपुलान्मनथः प्रियान्। श्राद्धदः पंचदश्यां तु सर्वान्कामान्समश्नुते। वंदिनः स्तुतिपाठकाः। स्तुतो भवतीत्यर्थः। द्यूतं द्यूतजयं। जातरूपं हेम कुप्यं सुवर्णरजतव्यतिरिक्तं ताम्रादि। पक्षतिः प्रतिपत् तदादितिथिष्वभिहितानि यानि फलानि तेषु स्वीयमनसो भीष्टान् सर्वान्कामान्कामावाप्त्या श्राद्धदः प्राप्नोतीत्यर्थः। अत्र यद्यपि सर्वकामप्राप्तिरविशेषेण कथिता तथापि न युगपत्सर्वकामानां प्राप्तिरपि तु पंचदश्यामनुष्ठितेन श्राद्धेनैकेनैक एव कामः। एवममावास्यां तु अनुष्ठितेनान्येन श्राद्धेनान्यः काम इति क्रमेणाभिलषितसिद्धिः। उपपादितं चैतन्मीमांसायां सर्वेभ्यः कामेभ्यो यदृर्शपौर्णमासाविस्येतद्वाक्यविचारे। यत्र स्मृत्यंतरेषु। तिथिवारनक्षत्रप्रयुक्त्या पृथक् फलानुपात्तानि तत्रापि पूर्वोक्तरीत्यानेकफलसिद्धिर्द्रष्टव्या। विष्णुः। सततमादित्याह्ने श्राद्धं कुर्वन्नारोग्यमाप्नोति सौभाग्यं चांद्रे समरविजयं कौजे सर्वान्कामान्बौधे विद्यामभीष्टां जीवे धनं शौक्रे जीवितं शनैश्चर इति। ब्रह्मपुराणे। अश्विन्यां प्राप्नुयाद्वश्वान् भरण्यामायुरुत्तमं। कृत्तिकायां विज्वरत्वं श्रा

द्धकृत्स्नमवाप्नुयात्। प्राजापत्ये तथा पुष्टिं सौम्ये चौजः सुशो
भनं। आर्द्रायां तु वरां सिद्धिं पुत्रान् श्रेष्ठान् पुनर्वसौ। तिष्ये
सुतान्वीरधर्मान् सार्पे च लभते धनं। जातिश्रैष्ठ्यं मघास्वे
व भाग्ये सौभाग्यमुत्तमं। दानप्राप्तिमथार्यम्णो हस्ते श्रै-
ष्ठ्यं महर्द्धिमत्। त्वाष्ट्रे दुहितरं पुण्यां स्वातौ वाणिज्यमु-
त्तमं। विशाखायां शुभान् पुत्रान्मैत्रे चाप्यहतां गतिं।
ज्येष्ठायामाधिपत्यं च मूले चारोग्यमुत्तमं। अषाढासु
यशोलाभमुत्तरासु विशोकतां। श्रवणे च गतिं पुण्यां
धनिष्ठासु धनं बहु। वारुणेन कृषेर्वृद्धिर्वै शाखेवा
चिकं बहु। वह्नीर्गाश्वोत्तरायां च पौष्णे कुप्यं महानिधिः
इति संचिंत्य योगेन विधिना साधयेच्च यत्। स तस्मिन्दि
वसे श्राद्धे भक्त्या संतर्पयेत्पितॄन्॥ अथ नित्याधिका
रे देवलः। अयुग्मास्तिथयः सर्वा युग्माभ्यः प्रतिपूजि
ताः। कालतः पूजितौ मासौ माघप्रोष्ठपदावुभौ। पक्ष
योः शुक्लपक्षाद्धि बहुलः श्राद्धपूजितः। उक्तातिथि
परीक्षेयं नक्षत्रेषु प्रवक्ष्यते। उत्तराश्रवणं तिष्यो मृग
शीर्षं प्रजापतिः। हस्तः शतभिषक् स्वाति चित्रापि
त्र्यमथाश्विनं। नक्षत्राणि प्रशस्तानि सदैवैतानि पै-
तृके। अपराण्यपि नक्षत्राणि प्रोच्यंते कारणैः क्वचित्।
अपराणि धनिष्ठादीनि कारणे माघपंचदशीयोगा
दिभिः॥ वर्ज्यान्याह गार्ग्यः। नंदायां भार्गवदिने।

त्रयोदश्यां त्रिजन्मनि। एषु श्राद्धं न कुर्वीत गृही पुत्रं च नक्षयादिति। त्रिजन्मनि जन्मदिनं जन्मनक्षत्रं जन्मतारा चेति त्रिजन्म। तथा। भानौ भौमे त्रयोदश्यां नंदाभृगुमघासु च। पिंडदानं मृदा स्नानं न कुर्यात्तिलतर्पणं वृद्धगार्ग्यः। प्राजापत्ये च पौष्णे च पित्र्यर्क्षे भार्गवे तथा। यस्तु श्राद्धं प्रकुर्वीत तस्य पुत्रो विनश्यति। प्राजापत्यं रोहिणी। पौष्णं रेवती। पित्र्यं मघा। तथा। भरणीं कृत्तिकां चैव सार्पं चैव विवर्जयेत्। महाभारते। नक्षत्रे च न कुर्वीत यस्मिन्जातो भवेन्नरः। न प्रौष्ठपदयोः कार्यं न चाग्नेये च भारत। दारुणेषु च सर्वेषु प्रत्यरे च विवर्जयेत् आग्नेयं कृत्तिका। दारुणान्यार्द्राश्लेषाज्येष्ठामूलानि। जन्मर्क्षात्पंचमं चतुर्दशं त्रयोविंशं प्रत्यरं। ज्योतिःशास्त्रे। साधारणध्रुवोग्रमैत्रे च न शस्यते मनुष्याणां। प्रेतक्रियां कथं किंचित्त्रिपुष्करयमलधिष्ण्ये च। साधारणे कृत्तिकाविशाखे। उत्तरात्रयं रोहिणी च ध्रुवाणि। पूर्वात्रयं भरणी मघा चोग्राणि। मैत्रमनुराधा। त्रिपुष्करं त्रियान्नक्षत्रं। भद्रातिथिः गुरुशुक्रभौमवारादियोगः। यमलधिष्ण्यमश्विनी। एवमन्यान्यपि विहितानि निषिद्धानि च स्मृत्यंतरतो वगम्यानि। ये पुन विधिर्न प्रति निषेधः तान्यपि विहितानि निषिद्धानि च स्मृत्यंतरतो गम्यानि। ये पुन विधिर्न प्रति निषेधः तान्यपि वि-

हिताभावे गयाश्चारिणि। प्रतिदिनमपरपक्षश्राद्धकरणे पू-
र्वोक्ततिथ्यादिदोषो नास्ति। तथा च कार्ष्णाजिनिः। नभ-
स्यस्यापरे पक्षे श्राद्धं कार्यं दिने दिने नैव नंदादि वर्ज्यं स्यान्नै-
व वर्ज्या चतुर्दशी। दशम्यादिपक्षत्रये पु चतुर्दशी वर्ज-
नीया। यदाह मनुः। कृष्णपक्षे दशम्यादौ वर्जयित्वा च-
तुर्दशीं श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतराः। अत्रादि-
शब्देन पंचम्युपक्रममष्टम्युपक्रमं गृह्यते। एवं च प्रतिपत्प्रभृ-
तिष्वेकां वर्जयित्वा चतुर्दशीमिति याज्ञवल्क्यवचनं
पंचम्यादिपक्षेष्ववतिष्ठते। अपरपक्षे या भरणी सा महा-
भरणीत्युच्यते। तथा मध्याष्टमी गयेत्युच्यते। तदुक्तं मा-
त्स्ये। भरणी पितृपक्षे तु महती परिकीर्तिता। अस्यां श्रा-
द्धं कृतं येन स गयाश्राद्धकृद्भवेत्। ब्रह्मांडपुराणे। आषा-
ढ्याः पंचमे पक्षे गया मध्याष्टमी स्मृता। त्रयोदशी गजच्छाया
गया तुल्ये तु पैतृके। सन्यासिविषयो वायुपुराणे विशे-
षः। सन्यासिनो व्याब्दिकादि पुत्रः कुर्याद्यथाविधि। महा-
लये तु यत् श्राद्धं द्वादश्यां पार्वणेन तु। त्रयोदशीवि-
षये प्रागेव लिखितयमाः। पिता पितामहश्चैव तथैव
प्रपितामहाः। जातं पुत्रं प्रशंसंति पिप्पलं शकुना इव।
मधुमांसेन खड्गेन पयसा पायसेन वा। एष दास्यति नस्तृ-
प्तिं वर्षासु च मघासु चेति। अत्र त्रयोदश्यां युगाद्या विष्ट-
द्व्यतिरिक्तं श्राद्धं पुत्रवता पुत्ररहितेन पिंडसहितमेव

कर्त्तव्यं। मघायुक्तायां तस्यां ज्येष्ठपुत्रवता पिंडरहितमेव श्राद्धं कर्त्तव्यं। कन्यागतापरपक्षप्रकरणे देवीपुराणे पिंडनिषेधात्। तत्रापि महती पूजा कर्त्तव्या पितृदैवते। कृष्णे पिंडदानं तु ज्येष्ठपुत्रो विवर्जयेत्। इति। पूजा श्राद्धं। यत्तु त्रयोदश्यां युवानस्तस्य म्रियंत इति कात्यायनवचनं त्रयोदशी प्रयुक्तकाम्यश्राद्धविषयं यस्य गृहे युवानस्तेन त्रयोदश्यां काम्यश्राद्धं न कर्त्तव्यमिति तस्यार्थः। अतः कन्यागतापरपक्षाधिकारे मघायुक्तत्रयोदश्यां विद्यमानज्येष्ठपुत्रवता पिंडरहितं श्राद्धं कर्त्तव्यमिति सिद्धं। यत्त्वांगिरसः। त्रयोदश्यां कृष्णपक्षे यः श्राद्धं कुरुते नरः। पंचत्वं तस्य जानीयात् ज्येष्ठपुत्रस्य निश्चितं। श्राद्धमात्रं निषिद्धं तन्मातामहवर्गपरित्यागेन केवलपितृवर्गश्राद्धविषयं। श्राद्धं नैवैकस्य वर्गस्य त्रयोदश्यामुपक्रमेत्। अतस्तास्तस्य येऽस्य स्युः प्रजां हिंसंति ते प्रजामिति। कार्ष्णाजिनिस्मरणात्। कन्यागतापरपक्षचतुर्दश्यां शास्त्रविहितमार्गेण महाप्रस्थानादिभिर्हतानामेकोद्दिष्टं श्राद्धं कर्त्तव्यं नान्येषां। तथा च ब्रह्मांडपुराणे। प्रायोनाशस्त्राग्निविषोद्बंधनिनां तथा। चतुर्दश्यां तु कर्त्तव्यं तस्यर्थमिह निश्चयः। मरीचिः। विषशस्त्रश्वापदाहितिर्यग्ब्राह्मणघातिनां। चतुर्दश्यां क्रिया कार्याऽन्येषां तु विगर्हिता। समस्तमागतस्यापि पितुः शस्त्रहतस्य वै॥

एकोद्दिष्टं तु कर्त्तव्यं चतुर्द्दश्यां महालये इति। विषादिमृत
गणपरिपठितस्य शस्त्रहतस्योद्दिष्टविधानाद्विषादिमृ
तानामप्येकोद्दिष्टमेवात्रेति केचिदुक्तं। वसंते ब्राह्मणो-
ऽग्नीनादधीतेत्यत्र यथा वसंत एव ब्राह्मणोऽग्न्याधानं कुर्या
न्नान्यत्र। ब्राह्मण एव वसंते नान्य इत्युभयनियमस्तथा
चतुर्द्दश्यामेव शस्त्रहतस्य नामावास्यादितिथौ शस्त्र
हतस्यैव चतुर्द्दश्यां नान्यस्येति। तदयुक्तं। यस्य पिता श-
स्त्रहतस्तस्य चतुर्द्दश्यामेव पितुरेकोद्दिष्टे पितामहादितृ
प्तिर्न स्यात् पितामहाद्युद्देशाभावात्। विहितं चापरपक्ष
प्रकरणे पितामहादेरपि तर्पणीयत्वं। कांक्षंति पुत्रपौत्रे-
भ्यः पायसं मधुसंयुतं। तस्मात्तांस्तत्र विधिना तर्पयेत्पा
यसेन तु। मध्वाज्यतिलमिश्रेणेति देवीपुराणवचनं
तु साक्षात्तिथ्यंतरकर्त्तव्यतां प्रतिपादयति। आहवेषु वि
पन्नानां विषाग्निभृगुपातिनां। चतुर्द्दश्यां भवेत्पूजा ह्यमा
वास्यां तु कामिकीति। पूजा श्राद्धं। अमावास्येति तिथ्यंत
रोपलक्षणार्थं। अपरार्के तत्रैकस्य शस्त्रहतस्यैको
द्दिष्टविधानं न तु त्रयाणां तथात्वे पार्वणमेवेत्यनेन ग्रंथे
न त्रयाणां शस्त्रहतत्वे पार्वणमेवेत्यभिहितं। स्मृतिचं
द्रिकायामपि। एकस्मिन् द्वयोर्वैकोद्दिष्टविधिरिति स्मा
र्त्तवचनमुपन्यैकस्मिन् द्वयोर्वेत्यभिधानात्त्रिषु पितृम
तामहप्रपितामहेषु नैकोद्दिष्टविधिरिति स्मार्त्तवचनं

गम्यतद्व्युक्तं । एतच्चिंत्यं । तथाहि । श्राद्धस्य तावद्वचनं
नास्ति त्रिषु मृतेषु पार्वणमेव कर्त्तव्यमिति । एकोद्दिष्टं क-
र्त्तव्यमित्येतत्तु वचनप्राप्तं । एकस्मिन्द्वयोर्वेत्येतद-
पि द्वयोरेकोद्दिष्टप्रापकं न तृतीयस्य निवर्त्तकं । तथात्वे-
ऽतात्पर्यभेदाद्वाक्यभेदप्रसक्तेः । न च परिशेषव्याख्याश्रयण-
मुचितं दोषद्वयापत्तेः । तस्मात्पित्रादिषु त्रिषु मृतेष्वप्येको-
द्दिष्टमेवेति सिद्धं । यदा तु तस्यामेव चतुर्दश्यां पित्रादिसांव-
त्सरिकं प्राप्तं पार्वणात्मकमेकोद्दिष्टात्मकं चतुर्दशीश्राद्धं
च । तदा समग्राङ्गपार्वणश्राद्धं न्यूनाङ्गैकोद्दिष्टयोरनुष्ठानं
पृथगिति निर्णयः । एवमभिहितः सकलोऽप्यपरपक्षि-
कः प्रपंचः । तत्र श्राद्धासंभवे सुमंतुः । सूर्ये कन्यास्थिते कु-
र्यात् श्राद्धं यो न गृहाश्रमी । धनं पुत्राः कुतस्तस्य पितृनि-
श्वासपीडनात् । दीपान्विता राजन् ख्याता पंचदशी
भुवि । तस्यां दद्यान्न चेद्दत्तं पितृणां वै महालये । दीपान्वि-
ता पंचदशीति तुलासंक्रमणकालोपलक्षणं । कार्ष्णा-
जिनिः । कन्यागते सवितरि पितरो यांति वै सुतान् । तावत्प्रे-
तपुरी शून्या यावद्वृश्चिकदर्शनमिति ॥ अथ संक्रांतिका-
लः ॥ तत्र वृद्धवशिष्ठः ॥ अयने द्वे विषुवति द्वे चतस्रः
षडशीतयः । चतस्रो विष्णुपद्यः स्युः संक्रांत्यो द्वादश
स्मृताः । मृगकर्कटसंक्रांती द्वे उदग्दक्षिणायने । विषु-
वे तुलामेषे गोलमध्ये ततोऽपरा इति । मृगो मकरः । गोल

मध्येऽयनविषुवगोलमध्ये गोलं चलनं। ततोऽपराः त-
तोऽपराः संक्रांतयः स्युरित्यर्थः। ज्योतिर्वशिष्ठः। वृषवृश्चि-
ककुंभेषु सिंहे चैव यदा रविः। एतद्विष्णुपदं नाम विषुवाद-
धिकं फलं। कन्यायां मिथुने मीने धनुष्यपि रवेर्गतिः। षड-
शीतिमुखाः प्रोक्ताः षडशीतिगुणाः फलैः। अयं च संक्रम-
णकालो निमेषादपि स्वल्पतर इति दीर्घकालसाध्यक-
र्मस्वंगत्वमस्य कथमित्याकांक्षायां स एव। संक्रांतिस-
मयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः। तद्योगाच्चाप्यधश्चो-
र्ध्वं त्रिंशन्नाड्यः पवित्रिका इति। एतच्च सामान्येन सकल-
संक्रांतिसाधारणं संस्पृष्टपूर्वोत्तरकालस्य पावित्र्यं प्रथयति
विशेषस्तु वचनांतरेभ्योऽवगंतव्यः। तथा च वृद्धवशि-
ष्ठः। अतीतानागते पुण्ये द्वे उदग्दक्षिणायने। त्रिंशत्क-
र्कटके नाड्यो मकरे विंशतिः स्मृताः। यत्तु अयने विंश-
तिः पूर्वा मकरे विंशतिः परेति। तत्संनिहितनाडीनां वि-
पाते पुण्यतमत्वप्रतिपादनार्थं। अत एव वशिष्ठेन।
या याः संनिहिता नाड्यस्तास्ताः पुण्यतमा इति। संनिधि
विशेषात् फलविशेषः श्रूयते। एतदुक्तं भवति। सर्वत्रा-
धस्त्रिंशन्नाड्यः ऊर्ध्वं च त्रिंशन्नाड्यः पुण्यकालः क्वचि-
दध एव क्वचिदूर्ध्वमेव क्वचिदुभयत्रापि षोडशादिदंडपरि-
मितः कालः पुण्यतरः। तत्रापि संनिहितः पुण्यतम इति
एवं च सकलवचनविरोधः परिहृतो भवेत्। वृद्धवशिष्ठः

वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश। तथा। पुण्यायां विष्णुपद्यां तु प्राक् पश्चादपि षोडश। तथा। षडशीत्यां व्यतीतायां षष्टिरुक्तास्तु नाडिकाः। गर्गः। भविष्यत्यपनेविष्णौ वर्त्तमाने तथा विधौ। षडशीतिमुखे चैव व्यतीते चोत्तरायणे। वर्त्तमाने विषो मध्य इत्यर्थः। स्मृत्यंतरमपि। मध्ये विषुवति दानं विष्णुपदे दक्षिणायने वादौ। षडशीतिमुखे तीते तथोदगयने च भूरिफलं। ज्योतिर्वशिष्ठः। अह्नः संक्रमणे पुण्यमह्नः कृत्स्नं प्रकीर्त्तितं। संक्रमस्तु निशीथे स्यात् षड्यामाः पूर्वपश्चिमाः। संक्रांतिकालविज्ञेयास्ततः स्नानादिकं चरेत्। वृद्धवशिष्ठः। अह्नि संक्रमणे पुण्यमह्नः कृत्स्नं प्रकीर्त्तितं। रात्रौ संक्रमणे पुण्यं दिनार्द्धं स्नानदानयोः। द्वितीयार्धो व्याख्यातः। स्मृतिचंद्रिकाकारेण। व्यवहितमपि दिनार्द्धमेव पुण्यं न तु संनिहितरात्रिगता नाड्यः पुण्या इत्यर्थ इति। एतदप्युक्तं। रात्रौ संक्रमणे पुण्यमित्येतद्वाक्यं न तानाड्यस्ताताः पुण्यतमाः स्मृता इति। किंच राहुदर्शनसंक्रांतिविवाहात्ययवृद्धिषु। स्नानदानादिकं कुर्यान्निशि काम्यव्रतेषु चेति। रात्रावपि स्नानाद्यधिकारात् संनिहितरात्रिगतनाडीपरिकारणाभावात्। अयं संक्रांतिप्राप्त्योपपादनपर इति स्मृतिचंद्रिकाकार आह। न चायं प्रतिप्रसवः। सर्वसंक्रांतिषूच्यते। अयनद्वयव्यतिरि-

क्रसंक्रांतौ रात्रिगतायां दिन एव संक्रांतिकृत्याभिधानादि
नेन ग्रंथेन। रात्रौ स्नानं न कुर्वीत दानं चैवेत्यस्य प्रतिप्रसवः
दिने संक्रांतिकृत्याभिधायकं वचनं तु वाशिष्ठमुदाहृतं
तस्मिन्नेव प्रकरणे। अर्द्धरात्रादधस्तस्मिन्मध्याह्नस्यो
परिक्रिया। ऊर्द्ध्वं संक्रमणे चोर्द्ध्वमुदयात्प्रहरद्वयं। पूर्णे
चेदर्द्धरात्रे न यदा संक्रमते रविः। प्राहुर्दिनद्वयं पुण्यं
मुक्त्वा मकरकर्कटाविति। अत्रापि दिन एव कर्त्तव्यं न रात्रा
वित्ययमर्थो न प्रतीयते। दिनस्यापि पुण्यकालत्वप्रतिपा
दनत्वेनाप्युपपत्तेः। तस्मादयमर्थः। अहः संक्रमणेत्व
हः पुण्यकालः। रात्रावर्द्धरात्रादधश्चेदपराह्णोपि। अर्द्ध-
रात्रे चेद्दिनद्वयं। ऊर्द्ध्वं चेत्परेद्युः पूर्वाह्णोपीति। अत्रापि पा
याः संनिहिता नाड्य इत्यनुसंधेयं। मकरकर्कटयोस्तु नैवं
मुक्त्वा मकरकर्कटाविति स्मरणात्। तर्हि तत्र कथमित्या
कांक्षायां इदमुपतिष्ठते। अयने विंशतिः पूर्वा मकरे विं
शतिः परेति। अत्रापि विशेषो भविष्योत्तरे। मिथुना
त्कर्कसंक्रांतिर्यदि स्यादंशुमालिनः। प्रभाते वा निशीथे
वा कुर्यादहनि पूर्वतः। कार्मुकं तु परित्यज्य झषं संक्रमते र-
विः। प्रदोषे वार्द्धरात्रे वा स्नानं दानं परेहनीति। झषो मक-
रः। कार्मुकं धनुः। पूर्वतः पूर्वत्र। तथा वृद्धगार्ग्यः। य
त्समयवेलायां मकरं याति भास्करः। प्रदोषे वार्द्धरात्रे वा
स्नानं दानं परेह्नीति। अर्द्धरात्रे तदूर्द्ध्वं वा संक्रांतौ दक्षिणा

यने। पूर्वमेव दिनं ग्राह्यं यावच्चोदयते रविः इति। अत्रापि क-
र्के पूर्वतन विंशतिघटिकात्मकः कालः। मकरे च परवि-
शति। घटिकात्मकश्च पुण्यतर इत्येव। अत एव पुण्य-
तर पूर्वकालसंनिहितः पूर्वदिनकालः। पुण्यतरः पर
कालसंनिहितः परदिनकालश्च कर्कटमकरयोः श्रा-
द्धादिषु ग्राह्यः संनिहितपूर्वपरकालासंभवे॥ अथ ग्र-
हणकालः॥ तत्र वृद्धगार्ग्यः। पूर्णिमाप्रतिपत्संधौ
राहुः संपूर्णमंडलं। ग्रसते चंद्रमर्कं च दर्शप्रतिपदंतरे।
ब्रह्मसिद्धांते। यावान्कालः पर्वणोंते तावान्प्रतिपद-
दितः। रवींदुग्रहणानेष्टाः सपुण्योस्मिन्श्रणाद्भवेत्। प-
र्वोत्थकालो ग्रासकालः। प्रतिपदादिकालो मोक्षका-
लः। व्यासः। त्रिदशाः स्पर्शसमये तृप्यंति पितरस्त-
था। मनुष्या मध्यकाले तु मोक्षकाले तु राक्षसाः। उ-
त्तममध्यमकनिष्ठकाल इत्यर्थः। विष्णुः। संध्या
रात्र्योर्न कर्त्तव्यं श्राद्धं खलु विचक्षणैः। द्वयोरपि च क-
र्त्तव्यं यदि स्याद्राहुदर्शनं। मत्स्यपुराणे। चंद्रसूर्य
ग्रहे चैव मरणे पुत्रजन्मनि। मलमासेपि देयं स्याद्दत्त-
मक्षयकारणं। लिंगपुराणे। चंद्रसूर्यग्रहे स्नायान्मृ-
तके सूतके पि वा। अस्नायी मृत्युमाप्नोति स्नायी मृत्युं च
विंदति। सूतके मृतके चैव न दोषो राहुदर्शने। तावदेव
भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते। एकग्रंथवचनद्वयम-

ध्यं पूर्ववचनं स्नानपरं। उत्तरं श्राद्धदानादिपरं। अन्य-
थापौनरुक्त्यापत्तेः। अंगिराः। सर्वे वर्णाः सूतकेपि मृ-
तके राहुदर्शने। स्नात्वा श्राद्धं प्रकुर्वीरन् दानं शक्त्या विव
र्जितं। वृद्धवशिष्ठः। ग्रहणे संक्रमे वापि न स्नायाद्यदि
मानवः। सप्तजन्मानि कुष्ठी स्याद्दुःखभागी च जायते।
मार्कंडेयः। चंद्रे वा यदि वा सूर्ये दृष्टे राहौ महाग्रहे। अ
क्षयं कथितं पुण्यं तत्रार्के तु विशेषतः। दृशेश्चक्षुर्व्यापार
वाचित्वात् मेघाच्छन्ने स्नानाद्यधिकारो नास्ति। तथा स्व-
राशिग्रहणेप्येकवारं दृष्ट्वा पश्चात् स्नानादिकं कर्तव्य
मिति केचन वदंति। तद्विचारणीयं। असति बाधके दर्श
नं चक्षुर्व्यापार एव। न तु दर्शनयोग्यता। यदि सा चाक्षु
र्व्यापार एव दर्शनशब्देनात्र गृह्येत तर्हि सूर्यग्रहण
स्य रात्रौ चंद्रग्रहणस्य दिवा चक्षुर्विषयत्वाभावात्स्ना
नदानाद्यधिकाराभावात् स्नानादिनिषेधो नोपपद्यते।
निषेधश्च षट्त्रिंशन्मते। सूर्यग्रहो यदा रात्रौ दिवा चंद्रग्र-
हस्तथा। तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचिदिति।
तस्मादेतद्वचनबलाद्दर्शनं नाम शास्त्रतो दर्शनमंगी
कर्तव्यं। अतो मेघादिच्छिन्नेपि दिवा सूर्यग्रहणे रात्रौ
चंद्रग्रहणे च स्नानाद्यधिकारोस्ति। यदि परं विशेषः
परिकल्प्यते तर्ह्येवं कल्पनीयं। चक्षुर्गोचरत्वे त्वधि
कं फलं तदभावे ततो न्यूनमिति। ये तु षट्त्रिंशन्मतेपि

विकिंवित्तं ते तेषामपरार्क विज्ञानेश्वर चंद्रिका हेमाद्रि
प्रभृतयः। प्रतिमहीकर्त्तव्याः एवं च ग्रस्तामये हितीयदि
ने मेघादिभिर्मुक्त दर्शनेपि शास्त्र दर्शन संभवात्स्नात्वा
भोजनाधिकारोस्तीतिन्यायतः प्राप्तेरपवादमाह मनुः
चंद्रसूर्यग्रहे नाद्याद्द्यात्स्नात्वा विमुक्तयोः। अमुक्तयो
रस्तगयोर्दृष्ट्वा स्नात्वा परेहनीति। महाभारते। सर्वाण्या
मत्रयादिंशो ग्रहणे भुक्तिमाचरेत्। चतुर्यामावधश्चैव रा-
हुग्रस्ते दिवाकरे। एतच्च बालादिव्यतिरिक्तविषयं। तथा
च वृद्धवसिष्ठः। सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्
यं। चंद्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरैर्विना। बालादिवि
षये तु मत्स्यः। अपराह्ने न मध्याह्ने न तु मंगवे भुंजीत संगवे
चेत्स्यान्न पूर्वं भोजनक्रिया। यः समर्थः सन्निषिद्धका-
ले भुंक्ते तत्र कात्यायनः। चंद्रसूर्यग्रहे भुक्त्वा प्राजाप-
त्येन शुध्यति। ग्रहणकाले भुक्तौ प्राजापत्यं ततः पूर्वं नि
षिद्धकाले तु त्रिरात्रमिति विवेकः। यदा चंद्रग्रहणे ग्रस्तो
दयस्तदा तस्मिन्नहनि नाद्यात्। तथा च मार्कंडेयः।
चंद्रस्य यदि वा भानोर्यस्मिन्नहनि भार्गव। ग्रहणं तु भ
वेत्तत्र न पूर्वं भोजनक्रिया। नाचरेत्संग्रहं चैव तथैवा-
स्तमुपागते। यावत्स्यान्नोदयस्तस्य नाश्नीयाद्यापदे
व तु। मुक्तिं दृष्ट्वा तु भुंजीत स्नानं कृत्वा ततः परं। दृष्ट्वेति
ज्ञानोपलक्षणं। तथा च वृद्धगौतमः। चंद्रसूर्यग्रहे

यद्वा। मुक्तिं हृष्ट्वातो भोक्तव्यं स्नानं कृत्वा ततः परमिति।
एतदपि ग्रस्तास्तमयविषयं। सूर्ये ग्रस्तास्तंगते ग्रहणात्पूर्वाह्ण भागे ग्रहणोत्तरभाविनी रात्रिश्चेत्यहोरात्रे भोजननिषेधः। चंद्रे ग्रस्तास्तं ग्रहणात्रिरग्रिमाहश्चेत्यहोरात्रं। अत्र श्राद्धमावश्यकं। तथा च लिंगपुराणे
सर्वस्वेनापि कर्त्तव्यं श्राद्धं वै राहुदर्शने। अकुर्वाणस्तु तत्श्राद्धं पंके गौरिव सीदति। तथा। यस्त्रिरात्रमुपोष्यैव ग्रहणे चंद्रसूर्ययोः। स्नात्वा दत्वा तु विधिवन्मोदते ब्रह्मणा सह। एकरात्रमुपोष्यैव स्नात्वा दत्वा च शान्तितः कंचुकादिव सर्पस्य निःकृतिः पापको शतः। अथ युगादिमन्वादिकालाः॥ तत्र विष्णुपुराणे। वैशाख मासस्य तु या तृतीया नवम्यसौ कार्तिक शुक्लपक्षे नभस्य मासस्य तु कृष्णपक्षे त्रयोदशी पंचदशी तु माघे
माघे पंचदशी अमावास्या। तथा च नारदीयपुराणे
द्वे शुक्ले द्वे च कृष्णे तु युगाद्याः कवयो विदुः। द्वे शुक्ले वैशाख तृतीया कार्त्तिक नवमी च। द्वे कृष्णे भाद्रपद त्रयोदशी माघामावास्या च। ब्रह्मपुराणानुसारेण माघे पंचदशी पौर्णमासी। वैशाख शुक्लपक्षस्य तृतीयायां कृतं युगं कार्त्तिके शुक्लपक्षस्य त्रेता तु नवमेहनी। अथ भाद्रपदे कृष्णे त्रयोदश्यां तु द्वापरं। माघे तु पौर्णमास्यां तु घोरं कलियुगं तथा। युगारंभास्तु तिथयो युगाद्यास्तेन

विश्रुताः। सूर्यस्य सिंहसंक्रांतावंतं कृतयुगस्य तु। अथ-
वृश्चिकसंक्रांत्यामंतं त्रेतायुगस्य तु। ज्ञेयं तु वृषसंक्रांत्यां
द्वापरांतं च संख्यया। तथा च कुंभसंक्रांत्यामंतं कलियु-
गस्य तु। युगादिषु युगांतेषु श्राद्धं कुर्यान्मुच्यते न सा। क-
ल्पभेदेन माघपंचदश्यां व्यवस्थेति केचित्। वयं तु दे-
शाचारानुसारेण व्यवस्थापयामः। पुलस्त्यः। अयन-
द्वितये श्राद्धं विषुवद्वितये तथा। युगादिषु च सर्वासु पिं-
डनिर्वपणाद्दते। वैशाखस्य तृतीयायां नवम्यां कार्त्ति-
कस्य तु। श्राद्धं कार्यं च शुक्लायां संक्रांतिविधिना नरैः।
मन्वादयो मत्स्यपुराणे। अश्वयुक् शुक्लनवमी का-
र्त्तिके द्वादशी सिता। तृतीया चैत्रमासस्य तथा भाद्रपद-
स्य च। फाल्गुनस्य त्वमावास्या पौषस्यैकादशी सिता।
आषाढस्यापि दशमी माघमासस्य सप्तमी। श्रावण-
स्याष्टमी कृष्णा तथाषाढी तु पूर्णिमा। कार्त्तिकी फा-
ल्गुनी चैत्री ज्यैष्ठी पंचदशी सिता। मन्वंतराद्यश्चैते द-
त्तस्याक्षयकारकाः। यत्र कृष्णेति विशेषनिर्देशस्त-
त्र कृष्णो वयत्र विशेषनिर्देशाभावस्तत्र सितैव। वृद्धगा-
र्ग्येण तु भाद्रपदसिततृतीया फाल्गुनामावास्याषा-
ढसप्तमी श्रावणाष्टमीर्विहाय मन्वंतरादयः कथिताः
अश्वयुक् शुक्लनवमी कार्त्तिके द्वादशी सिता। तृती-
या चैत्रमासस्य ज्येष्ठे पंचदशी सिता। सप्तमी माघमा-

सस्य पौषस्यामातथापरः। वृश्चिकेचाष्टमी कृष्णा मकरे-
कादशीसिता। गोविंदद्वादशी कुंभेमेषे पंचदशीसिता।
कार्त्तिकी फाल्गुनाषाढीपूर्णिमाद्वादशीसिता। मन्वन्तरा
दयश्चैतामुनिभिः परिकीर्त्तिताः। इति। अत्रापिपूर्ववं
देवव्यवस्था॥ अथजीवत्पितृकश्राद्धकालाः॥
तत्र कात्यायनः॥ सपितुःपितृकृत्येषुअधिकारो
नविद्यते। नजीवंतमतिक्रम्य किंचिद्दद्यादितिश्रुतिः।
अत्रापवादोमैत्रायणीयपरिशिष्टे। उद्वाहे पुत्रजनने
नेपित्र्येष्ट्यांसौमिके मखे। तीर्थे ब्राह्मणआयातेष-
डेते जीवतःपितुः। एते षट्काला इत्यर्थः। पित्र्येष्ट्यां
चातुर्मास्येषु। तथापिंडपितृयज्ञेच। सौमिके मखेसो
मारौद्रपुरोडाशात्पिंडदानेच। अन्योपि विशेषस्तत्रै-
व। अन्वष्टक्यंगयाप्राप्तौ सत्यांयच्च मृतेहनि। मातुःश्राद्धं
सुतःकुर्यात्पितर्यपिचजीवति। यत्तु। दर्शश्राद्धंगया
श्राद्धंश्राद्धंचापरपक्षिकं। नजीवत्पितृकःकुर्यात्तिलैः
कृष्णैस्तुतर्पणमितिगयाश्राद्धनिषेधकंवचनं। तत्तुग-
याश्राद्धोद्देशेनगत्वागयाश्राद्धंनकर्त्तव्यमित्येतत्परं।
पूर्वोक्तवाक्यंतुदैवाद्गयाप्राप्तौसत्यांश्राद्धविधायकं।
मनुः। ध्रियमाणेतुपितरिपूर्वेषामेवनिर्वपेत्। विप्रव
द्वापितंश्राद्धेस्वकंपितरमाशयेत्। पितायस्यतुवृत्तः
स्याज्जीवेद्वापिपितामहः। पितुःसनामसंकीर्त्यपत्रपि-

مدن پارجات ۳۷۸

तामहं। पितामहो वा मत् श्राद्धं भुंजीतेत्यब्रवीन्मनुः। पूर्वेषांपि तामहादीनां। पितुः सनामसंकीर्त्यस्तस्मात्पितुः पितामह इति स्व प्रपितामहनाम पिंडदानादिषु गृह्णीयादित्यर्थः। भविष्यत्पुराणे। जीवमानेन देयं स्याद्यस्माद्भरतसत्तम। तस्माज्जीवत्पिता कुर्याद्द्वाभ्यामेव न संशयः। विष्णुः। पितरि जीवति यः श्राद्धं कुर्याद्येषां पिता कुर्यात्तेषां कुर्यात्। पितरि पितामहे च जीवति येषां पितामहः पितरि पितामहे प्रपितामहे च जीवति नैव कुर्वीत। यस्य पिता प्रेतः स्यात्स पित्रे पिंडं निधाय प्रपितामहात्परं द्वाभ्यां दद्यात्। यस्य पितामहौ च प्रेतौ स्यातां स ताभ्यां पिंडौ दत्वा पितामहपितामहाय दद्यात्। यस्य पितामहः प्रेतः स्यात्स तस्मै पिंडं निधाय प्रपितामहात्परं द्वाभ्यां दद्यात्। यस्य पिता प्रपितामहश्च प्रेतौ स्यातां स पित्रे पिंडं निधाय पितामहात्परं द्वाभ्यां दद्यादिति। निगमः। यो जीवति पितृणां तं भोजयेत्स्वपितृस्थाने कुर्यादेके। जीवता मजीवतां वा देयमिति हिरण्यकेतुरिति। पिंडपितृयज्ञविषये मनुः। पित्र्यं जीवत्पितुर्नो कश्चिद्धोमोपि पाक्षिकः। येभ्यो वापि पिता तेभ्यो दद्याद्वैतानकर्मणि। दद्यात्पिंडमित्यर्थः। यज्ञपार्श्वः। होमान्तः पितृयज्ञः स्याज्जीवे पितरि जानतः। पितरं भोजयित्वा वा पिंडौ निपृणुयात्परौ। उभयस्य व्यतीतौ तु जीवेच्चेत्प्रपितामहः। पिंडं निपृणुयात्पूर्वौ भोजयेत्प्रपितामहं। इत्यादिवाक्यान्यन्यान्यपि अनुसंधेयानि। तत्र यथाशास्त्रं व्यवस्था। जीवत्पितृकस्याग्निमत एवाधिकारः

तथाचमनुः।नजीवत्पितृकःकुर्यात्श्राद्धमग्निमृतेद्वि-
जः।येभ्यएवपितादद्यात्तेभ्यःकुर्वीतसाग्निकः।साग्निःश्रौ-
तेनस्मार्त्तेनवा।स्मार्त्ताग्नेःपिंडपितृयज्ञविधानात्तत्राधिकारः
विवाहादिषुतस्यैवाधिकारिकर्तृत्वे अंगरूपश्राद्धकरणे
अंगिनैवैगुण्यात्तत्राप्यधिकारः।नचसाग्निरित्युपादा-
दंगीकरणेपिवैगुण्याभावः अग्निशब्दस्यस्मार्त्ताग्नाव-
पिप्रवृत्तेः श्रौताग्निष्वेवप्रवृत्तिनियमाभावात्। चातुर्मा-
स्यगतपित्र्येष्ट्यांसोमिकमखेचाहिताग्नेरेवाधिकारात्त-
त्रत्यश्राद्धेस्मार्त्ताग्नेर्नाधिकारः।यदिपूर्वोक्तकालेश्राद्धा-
धिकारःसिद्धः॥ **अथाधिमासेविहितानिनिषि-
द्धानिच** ॥ **तत्रशातातपः**॥ एकसंज्ञौयदामा-
सौस्यातांसंवत्सरेक्वचित्।तत्राद्येपितृकार्याणिदेव
कार्याणिचोत्तरे।व्यासः।षष्टिभिर्दिवसैर्मासःकथि-
तोबादरायणैः।देवकार्याणिपूर्वस्मिन्पितृकार्याणिचो-
भयोः।देवकार्याणिनित्याग्निहोत्रवैश्वदेवादीनि।तथा
पितृकार्याण्यप्यावश्यकान्येव।एवंवचनद्वयबलादा-
वश्यकानांदेवपितृकार्याणामुभयत्रकर्त्तव्यताप्रतीय-
ते।एवमादीन्यन्यान्यपिवचनान्यावश्यकदेवकार्य
पितृकार्य्यविषयाणि॥ **तथाचबृहस्पतिः**॥ नित्य
नैमित्तिकेकुर्यात्प्रयतःसन्मलिम्लुचे। तीर्थश्राद्धंगज-
च्छायाप्रेतश्राद्धंतथैवच।नित्यंयदकरणेकालातिक-

मनिमित्तं प्रायश्चित्तं श्रूयते यथा। अग्नये पथिकृते पुरोडा-
शमष्टाकपालं निर्वपेद्यो दर्शपौर्णमासयाजी सन्नमावा
स्यां वा पौर्णमासीं वातिपातयेदिति। नैमित्तिकं यस्याग्नि
गृहाग्निर्दहेत्क्षामवते प्रायश्चित्तिरित्युपक्रम्य या गृहदा
हेष्टिर्विहिता तन्नैमित्तिकं। अयमभिप्रायः। यस्यातिक्र
मे प्रायश्चित्तप्राप्तिः। यस्य गृहदाहेष्ट्यादेर्मासांतरे वि
हितकालासंभवेन मलमास एवावश्यकमनुष्ठानं
तत्सर्वमधिमासेपि कर्त्तव्यमिति। गृह्यपरिशिष्टे। अ-
वषट्कारहोमाश्च पर्व चाग्रयणं तथा। मलमासेपि
कर्त्तव्यं काम्या इष्टीर्विवर्जयेत्। अवषट्कारहोमः।
अग्निहोत्रोपासनवैश्वदेवाद्याः। दर्शपौर्णमासौ प-
र्व पार्वणस्थालीपाकश्च। आग्रयणं आग्रयणेष्टिः
आपदि पुरातनधान्याभावे कर्त्तव्याग्रयणेष्टिर्न त्व-
नापदि स्मृत्यंतरे ह्याग्रयणनिषेधात्। यमः। गर्भे
वार्द्धुषिके भृत्ये श्राद्धकर्मणि मासिके। सपिंडीकरणं
नित्ये नाधिमासं विवर्जयेत्। तीर्थस्नानं जपो होमो य
वव्रीहितिलादिभिः। जातकर्मान्त्यकर्माणि नवश्राद्धं
तथैव च। मघात्रयोदशी श्राद्धं श्राद्धान्यपि च षोडश
चंद्रसूर्यग्रहे दानं श्राद्धस्नानजपादिकं। कार्याणि म-
लमासेपि नित्यं नैमित्तिकं तथा। गर्भे गर्भनिमित्तपुंस
वनादिकर्मसु। वार्द्धुषिके अशीतिभागो वृद्धिःस्यादि

त्यादिभिरुक्तेऽवृद्धिग्रहणे। भृत्ये भृत्यस्य वेतनदाने। श्राद्ध
कर्मणि मासिकेऽमावास्याश्राद्धे। केचन ऋष्यशृंगवचन
मन्यथा पठित्वामावास्याश्राद्धनिषेधमपि कुर्वंति। तद्वच-
नं तु। संवत्सरातिरेकौ वै मासोयः स्यात्त्रयोदश। तस्मात्त्रयो
दशे श्राद्धं न कुर्यादिंदुसंक्षय इति। अयं च पाठो न युक्तः।
बहुस्मृतिविरोधादनेकनिबंधकारैरनादृतत्वाच्च। अपरे
तु तस्मात्त्रयोदशे श्राद्धं न कुर्युर्नोपतिष्ठत इति पठंति अय
मेव पाठो युक्तः। अयं च निषेधो दर्शश्राद्धादिव्यतिरिक्त
विषयः। तीर्थस्नानं पूर्वोपक्रांतं। तथा जपश्च। यवादिभि-
र्होमो नित्यहोमः। काठकगृह्यपरिशिष्टे। मलेनन्यगति
नित्यां कुर्यान्नैमित्तिकीं क्रियां। सोमयागादिकर्माणि नि-
त्यान्यपि मपि मलिम्लुचे। तथैवाग्रयणाधानचातुर्मा
स्यादिकान्यपि। महालयाष्टकाश्राद्धोपाकर्माद्यपि वर्ज-
येत्। अष्टमासविशेषाख्याविहितं वर्जयेन्मले। महाल
यो भाद्रपदापरपक्षः। अष्टमासविशेषेति मासविशेषना
मग्रहणान्यद्विहितं वै श्रावणे कर्त्तव्यमित्येवं तदपि। तथा
। प्रेतमासादिमारभ्य श्राद्धपिंडोदकक्रियाः। सपिंडीक-
रणांता अयथाकालमुपस्थिताः। अनन्यगतिकत्वेन क
र्त्तव्यं स्यान्मलिम्लुचे॥ अगस्त्यः। न कुर्यान्मलमासे·
तु काम्मिकमष्टकं चन। भुक्त्वा नैमित्तिकं श्राद्धं तत्तु तत्रैव कीर्त्ति
तं। एकोद्दिष्टं तु यत श्राद्धं तन्नैमित्तिकमुच्यते। तत्कार्ये

पूर्वमासेपिकालाधिक्येपिधर्मतः। एकोद्दिष्टंतुषोडशश्रा
द्धादिपूर्वमासेपि। अपिशब्दएवकारार्थे पूर्वमासएवक
र्त्तव्यमित्यर्थः। कौथुमिः। अब्दमेकंघटंदद्यादन्नंवापि
सुसंचितं। संवत्सरेविवृद्धेपि प्रतिमासंचमासिकं। मलमा-
समृतानांतुसांवत्सरिकंपुनर्मलमासपातेमलमासएव
कर्त्तव्यं। न शुद्धे। तथाचभृगुः। मलमासमृतानांतुय-
च्छ्राद्धंप्रतिवत्सरं। मलमासेतुतत्कार्यंनान्येषांतुकथं-
चन। तुशब्दएवकारार्थे। व्यासः। अधिमासेविपन्नानां
सौरंमानंसमाश्रयेत्। सएवतस्यमासोपिश्राद्धपिंडक्रिया
दिषु। यदाप्रथमवत्सरेदैवादधिमासस्त्रयोदशः। तदा
प्रथमाब्दिकमधिमासएव। अब्देपरिपूर्णेसपिंडीकरण-
पक्षाश्रयणेपितत्रैवसपिंडीकरणं। तदाहवसिष्ठः॥
असंक्रांतेपिकर्त्तव्यमाब्दिकंप्रथमंद्विजैः। तथैवमासिकं
श्राद्धंसपिंडीकरणंतथा। यत्तुसत्यव्रतेनोक्तं। वर्षेवर्षेतु
यच्छ्राद्धंमातापित्रोर्मृतेहनि। मलमासेनकर्त्तव्यंव्या-
घ्रस्यवचनंयथेति। एतदधिमासादन्यत्रमृतस्यसांवत्सरि
कविषयं। प्रथमाब्दिकव्यतिरिक्तविषयेच। अत्रमलमा-
सोनामाधिकमासएवनक्षयमासः। क्षयमासेतेनैवश्रा
द्धविधानात्। एकएवयदामासःसंक्रांतिद्वयसंयुतः। मा
सद्वयगतंश्राद्धंमलमासेपिशस्यतइति। गालवोपि
वर्षेवर्षेतुयच्छ्राद्धंमातापित्रोर्मृतेहनि। मासद्वयेपित

त्कुर्यात् व्याघ्रस्य वचनं यथा। मासद्वयेपि संक्रान्तिद्वय
युक्तत्वात्क्षयमास एव मासद्वयात्मकः। अपिशब्द
एवकारार्थे। क्षयमास एव श्राद्धं कुर्यादिति। एवंविधा
न्यन्यान्यपि वचनान्यस्मिन्नेव विषये योज्यानि। द्वि-
तीयाब्दिकं तु शुद्ध एव कार्यं। तस्मिंस्तु प्राकृते मासि कु
र्वीत श्राद्धं यथाविधि। तथैवाभ्युदयं सर्वं नित्यमेकं हि
सर्वदेति सत्यव्रतस्मरणात्। प्राकृते शुद्धे। नित्यं नियमेन
एकमेव श्राद्धं कुर्यान्न मलमासद्वयमित्यर्थः। यत्तु यमवच
ने। आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे। त्रयो
दशे तु संप्राप्ते कुर्वीत पुनराब्दिकमिति। तस्यायमर्थः।
प्रथमाब्दिकं मलिम्लुच एव कुर्वीत पुनराब्दिकं द्वितीया
द्याब्दिकं त्रयोदशे मासि यन्निषिद्धं। क्षयमासे तु प्रथमा
रंभ एव निषिद्धः॥ इति संक्षेपेण मलमासे विधिनिषे-
धौ कर्मणां दर्शितौ विशेषस्तु मलमासनिर्णये द्रष्ट
व्यः॥ उक्ताः श्राद्धोपयुक्ताः कालाः॥ अथेदानीं श्राद्धे
हविर्विशेषात्प्रीतिविशेषोभिधीयते। तत्र मनुः। यद्धवि-
श्चिरकालाय यच्चानंत्याय कल्पते। पितृभ्यो विधिवद्दत्तं
तत्प्रवक्ष्याम्यशेषतः। तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफले
र्वा। दत्तेन मासं प्रीयन्ते विधिवत्पितरो नृणां। द्वौ मासौ म
त्स्यमांसेन त्रीन्मासान्हारिणेन तु। औरभ्रेणाथ चतु
रः शाकुनेनेह पंच वै। षण्मासांश्छागमांसेन पार्षतेनाथ

मप्तवै। अष्टावेणस्य मांसे रौरवेणास्य मांसेन रौरवेणा नवैव तु। दिशमासांस्तु तृप्यंति वाराहमहिषामिषैः। शशकूर्मयोर्मांसेन मासानेकादशैव तु। संवत्सरं तु गव्येन पयसा पायसेन वा। वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी। कालशाकं महाशल्कं खड्गं लोहामिषं मधु। आनंत्यायैव कल्पंते मुन्यन्नानि च सर्वशः। मत्स्यः पाठीनादिः। उरभ्रो मेषः। शकुनिः पक्षी। सोप्यनिषिद्धो ग्राह्यः॥ पृषतश्चित्रमृगः। एणः कृष्णसारः। रुरुः शंबरः। गव्येन पयसा। वार्ध्रीणसो निगमोक्तः। त्रिपिबं त्विंद्रियक्षीणं श्वेतं वृद्धमजापतिं। वार्ध्रीणसं तु तं प्राहुर्याज्ञिकाः पितृकर्मणि। त्रिपिबमिति उदकपानसमये मुखं कर्णौ द्वयं चोदके मध्ये पततीति त्रिपिबः। महाशल्को मत्स्यविशेषः। लोहामिषमिति। लोहो नाम लोहपृष्ठाख्यः पक्षिविशेषः। सोपि वार्ध्रीणस इत्यपि व्यपदिश्यते। तथा च निगमे। कृष्णग्रीवो रक्तशिराः श्वेतपक्षो विहंगमः। स वै वार्ध्रीणसः प्रोक्त इत्येषा नैगमी श्रुतिरिति। अथवा लोहो लोहच्छागः। श्राद्धे मांसोपादानं क्षत्रियादिविषयं। मुन्यन्नं ब्राह्मणस्योक्तं मांसं क्षत्रियवैश्ययोरिति पुलस्त्येन क्षत्रियादीनां मांसनियमात्। छागमेषयोरालंभः कर्त्तव्यः इतरेषां तु न। तथा च कात्यायनः॥ छागमेषावालब्धव्याः शेषाणि क्रीत्वा लब्धावास-

यं मृतानां वाहृत्यपचेतेति। शंखः। क्षत्रियैस्तु मृगया
यां विधिना यदुपाहृतं। श्राद्धकाले प्रशंसंति सिंहव्याघ्र
हतं तु यत्। विष्णुः। शाकैः श्यामाकैः प्रियंगुनीवारैर्मुद्गै
र्गोधूमैश्च मासं प्रीयते। पैठीनसिः। घृतेन मासं प्रीणाति
श्रादित्यपुराणे। मधूकं रामठं चैव कर्पूरं मरिचं गुडं। श्रा
द्धकर्मणि शस्तानि सैंधवं त्रपुसं तथा। रामठं हिंगु। वायु
पुराणे। श्यामाका हस्तिनामानो विहितां यज्ञनिःसृता
न्। प्रसाधिका प्रियंगुश्च मुद्गाश्च हरितास्तथा। मुद्गाश्चे-
त्यत्र पाठांतरं। ग्राह्याः स्युः श्राद्धकर्मणि। एतान्यपि समा
नि स्युः श्यामाकानां गुणैर्द्विजाः। कुल्माषास्तिलाश्चै-
व यवाः स्युर्यव शालयः। महायवा व्रीहियवास्तथैव
च मधूलिकाः। कृष्णाः श्वेता लोहिताश्च ग्राह्याः स्युः श्रा
द्धकर्मणि। बिल्वामलकमृद्वीकपनसाम्राणि दाडिमं
भव्य पारेवताक्षोडखर्जूराणां फलानि च। कसेरुः को
विदारश्च तालकंदस्तथा बिसं। तमालं शतकंदं च तथा
वै शीतकं। कालेयं कालशाकं च सुनिषण्णं सुवर्चला।
मांसं शाकं दधि क्षीरं शस्तं वेत्रांकुरस्तथा। मांसास्कंद-
धिशाके चेत्यपि पाठः। कट्फलं कोंकणी द्राक्षा लकुचं
गोचमेव च। अथवा वुग्रीवकं चारुकर्कंधुमधुसाह्वय।
कर्कंधुविशेषणानि अल्पावुग्रीवकमित्यादीनि। अ-
त्र पाठांतरमपि कर्कंधुग्रीवकं चारुतिंदुकं मधुसाह्वयं।

वैकंकतं नालिकेरं शृंगाटक परूषकं। पिप्पलीमरिचंचैव
पटोलं बृहतीफलं। एवमादीनि चान्यानि स्वादूनि मधुरा-
णि च। नागरंचात्रवैदेयं दीर्घमूलक मेव चेति। प्रसाधिका
ख्यं धान्यं। यवशालयो यवप्रभेदाः। शालिभेदा वा। मह्रा
यणवेणुयवाः। मधूलिका यावनाल विशेषः। अस्यै-
व विशेषणं। कृष्णाः श्वेता लोहिता श्चेति कल्पतरुकारः
गोविंदराजस्तु स्मृति मंतर्यामन्य था व्याचख्यौ। कृष्णगौ
राख्याः षष्टिक शालि प्रभेदाः। गौरषष्टिकाः श्वेता लोह
वालाख्या। शालयो लोहाः। मृद्वीका गोस्तनी द्राक्षा।
भव्य पारेवतं कृतमाल विशेषः। अक्षोठं कश्मीर देशप्र-
सिद्धं फलं। गिरिसं भुवं पीलु फलं। कसेरुः कूलजो मूल
विशेषः। कोविदारः श्वेत कांचनार सदृशः। तालकंदो वा
ल मूलं। शतकंदं शतावरी। शीत कंदः शालूकं। कालेयं
करालाख्यं शाकं। सुनिषण्णं। वांगेरी सदृशं शाकं। यदा
मां साक्षमिति पाठः। तदा सुवर्चलादयः शालूकं। का
लेयं करालाख्यं शाकं। सुनिषण्णं। वांगेरी सदृशं शाकं।
यदामां साक्षमिति पाठः। तदा सुवर्चलादयः। कालेयक-
रालाख्य शाकं। सुनिषण्णं। वांगेरी सदृशं शाकं। यदामां
साक्षमामिति पाठः। तदा सुवर्चलादयः शाक विशेषाः
कोंकणादेशोद्भवा कौंकरा द्राक्षा मोचं कदली फलं। कर्कं
धुर्बदरी विशेषः। शृंगाटकं जलोद्भव मूल विशेषः। तन्मा

हचर्यात्परूषकमपित्तथैवच। नागरंशुंठी। इतरनामान्य विधानतो देशविशेषनिवासिभ्यश्चावगंतव्यानि। अथ वर्ज्यानि। तत्र शंखः। भूतृणंसुरसंशिग्रुपालक्यंमधुकं तथा। कूष्मांडालाबुवार्ताकुकोविदारांश्चवर्जयेत्। पिप्पलीमरिचंचैवतथावैपिंडमूलकं। कृतंचलवणंसर्वंवंशाग्रंचविवर्जयेत्। कोविदारपिप्पलीमरिचवंशांकुराणां विहितप्रतिषिद्धत्वाद्विकल्पः। एवंहिंगुबीजपूरादीनामपि विज्ञेयं। अथवापिप्पलीमरिचयोः शाकादिष्वनिक्षिप्तयोः प्रत्यक्षयोर्निषेधः। हिंगुनिषेधः शाकेषुनफलव्यंजनेषु। तथाचवर्ज्यप्रकरणे व्यासः। हिंगुद्रव्येषुशाकेष्वितिद्रव्येष्विति शाकविशेषणं। अन्यथा द्रव्येष्वित्यनेनैव सिद्धे शाकपदंव्यर्थंस्यात्॥ ब्रह्मांडपुराणे आसनारूढमन्नांचपादोपहतमेवच। अमेध्यैर्जंगमैः स्पृष्टंशुष्कंपर्युषितंतुयत्। द्विःस्विन्नंपरिदग्धंचतथैवाग्रावलेहितं। शर्कराकीटपाषाणैः केशैर्यच्चाप्युपद्रुतं पिण्याकंमथितंचैवतथातिलवणंतुयत्। सिद्धाःकृताश्चयेभक्ष्याः प्रत्यक्षलवणीकृताः। वाग्भावदुष्टाश्च तथादुष्टैश्चोपहृतास्तथा। वाससावावधूतानिवर्ज्यानिश्राद्धकर्मणि। राजमाषास्तथाचैववर्ज्याःसद्भिःप्रयत्नतः। आदिकंमार्गमौष्ट्रंतुसर्वमेकशफंतुयत्। माहिषंचामरंचैवपयोवर्ज्यंविजानता। द्विःस्विन्नं

घृताकादिसंस्कारार्थं जीरकादिप्रक्षेपेण यत्तुनः पक्वं। अतएव पाकादावेव संस्कारः कर्त्तव्यः। यस्त्ववंजनादेर्गौरस्यापगमे सति पुनरुष्णता पाद्यते सोपि द्वितीयः पाकः सच वर्जनीयः। अग्रावल्लेहितं उपयुक्ता गृभाणं। सिद्धाः कृताः संत इति। येषु सिद्धेषूत्तरकालं प्रक्षलवणप्रक्षेपः कृतस्तेनादुष्टाः॥ अथ ब्राह्मणपरीक्षा॥ तत्रमनुः॥ दूरादेवपरीक्षेत ब्राह्मणं वेदपारगं। तीर्थंतद्धव्यकव्यानां प्रदाने सोतिथिः स्मृतः। सहस्राणि सहस्राणामनृचां यत्र भुंजते। एकस्तान्मंत्रवित्प्रीतः सर्वानर्हति धर्मतः। ज्ञानोत्कृष्टाय देयानि कव्यानि च हवींषि च। नहि हस्तावसृग्दिग्धौ रुधिरेणैव शुध्यतः। दूरात्परीक्षा पितृपितामहाद्यभिजनाचारादिपरीक्षा। प्रदाने इतरस्मिन्नपि प्रदाने अतिथिवत्पूज्य इत्यर्थः। न ब्राह्मणं परीक्षेत दैवे कर्मणि धर्मवित्। पित्र्ये कर्मणि संप्राप्ते परीक्षेत प्रयत्नतः। श्रुतवृत्तादिभिः परीक्षेतेत्यर्थः॥ अथ पंक्तिपावनाः तत्र मनुः। अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च। श्रोत्रियान्वयजाश्चैव विज्ञेयाः पंक्तिपावनाः। त्रिनाचिकेतः पंचाग्निस्त्रिसुपर्णः षडंगवित्। ब्रह्मदेयानुसंतानो ब्रह्मवित् ज्येष्ठसामगः। वेदार्थवित्प्रवक्ता च ब्रह्मचारी सहस्रदः। शतायुश्चैव विज्ञेया

ब्राह्मणाः पंक्तिपावनाः॥ सर्ववेदेष्वेकस्मिन्वा अग्र्या
अध्यापकानां मध्ये मुख्याः॥ एवं सर्वप्रवचनेषु वेदार्थ-
निर्वचनेषु। श्रोत्रियान्वयजा वेदाध्येतृकुलजाः त्रिणाचि-
केतः अध्वर्युवेदभागस्तद्व्रतं च तदुभयं योधीते यश्च करो-
ति सोपि तद्योगात्त्रिणाचिकेतः॥ पंचाग्निः॥ गार्हपत्यदक्षि-
णाग्न्याहवनीयसभ्यावसथ्याग्निमान् त्रिषुवर्णः। अध्वर्यु
वेदभागः तस्यार्थतो ग्रंथतश्चाध्येता। षडंगवित्। शिक्षाकल्पा-
दीनामर्थतो ग्रंथतश्च वेत्ता। ब्रह्मदेयानुसंतानः ब्राह्मवि-
वाहदत्ता ब्रह्मदेया तत्संततिस्तदनुसंतानः। ब्रह्मदेयैव
यत्परंपरायां भार्या तत्संततिरिति ज्ञापनार्थमनुपदं। सा-
म्नः सततगानां ज्येष्ठसामगः। अथवा ज्येष्ठसामच्छंदोगानां
व्रतं सामानि च। तद्योगी ज्येष्ठसामगः। प्रवक्ता वेदार्थव्याख्या-
ता सहस्रदो गोसहस्रद इति मेधातिथिः। पूर्णशतवर्षः शता-
युः॥ मत्स्यपुराणे॥ यश्च व्याकुरुते वाचं यश्च मीमांसते-
ऽध्वरं। सामस्वरविधिज्ञश्च विज्ञेयाः पंक्तिपावनाः॥ वायुपु-
राणे। यतिश्च सर्वप्राणानां सर्वेषामग्रभुग्भवेत्। गृहस्था-
नां सहस्रेण वानप्रस्थशतेन च। ब्रह्मचारिसहस्रेण एको
योगी विशिष्यते॥ अथानुकल्पः॥ एष वै प्रथमः क-
ल्पः प्रदाने हव्यकव्ययोः। अनुकल्पस्त्वयं ज्ञेयः सदा
सद्भिरनुष्ठितः। मातामहं मातुलं च स्वस्रीयं श्वशुरं गुरु-
मा। दौहित्रं विट्पतिं बंधुमृत्विग्याज्यौ च भोजयेत्। विट्पतिर्जा-

माता। बंधुशब्देन शरीरबंधवः स्नेहबंधवश्च गृह्यंते। वशि-
ष्ठः। शिष्यान पिशुनान्वतो भोजयेत्॥ अथ वर्ज्याः तत्र म-
नुः॥ न श्राद्धे भोजयेन्मित्रं धनैः कार्योस्य संग्रहः। नारिं न मित्रं
यं विद्यात्तं श्राद्धे भोजयेद्द्विजं॥ याज्ञवल्क्यः॥ रोगी हीना-
तिरिक्तांगः काणः पौनर्भवस्तथा। अवकीर्णी कुंडगोलौ-
कुनखी श्यावदंतकः। भृतकाध्यापकः क्लीवः कन्यादूष्य-
भिशस्तकः। मित्रध्रुक् पिशुनः सोमविक्रयी परिविंदकः॥
मातापित्रोर्गुरोस्त्यागी कुंडाशी वृषलात्मजः। परपूर्वाप-
तिः स्तेनः कर्मदुष्टाश्च निंदिताः। रोगी दीर्घरोगी। पौनर्भ-
वः पुनर्भूपुत्रः। अवकीर्णी ब्रह्मचार्येव स्खलितब्रह्मच-
र्यः। कुंडगोलकौ परपुरुषादुत्पन्नौ। जीवद्भर्तरि कुंडः
स्यान्मृते भर्त्तरि गोलक इति मनुः। श्यावदंतः स्वभावतः
भृतकाध्यापकः॥ मूल्यं गृहीत्वाध्यापकः। मूल्यदाने-
नाध्येतापि निषिद्ध एव। सद्भिरसद्भिर्वा दोषैः कन्यादूष-
कः। कन्यादूषी। सोमविक्रयी सोमलताविक्रयी। परिविं-
दकः दाराग्निहोत्रसंयोगं कुरुते योग्रजे स्थिते। परिवेत्ता स-
विज्ञेयः परिवित्तिस्तु पूर्वज इति मनूक्तः। कुंडाशी कुंडगोल-
कसंबंधि अन्नभोजी। कुंडगोलकावभिधाय पल्ययोरन्न-
मश्नाति सं कुंडाश्युच्यते द्विज इति मनुस्मरणात्। ब्रह्मांड-
पुराणे॥ अन्यथा। चतुःषष्टिपलैः शुद्धैः कुंडं प्रस्थ चतु-
ष्टयं। भवेत्तस्य तु निर्गिरेत्स कुंडाशी पतन्त्यधः। वृषलात्मजः

वृषलोधर्महीनस्तदात्मजः। अथवा वृषलःशूद्रःसस्मात्म-
जोयस्यस तादृशः। परंपूर्वापतिः। परपूर्वा पुनर्भूः। कर्मदुष्टाः
शास्त्रविरुद्धकारिणः। चकाराद्धर्मविद्वेषजननादयः
मनुः॥ चिकित्सकान्देवलकान्मांसविक्रयिणस्तथा। विप-
णेनचजीवंतोवर्ज्याःस्युर्हव्यकव्ययोः॥ यक्ष्मीचपशुपालश्च
परिवेत्तानिराकृतिः। ब्रह्मविट्परिवित्तिश्चगणाभ्यंतर ए-
वच। यो पशुपालोवृत्त्यर्थं। निराकृतिर्नास्तिकः। गणाभ्यं-
तरो मठब्राह्मणादिः। कुशीलवोवकीर्णी च वृषलीपतिरेव-
च। पौनर्भवश्चकाणश्चयस्यचोपपतिर्गृहे। कुशीलवो
नटः। अकारणपरित्यागीमातापित्रोर्गुरोस्तथा। ब्राह्मै-
र्यौनैश्चसंबंधैःसंयोगंपतितैर्गतः॥ अथब्राह्मणनिमं-
त्रणविधिस्तन्नियमाश्च तत्रवाराहपुराणे॥ वस्त्र-
शौचादिकर्त्तव्यंश्वःकर्त्तास्मीतिजानता। स्थानोपलेपनं
भूमिंकृत्वाविप्रान्निमंत्रयेत्॥ दंतकाष्ठंतुविसृजेत्ब्रह्मचा-
रीशुचिर्भवेत्। वस्त्रशौचादिकमह्निकृत्वाश्राद्धभूमिंपरि-
गृह्यतांदक्षिणाप्रवणांद्विगुणोपेतांकृत्वारात्रौविप्रान्नि-
मंत्रयेत्। ततश्चब्राह्मणेभ्योदंतकाष्ठंविसृजेत्। निमंत्रणं
त्वाकुर्त्तव्यमाह पैठीनसिः श्वःश्राद्धंकरिष्यामीतिसंक-
ल्प्यब्राह्मणान्श्रोत्रियान्पंच सप्त वा निमंत्रयीतेति।
द्वौवैश्वदेवार्थंत्रयःपित्र्यर्थमितिपंच। चत्वारोवैश्वदेवार्थंत्र-
यः पित्र्यर्थमितिसप्त। ननुद्वौविश्वेदेवस्थानेपंचपितृस्थान

इति सप्तसंख्या किमिति नांगीक्रियत इति चेत्। नैवं। दैवे युग्मा-
न्यथा प्राप्तिः। पित्र्य एकैकस्येति कात्यायनेन शक्तिसंभवेऽ-
काद्विक्रमेण पित्र्येऽप्ययुग्मब्राह्मणवृद्धिरहिता ततश्च समं
स्यादश्रुतित्वादिति न्यायेन पित्र्यादित्रये एवं प्रत्येकमेकै-
कं वा त्रींस्त्रीन्वा निमंत्रयेदिति नियतं। तथा च पित्र्ये पंचानां
निमंत्रणे पितृपितामहप्रपितामहोद्देशेन समविभागो न प्र-
सज्येतेति। पूर्वोक्त एष विभागः। अथवा सप्त पंच वेति पित्र्य-
ब्राह्मणसंख्यैव। यत्तु मनुनोक्तं॥ द्वौ दैवे पितृकृत्ये त्री-
नेकैकमुभयत्र वा। भोजयेत्सुसमृद्धोऽपि न प्रसज्जेत विस्तर इ-
ति। तत्तु देशकालबलाद्यभावे विस्तरे क्रियमाणे कर्म्मवैगु-
ण्यभयाद्विस्तारनिषेधपरं॥ याज्ञवल्क्यः॥ मातामहाना-
मप्येवं तंत्रं वा वैश्वदेविकं। वशिष्ठः॥ अपि वा भोजयेदेकं
ब्राह्मणं वेदपारगं। यद्येकं भोजयेत् श्राद्धे दैवं तत्र कथं भवेत्
अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य तु। देवतायतने कृत्वा
यथाविधि समाचरेत्। प्रास्येदन्नं तथाग्नौ तु दद्याद्वा ब्रह्म-
चारिणे॥ देवलः॥ श्वः कर्त्तास्मीति निश्चित्य दाता विप्रा-
न्निमंत्रयेत्। निरामिषं सकृद्भुक्त्वा सर्वं भुक्तजने गृहे। यमः
जातिक्रियाच बोधाद्यैर्गुणैर्युक्तानलोलुपान्। प्रार्थयीत
प्रदोषांते भुक्त्वा न शायितान्द्विजान्। देशाद्यादेरवगतिरव-
बोधः। अकृतशयनक्रियाश्च शायिताः। प्रार्थनाप्रकारमा-
ह॥ प्रचेताः॥ कृतापसव्यः पूर्वेद्युः पितॄन्पूर्वं निमंत्रयेत्

भवद्भिः पितृकार्यं न संपाद्यं च प्रसीदत। सव्येन वै पूर्ववदेवार्थं प्रणि-
पत्य निमंत्रयेत्। अत्र पूर्वं प्राधान्येन गौरवेणेति यावत्।
न तु प्रथममित्यभिप्रायः। वैश्वदेविकब्राह्मणनिमंत्रणस्य
प्राथम्यात्। सव्येन सव्यांसस्थितयज्ञोपवीतान्वितेन। तत्रै-
वं प्रयोगः। पूर्वोक्तः पितृकार्यं भविता भविष्यतीति वा तत्र विश्वे-
देवस्थाने पितृस्थाने आहवनीयार्थे भवद्भिः क्षणः स्वीकर्त-
व्यः। प्रसीदतेति प्रणिपत्य निमंत्रणं शूद्रकर्तृश्राद्धे। दक्षि-
णं चरणं विप्रः सव्यं वै क्षत्रियस्तथा। पादावादाय वैश्यो-
ह्यौ शूद्रः प्रणतिपूर्वकं। निमंत्रयीत पूर्वेद्युरिति स्मरणात्॥
मत्स्यपुराणे चरणग्रहणे विशेषः॥ दक्षिणं जा-
नुमालभ्य त्वं मयात्र निमंत्रितः। एवं निमंत्र्य नियमाञ्छ्रा-
वयेत्पैतृकान्बुधः। अक्रोधनैः शौचपरैः सततं ब्रह्मचारि-
भिः। भवितव्यं भवद्भिश्च मया च श्राद्धकर्मणि। पूर्वेद्युर्निमंत्र-
णासंभवे॥ देवलः॥ असंभवे परेद्युर्वा ब्राह्मणांस्तान्नि-
मंत्रयेत्। निमंत्रणं च भोजनीयब्राह्मणगृहं गत्वा कर्त्तव्यं॥
तथा चात्रिः॥ प्रथमेऽह्नि निवासस्थान्श्रोत्रियादीन्निमंत्रयेत्
निमंत्रणं शिष्यादिभिरपि कार्यं॥ तथाह यमः॥ स्वयं शिष्यो
यथा सुतः॥ प्रचेताः॥ सवर्णं प्रेषयेदाप्तं द्विजानामुपमंत्रणे।
एषु पूर्वः पूर्वः श्रेयान्॥ यमः॥ अभोज्यं ब्राह्मणस्यान्नं वृष-
लेन निमंत्रितं। तथैव वृषलस्यान्नं ब्राह्मणेन निमंत्रितं। ब्राह्म-
णशूद्रयोरेव निषेधात्। क्षत्रियवैश्यकर्तृके श्राद्धे ब्राह्मणेन निमंत्रि-

तेपि न दोषः। अत एव प्रचेतोवचने सवर्णाग्रे पश्येदिति संभ-
वाभिप्रायं। अत्रिस्तु निमंत्रितविप्रकर्तव्यमाह। ते तं तथेत्यविघ्ने-
न गते यो रजनी यदि। यथाश्रुतं प्रतीक्षेरन् श्राद्धकालमतंद्रिताः
ते निमंत्रितास्तन्निमंत्रणकर्तारं यदीयं रात्रिरविघ्नेन गता त-
र्हि तथास्त्वित्युक्त्वा श्राद्धकालं प्रतीक्षेरन्नित्यर्थः॥ कात्या-
यनः॥ अनिंद्येनामंत्रितो नापक्रामेत्। विधिवत्केतनं प्रति-
गृह्य शक्तः सन्नातिक्रामेत्। केतनमामंत्रणं। शक्त इत्युपाद-
नादंगीकृत्यापि भोक्तुमसामर्थ्ये सत्यतिक्रमेण दोष इत्युक्तं भव-
ति॥ मनुयमौ॥ कथितस्तु यथान्यायं ब्राह्मणो हव्यकव्ययोः॥
कथंचिदप्यतिक्रामेत्पापसूकरतां व्रजेत्। निमंत्रितब्राह्मणापरि-
त्यागे। यमनारायणौ। केतनं कारयित्वा तु योतिपातयते द्वि-
जः। निवारयति दुर्मतिरिति॥ नारायणपाठः॥ ब्रह्महत्याम-
वाप्नोति शूद्रयोनौ च जायते॥ नारायणः॥ आमंत्रितस्तु यः श्रा-
द्धे कुर्यादन्यस्य भक्षणं। संवत्सरकृतं पुण्यं तस्य नश्यति दुर्मतेः
अन्यत्र निमंत्रितः सन्नन्यत्र यः प्रतिगृह्णाति तं प्रति देवलः। पूर्वं
निमंत्रितोन्येन कुर्यादन्यप्रतिग्रहं। भुक्त्वाहारेयथवा भुंक्ते सुकृतं
तस्य नश्यति। आमंत्रितश्चाहूतः सन् श्राद्धकालातिपातं न कुर्यात्
तथा च ब्रह्मपुराणे॥ आमंत्रितश्चिरं नैव कुर्याद्विप्रः कदाचन।
देवतानां पितॄणां च दातुरन्नस्य चैव हि। अथ श्राद्धदिनपूर्वा-
ह्ने दातृकृत्यं तत्र प्रचेताः॥ श्राद्धभुक्प्रातरुत्थाय न प्रकुर्याद्दंतधाव-
नं। श्राद्धकर्ता न कुर्वीत दंतानां धावनं बुधः। यजमानकृत्यमाह

देवलः ॥ तथैवयंत्रितो दाता प्रातः स्नात्वा सहांबरः ॥ आर-
भेत नवैः पात्रैरन्वारंभं च बांधवैः । तथैव पूर्वोक्तप्रकारेण यं-
त्रितो नियतः । दाता श्राद्धकर्त्ता । अन्वारंभः पाकारंभः । पा-
कसंभृत्यनंतरं कर्त्तव्यमाह ॥ हारीतः ॥ पूर्वेद्युर्ब्राह्मणा-
नामंत्र्येदित्यधिकारे पूर्वोभूते दक्षिणां दिशं गत्वा दक्षिणा-
प्रवणान्समूलान्दर्भानाहरेदपरिगृहीतांश्चापः ॥ उश-
नाः ॥ गोमयोदकैर्भूमिभाजनभांडशौचं कुर्यात् ॥ देवलः
तिलानवकिरेत्तत्र सर्वतो बंधयेदजान् । असुरोपहृतं सर्वं ति-
लैः शुद्ध्यत्यजेन च । ततो बहुसंस्कारैर्नैकव्यंजनभक्ष्यवत्
चोष्यपेयसमृद्धं च यथाशक्त्युपकल्पयेत् । ततोऽनिवृत्ते
मध्याह्ने कृत्तरोमनखान्द्विजान् । अभिगम्य यथामार्गं
प्रयच्छेद्दंतधावनं । तैलमभ्यंजनं स्नानं स्नानीयं च पृथ-
ग्विधं । पात्रैरौदुंबरैर्दद्याद्वैश्वदेवत्यपूर्वकम् । मध्याह्ने
अनिवृत्ते मध्यात्पूर्वं पूर्वाह्न इत्यर्थः । यथामार्गं उक्तविधि-
ना दंतधावनं प्रयच्छेत् । एतच्च पूर्वेद्युरात्रौ दंतकाष्ठदाने
वेदितव्यम् । अभ्यंजनं तैलापकर्षकद्रव्यम् । स्नानं स्ना-
नोदकम् । स्नानीयं सुगंधिचूर्णमुद्वर्त्तनाद्युपयोगि । औ-
दुंबरं ताम्रम् ॥ अथ श्राद्धदिनापराह्णकृत्यम् ॥ त-
त्र यमः ॥ ततः स्नात्वा निवृत्तेभ्यः प्रत्युत्थाय कृतांजलिः
पाद्यमाचमनीयं च संप्रयच्छेद्यथाक्रमम् । मार्गगम-
नजनितोपहतिशुद्ध्यर्थं पाद्यं पादप्रक्षालनोदकम् ।

आचमनीयमाचमनोदकं च पृथक्पृथगागमनक्रमेणैक
समयागमने निमंत्रणक्रमेणेत्यर्थः॥ याज्ञवल्क्यः॥ अ-
पराह्णे समभ्यर्च्य स्वागतेनागतांस्तु तान्। स्वागतमिति प्रश्न
रूपत्वात्प्रत्युत्तरं ब्राह्मणैर्दातव्यं। एवमन्यत्रापि। ततो वैश्व-
देविके यज्ञोपवीतिना पैतृके प्राचीनावीतिना कार्यं॥ ब्रह्मांड
पुराणे॥ उदङ्मुखस्तु देवानां पितॄणां दक्षिणामुखः। प्रदद्या-
त्पार्वणश्राद्धं दैवपूर्वं विधानतः॥ कात्यायनः॥ दक्षिणं पा-
तयेज्जानुं देवान्परिचरन्सदा। पातयेदितरं जानुं पितॄन्परि-
चरन्सदा॥ बौधायनः॥ प्रदक्षिणं तु देवानां पितॄणामप्र-
दक्षिणं। देवानामृजवो दर्भाः पितॄणां द्विगुणास्तथा द्वि-
गुणास्तथा। द्विगुणा मध्यभंगेन द्विगुणी कृताः। संक-
ल्पानंतरं॥ मत्स्यपुराणे॥ पादप्रक्षालनार्थं तु भवन-
स्याग्रतो भुवि। गोमयेनानुलिप्तायां गोमूत्रेण तु मंडले। कर्त-
व्ये इत्यर्थः। गोमूत्रमुदकस्यापि प्रदर्शनार्थं। तच्च गोमयसहि-
तं॥ शंखः॥ उदकप्लवमुदीच्यं तद्दक्षिणं दक्षिणाप्लवं। उ-
त्तरेक्षणसंयुक्तान्पूर्वाग्रान्विन्यसेत्कुशान्। दक्षिणे दक्षिणा-
ग्रांस्तु सतिलान्विन्यसेत्कुशान्। तिलेषु विशेषश्चापस्तंबेनो-
क्तः। अरण्ये समुत्पन्ना अकृष्टफलिनास्तथा। ते वै श्राद्धे पवि-
त्रास्तु तिलाः स्तेन तिलास्तिलाः। ग्राम्यतिलानां तिलकार्यकरा इ-
त्यर्थः। अनरण्यतिलेषु सत्सु न ग्राम्या ग्राह्याः। ब्रह्मनिरुक्ते।
पादं चैव न देवार्घ्ये दैव्या दोषप्रयोजयेत्। शन्नोदेवीति मंत्रेण।

पाद्यं चैव प्रदापयेत्। शन्नो देवीति मंत्रं पठित्वा पुरूरवार्द्रवःसंज्ञ-
का विश्वे देवा इदं वः पाद्यमिति दद्यात्। एवं पित्रर्थं ब्राह्मणपा-
दयोरपि शन्नो देवीति मंत्रेण पितरमुकगोत्रामुकशर्मन्नमुकरू-
प इदं ते पाद्यमिति दद्यात्। एतच्चरणक्षालनं स्वयमेव कुर्यात्-
तथा च यमः। पादप्रक्षालनं कुर्यात्स्वयमेव विनीतवदिति। पा-
दप्रक्षालनानंतरं मंडलाद्दक्षभागे स्थित्वा चांतेषु ब्राह्मणेषु स-
त्सु कर्तुराह। दर्भपाणिर्द्विराचम्य लघुवासा जितेंद्रियः। आ-
सनेषु सदर्भेषु विविक्तेषूपवेशयेत्। लघुवासाः शुद्धवासाः॥
यमः। आसनं कुशपं दद्यादितरद्वापवित्रकं। तथा आसनं स्पृशा-
न्सव्येन पाणिना ब्राह्मणमुपसंगृह्य समाध्वमिति चोक्तोपवेश-
येदिति। ब्राह्मणमुपसंगृह्य दक्षिणहस्तेनान्वालभ्य स्पृष्ट्वेत्य-
र्थः तथा। आस्यतामिति तान्ब्रूयादासनं संस्पृशन्नपि। उप-
वेशने मंत्रमाह। धर्मः। समस्ताभिर्व्याहृतीभिरासने चूपवेशये-
त्। दिङ्नियममाह याज्ञवल्क्यः। द्वौ दैवे प्राक्त्रयः पित्र्ये
उदगेकैकमेव वा। दैवे प्राङ्मुखावुपवेशनीयौ। पित्र्ये उदङ्मु-
खा इत्यर्थः। यत्तु मैत्रायणीयपरिशिष्टे। दक्षिणाग्रेषु दर्भेषु
प्राङ्मुखान्योजयेदुदङ्मुखान्नित्येक इति। तत्प्राङ्मुखोपवे-
शनं मैत्रायणीयानामेव व्यवस्थितं। ब्रह्मपुराणे। पृथक्
पृथगासनेषु तिलतैलेन दीपकाः। अविच्छिन्नास्तथा देया-
स्ते तु रक्ष्यास्तु वै द्विजैः। आसनेषु आसनसन्निधौ। यमः॥
भिक्षुको ब्रह्मचारी वा भोजनार्थमुपस्थितः। उपविष्टेष्वनुप्रा-

ष्टः कामं तमपि भोजयेत्। भिक्षुको यतिः। उपविष्टेष्वनुप्राप्त
इति वदता अतिथ्यर्थं पूर्वमेव ब्राह्मणासंपादनं कर्तव्यमि-
त्यर्थादुक्तं भवति। उपविष्टब्राह्मणानुज्ञया तमतिथिं भोज-
येत्। ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेदिति मनुस्म-
रणात्। शक्तित इत्युपादानात् बहुष्वतिथिषु प्राप्तेष्वेकं
द्वौ वा स्वशक्त्यनुसारेण भोजयित्वेतरानन्नसत्कारादिभिः प्री-
णयित्वा प्रस्थापयेदित्युक्तं भवति। यत्तु वृद्धशातातपवच-
नं। आतिथ्यरहिते श्राद्धे भुंजते येऽबुधा द्विजाः। वृथा तेना-
न्नपाकेन काकयोनिं प्रयांति ते इति। तद्यथोक्तकाले अतिथि-
लक्षणोपेतभिक्षुकादि आगतेष्वातिथ्यपूजारहितविष-
यमवगंतव्यं। एवमासनोपविष्टेषु ब्राह्मणेषु सत्सु। ब्रह्मांड-
पुराणे। श्राद्धं करिष्य इत्येवं पृच्छेद्विप्रान्समाहितः। कुरु-
ष्वेति तैस्तैरुक्तो दद्याद्भोजलिं ततः। कुर्याद्दर्भासनं ततः इत्य-
पि पाठः। कात्यायनः। सर्वप्रश्नेषु पंक्तिमूर्द्धन्यं पृच्छति
सर्वान्वेति। तदनंतरं निगमः। अपहता इति तिलान्विकिरेत्
पात्रोक्षयेदिति। तिलविकिरणानंतरं ततः पूर्ववानीवीबं-
धनं कुर्यात्। कटिप्रदेशे दर्भान्निक्षिपेदित्यर्थः। तत्र दक्षिण-
वामयोर्यथासंप्रदायं व्यवस्था। याज्ञवल्क्यः। पाणिप्र-
क्षालनं दत्वा विष्टरार्थान् कुशानपि। आवाहयेदनुज्ञातो वि-
श्वेदेवास इत्यृचा। आसनार्थदर्भदाने विशेषः स्मृत्यंतरे। पि-
तृकर्मणि वामे वै दैवे कर्मणि दक्षिणे। विष्टरे देवस्थाने यवा।

ग्रास्याः । देवानां यवा दर्भा इति काठकेऽभिधानात् । अत्र यवाक्षत-
योर्विकल्पः । अक्षतानामपि स्मृत्यंतरेऽभिधानात् । कर्मविशे-
षे विभक्तिविशेषनियममाह श्लोकसंग्रहकारः । अक्षय्या-
सनयोः षष्ठी द्वितीयावाहने स्मृता । अन्नदाने चतुर्थी स्याच्छे-
षाः संबुद्धयः स्मृताः इति । दर्भासनदानानंतरं गृह्यसंग्रहकारः
ततः पुनरपो दत्वा निमंत्रयेत् । देवे क्षणः क्रियतामिति ततः
ओंतथेति विप्रो ब्रूयात्प्राप्नोतु भवानिति कर्त्ता पुनर्ब्रूयात्प्राप्न-
वानीति विप्रः पुनर्ब्रूयादिति । निमंत्रणं वांगुष्ठव्यतिरिक्तं ।
ब्राह्मणहस्तं गृहीत्वा कर्त्तव्यं । निरंगुष्ठं गृहीत्वा तु विश्वान्दे-
वान्समाह्वयेदिति ब्रह्मांडपुराणस्मरणात् । निरंगुष्ठं गृही-
त्वा निमंत्र्य विश्वान्देवान्समाह्वयेदित्यर्थः । यमः । यवहस्त-
स्ततो देवान्विज्ञाप्यावाहनं प्रति । आवाहयेदनुज्ञातो विश्वेदे-
वास इत्यृचा विश्वे देवाः शृणुतेति मंत्रं जप्त्वा ततोऽक्षतान् ।
ओषधय इति मंत्रेण विकिरेच्च प्रदक्षिणं । विश्वेदेवास आगत
इत्यृचावाह्य ततो विश्वे देवाः शृणुतेमं हवं म इति जपित्वा तत
ओषधयः प्रमोदध्वमिति मंत्रेण दक्षिणपादादिमस्तकांत-
मक्षतानारोपयेदित्यर्थः । अक्षतग्रहणं पुष्पाणामपि प्रद-
र्शनार्थं । प्रचेताः । पादप्रभृति मूर्द्धांतं देवानां पुष्पपूजनमि-
ति । कर्मविशेषे विश्वेदेवनामानि बृहस्पतिना दर्शितानि ।
इष्टिश्राद्धे क्रतुर्दक्षः सत्यो नांदीमुखे वसुः । नैमित्तिके काल-
कामौ काम्ये च धुरिलोचनौ । पुरूरवार्द्रवौ चैव पार्वणे समुदा-

स्मृतौ। उत्पत्तिं नाम चैतेषां न विदुर्ये द्विजातयः। अयमुच्चारणी-
यस्तैः श्लोकः श्रद्धासमन्वितैः। आगच्छंतु महाभागा विश्वे-
देवा महाबलाः। ये यत्र विहिताः श्राद्धे सावधाना भवंतु त इति
इष्टिश्राद्धमाधानाद्यौ क्रियमाणं नांदीमुखे वृद्धिश्राद्धे नैमि-
त्तिके सपिंडीकरणे। कामनया नुष्ठेयमाण्यामहालयादि-
श्राद्धं काम्यं। पार्वणं दर्शश्राद्धं। सकलश्राद्धप्रकृतिभूतं।
यदा महालयादिश्राद्धं केवलनित्यबुद्ध्या करोति तदा पु-
रूरवार्द्रवावेव। यदा तु केवलकाम्यबुद्ध्या तदा धुरिलोचनावे-
व। यदोभयबुद्ध्या तदापि धुरिलोचनावेव यतः काम्यं नि-
त्यस्य बाधकं। यदा तु गोदोहनेन पशुकाम इति वद्गुणफ-
लाधिकारः स्यात्। न दोपकर्मे कामनाभावान्नित्यकर्मा-
श्रयणे न गुणफलविधेश्च पुरूरवार्द्रवावेवेति विवेकः। अनेनै-
वाभिप्रायेणादिपुराणे। विश्वे देवौ क्रतुर्दक्षः सर्वास्विष्टि-
षु कीर्त्तितौ। नित्यं नांदीमुखे श्राद्धे वसुसत्यौ च पैतृके। नवा-
न्नलंभने देवे कालकामौ सदैव हि। अपि कन्यागते सूर्ये का-
म्ये च धुरिरोचनौ। पुरूरवार्द्रवौ चैव विश्वे देवौ च पार्वण इति
पैतृके नवान्नलंभने। नवान्नलाभरूपनिमित्तेन पितृभक्त्या
नूतनात्र लवान्नलंभनं। आवाहनानंतरं। याज्ञवल्क्यः।
यवैरन्ववकीर्याथ भाजने सपवित्रके। शन्नो देव्या पयः क्षि-
प्त्वा यवोसीति यवांस्तथा। विश्वे देवस्थाने अर्घ्यपात्रमेकं द्वेवा
पितृस्थाने एकं त्रीणि वा परदेवत्येषु दध्यात्कुर्वीत। अर्घपात्राणि

हा कात्यायनः। सौवर्णराजतौदुंबरखड्गमणिमयानां पा-
त्राणामन्यतमेषु यानि चाविद्यंते पत्रपुटिकादिषु चेति। अनि-
षिद्धेष्विति शेषः। राजतं दैवे निषिद्धं। मत्स्यपुराणे। शिव-
नेत्रोद्भवं यस्माज्जातस्तत्पितृवल्लभं। अमंगलं तद्यत्नेन देव-
कार्येषु वर्जितं। चतुर्विंशतिमते। द्वे द्वे शलाके देवानां पात्रे
कृत्वा पयः क्षिपेत्। शन्नो देव्या यवोसीति यवानपि ततः क्षि-
पेत् पुष्पधूपादिभिः पूजां कृत्वा पात्रेषु मानवः। पितृपात्रे वि-
शेषोयं तिलोसीति तिलान्क्षिपेत्। तिस्रस्तिस्रः शलाकास्तु
पितृपात्रेषु पार्वणे। एकोद्दिष्टे शलाकैकां निधायोदकमाह-
रेत्। शलाका साग्रः कुशः। योगयाज्ञवल्क्यः। पवित्रेस्थ
इति मंत्रेण द्वे पवित्रे च कारयेत्। अनंतर्गर्भिते नाग्रच्छिन्ने प्रादेश-
संमिते। पवित्रे स्थो वैष्णवी वायुर्वा मनसा पुनात्विति मंत्रः। य-
ज्ञपार्श्वः। ओषधीमंतरे कृत्वा अंगुष्ठांगुलिपर्वणोः। छिं-
द्यात् प्रादेशमात्रं तु पवित्रं विष्णुदैवतं। एवमर्घ्यपात्रस्थापना-
नंतरं। याज्ञवल्क्यः। या दिव्या इति मंत्रेण हस्ते त्वर्घ्यं विनि-
क्षिपेत्। प्रत्यर्घदानं मंत्रावृत्तिः। एवमुदकप्रक्षेपेपि। अत्र वि-
शेषमाह। गार्ग्यः। दत्त्वा हस्ते पवित्रं तु कृत्वा पूजां तु पादतः
या दिव्या इति मंत्रेण हस्ते त्वर्घ्यं विनिक्षिपेत्। ब्रह्मपुराणे
ततो वामेन हस्तेन गृहीत्वा चमसान् क्रमात्। पितृतीर्थेन त-
त्तोयं दक्षिणेन च पाणिना। विश्वेदेवस्थाने देवतीर्थेन द-
द्यात्। पितृस्थाने पितृतीर्थेन दद्यादिति विवेकः। ततश्च संस्र-

वांस्तत्पात्रे गृहीत्वा विश्वेभ्यो देवेभ्यः स्थानमसीति पात्रमु- त्तानं निदधीत। तथा च॥ याज्ञवल्क्यः॥ दत्त्वार्घ्यं संस्रवां- स्तेषां पात्रे कृत्वा विधानतः। पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः। पितृस्थाने न्युब्जत्वविधानाद्देवस्थाने उत्ता- नस्थापनमभिप्रेतं। संस्रवा ब्राह्मणहस्तगलितार्घोदकानि प्रचेताः। पादप्रभृति मूर्द्धांतं देवानां पुष्पपूजनं। शिरःप्र- भृति पादांतं नम्ये वइति पैतृके। पुष्पग्रहणं तिलानामपिप्र- दर्शनार्थं। याज्ञवल्क्यः। दत्त्वोदकं गंधमाल्यं धूपदानं सदीपकं। प्रत्युपचारं हस्ते सलिलं दद्यात्। ब्रह्मपुराणे॥ श्वेतचंदनकर्पूरकुंकुमानि शुभानि च। विलेपनार्थं दद्या- द्यपच्चान्यत्पितृवल्लभं। श्वेतचंदनं हरिचंदनं। व्यासः। सपवित्रकरो गंधैर्गंधद्वारेति पूजयेत्। धूपं च धूरसीत्युक्त्वा दीपो ज्योतिरिदं च ते। गंधदानं पवित्रसहित एव कुर्यात्। विलेपने तु विशेषमाह। वृद्धशातातपः। पवित्रं तु करे कृ- त्वा यः समालभते द्विजान्। राक्षसानां भवेच्छ्राद्धं निराशाः पितरो गताः। समालंभनमनुलेपनं। देवलः। यज्ञोपवी- तं विप्राणां स्कंधान्नैवावतारयेत्। गंधादिपूजासिद्ध्यर्थं दै- वे पित्र्ये च कर्मणि। ललाटे पुंड्रकं दृष्ट्वा स्कंधे माल्यं तथै- व च। निराशाः पितरो यांति दृष्ट्वा च वृषलीपतिं। पुंड्रं वर्तु- लमिति अपरार्के हेमाद्रिप्रभृतयः। माल्यं शिखायां धा- र्यमित्याह। वृद्धमनुः। न नियुक्तः शिखावर्ज्जं माल्यं।

शिरसि वेष्टयेत्। नियुक्तः आहूत उपविष्टः। शुक्लाः सुमनसः श्रेष्ठास्तथा पद्मोत्पलानि च। गंधधूपोपपन्नानि यानि चान्यानि कृत्स्नशः। जपादिकुसुमं भिंडी रूपिका सकुरंटिका। पुष्पाणि वर्जनीयानि श्राद्धकर्मणि नित्यशः। आदिशब्दाज्जलजव्यतिरिक्तरक्तपुष्पाणि गृह्यंते। रूपिकार्कपुष्पं। पीतकुरंटिका। भिंटी। उग्रगंधीन्यगंधीनि दुष्टान्यपि विवर्जयेत्। चंदनागुरुणी चोभे तथैवोसीरपद्मकं। तुरुष्कं गुग्गुलं चैव घृताक्तं युगपद्दहेत्। चंदनं केवलं दद्यात् धूपं वा तृणगुग्गुलं। तुरुष्कः सिल्हका। गुग्गुलुः सर्ज्जरसः विष्णुः। घृतेन दीपो दातव्यस्तिलतैलेन वा पुनः। शौनकः। एतस्मिन्काले गंधमाल्यधूपदीपाच्छादनानां प्रदानं एतस्मिन्काले अर्घदानाद्यनंतरं। अत्रिः। युवं वस्त्राणीत्यनेन दद्याद्वासांसि प्राञ्जलितः। पुराणातपः। सुवासा इति वस्त्रं दद्यात्तदभावे यज्ञोपवीतं। वायुपुराणे। लोकेश्वतरं सर्वमात्मनश्चापियत्प्रियं। सर्वं पितॄणां दातव्यं तदेवाक्षयमिच्छता। वैश्वदेवकार्चनविध्यनंतरं याज्ञवल्क्यः। अपसव्यं ततः कृत्वा पितॄणामप्रदक्षिणं। द्विगुणांस्तु कुशान् कृत्वा उशंतस्त्वेत्यृचापि तॄन्। आवाह्य तदनुज्ञातो जपेदायंतु नस्ततः। यवार्थास्तु तिलैः कार्याः कुर्यादर्घादि पूर्ववत्। दत्वार्घं संस्रवांस्तेषां पात्रे कृत्वा विधानतः। पितृभ्यः स्थानमसीति न्युब्जं पात्रं करोत्यधः। न्युब्जमधोमुखं। प्रचेताः। प्रथमेपि-

त्रपात्रे तु सर्वान्संभृत्य संस्रवान्। पितृभ्यः स्थानमित्युक्त्वा
कुर्याद्भूम्यामधोमुखं। कात्यायनः। एकस्मिन्पितृपात्रे
संस्रवान्समवनीय पुत्रकामो मुखमनक्ति। तथा। कुश-
वत्यां भूमावधोमुखं कुर्यात्तस्योपरि च कुशानिति। आसन-
प्रभृति वस्त्रप्रदानपर्यंतं पूर्वोक्तरीत्या कृत्वा भोजनभाजन-
स्थापनार्थं मंडलानि कार्याणि। तथा च ब्रह्मपुराणे।
मंडलानि च कार्याणि नीवारैश्चूर्णकैः शुभैः। गोमयेन मृदा वा-
पि प्रणीतेनापि भस्मना। गौरमृत्तिकया वापि इति तृतीयपा-
दे पाठांतरं। पाषाणचूर्णसंकीर्णमाहृतं तत्र वर्जयेत्। प्र-
णीतेन मंडलार्थमाहृतेन। अथाग्नौकरणार्थमग्नि-
निर्णयः॥ तत्र मार्कंडेयः। आहिताग्निस्तु जुहुयाद्द-
क्षिणाग्नौ समाहितः। एतच्च सर्वाधानपक्षे। अर्द्धाधानपक्षे
त्वौपासनाग्नावेव। स्मार्त्तं कर्म विवाहाग्नौ कुर्वीत प्रत्यहं गृही
दायकालाहृते वापि श्रौतं वैतानिकाग्निष्विति स्मार्त्तकर्म-
णो गृह्याग्नावेव नियमात्। वायुपुराणे। आहृत्य दक्षिणा-
ग्निं तु होमार्थं वै प्रयत्नतः। अग्न्यर्थं लौकिकं वापि जुहुयात्क-
र्मसिद्धये। अग्न्यर्थं। अग्नौकरणहोमार्थं लौकिकमावसथ्यो
गृह्याग्निरिति कल्पतरौ। स्मृतिचंद्रिकाकारादिभिर्लौकिकाग्निः
श्रौतस्मार्त्ताग्निव्यतिरिक्तोऽभिहितः। तच्चाभिधानं चिंत्यं। अ-
नाहिताग्निश्चोपसदेऽग्न्यभावे तथाप्सु वेति। मार्कंडेयेनोपस-
दो गृह्याग्नेरभावे अप्सु होमाभिधानात्तु लौकिकाग्निस्त्री-

करणमुचितं। मनुरपि। अग्न्यभावे तु विप्रस्य पाणावेवोप-
पादयेदिति पाणौ होमं विधत्ते। श्रौतगृह्याग्न्यवश्चतुर्धा।
प्रागभावः। प्रध्वंसाभावः अत्यंताभावश्चेति। गृह्याश्रमस्वी-
करणात्पूर्वं प्रागभावः। आश्रमस्वीकरणानंतरमग्नेः प्र-
मादादिनोच्छेदे आश्रमभंगे वा प्रध्वंसाभावः। तत्र च पु-
नःसंधाने पुनराश्रमस्वाकरणे च तत्स्वरूपाग्न्युत्पत्तिः। नै-
ष्ठिकस्य विवाहाभावादत्यंताभावः। श्रौतस्मार्ताग्न्योः प्रा-
गभावे प्रध्वंसाभावे च श्राद्धसमये वाग्निसंपादनस्या-
शक्यत्वात्पाणयादिषु होमः। ये लौकिकाग्नेरपि होमा-
धिकरणत्वमंगीक्रियते तेषां तु लौकिकाग्नेः सुसंपाद-
त्वादग्न्यभाव एव नास्तीति तदभावे यः पाणिस्वीकरण-
पक्षस्तस्य न क्वाप्यवकाश इत्यग्न्यभावे तु विप्रस्य पा-
णावेवोपपादयेदिति मन्वादिवचनानि निरर्थकानि भ-
वेयुः। तस्माल्लौकिकाग्निरेव सभ्यो गृह्याग्निरिति युक्तं
अथवा श्रौतस्मार्तव्यतिरिक्त एवात्र लौकिकाग्निः। स च
विधुरादीन्प्रत्यग्नौ करणहोमार्थं विधीयते। यामुते त्रिरी-
यादिशासु यज्ञेसाता प्रस्तुलोमेत्यादिभिर्मंत्रैरिध्माधा-
नाद्याज्यभागपूर्वमग्नौ करणमाम्नातं तत्रेध्माधानादेः पा-
णावनुयुक्तत्वादग्निः प्राप्तः स च न श्रौतो न स्मार्तो विधुर-
णामित्यगत्याकांक्षायां लौकिकोग्निरुपतिष्ठत इति तदुद्देशे-
न लौकिकाग्निविधानं युज्यते। अथ मतनात्पर्यार्थः आहिताग्नेः

सर्वाधाने दक्षिणाग्नावग्नौकरणहोमः। अर्द्धाधाने औपास-
न एव। अनाहिताग्नेः स्मार्ताग्नौ विद्यमाने तत्रैवाभावे पाणौ
वाप्सु वा। अप्सु अग्नौकरणाधिकारे कात्यायनः। तद्यपां-
समीपे स्यात् श्राद्धे ज्ञेयो विधिस्तदेति। उदकसमीपे श्राद्धकर-
णे अप्स्वेव इतरत्र पाणौ। आभ्युदयिकश्राद्धेषु पिंडपितृयज्ञा-
तिदेशाभावाच्छिष्टाचारविरोधाच्चाग्निसद्भावेपि पाणावे-
वेति विवेकः। यच्चोक्तं धूर्तस्वामिना पिंडपितृयज्ञो दक्षिणा-
ग्नौ विहितः। आपस्तंबेन पिंडपितृयज्ञातिदेशमंतरेणैवा-
ग्नौकरणोपदेशात्तद्धोमे दक्षिणाग्निर्न प्राप्तः। उपदेशाति-
देशयोरभावात्। तस्मात्सर्वाधानपक्षे आपस्तंबिनामग्नौ-
करणाभाव एवेति। तदपि चिंत्यं। कुरुष्वेत्यभ्यनुज्ञातो हुत्वा-
ग्नौ पितृयज्ञवदिति याज्ञवल्क्यादिभिः पिंडपितृयज्ञहोमे-
तिकर्तव्यतातिदेशात्सर्वशाखासु च कर्मण एकत्वेनावि-
रुद्धांशोपसंहारस्य न्याय्यत्वादापस्तंबशाखीयानामप्यति-
देशः सिद्ध इति दक्षिणाग्नेरतिदेशतः प्राप्तत्वादग्नौकरणं
सर्वाधानेपि विद्यत एवेत्यलमतिप्रपंचेन। एवमुभयविधा-
ग्न्यभावे पाणौ होमः। यत्तु जातूकर्ण्येनोक्तं। अग्न्यभावे तु
विप्रस्य पाणौ दद्यात्तु दक्षिणे। अग्न्यभावः स्मृतस्तावद्या-
वद्भार्यां न विंदतीति। भार्यावेदनाभावोऽग्न्यभाव इति। तद-
यमप्येकोभाव इति प्रदर्शनार्थं न त्वयमेवाभाव इति निय-
मार्थं पूर्वोक्तरीत्या प्रकारांतरेणाप्यभावोपपत्तेः। किंच त-

व्यभार्यस्यापि दायविभागात्प्रागग्न्याहरणाभावपक्षेऽग्न्य-
भावसंभवाद्यावद्भार्यां न विंदतीति न नियमार्थः। यदपि
गृह्यपरिशिष्टेऽग्निमतामपि क्वचन पार्वणवद्धोमो विहितः
आन्वष्टक्यं च पूर्वेद्युर्मासि मास्यथ पार्वणं। काम्यमभ्युद-
येऽष्टम्यामेकोद्दिष्टमथाष्टमं। चतुर्ष्वाद्येषु साग्नीनां वह्नौ हो-
मो विधीयते। पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपीति।
अस्यार्थः। अष्टकाश्राद्धेषु नवमीश्राद्धमन्वष्टक्यं। सप्तम्यां
क्रियमाणं पूर्वेद्युः। मासि मासि कृष्णपक्षे पंचमीप्रभृतिषु क्रिय-
माणं पार्वणममावास्याश्राद्धं। काम्यं तिथिनक्षत्रविशेषेषु विहितं
फलकामनया क्रियमाणं। अभ्युदये पुत्रोत्पत्त्यादिनिमित्तेषु
विहितं। अष्टम्यां यद्विहितमष्टकाश्राद्धं। एकोद्दिष्टं सपिंडीक-
रणं। अत्रास्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्नेतिन्यायेना-
भ्युदयिके सपिंडीकरणे च सिद्धेऽग्नौ होमस्यानभिनंदितत्वा-
त्पाणावेव। काम्येऽष्टम्यां च येषां गृह्यपरिशिष्टे नैषामे-
व पाणौ होमः। इतरेषां तु मन्वादिवचनानुसारेणाभ्युद-
यिकसपिंडीकरणव्यतिरिक्तश्राद्धेष्वग्न्यभावएव पाणौ हो-
मः। इति निर्णयः। यदा पाणिहोमस्तदा पित्र्ये ब्राह्मण-
बहुत्वेपि प्रधानब्राह्मणहस्त एव नान्यत्र॥ तथा च का-
त्यायनः॥ पित्र्ये यः पंक्तिमूर्द्धन्यस्तस्य पाणावनग्निकः।
हुत्वा मंत्रवदन्येषां तूष्णीं पात्रेषु निक्षिपेत्। हुतशेषमित्य-
र्थः। पित्र्यब्राह्मणहस्त एवेति न नियमः। अत एव यमः

दैवविप्रकरेनग्निः कृत्वाग्नौकरणं द्विज इति। अत्रापि शेषं
दैवपात्रे न निक्षिपेत्। तथा च वायुपुराणे। हुत्वा दैवकरे-
नग्निः शेषं पित्र्ये निवेदयेत्। न हि स्मृताः शेषभाजो विश्वेदे-
वाः पुराणगैः। हस्ते ऽग्नौकरणं कुर्यात् अग्नौ वा साग्निको द्वि-
जः। पाणावेव निरग्निस्तु शूद्रः कुर्यात्सदा तथा। अतः पित्र्य-
दैवकरयोर्विकल्पः। तथा। वैश्वदेवे यदैकस्मिन्भवेयुर्द्वा-
दशो द्विजाः। तदैकपाणौ होतव्यं स्याद्विधिर्विहितस्तदा।
एकस्मिन् श्राद्धे विश्वेदेवस्थाने द्वौ चत्वार इत्येवंप्रकारेणे-
त्यर्थः। यदा मातामहश्राद्धं न तन्त्रेण किंतु पृथगेव तदा माता-
महश्राद्धपंक्तिस्थद्विजन्यपाणावपि पृथक् होमः। तथा च
कात्यायनः। मातामहस्य भेदेपि कुर्यात्तन्त्रेव साग्निक
इति मातामहस्थाने वैश्वदेविकपित्र्यब्राह्मणभेदेपि भेद-
पक्षेपि तन्त्रेव तन्त्रयुक्तपाणिहोमस्तत्रैव मातामहश्राद्धप्र-
युक्तब्राह्मणहस्त एवान्यभाव इत्यर्थः। युक्तं चैतत् अग्नि-
स्थानीयस्य पाणेः पृथक्त्वात्। होमो हस्तश्च होमाधि-
करणं पृथगिति ह विरुद्धरणमपि पृथगेव। पाणौ हुतं
च न पृथग्भोक्तव्यं। यदाहुर्गृह्यकाराः। अन्नं पाणितले
दत्तं पूर्वमश्नंत्यबुद्धयः। पितरस्ते न तृप्यंति शेषान्नं न ल-
भंतिते। यच्च पाणितले दत्तं यच्चान्यदुपकल्पितं। एकीकृ-
त्यैव भोक्तव्यं पृथग्भावो न विद्यते। अथाग्नौकरणविधिः
॥तत्राश्वलायनः॥ उद्धृत्य घृताक्तमन्नमनुज्ञापयत्य-

ग्नौ करिष्ये करवै करवाणीति प्रत्यनुज्ञा क्रियतां कुरुष्वा-
कुर्वित्यथाग्नौ जुहोतियथोक्तं पुरस्तादभ्यनुज्ञातः पाणि-
ष्वेव वा अग्निमुखा वै देवाः पाणिमुखाः पितर इति ह ब्राह्म-
णं यदि पाणिष्वाचांतेष्वन्यदन्नमनुदिशतीति। करिष्य
इत्यादिप्रश्नत्रये क्रियतामित्याद्युत्तरत्रये च यथासंख्य-
प्रयोगनियम इति कल्पतरौ। अयं नियमः सर्वेषामुत तच्छा-
खिनामेव। न त्वादाद्यः। कल्पतरावेव याज्ञवल्क्यवच-
नव्याख्यानसमये अग्नौकरिष्य इति पृच्छति घृतप्लुत-
मन्नमादायेत्यन्वय इत्यभिहितं। अग्नौकरिष्यन्नादाय पृ-
च्छत्यन्नं घृतप्लुतं। कुरुष्वेत्यभ्यनुज्ञात इति करिष्य इत्य-
स्य कुरुष्वेति प्रत्युत्तराभिधानान्नियमानुपपत्तेः द्वितीये
त्वविरोधः। यथोक्तं पुरस्तादिति। प्राचीनावीतीध्ममुपस-
माधायेत्यादिना। यदि पाणिष्वित्यादि। पाणौ होमपक्षे
होमानंतरमाचांतेषु अन्यदन्नं ददातीत्यर्थः। एतदाच-
मनं पिंडदानानंतराचमनवन्नैमित्तिकं। आचांतेष्विति
बहुवचनात्पितृस्थानमातामहस्थानस्थितयोर्होमा-
धिकरणभूतयोर्यजमानस्य चाचमनप्राप्तिः। अन्यथा
बहुवचनानुपपत्तेः। यदा तंत्रेण श्राद्धं तदा द्वयोरेव।
आचमनं च होमाधिकरणभूतस्य तत्रैव। उत्तिष्ठंतु पि-
तर इत्यादिभिर्यावन्नोत्थाप्यते। तावदासनादुत्था-
नस्य निषिद्धत्वात्। यजमानस्य बहिराचमनं। विष्णुः

आमश्राद्धेषु काम्येषु च प्रथमपंचकेनाग्निं हुत्वा पशुश्राद्धे-
षु मध्यमपंचकेनामावास्यासूत्तमपंचकेनाग्रहायण्यूर्ध्व-
कृष्णाष्टकासु चरुकमेणैव प्रथममध्यमोत्तमपंचकैरन्वष्टका-
सु च ततो ब्राह्मणानुज्ञातः । पितॄनावाहयेदपयंत्वसुरा इति
द्वाभ्यां तिलैर्यातुधानविसर्जनं कृत्वा एत हूः पितरः सर्वा-
स्तानमासेयन्त एत त्पितर इत्यावाहनं कृत्वा कुशतिल-
विमिश्रेण पंचोदकेन यास्तिष्ठन्त्यमृता वागिति यन्मे मातेति
च पाद्यं निवेद्य चैवायमर्घं कृत्वा निवेद्य चानुलेपनवस्त्रपुष्पा-
लंकारधूपैः शक्त्या विप्रान् समभ्यर्च्यादित्या वसव इति वी-
क्ष्याग्नौ करवाणीत्युक्त्वानुज्ञातश्च विप्रैः प्राग्वद्धावाहुतित्र-
यं हुत्वाथ मामकाः पितरः एत हूः पितरः अयं यज्ञ इति व-
चोभिमंत्रणं कृत्वा यथोपपन्नेषु पात्रेषु विशेषतो रजतमयेषु
नमो विश्वेभ्यो देवेभ्य इत्यन्नं द्वौ प्राङ्मुखयोर्निवेदयेत्पित्रे
पितामहाय प्रपितामहाय नामगोत्राभ्यामुदङ्मुखेष्विति ।
आमश्राद्धं लौगाक्षिगृह्यानुसारेण ज्योतिष्टोमाद्यारंभे नां-
दीमुखश्राद्धं यन्मांसरहितं क्रियते तत् । प्रथमपंचकेनेत्या-
दि । काठके तैत्तिरीयके च यमेवमेति पंचदशर्चोनुवाकः पठ्य-
ते तस्य प्रथमद्वितीयतृतीयपंचकैरनुक्तस्थलेषु होमः । प-
शुश्राद्धं समाप्तेऽब्दे पशुश्राद्धविधिवत्संपादयेदिति हारी-
तेन यत्सपिंडीकरणश्राद्धं विहितं तदुच्यते । आदित्या वसव
इति मंत्रेण ब्राह्मणान्वीक्ष्य । अनुज्ञातश्च विप्रैरिति बहुवच-

नात्सर्वैरनुज्ञातव्या। तथाच मनुः। अग्नौकुर्यादनुज्ञातो ब्राह्मणो ब्राह्मणैः सह इति। पुंरवलिखितौ। धूपगंधमाल्यैरलंकृत्यब्राह्मणान्सघृतमन्नमनुज्ञाप्य दर्भैर्दक्षिणाग्नैरग्निं परिस्तीर्यजुहुयादग्नये कव्यवाहनाय स्वाहासोमाय पितृमते स्वाहेति। बौधायनः। अथैतान्तिलमिश्रा आपः प्रतिग्राह्य गंधैर्माल्येनचालंकृत्याग्नौ करिष्यामीत्यनुज्ञातोग्निमुपसमाधायसंपरिस्तीर्य तिस्र आज्याहुतीर्जुहोति सोमाय पितृमते स्वधानमः स्वाहायमायांगिरस्वते पितृमते स्वधानमः स्वाहाग्नये कव्यवाहनाय स्विष्टकृते स्वधानमः स्वाहेतितच्छेषेणान्नमभिघार्यान्नस्यैता एव तिस्रो जुहुयाद्धूयमां पिंडान्दद्याद्धूयमां हि पितरः प्रतिमयाचरंतीति विज्ञायते। अथैतदन्नं ब्राह्मणेभ्यो निवेद्य ब्राह्मणस्यांगुष्ठेनानखेनानुदिशति पृथिवी समस्तस्यत इत्यादिवाक्यं पठित्वा बौधायनस्त्वाह। अथाप्युदाहरंति। अग्नौकरणशेषेणायदन्नमभिघारयेत्। तस्मिंस्तु प्राशिते दद्याद्दन्नं यत्स्वकृतं भवेदिति। तच्छेषेणाहुताज्यशेषेणावयत्तं पिंडान्दद्यादित्यादि। अग्नौकरणानंतरं पिंडदानंविधायतान्पिंडान्पक्षिभ्यः काकेभ्यो दद्यादिति। वयसां प्रतिमयातद्रूपेण पितरो यतश्चरंतीत्यर्थः। अयंच समाचारः आहुविशेषे बौधायनीयानामेवेति कल्पतरौ। यत्राग्नौकरणानंतरमेव पिंडदानं तत्रापि एतदन्नंब्राह्मणेभ्योनिवेद्येतिवच

मादग्नौ करणशेषं पितृपात्रे न दद्यात्। तत्र यदा पिंडदानाभाव-
स्तदाग्नौ करणशेषाभिघारितहविःशेषं ब्राह्मणेभ्यो हस्ते द-
द्यात्। तदन्नं च ते भक्षयित्वा चमनं कुर्युः। प्राशनविधानाद-
स्तदानमर्थसिद्धं। ततश्च प्रकृतमंत्रप्राप्त्यर्थं संपादितमन्नं दत्ता-
न्नत्यागः कर्त्तव्यः। अयं च प्रकारो बौधायनीयानामेव। एवम-
ंगीकारे पूर्वापरवाक्यविरोधः प्रसज्येत। ब्रह्मपुराणे।
ततो घृताक्तमन्नं तु सोमलनादायसाधितं। तानग्नौ करिष्य इ-
ति प्रयतः प्रार्थयेद्द्विजान्। ॐ कुरुष्वेति तैरुक्तो दक्षिणाग्निं समा-
श्रयेत्। दक्षिणाग्रांश्चतुर्दिक्षु दर्भानास्तीर्य तान्यतः। दद्याच्च
समिधस्तिस्रस्तस्मिन्प्रादेशमात्रिकाः। पालाश्यः समिदर्थे
च नियोज्याः पितृकर्मणि। घृताक्ताः समिधो हुत्वा दक्षिणा-
ग्राः समंत्रिकाः। मेक्षणेन घृताक्तेन जुहुयादाहुतित्रयं। वा-
युपुराणे। दक्षिणतोग्नये नित्यं सोमायोत्तरतस्तथा। एत-
योरंतरे नित्यं जुहुयाद्वै विवस्वते। पालाशफल्गुन्यग्रोध-
प्लक्षाश्वत्थविकंकताः। उदुंबरस्तथा विल्वश्चंदनो यज्ञिया-
श्च ये। सरलो देवदारुश्च शालश्च खदिरस्तथा। समिदर्थे प्र-
शस्ताः स्युरेते वृक्षा विशेषतः। फल्गुः काकोदुंबरिका।
श्लेष्मातको नक्तमालः कपित्थः शाल्मलिस्तथा। नीपो
विभीतकश्चैव श्राद्धकर्मणि गर्हिताः। गोभिलस्तु स्वाहाकारं
प्रथमतएवाह। मेक्षणोपघातं जुहुयात्स्वाहा सोमाय पितृ-
मत इति पूर्वं स्वाहाग्नये कव्यवाहनायेति द्वितीयमत ऊर्द्धं।

प्राचीनावीतीति। अतऊर्द्ध्वमिति वदता होमउपवीतित्वमुक्तं।
मेक्षणेोपघातमेक्षणेनैवादायजुहुयादित्यर्थः। आश्वलाय-
नस्तु पिंडपितृयज्ञप्रकरणे प्राचीनावीतित्वं विकल्पितमाह।
प्राचीनावीती अमुपस्तमाधाय मेक्षणेनादायावदानसंपदा
जुहुयात्सोमाय पितृमते स्वधानमोग्नये कव्यवाहनाय स्वधानम
इति स्वाहाकारेण वाग्निं पूर्वं यज्ञोपवीतीनीति। यदा स्वाहाकारां-
तौ मंत्रस्तदाग्निं पूर्वं जुहुयादुपवीती सन्नित्यर्थः। अयं च विकल्पः
शिष्टाचारवशाद्व्यवस्थितः। प्राचीनावीतित्वपक्ष आश्वलाय-
नानामितरइतरेषामिति। स्वधास्वाहाकारादिविकल्पाः स्वस्व-
शाखानुसारेण व्यवस्थिताः। तथा च कात्यायनः। स्वाहा।
स्वधानमः सव्यमपसव्यं तथैव च। आहुतीनां च या संख्या सा-
वगम्या स्वसूत्रत इति। सर्वं चतुरवदानं पंचावदाने पियः समर्थः स-
तु शाखांतरोक्तांगान्युपदिष्टान्यतिदिष्टान्यपि च विरुद्धान्युप-
संहृत्य कर्म करोति। असमर्थस्तु स्वगृह्योक्तमात्रमेव करोति
तावतैव तस्य शास्त्रार्थसिद्धेरुक्तत्वात्। स्वधर्मशास्त्रे आपस्तं-
बः। उद्ध्रियतामग्नौ च क्रियतामित्यामंत्रयते काममुद्ध्रियतां का-
ममग्नौ च क्रियतामित्यतिसृष्ट उद्धरेत्जुहुयाद्वेति। अतिसृ-
ष्टः अनुज्ञातः। स्वकृतगृह्यसूत्रेतु मेनैवानूहितमंत्रविधिमुखे-
नाथोदाहुतीनां त्रयोदश संख्या दर्शिता। तथा पिंडपितृयज्ञा-
धिकारेष सर्वं। अध्वर्युरुपवीती दक्षिणां जान्वाच्य मेक्षणेोपस्ती-
र्येनावदायाभिधार्य सोमाय पितृमते स्वधानम इति दक्षिणे-

ग्नौजुहोति यमायांगिरस्वते स्वधा नम इति द्वितीयामग्नये कव्य-
वाहनाय स्वधा नम इति तृतीयां मेक्षणोलग्नं दुलास्तान् हुत्वा तृ-
षणीं मेक्षणमादधातिनपमा यजुह्वोतीत्येक इति। नचैते मंत्रा-
आपस्तंबेनाग्नौकरणहोमे निषिद्धाः। अन्यैश्चोपात्ताः। या-
ज्ञवल्क्यादिभिश्च पिंडपितृयज्ञातिदेशः कृतः। हुत्वाग्नौ पितृ-
यज्ञवदित्यादिभिर्वाक्यैरतो गृह्योपसंहारन्यायेन स्वगृह्यो-
क्ताग्नौकरणमंत्राः तथा पिंडपितृयज्ञप्रकरणोक्ताश्च मंत्रा अ-
ग्नौकरणे ग्राह्यास्तैत्तिरीयैः। तत्रातिदेशप्राप्ते पितृयज्ञहोम-
उपवीतित्वं धर्मः। उपदिष्टमंत्रहोमे तु प्राचीनावीतित्वं धर्मः
पितृदेवताकत्वात्। अत एव स्वगृह्योपक्रम आपस्तंबः। अ-
परपक्षे पित्र्याणि प्राचीनावीतिनामव्यं दक्षिणतोपवर्ग-
इति। अत्राप्यन्यो विशेषो भाष्यार्थसंग्रहकारेणोक्तः। आ-
धारदार्वेम्निमुखाज्यभागप्रदक्षिणानुव्रजनेषु तद्वत्। आ-
घारयोः स्विष्टकृति प्रदिष्टं यज्ञोपवीतं हि कपर्दिनास्यादि-
ति। उक्तरीत्या प्रश्नपूर्वकमनुज्ञामुहृत्याग्नेरुपसमिंधनाज्यभा-
गांतं कृत्वा होमः कार्यः। चरुमवदानधर्मेणावदाय दर्व्यां
निधाय यन्मे माता प्रलुलोभ चरति यास्तिष्ठंतीति द्वाभ्याम-
मुष्मै स्वाहेत्यंताभ्यामाहुतिद्वयं जुहुयात्। अमुष्मा इत्यत्र
चतुर्थ्यंतत्वेन पितृनामनिर्देशः। एवमुत्तरत्रापि पितामहा-
य प्रपितामहायेति निर्देशः। एवं यन्मे पितामही प्रलुलो-
भेति पूर्वोक्तमंत्रद्वयेन च यथाक्रमं मातामहाय मातुः पिता-

महाय मातुः प्रपितामहाय चाहुतिद्वयं जुहुयात्। तत्रामुष्मा
इत्यत्र मातामहायेत्याद्यूहः कर्त्तव्यः। प्रथमे मंत्रे यन्मे माता-
मही प्रलुलोभ तन्मे रेतो मातुः पितामहो वृंक्तामिति। चतुर्थे
अंतरन्यं मातुः पितामहाद्दध इति। पंचमे यन्मे मातुः प्रपिता-
मही प्रलुलोभ तन्मे रेतो मातुः प्रपितामहो वृंक्तामिति षष्ठे
अंतरन्यं मातुः प्रपितामहाद्दध इत्यूहः। तथा च गृह्यभाष्या-
र्थसंग्रहकारः। अन्नहोमे तथा स्पर्शे जलपिंडादिदानके।
यन्मे माता मही त्यादि तन्नोदाहरणं भवेदिति। उदाहरणा-
मूहः। स्पर्शे एष ते तत मधुमानित्यादि मंत्रैर्ब्राह्मणभोजना-
र्थं मंत्रस्पर्शे तत ये चेह पितर इत्यृचा एकामाहुतिं जुहोति।
एवमन्नहोमानंतरं षडाज्याहुतीर्जुहुयात्। तत्र स्वाहा पित्र
इति मंत्रेण प्रथमाहुतिः। पित्रे स्वाहेति द्वितीया। एताभ्यामेव
तृतीया चतुर्थी च स्वधा स्वाहेति पंचमी। अग्नये कव्यवाहना-
य स्वधा स्वाहेति षष्ठी। ततोऽतिदेशप्राप्तः पिंडपितृयज्ञमंत्रहो-
मः ततः स्विष्टकृतं हुत्वा सर्वस्माद्दन्नात्किंचिदादायोदीची-
नमुष्णमंगारसहितं भस्मापोह्य तूष्णीं जुहोति। तत उत्तर-
तंत्रमासे यस्थालीपाकवत्कुर्यात्। तथा च भाष्यार्थसंग्रह-
कारः। अग्नींधनादि प्रतिपक्षकर्म कृत्वाज्यभागांतमथाव-
दाय। यन्मेति मंत्रैः। प्रतिमंत्रमग्नौ कार्यस्तथा सप्तभिरन्नहोमः
स्वाहादिमंत्रैरपि सर्पिषा स्युर्होमास्ततः स्विष्टकृतं च हुत्वा।
भस्माप्यपोह्याहविरन्नहोमो लेपे तु दर्व्योम्ब्रसमंजनादि-

शेषंच कृत्वा परिषेचनांतं पात्रेषु दद्याद्धुतशेषमन्नमिति। अ-
त्र सप्तभिरन्नहोमो नूहितमंत्राभिप्रायः। शिष्टबुद्धिपरिज्ञा-
र्थमूहितमंत्रसंख्यानभिधानं। तथातिदेशप्राप्तपिंडपितृ-
यज्ञमंत्रहोमानभिधानंच। एतच्चाग्नौकरणं तैत्तिरीया-
णामन्वाहार्यकश्राद्धेन दर्शश्राद्धमात्रे। अन्वाहार्यकश्रा-
द्धंच प्रमीतमातापितृकस्य। तथाच कल्पतरौ परिशिष्ट-
परिशेषे। अग्निमतो ह्यमावास्यायां पिंडपितृयज्ञः पिंडा-
न्वाहार्यकंच कर्त्तव्यं। तच्च प्रमीतमातापितृकस्य सपत्नी-
कपित्रादिदैवत्यमिति। तस्मादन्वाहार्यकश्राद्धे पूर्वम-
ग्नौकरणं। दर्शश्राद्धमात्रे त्वतिदेशप्राप्तसोमाय पितृमते
स्वधानम इत्यादिमंत्रैरेवाग्नौकरणं नोपदिष्टातिदिष्टात्मक-
मिति सिद्धं॥ अथ परिवेषणादिविधिः॥ अन्नसमर्प-
णानंतरं हस्तोदकं दत्त्वा पात्रप्रक्षालनं कुर्यात्। तथाप-
रिस्तरणादिकमपि दद्यात्॥ तदनंतरं याज्ञवल्क्यः।
हुतशेषं प्रदद्यात्तु भोजनेषु समाहितः। यथालाभोप-
पन्नेषु रौप्येषु च विशेषतः। ततश्च निषिद्धायसादिव्यति-
रिक्तैर्विहितसुवर्णरजतादिपात्रैः स्वयं भार्यान्या वा-
शुचिः परिवेषणं कुर्यात्। पक्वान्नं तु हस्तेनैव पक्वान्ना-
भिघारेन तु दर्व्या कदाचनेति निषेधात्। वायुपुराणे
नापवित्रेण हस्तेन नैकेन च विना कुशं। नाप्यायसेना-
यसेन श्राद्धे तु परिवेषयेत्। आयसे पात्रे आयसेन दर्वी-

दनानद्द्यादित्यर्थः। तथा। तस्मादंतरितं देयं परोक्षमाधनतः
शानवा। परिवेषणानंतरं याज्ञवल्क्यः। दत्त्वान्नं पृथि-
वीपात्रमिति पात्रानुमंत्रणं। कृत्वेदं विष्णुरित्यन्ने द्विजांगु-
ष्ठं निवेशयेत्। इदं विष्णुरिति मंत्रानंतरं। द्विजांगुष्ठमन्ने।
निवेश्य विश्वेदेवस्थाने साक्षतकुशोदकैरन्नत्यागं कृत्वा।
पितृस्थाने तिलोदककुशैः पृथक्पृथगन्नत्यागं विधिना
कुर्यात्। तदनंतरं याज्ञवल्क्यः। सव्याहृतिकां गायत्रीं
मधुवाता इति त्र्यृचं। जप्त्वा यथासुखं वाच्यं भुंजीरंस्तेपि वा-
ग्यताः। गायत्रीं त्रिः सकृद्वा जप्त्वा मधुवाता इति त्र्यृचं ज-
प्त्वा मधु मधु मध्विति त्रिरुच्चार्य यथासुखं जुषध्वमिति वच-
नानंतरं ते ब्राह्मणा मौनिनो भूत्वा भुंजीरन्नित्यर्थः ॥
वशिष्ठः। उभयोः शाखयोर्मुक्तं पितृभ्योन्नं निवेदितं।
तदंतरं प्रतीक्षंते ह्यसुरा दुष्टचेतसः। तस्मादशून्यहस्ते-
न कुर्यादन्नमुपागतं। भाजनं वा समालभ्य तिष्ठेदोच्छे-
षणाद्द्विजः। उभयोःशाखयोः उभयोर्हस्तयोर्मध्ये एकेन
हस्तेन यदि मुक्तं पितृभ्यो दत्तमन्नं तदेवांतरमवकाशो
रक्षसां तस्मादशून्यं कुर्यादित्यर्थः। भरद्वाजः। पितृ-
णामन्नमादाय बलिं यस्तु प्रयच्छति। स्तेयेन ब्राह्मणस्ते-
नः स सर्वः स्तेनकृद्भवेत्। पितृणामन्नं विश्वेदेवार्थं पित्र-
र्थं चान्नं। याज्ञवल्क्यः। अन्नमिष्टं हविष्यं च दद्यादक्रो-
धनोत्वरः। आतृप्तेस्तु पवित्राणि जप्त्वा पूर्वजपं तथा। पवि-

चारिणि यवमानप्रभृतीनि। अयं च जप उपवीतिना कार्यः।
कृत्वापसव्यं कुर्वंति मुक्त्वायत्त्वश्रतां जपमिति निगमस्म-
रणात्। जमदग्निरपि। अपसव्येन कर्तव्यं सर्वं श्राद्धं यथा-
था विधिः। सूक्तस्तोत्रजपं मुक्त्वा विप्राणां च विसर्जनमिति
ततश्च सव्याहृतिकगायत्रीमधुवातेत्यादिजपः कार्यः।
तथा। अन्नमादाय तृप्ताः स्थ शेषं चैवानुमान्य च। तद-
न्नं प्रकिरेद्भूमौ दद्याच्चापः सकृत्सकृत्। अनग्नीकर-
णार्थं गंडूषार्थं च। सर्वमन्नमुपादाय सतिलं दक्षिण-
मुखः। उच्छिष्टसन्निधौ पिंडान् दद्याद्वै पितृयज्ञवत्।
मातामहानामप्येवं दद्यादाचमनं ततः। स्वस्तिवाचं
ततः कुर्यादक्षय्योदकमेव च। दत्त्वा च दक्षिणां शक्त्या
स्वधाकारमुदाहरेत्। दक्षिणादानमुपवीतिना कार्यं।
तथा च जमदग्निः। सर्वकर्मापसव्येन दक्षिणादान-
वर्जितं। याज्ञवल्क्यः। वाच्यतामित्यनुज्ञातः प्रकृ-
तेभ्यः स्वधोच्यतां। ब्रूयुरस्तु स्वधेत्युक्ते भूमौ सिंचेत्त-
तो जलं। विश्वेदेवाश्च प्रीयंतां विप्रैश्चोक्त इदं जपेत्।
दातारो नोभिवर्द्धंतां वेदाः संततिरेव च। श्रद्धा च नो
माव्यगमद्बहुदेयं च नोस्त्विति। इत्युक्त्वोक्त्वा प्रियावा-
चः प्रणिपत्य विसर्जयेत्। वाजेवाज इति प्रीतः पितृपू-
र्वं विसर्जनं। यस्मिंस्ते संस्रवाः पूर्वमर्घपात्रे निपातिताः
पितृपात्रं तदुत्तानं कृत्वा विप्रान्विसर्जयेत्। मनुः। पिंड-

निर्वपणं केचित्पुरस्तादेव कुर्वंति। ब्राह्मणभोजनात्प्रागर्चना-
नंतरमग्नौकरणानंतरं वा केचित्पिंडदानं कुर्वत इत्यर्थः ॥
आश्वलायनः। भुक्तवत्स्वनाचांतेषु पिंडं निदध्यादा-
चांतेष्वेक इति। अत्र यथाशाखं व्यवस्था। जातूकर्ण्यः।
व्याममात्रं समुत्सृज्य पिंडांस्तत्र प्रदापयेत्॥ व्यासः। अ-
रत्निमात्रमुत्सृज्य पिंडांस्तत्र प्रदापयेत्। पत्रोपस्पर्शना-
द्यपि प्राप्नुवंतिन बिंदवः॥ वायुपुराणे। सकृदेवास्तरे-
द्दर्भान् पिंडार्थं दक्षिणामुखः। प्राग्दक्षिणाग्रान्नियतो
दद्यात्पिंडाननंतरं। मरीचिः। आर्द्रामलकमात्रांस्तु पिंडा-
न्कुर्वीत पार्वणे। एकोद्दिष्टे बिल्वमात्रं पिण्डमेकं तु निर्वपे-
त्। नवश्राद्धे स्थूलतरं तस्मादपि तु निर्वपेत्। तस्मादपि स्थू-
लतरं मासे चैव प्रतिवत्सरं। विष्णुः। उच्छिष्टसंनिधौ द-
क्षिणाग्रेषु दर्भेषु पृथिवी दर्विरक्षितेत्येकं पिंडं पित्रे निद-
ध्यादंतरं दर्विरक्षितेति द्वितीयं पितामहाय द्यौर्दर्विरक्षिते-
ति तृतीयं प्रपितामहाय। येत्र पितरः प्रेता इति वासो देयं वी-
रान्न पितरो दत्त इत्यन्नमत्र पितरो दत्त इत्यन्नमत्र पितरो
मादयध्वमिति दर्भमूले कराघर्षणं ऊर्जं वहंतीरित्यनेन
मोदकेनाप्रदक्षिणं पिण्डानां विकिरणं कृत्वार्घपुष्प-
धूपानुलेपनान्नाद्यभक्ष्यभोज्यानि निवेदयेदिति ॥
मनुः। अपसव्यमग्नौ हुत्वा सर्वमावृत्य विक्रमं। अप-
सव्येन हस्तेन निर्वपेदुदकं भुवि। त्रींस्तु तस्माद्धविःशेषा-

त्पिंडान्कृत्वा समाहितः। ओदके नैव विधिना निर्वपेद्दक्षिणामुखः। न्युप्य पिंडांस्ततस्तांस्तु प्रयतो विधिपूर्वकं। तेषु दर्भेषु तं हस्तं निमृज्याल्लेपभागिनां। आचम्योदक्परावृत्य त्रिरायम्य शनैरसून्। षड्ऋतूंश्च नमस्कुर्यात्पितॄनेव च मंत्रवत्। ऋतुनमस्कारो नमो वः पितर इत्यादिभिः। तथा च ब्रह्मपुराणे। नीवीं विसृज्य च जपेन्नमो वः पितरस्त्विति। मनुः। उदकं निनयेच्छेषं शनैः पिंडांतिके पुनः। अवजिघ्रेच्च तान् पिंडान्यथान्युप्तान्समाहितः। पिंडेभ्यः स्वल्पिकां मात्रां समादायानुपूर्वशः। तानेव विप्रानासीनान्विधिना पूर्वमाशयेत्। तानेव विप्रानित्ययं पक्षो ब्राह्मणभोजनात्पूर्वमेव पिंडदानाभिप्रायेण ॥ कात्यायनः। एतद्व इति सूत्राणि प्रतिपिंडं वस्त्युत्तरे यजमानस्य लोमानि नेति। शंखः। दशां विवर्जयेत्प्राज्ञोऽप्यहतवस्त्रजां। अत्र सर्वत्र यथाशाखं व्यवस्था। पुत्रार्थिनो मध्यमपिंडप्रतिपत्तिराश्वलायनेनोक्ता पिंडानां मध्यमं पत्नीं प्राशयेदिति। अत्र मंत्रः। आधत्त पितरो गर्भं कुमारं पुष्करस्रजं। यथेह पुरुषोऽसदिति। देवलः। ततः कर्मणि निर्वृत्ते तान्पिंडांस्तदनंतरं। ब्राह्मणोऽग्निरजो गौर्वा भक्षयेदप्सु वा क्षिपेत्। एवं स्वस्वगृह्योक्तविधिना ब्राह्मणविसर्जनांतं कृत्वा पितृशेषं बंधुभिः सह भुंजीत। आवश्यकोपवासे प्राप्ते पितृसेवितमाघ्रायोपवसेत्। तथा च

श्रुतिः। अवघ्रेयमेव तन्नैव प्राशितं नैवाप्राशितमिति। शाताता-
तपः। श्राद्धं कृत्वा परश्राद्धे भुंजते ये तु मोहिताः। पतंति पितरस्ते-
षां लुप्तपिंडोदकक्रियाः। पुनर्भोजनमध्वानं भाराध्ययनमैथुनं।
दानं प्रतिग्रहो होमः श्राद्धभुक्त्वष्ट वर्जयेत्। यमः। दशकृत्वः
पिबेदापो गायत्र्या श्राद्धभुक् द्विजः। ततः संध्यामुपासीत जपेच्च
जुहुयादपि। एवं प्रतिमासं दर्शे पार्वणं श्राद्धं कर्त्तव्यं। एवं प्रति सांव-
त्सरिकादीन्यपि पार्वणश्राद्धानि कर्त्तव्यानि। तत्र मातापितृविष-
येयः पार्वणैकोद्दिष्टविकल्पः स स्वस्वकुलानुसारेण व्यवस्थि-
तो विज्ञेय इति विज्ञानेश्वरमते। एतच्चोपपादितमस्माभिर्मि-
ताक्षराटीकायां सुबोधिन्यामादाराध्याये। यदा मातापितृभ्रा-
त्रादीनेकसांवत्सरिकानां युगपत्सन्निपातस्तदा पितुः श्राद्धं न-
तो मातुस्ततश्चान्येषामिति प्रधानोपसर्जनतरतमभावेन सां-
वत्सरिकं कुर्यात्। यत्तुनर्भृगुणोक्तं। एककाले गतासूनां बहू-
नामथवा द्वयोः। तंत्रेणाश्रयणं कुर्यात् श्राद्धं चैव पृथक्पृथ-
क्। पूर्वकस्य मृतस्यादौ द्वितीयस्य ततः पुनः। तृतीयस्य।
ततः कुर्यात्सन्निपाते त्वयं क्रमः। इति। तत्र पूर्वकस्य मुख्य-
स्य द्वितीयस्य मुख्यापेक्षया जघन्यस्य तृतीयस्य जघन्य-
तरस्येत्यर्थः। अत्रायं क्रमः। पितृब्राह्मणनिमंत्रणानंत-
रं मातृब्राह्मणनिमंत्रणं ततोन्यनिमंत्रणं एवं पादप्रक्षा-
लनादि विसर्जनांतं कुर्यात्। एतच्च पौर्वापर्येणानेकश्रा-
द्धकरणे कुतपादि श्राद्धकालातिपातप्रसक्तौ द्रष्टव्यं श्राद्ध-

कालानतिपाते तु पृथक्पाकेन यथोक्तक्रमेण कर्म पृथक्पृ-
थक्कर्त्तव्यं। यत्तु प्रचेतसोक्तं। नैकः श्राद्धद्वये कुर्यात्समाने
ह्नि कुत्रचिदिति। तदेकस्मिन्नेव निमित्ते पुनः श्राद्धं न कर्त्त-
व्यमित्येवंपरं। न तु निमित्तभेदेपि। यदा तु भर्त्तुर्मरणति-
थावेव सहगमनं पत्नी करोति तत्सांवत्सरिके लौगाक्षि-
णा विशेषो दर्शितः। मृताहनि समासेन पिंडनिर्वपणं पृ-
थक्। नवश्राद्धं तु दंपत्योरन्वारोहण एव तु। अस्यार्थः। दंप-
त्योरन्वारोहणे न सहगमनेन निमित्तेन मृततिथेरेकत्वे पिं-
डनिर्वपणं श्राद्धं समासेन संक्षेपेण यथा हि पितृकश्राद्धे एक-
स्मिन्पिंडे द्वयोरुद्देशः। एवमत्रापि द्वावुद्दिश्य युग्मा ब्राह्म-
णा भोजयितव्याः। पिंडनिर्वपणमपि द्वावुद्दिश्य। दैवश्राद्ध-
द्वयकरणात्समासः। अत्र वैश्वदेविकमपि तंत्रेणैव पार्वण-
श्राद्धवत्से। मृताहनीति विशेषोपादानान्मृततिथिभेदे तु न समासे-
न श्राद्धं किंतु पृथगेव। मृताहनि समासेन पिंडनिर्वपणं कु-
र्यादिति विधिबलादन्वारोहणे नैकतिथिमृतयोर्दंपत्योः सां-
वत्सरिकव्यतिरिक्तनवश्राद्धषोडशश्राद्धसपिंडीकरणाग्य-
न्वष्टक्यादिश्राद्धेष्वर्थाद्वचनांतरवशाच्च पृथक्कर्त्तव्यतायां
प्राप्तायां नवश्राद्धं पृथगिति केवलनवश्राद्धस्यैव पार्थक्य-
विधेः परिसंख्यया इतरश्राद्धे पृथक्त्वनिषेधात्सांवत्सरिक-
वदेव षोडशश्राद्धेष्वपि समासेनैवानुष्ठानं सपिंडीक-
रणं पृथगेव। भर्तृपिंडेन तत्पिंडयोजनविधानबलात् अमा-

वास्यादिषु पृथक् मातृश्राद्धप्राप्त्यभावादेव न पृथक्करणं।
किंतु सहैव। अयंतु विशेषः। षोडशश्राद्धादिषु मातापित्रोः
पृथक्पृथक् देवतात्वं अमावास्यादिषुतु पितृपिंडे नैव सप-
त्नीकशब्दोच्चारणेन मातुरपि तृप्तिरिति। अमावास्यादि-
ष्वपि येषां शाखिनां मातापित्रोरपि पृथक् देवतात्वं अथ-
च पृथक् श्राद्धविधिस्तेषां तथैवेति विज्ञेयं। केचन नवश्रा-
द्धशब्देन षोडशश्राद्धानां सपिंडीकरणस्य चोपसंग्रहमि-
च्छंति। दंपत्योरिति पदोपादानात् एकचित्यारोहणाधि-
कारिसवर्णासापत्नमात्रा मातृभ्यां मातृभिर्वान्वारोहणे
कृते पतिपत्न्योर्मृततिथेरेकत्वे पूर्ववत्समासेन नवश्राद्ध-
व्यतिरिक्तं सर्वं भवेत्। एकस्मिन्नाहवनीयस्थानीयब्राह्म-
णे द्वित्राद्युद्देशस्तथैकस्मिन्नेव पिंडेपि। यथा द्वित्रिपितृकस्य
अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यतीति समयं विधाय-
या विवाहिता ततश्चानपत्याया एव तस्या भर्तृमरणे नियो-
गेन देवतादिभ्यः पुत्रोत्पादनसमये उत्पाद्यमानः पुत्र आ-
वयोरपीत्यपि संकेते तत्रोत्पन्नः पुत्रस्त्रिपितृकः। एको मा-
तामहः अपरः क्षेत्राधिपतिः। अन्यश्च बीजीति त्रयः पितरः
तस्यामावास्यादिश्राद्धेषु यथा त्रयोद्देशेनैक एव पिंडस्त-
था द्वित्राद्युद्देशेनाप्येक एव पिंडो देय इत्यर्थः। यदि जनन्य-
न्वारोहणे एवायं नियमस्तदा पित्रोरिति ब्रूयान्न दंपत्यो-
रिति। तस्मात्पूर्वोक्त एव निर्णयः। यत्तु स्मृत्यंतरमेकचित्यां

समारूढौ दंपती निधनं गतौ। पृथक् श्राद्धं तयोः कुर्यादो-
दनं च पृथक् पृथगिति। तन्नवश्राद्धविषयं। नवश्राद्धांग।
पिंडदानं तु येषां पक्कान्नेनैव तेषां पिंडार्थो दनोपि पृथगेवे-
त्यर्थः। अथवा नवश्राद्धं भोक्तृसद्भावे पक्कान्नेन यदा क्रियते
तदौदनमपि पृथक् पृथगेव न तंत्रेणेत्यर्थः। नवश्राद्धस्य
पक्कान्नेन करणमंगिरोवचनेनचोक्तमिति। नवश्राद्धेषु य-
च्छिष्टं गृहे पर्युषितं च यत्। दंपत्योर्भुक्तशिष्टं तु तन्न भुंजी-
त कर्हिचित्। यत्तु न भृगुणोक्तं। या समारोहणं कुर्याद्भर्तु-
श्चित्यां पतिव्रता। तां मृताहनि संप्राप्ते पृथक् पिंडे नियोज-
येत्। प्रत्यब्दं तु नवश्राद्धं युगपत्तु समापयेदिति। तद्भर्तृमृ-
ततिथिव्यतिरिक्तान्यतिथावन्वारोहणमृतविषयं। नव-
श्राद्धं तु युगपदित्यस्यायमर्थः। प्रथमं पितृनवश्राद्धोप-
विष्टस्य ब्राह्मणस्य पादप्रक्षालनं। पश्चान्मातृनवश्रा-
द्धोपविष्टस्यैवं क्रमेण विसर्जनांतं कृत्वा युगपच्छ्राद्ध-
द्वयं समापयेदिति। यदा त्वेकस्यामेव तिथौ पूर्वदिनभागे
भर्तुर्मरणं। उत्तरदिनभागे पत्न्या अन्वारोहणेन मरणं
तदापि समासेनैव पिंडादिविधायकवाक्यबलान्मृततिथि-
थेरेकत्वाद्भर्तुश्च प्राधान्यात्तद्दग्धशरीरभूत्तया भार्यायाश्च
पितृदैवतप्रायत्वात् बहूनामनुग्रहोन्याय्य इति भिन्नदि-
नमरणरूपैकनिमित्ताद्यपेक्षया पूर्वोक्तानेकनिमित्ता-
नुरोधस्य न्याय्यत्वात् भर्तृमरणप्रभृत्येव दिनपरिगण-

नां कृत्वा तिलोदकपिंडदानाशौचैकादशाहादिकं क-
र्तव्यं। एवं च यानि वाक्यानि भर्तृमरणानंतरं चिरका-
लव्यवधानेनान्वारोहणमृताया अपि भार्याया भर्तृ-
मरणसमकालमेव मरणप्रतिपादकान्यर्थवादरूपा-
णि चिंतामणिरत्नावल्यादिषु प्रदर्शितानि तानि पू-
र्वोक्तविषये योज्यानि। ननु मृताहनि समासेन पिंड-
पिंडनिर्वपणमित्येतद्वचनवनान्मृताहादिश्राद्धा-
हवनीयार्थोपविष्टएकस्मिन्ब्राह्मणे एकस्मिन्पिंडे
द्वयोरुद्देशः समासः संक्षेप इति वक्तव्यं। संक्षेपश्च ब्राह्मणभेदे
पिण्डभेदेपि घटते। तद्यथा। एकश्राद्धनियुक्तब्राह्मण
चरणक्षालनानंतरमितरश्राद्धनियुक्तचरणप्रक्षाल-
नमेकत्रासनादिकं दत्वेतरत्रासनादिकमित्यासमाप्तेरे-
वं क्रियमाणेपि संक्षेपोपपन्नेरिति चेत्। मैवं। समासेन पिं-
डनिर्वपणमिति पिंडनिर्वपणेपि संक्षेपो दर्शितः। पूर्व-
पक्षोक्तरीत्या क्रियमाणे पिंडस्य भिन्नत्वान्न तत्र समासो-
न घटते। निरपेक्षस्य समासशब्दरूपान्तः सच सर्वात्म-
ना संक्षेपयोग्यसकलेतिकर्तव्यता संक्षेपं प्रतिपादयति
बाधकाभावात्। तस्मात्सर्वेतिकर्तव्यतानुस्यूतः संक्षेप
एवांगीकर्तव्यः। तथा च द्विपितृकश्राद्धवदेव संक्षेप इति
सिद्धं॥ अथ द्विपितृकश्राद्धं॥ तत्र हारीतः॥ नाक्षे-
त्रं वीजं रोहति। उभयदर्शनादुभयोरपत्यमित्यपरे॥

तेषामुत्पादयितुः प्रथमः प्रवरो भवति। द्वौ द्वौ पिंडौ प्र-
निर्वापेद्द्वयोरेकपिंडे वा द्वावनुकीर्तयेत् द्वितीये पुत्रस्तृ-
तीये पौत्रो लेपिनश्चत्री नन्वाव क्षाणाः श्रासप्तमादित्ये-
क इति। तेषां वीजिक्षेत्रिपितृणां मध्य उत्पादयितुः बीजि-
नः प्रवरमार्षेयं प्रथमं निर्दिशेत्। ततः क्षेत्रिण इति द्विप्र-
वरता। एतच्चक्तत्वं गार्षेयप्रवरे। प्रनिर्वापेपितृयज्ञे॥
द्व्यामुष्यायणाः पितृपितामहप्रपितामहपिंडेषु द्वौ द्वा-
वनुकीर्तयेत्। द्वितीये द्वितीयपिंडे पितामहपिंडस्या-
प्युपलक्षणं। अतो द्व्यामुष्यायणपुत्रः प्रपितामहपिंडे-
पि द्वावनुकीर्तयेत्। यदि द्व्यामुष्यायणपौत्रः श्राद्धक-
र्ता तत्र कथमित्याकांक्षायामाह पौत्र इति। पौत्रो द्व्यामु-
ष्यायणस्य तृतीये प्रपितामहपिंडे द्वावनुकीर्तयेन्न पि-
तृपिंडे नापि पितामहपिंडे न्नीवन्वाचक्षाणाः पित्रादिपिं-
डाननुवदन् लेपिनश्च द्वौ द्वावनुकीर्तयेत्। अत एव त-
त्र मात्सप्तमपर्यंतमित्यन्यमतं। क्षेत्रिणः पूर्वमुद्देशः प-
श्चाद्बीजिन इति क्रमः। एतच्चाशौच प्रकरणे भिहितं।
पुत्रिकापुत्रो द्विविधः। मातामहेनैवं संबद्धो मातामहेन
पित्राच संबद्धश्चेति। तत्र मातामहेनैव संबद्धस्य श्राद्धक्रम-
माह॥ मनुः॥ मातुः प्रथमतः पिंडं निर्वपेत्पुत्रिकासुतः
द्वितीयं तु पितुस्तस्या स्तृतीयं तु पितुः पितुरिति। उभय-
संबद्धो वर्गद्वयस्यापि कुर्यादित्याहोशनाः॥ मातामही

तु मात्रादि पैतृकं पितृपूर्वकं। मातृतः पितृतो यस्मादधिकारोऽस्ति
धर्मतः। अत्र विशेषमाह ऋष्यशृंगः। यः स्यादुभयसंबद्धः
पुत्रिकायाः सुतो द्विजः। पूर्वं मातामहश्राद्धं पश्चात्पैतृकमा-
चरेत्॥ अथ संकल्पश्राद्धं॥ तत्र व्यासः॥ त्यक्ता-
ग्नेः पार्वणं नैव नैकोद्दिष्टं सपिंडनं। अत्यक्ताग्नेस्तु पिंडो हि त-
स्मात्संकल्प्य भोजयेत्। अस्यार्थः। त्यक्ताग्नेर्नास्ति दर्शा-
दिनोऽत्यक्ताग्नेः। पार्वणैकोद्दिष्टसपिंडीकरणरूपश्राद्धक-
र्मणि नैवाधिकारः। अत्यक्ताग्नेः पिंडो हि निःपिंडसहितश्रा-
द्धकर्तव्यताकः श्राद्धाधिकार इत्यर्थः। तस्मात्कारणात्त्य-
क्ताग्निः संकल्प्य भोजयेत्। संकल्पश्राद्धं कुर्यादिति। संक-
ल्पश्राद्धविधिमाह स एव। संकल्पं च यदा कुर्यान्न कुर्यात्पात्र-
पूरणं। नावाहनाग्नौ करणं पिंडांश्चैव न दापयेत्। पात्रपूरण-
मर्घ्यदानं। विकिरदानमपि निषिद्धं स्मृत्यंतरे। संकल्पं
तु यदा श्राद्धं न कुर्यात्पात्रपूरणं। विकिरं च न दातव्यमिति।
अयं चानुकल्पो मुख्यश्राद्धकरणशक्त्यभावेपि वेदि-
तव्यः॥ तथा च स्मरंति। श्राद्धानुकल्पं यः कुर्याज्ज्ञात्वा-
वस्थाद्यपेक्षया। श्राद्धांशेऽप्यवाप्नोति मुख्यश्राद्धफलं
नर इति॥ अथैकोद्दिष्टश्राद्धं॥ याज्ञवल्क्यः॥ ए-
कोद्दिष्टं दैवहीनमेकार्घैकपवित्रकं। आवाहनाग्नौकरण-
रहितं ह्यपसव्यवत्। उपतिष्ठतामित्यक्षय्यस्थाने विप्रवि-
सर्जने। अभिरम्यतामिति वदेद्ब्रूयुस्तेऽभिरताः स्मह दैव·

हीनं विश्वेदेवरहितमपसव्यवत्। यत्त्वार्वणे यज्ञोपवीति
वत्कर्म तत्र पिशाचीनावीतिना कर्त्तव्यमित्यर्थः। अक्षय्य
स्थाने अक्षय्यमस्त्विति मंत्रस्थाने उपतिष्ठतामिति मंत्रः।
विप्रविसर्जने वाजे वाज इति मंत्रस्थाने अभिरम्यतामिति।
विष्णुः॥ अथाशौचापगमे सुस्नातः सुप्रक्षालितपाणिपाद
स्त्वाचांतस्त्वेवं विधाने व ब्राह्मणान्यथाशक्त्युदङ्मुखानं-
धमाल्यवस्त्रालंकारादिभिः पूजितान्भोजयेदेकवत्संप्रा-
नूद्दिष्टे तेकोद्दिष्टउच्छिष्टसंनिधावेकमेव तन्नामगोत्राभ्यां पिंडं
निर्वपेत् भुक्तवत्सु ब्राह्मणेषु दक्षिणयाभिपूजितेषु प्रेत
नामगोत्राभ्यां दत्त्वाक्षय्योदकेषु चतुरंगुलपृथ्वीस्ताव-
दंतरास्तावदधः खाताविततस्त्यायतास्तिस्रः कर्षूः कुर्या-
त् कर्षूसमीपे चाग्नित्रयमुपसमाधाय परिस्तीर्य तत्रैकैक-
स्मिन्नाहुतित्रयं जुहुयात् सोमाय पितृमते स्वधा नमोऽग्नये
कव्यवाहनाय स्वधा नमो यमायांगिरसे स्वधा नमः स्थानत्रये
च प्राग्वत्पिंडनिर्वपणं कुर्यात्। ततो दधिमधुघृतमांसैः
कर्षूत्रयं पूरयित्वैतत्त इति जपेत्। एवं मृताहे प्रतिमासं कु-
र्यादिति। दत्त्वाक्षय्योदकेष्विति। अक्षय्योदकानि दत्त्वा ते-
षु दत्तेषु सत्स्विति विभक्तिविपरिणामेनान्वयः॥ वारा-
हपुराणे॥ श्वःपरिष्य इति ज्ञात्वा ब्राह्मणामंत्रणक्रि-
या। गतोसि दिव्यलोकांस्त्वं कृतांतविहितात्पथः। मनसा
वायुभूतेन विप्रेत्वाहं नियोजये। पूजयिष्यामि भोगेन एवं

विश्वंनिमंत्रयेत्। द्वितीयदिने श्रासनेच मंत्रस्तैर्नैवोक्तः। स्व-
ज्ञासने देवराजाभ्यनुज्ञातो विश्वस्यतां द्विजवर्यानुग्रहात्
प्रसादं त्वासनं गृह्ण भूतज्ञानाग्निशुद्धेन करेण विवेति॥
बृहस्पतिः। वस्त्रालंकारशय्यादं पितुर्यद्वाहनायुधं।
गंधमाल्यैः समभ्यर्च्य श्राद्धभोक्ते तदर्पयेत्। याज्ञव-
ल्क्यवृद्धशातातपौ॥ मृताहनि तु कर्त्तव्यं प्रतिमासं
तु वत्सरं। प्रतिसंवत्सरं चैव माद्यमेकादशेऽहनि। एकादशे-
हनीत्याशौचापगमानंतरदिवसोपलक्षणपरं। अथा-
शौचापगम इति विष्णुस्मरणादिति कल्पतरौ। तदेत-
द्विचारसहं। तथाहि श्राद्धमेकादशेहनीत्यनेनाद्योद्दे-
शेनैकादशाहकालो विधीयते। एवं चैकादशाहशब्दस्या-
शौचानंतरकालोपलक्षकत्वं न विधौ परः शब्दार्थ इति
न्यायेन विरुध्येत। अथ कालस्यानुपादेयत्वेन कालोद्दे-
शेन कर्म्म विधानं न तु कर्मोद्देशेन कालविधानमतो न विधौ
परः शब्दार्थ इति न्यायेनाविरोध इति चेत्। मैवं। वस्तुत
उद्देश्यमाद्यश्राद्धमेव तस्य वचनांतरेण प्राप्तत्वात्। एका-
दशाहरूपकालस्याप्राप्तत्वेन स कालो विधेयः। काल-
स्यानुपादेयत्वेनाविधेय इति कृत्वा तु द्देश्यमपि कालमु-
द्देश्यमितो विधेयमप्याद्यश्राद्धं विधेयमिव च कृत्वा वाक्य-
वृत्तिः परिसमाप्यते। ततश्च काल एव वस्तुतो विधिपर्य-
वसानमिति तत्र लक्षणास्वीकारे सिद्धे न विधौ परः शब्दा-

र्थ इति न्यायविरोधः। तस्मादाशौचापगमानंतरदिव-
सोपलक्षणपरत्वं न युक्तं। अथाशौचापगम इति वि-
ष्णुवचनं ब्राह्मणविषये व्यवतिष्ठत इति न तेनापि स-
ह विरोधः। अतः क्षत्रादीनामप्याद्यश्राद्धमेकादशे-
ह्नि कर्त्तव्यं॥ तथा च वृद्धवशिष्ठः। एकादशेह्नि
यच्छ्राद्धं तत्सामान्यमुदाहृतं। चतुर्णामपि वर्णानां
सूतके तु पृथक्पृथक्। शंखलिखितगाक्षिरपि। आद्यं
श्राद्धमशुद्धोपि कुर्यादेकादशेहनि। कर्त्तुस्तात्कालिकी
शुद्धिरशुद्धः पुनरेव स इति॥ यत्तु मत्स्यपुराणे॥
एकादशेहनि तथा विप्रानेकादशैव तु। क्षत्रादिः सूत-
कांते तु भोजयेदयुजो द्विजानिति। तत्र तत्तदर्थं सूतका-
न्त एकादशब्राह्मणभोजनोपेतं रुद्रगणाख्यं कर्मांतरं न-
तु षोडशश्राद्धांतर्भूतं तथा सत्येकादशश्राद्धान्येतानि
षोडशपराणीति संख्याधिक्यात्षोडशश्राद्धविधिवि-
रोधः। तस्मादाद्यमेकादशेहनीति सर्ववर्णसाधारणमि-
ति चतुरस्रं। आहिताग्नेरेकादशाहश्राद्धे विशेषमाह।
कात्यायनः। श्राद्धमग्निमतः कार्यं दाहादेकादशेह-
नि। ध्रुवाणि तु प्रकुर्वीत प्रमीताहनि सर्वदा। ध्रुवाणि
वै पक्षिकादूर्द्धं निमित्तानूकरार्थः। ऊर्द्धं त्रिपक्षाद्यत
श्राद्धं मृताहन्येव तद्भवेत्॥ अधस्तु कारयेद्दाहादा-
हिताग्नेर्द्विजन्मनः। विहितप्रकारेण क्षुद्रादि हुतानां सद्यः

शौचेप्याद्यमेकादशेह्नीत्याह शंखः। सद्यः शौचेपि
दातव्यं प्रेतस्यैकादशेहनि। स एव दिवसस्तस्य श्राद्ध-
शय्यासनादिषु। षोडशश्राद्धान्याह जातूकर्ण्यः॥
द्वादशप्रतिमास्यानि आद्यषाण्मासिके तथा। त्रैपक्षि-
काब्दिके चेति श्राद्धान्येतानि षोडशेति। आद्यषाण्मा-
सिकाब्दिकशब्दावूनषाण्मासिकोनाब्दि-
कपरौ॥ व्यासोपि॥ द्वादशाहे त्रिपक्षे च षण्मासे
मासिकाब्दिके। श्राद्धानि षोडशैतानि संस्मृतानि मनी-
षिभिः। द्वादशाहे क्रियमाणमूनमासिकं। यदाह गो-
भिलः। मरणाद्द्वादशाहे स्यान्मासूने वोनमासिकं।
ब्रह्मपुराणे षोडशश्राद्धकालाः क्वचनान्यथो-
पदिष्टाः। नृणां तु त्यक्तदेहानां श्राद्धाः षोडश सर्वदा।
चतुर्थे पंचमे चैव नवमैकादशे तथा। ततो द्वादशभिर्मासैः
श्राद्धास्तु दश संख्यया कर्त्तव्याः श्रुतितस्तेषां तत्र विप्रांस्तु-
तर्पयेत्। इति। अत्र चतुर्थाहादिश्राद्धांतर्भावेनैकादशा-
हादिश्राद्धानां षोडशसंख्या विहिता न तूनमासिकाद्यंत-
र्भावेनेति क्वचित्कालान्यथाभावः। अतः षोडशश्राद्धेषु
विकल्पः। अयं च विकल्पः शाखाभेदेन। तदभावे यथा-
देशं यथाकुलं वा व्यवस्थितो विज्ञेयः। मासेतीत इत्यस्मि-
न्नर्थे तद्धितोत्पत्तौ मासिकशब्दनिष्पत्तिमंगीकृत्य प्रथ-
ममासे निर्वृत्ते द्वितीयमासे मृतदिवसे श्राद्धं मासिकं स्वं।

द्वितीये तीते तृतीये मासि ऊन दिवसे द्वितीयमासिकमित्ये-
वं क्रमेण द्वादशमासिकानि एकादशाहश्राद्धं तु पृथगे-
वेति केचन मन्यंते। तदनुपपन्नं। द्वादशप्रतिमास्यानी-
त्युपक्रम्य आद्यान्येतानि षोडशेति जातूकर्ण्योक्तषो-
डशसंख्याविरोधात्। मृतेहनि तु कर्त्तव्यं प्रतिमासमित्य-
नेन चाद्यादिमासिकानामाद्यादिमास एव कालो विहित-
स्तेनापि विरोधः प्रसज्येत। ननु त्रैपक्षिकं भवेद्वृत्ते त्रिपक्षे-
तदनंतरमिति यथा त्रैपक्षिकस्य त्रिपक्षानंतरं कालस्तथा-
द्यादिमासिकानामाद्यादिमासानंतरमेव कालोस्त्विति चे-
त्। मैवं। त्रैपक्षिकं भवेद्वृत्त इत्यस्यायमर्थः। वृत्ते प्रारंभे
न तु निवृत्त इति॥ अत एव कार्ष्णाजिनिः॥ त्रैप-
क्षिकं त्रिपक्षे स्यान्मृताहे त्वितराणि तु। अतो मासिकश्रा-
द्धस्तत्र भव इत्यस्मिन्नर्थे सामान्येनाद्यादिप्रत्यये वि-
हितास्तदंतस्तत्रापि तुक इकादेशे कृते मासिक इति रूपं
निष्पन्नं। आद्यमासिकं द्विजमाहवनीयस्थाने कृत्वा कु-
र्यात्तदभावे अग्नौ जुहुयात्। पक्षद्वये पुनराद्यं कुर्यात्।
यदाह गोभिलः। ब्राह्मणं भोजयेदाद्ये होतव्यमन-
ले थवा। पुनश्च भोजयेद्विप्रं द्विरावृत्तिर्भवेदिति। ऊन-
मासिकादिषु कालनियममाह॥ गोतमः। एकद्वि-
त्रिदिनैरूनैस्त्रिभागेनोन एव वा। श्राद्धान्यूनाब्दिका-
दीनि कुर्यादित्याह गोतमः। कार्ष्णाजिनिः। ऊना-

न्यूनेषु मासेषु विषमाहे समे पि वा। अत्र विशेषमाह गार्ग्यः। नंदायां भार्गवदिने चतुर्दश्यां त्रिपुष्करे। ऊनश्राद्धं न कुर्वीत गृही पुत्रधनक्षयात्। मरीचिः। द्विपुष्करे च नंदासु सिनीवाल्यां भृगोर्दिने। चतुर्दश्यां तु नो नानि कृत्तिकासु त्रिपुष्करे। संवत्सरादर्वाक् सपिंडीकरणे षोडशश्राद्धान्यपकृष्य कृत्वा। ततः सपिंडीकरणं विधाय पुनस्तानि मासि मासि स्वस्वकाले श्राद्धानि कुर्यात्। यदाह गोभिलः। श्राद्धानि षोडशादत्त्वा नैव कुर्यात्सपिंडनं। लौगाक्षिः। श्राद्धानि षोडशापाद्य विदधीत सपिंडनं। अंगिराः। यस्य संवत्सरादर्वाक् सपिंडीकरणं कृतं। मासिकं चोदकुंभं च देयं तस्यापि वत्सरं। अत्र विशेषमाह पैठीनसिः। सपिंडीकरणादर्वाक् कुर्यात श्राद्धानि षोडश। एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु। सपिंडीकरणादूर्ध्वं यदा कुर्यात्तदा पुनः। प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्स तान्यपि। कात्यायनः। सपिंडीकरणादूर्ध्वं न दद्यात्प्रतिमासिकं। एकोद्दिष्टविधानेन दद्यादित्याह शौनकः॥ यदा वृद्धौ प्राप्तायां षोडशश्राद्धान्यपकृष्य कृत्वा सपिंडीकरणं कृत्वा पुनर्मासिकानि क्रियंते तान्यपि वृद्धेः पुरस्तादेवापकृष्य कर्तव्यानि न तु स्वे स्वे काले। तथा च शाट्यायनिः। सपिंडीकरणादर्वागपकृष्य कृतान्यपि। पुनरप्यपकृष्यंते वृद्ध्युत्तरनिषेधनात्। निषेधश्च कात्यायनेनोक्तः॥

निर्वृत्तस्य वृद्धितंत्रं तु मासिकानि न तंत्रयेत्। अथातयामं मरणं न भवेत्पुनरस्य तु। वृद्धिनिमित्तं कर्म्म कृत्वा मासिकानि न कुर्यात्। तथा सत्ययातयामं नवं मरणं पुनर्न भवेदित्यर्थः। यदि कुर्यात्तदा नूतनमरणं भवेदिति तात्पर्य्यं। आशौचादिना मासिकविघ्ने तदनंतरं कर्त्तव्यं न्यायसिद्धत्वात्। मासेन्यस्मिंस्तिथौ तस्यां कुर्यादंतरितं व तत्। अंतरितं विघ्नेन। तच्छब्देनान्यमासे स्वकालप्राप्तमुच्यते एकादशाहादिकं तु ज्येष्ठेनैव कर्त्तव्यं। तथा च प्रचेताः एकादशाद्याः क्रमशो ज्येष्ठस्य विधिवत्क्रियाः। कुर्युर्नैकेकशः श्राद्धमाब्दिकं तु पृथक् पृथक्। आब्दिकं तु पृथक् पृथगिति विभक्तविषयं॥ अथ नवश्राद्धानि॥ तत्रांगिराः॥ प्रथमेह्नि तृतीयेह्नि पंचमे सप्तमे तथा। नवमैकादशे चैव नवश्राद्धं प्रकीर्त्तितं। बौधायनः। मरणाद्विषमदिनेष्वेकैकं नवश्राद्धं कुर्यात्। नवमदिनकर्त्तव्यं नवश्राद्धं यद्यंतरितं तर्हि तदेकादशेह्नि कुर्यात्। एवं पंचैवास्य मते नवश्राद्धानि॥ भविष्यत्पुराणे॥ नव सप्त विशां राज्ञां नवश्राद्धान्यनुक्रमात्। आद्यंतयोर्वर्णयोस्तु षडित्याहुर्महर्षयः। शिवस्वामी। नवश्राद्धानि पंचाहुराश्वलायनशाखिनः। आपस्तंबाः षडित्याहुर्विभाषां तैत्तिरेयिणां। कण्वः। नवश्राद्धं मासिकं च यद्यदंतरितं भवेत्। तत्तदुत्तरसातंत्र्यादनुष्ठेयं प्रचक्षते। सातंत्र्यं समानतंत्रत्वं।

उत्तरनवश्राद्धदिनइतियावत्॥ अथ सपिंडीकरणं तत्र शौनकः॥ अथ सपिंडीकरणं चत्वार्युदपात्राण्येकं प्रेतस्य त्रीणीतरेषां प्रथमं पात्रं त्रिषु पात्रेषु नियोजयेत्। समानीव आकूतिरित्येवमेव प्रथमपिंडं त्रिषु पिंडेषु नियोजयेत्। मधुमतीभिः संगच्छध्वमिति द्वाभ्यामेव चतुर्थोनुज्ञापितो भवतीति। प्रेतोचिरमृतः॥ विष्णुः। संवत्सरांते प्रेताय तत्पित्रे तत्पितामहाय तत्प्रपितामहाय च ब्राह्मणान्भोजयेदग्नौकरणमावाहनं पाद्यं च कुर्यात्। संसृजंतु त्वा पृथिवी समानीवेति प्रेतपाद्यं पात्रत्रये योजयेदुच्छिष्टसंनिधौ पिंडचतुष्टयं कुर्याद्ब्राह्मणांश्च स्वाचांतान्दत्तदक्षिणांश्चानुव्रज्य विसर्जयेत्ततः प्रेतपिंडं पाद्यपात्रोदकवत्पिंडत्रये निदध्यात्कर्षूत्रयसंनिकर्षेप्येवमेव सपिंडीकरणं मासिकार्थवद्द्वादशाहं कृत्वा त्रयोदशेह्नि वा कुर्यान्मंत्रवर्जं हि शूद्राणां द्वादशेह्नि संवत्सराभ्यंतरे यद्यधिमासिको भवेत्तदा मासिकार्थं दिनमेकं वर्द्धयेदिति। कर्षूत्रयसंनिकर्षेप्येवमिति। प्रेतैकोद्दिष्टसंबंधिकर्षूत्रयसंनिहितान्नपिंडान्पित्रादिपिंडेषु योजयेत्। मासिकार्थवदिति। मासि भवानि श्राद्धानि मासिकानि तदर्थः प्रेताप्यायनादिः तद्युक्तानि श्राद्धानि मासिकार्थवंति तान्याशौचापगमे द्वादशाहं द्वादशस्वहःसु कृत्वा त्रयोदशेह्नि सपिंडीकरणं कुर्यादित्यर्थः। अत्रोनमासिकादीनि प्रथमतृतीयषड्द्वादशादिनेषु कर्त्तव्यानि

एवं च षोडशश्राद्धानि। अयं च पक्षो वृद्ध्यादिनिमित्तापक-
र्षे बोद्धव्यः। अत एव द्वादशाहं श्राद्धं कृत्वेति प्रदर्शनार्थं
ततश्चापकर्षकालात्पूर्वं कृतव्यतिरिक्तानि यावंति भवं-
ति तत्संख्याकदिनेषु तावंति कृत्वोत्तरदिने सपिंडीकरणं
कर्तव्यं॥ याज्ञवल्क्यः॥ गंधोदकतिलैर्युक्तं कुर्यात्पात्र-
चतुष्टयं। अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्। ये समा-
ना इति द्वाभ्यां शेषं पूर्ववदाचरेत्। एतत्सपिंडीकरणमेको-
द्दिष्टं स्त्रिया अपि। शेषं ब्राह्मणनिमंत्रणादि पूर्ववत्पार्वण-
वत्। एकोद्दिष्टं सपिंडीकरणं। व्युत्क्रममृते तु विशेषो ब्रह्म-
पुराणे। मृते पितरि यस्याथ विद्यते च पितामहः। तेन दे-
यास्त्रयः पिंडाः प्रपितामहपूर्वकाः। तेभ्यश्च पैतृकः पिंडो
नियोक्तव्यश्च पूर्ववत्। मातर्यग्रमृतायां तु विद्यते च पिताम-
ही। प्रपितामहीपूर्वं तु कार्यस्तत्राप्ययं विधिः॥ सुमंतुः॥
त्रयाणामपि पिंडानामेकेनापि सपिंडने। पितृत्वमश्नुते प्रेत
इति धर्मो व्यवस्थितः। त्रयाणां पित्रादिपिंडानां मध्य एके-
न पितृपिंडेन पितामहपिंडेन प्रपितामहपिंडेन वा पूर्वं पूर्वे
जीवति सपिंडने कृते प्रेतः पितृत्वं प्राप्नोतीत्यर्थः। यत्तु वच-
नं व्युत्क्रमाच्च प्रमीतानां नैव कार्या सपिंडनेति तन्मातापि-
तृभर्तृव्यतिरिक्तविषयं॥ तथा च स्कंदपुराणे॥ व्युत्क्र-
मेण मृतानां न सपिंडीकृतिरिष्यते। यदि माता यदि पिता
भर्त्तो नैष विधिः स्मृतः। एव विधिः। व्युत्क्रममृतानां नसपिंडी-

कृतिविष्यत इत्ययं विधिः। ब्रह्मपुराणवचनं तु मृते पि-
तरीत्यादि पूर्वमेव दर्शितं। पतिरपुत्रायाः पत्न्याः स्वमातृपि-
तामह्यादिभिः सापिंड्यं करोति॥ तथा च पैठीनसिः॥ अ-
पुत्रायां मृतायां तु पतिः कुर्यात्सपिंडतां। श्वश्र्वादिभिः सहैवा-
स्याः सपिंडीकरणं स्त्रियाः। सा मृतापि हि तेनैक्यं गता मंत्रा-
हुतिव्रतैः। सत्याः चैकेन पतिसुखेन तत्पित्रा तत्पितामहेन
वेत्यर्थः। न त्वेकेनैव सापिंड्यं किंतु त्रिभिः॥ शातातपः॥
मृतायामनुगतानामर्थं सा तेन सह पिंडनं। अर्हतीति। ब्राह्मदैवा-
र्षप्राजापत्यविवाहोढायाः सुतः पितामह्यादिभिः मातुः सपिं-
ड्यं कुर्यात्॥ यदाह शंखः॥ मातुः सपिंडीकरणं कथं का-
र्यं भवेत्सुतैः। पितामह्यादिभिः सार्द्धं सपिंडीकरणं स्मृतं॥
यमः॥ जीवत्पिता पितामह्या मातुः कुर्यात्सपिंडतां। प्रमी-
तपितृकः पित्रा पितामह्यापि वा सुतः। मातुरग्निप्रवेशाभावे
पित्रा पितामह्या वेति विकल्पः। पितामह्या पितामह्यादिरित्य-
र्थः। एवं पित्र्येत्यादिषु द्रष्टव्यं। आसुरगांधर्वराक्षसपैशा-
चविवाहेरूढासुतो मातामह्यादिभिस्तस्यामपि जीवंत्यां
मातुः पितामह्यादिभिस्तस्यां जीवंत्यां मातुः प्रपितामह्यादि-
भिर्मातामहेन वा सपिंडीकरणं कुर्यात्॥ यदाह शाता-
तपः॥ तन्मात्रा तत्पितामह्या तच्छ्वश्र्वा वा सपिंडनं। आसु-
रादिविवाहेषु विन्नानां योषितां स्मृतं। तच्छ्वश्रूः मातुः प्र-
पितामही॥ सुमंतुः॥ पिता पितामहे योज्यः पूर्णे संवत्सरे

सुतैः। मातामातामहेतद्वदित्याह भगवान्शिवः। पुत्रिकासुतोऽपि मातामह मातामह्यादिभिः कुर्यात्॥ तथा च कात्यायनः॥ मातुः सपिंडीकरणं पितामह्या सहोदितं। यथोक्तेनैव कालेन पुत्रिका या न चेत्सुतः। पुत्रिकापुत्रस्तु मातामहादिभिः कुर्यादित्यर्थः॥ बौधायनः॥ आदिशेत्प्रथमे पिंडे मातरं पुत्रिकासुतः। द्वितीये पितरं तस्यास्तृतीये च पितामहं। एवं च येन केनापि मातुः सापिंड्ये वृद्ध्याहकादिश्राद्धेषु पितामह्यादिभिरेव पार्वणं कर्त्तव्यं। आसुरादिविवाहेषु पुत्रिकाकरणे च मातामहगोत्रमेव। पितृगोत्रं समुत्सृज्य न कुर्याद्भर्तृगोत्रतः। जन्मन्येव विपत्तौ च नारीणां पैतृकं कुलमिति स्मरणात्। ब्राह्मादिविवाहेषु भर्तृगोत्रमेव। स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे। स्वामिगोत्रेण कर्त्तव्यास्तस्याः पिंडोदकक्रियेति स्मरणात्। एतच्च सपिंडीकरणं कालात्ययेऽपि पुत्रसद्भावे पुत्रेणैव कार्यं॥ तदुक्तं वायुपुराणे॥ अह्नानि षोडशादत्त्वा कुर्यान्न तु सपिंडनं। प्रोषितावसिते पुत्रः कालादूर्ध्वं चिरादपि। एतद्व्याख्यातमपरार्के। प्रोषितावसिते प्रवासिते प्रवासावसाने पुत्रो ति चिरादपि कालात्सपिंडत्वं कुर्यात्षोडशश्राद्धान्यदत्त्वा न कुर्यात् किंतु दत्त्वेत्यर्थः। यदि तानि कनिष्ठभ्रात्रादिना दत्तानि तदा सपिंडत्वमेव कुर्यादिति॥ कात्यायनः॥ पितामहः पितुः पश्चात्पंचत्वं यदि गच्छति। पौत्रेणैकादशाहादि कर्त्तव्यं

याद्व षोडशं ॥ नैतत्पौत्रेणाकर्त्तव्यं पुत्रवांश्चेत्पितामहः ।
पितुः सपिंडनं कृत्वा कुर्यान्मासानुमासिकं । असंस्कृतौ
न संस्कार्यौ पूर्वौ पौत्रप्रपौत्रकैः । पितरं तत्र संस्कुर्यादिति ।
कात्यायनोऽब्रवीत् ॥ पापिष्ठमपि शुद्धेन शुद्धं पापकृता-
पि वा । पितामहेन पितरं संस्कुर्यादिति निश्चयः । असंस्कृतौ
दाहादिसपिंडीकरणांतैः कर्म्मभिः । पूर्वौ पितामहप्रपिता-
महौ । पापिष्ठं संस्काररहितत्वान्नपातित्येन चंडालादिह-
ननेन वा । पापकर्म्मिणां न संसृजेरन् स्त्रियश्चातिचारिणी-
रिति गौतमस्मरणात् । न संसृजेरन्न सपिंडा कुर्युः । अ-
संस्कृतौ न संस्कार्यावित्येतच्च प्रत्यासन्ने सपिंडीकरणकर्त्त-
रि सति पौत्रादिना न कर्त्तव्यमित्येतत्परं असति तु कुर्यादेवे-
त्यपरार्के तत्रापि पितृसपिंडीकरणानंतरं पितामहादेः
कर्त्तव्यं पितुः प्राधान्यात्संनिहितत्वात् । पापिष्ठमपि शुद्धेन
शुद्धं पापकृतापि च । पितामहेन पितरं संस्कुर्यादिति वचना-
च्च । यत्र च पितामहे प्रमीते पिता तदौर्ध्वदेहिकं कुर्वन्मध्ये मृ-
तस्तत्रापि पौत्रः स्वपितृसापिंड्यं कृत्वा पश्चात्पितामहस्य
कुर्यात् । पूर्वोक्तन्यायस्य तुल्यत्वात् । अयं तु विशेषः । पि-
तामहदशाहादिमध्य एव पितृसापिंड्यं कृत्वा पश्चात्पि-
तामहस्य कुर्यात् । पूर्वोक्तन्यायस्य तुल्यत्वात् । अयं तु वि-
शेषः । पितामहदशाहादिमध्य एव पितृमरणे प्रथमेऽहनि यो
दद्यात्स दशाहं समापयेदिति वचनात्प्राहकस्य विघ्ने

पित्रौर्ध्वदेहिकानंतरं पुनः संस्कारं कृत्वा सर्वमावर्त्तयेत्। व्यतीतं च दशाहादिके। अग्निवपुत्रपित्रानुज्ञातेन पितामहश्राद्धं पौत्रेणोपक्रांते पित्राशौचं वहन्नेव स्वकाले पितामहश्राद्धं कुर्यात्। प्रक्रांतत्वात्कर्तुस्तात्कालिकी शुद्धिरिति वचनाच्च। यतिविषये विशेषः। शातातपेनोक्तः एकोद्दिष्टं न कुर्वीत यतीनां चैव सर्वदा। अहन्येकादशे प्राप्ते पार्वणं तु विधीयते। सपिंडीकरणं तेषां न कर्त्तव्यं सुतादिभिः। त्रिदंडग्रहणादेव प्रेतत्वं नैव जायते। एतत्सपिंडीकरणमाहिताग्निना कर्त्रा द्वादशाहे कर्त्तव्यं॥ तथा च। लघुहारीतः। यजमानोऽग्निमान्प्राजन्मे तन्त्रे दग्निमान्भवेत्। द्वादशाहे भवेत्तस्य सपिंडीकरणं श्रुतेः। तच्च श्राद्धानि षोडशादत्त्वा न तु कुर्यात्सपिंडतामिति वचनात्षोडशश्राद्धान्यपकृष्य कृत्वा सपिंडीकरणं कुर्यात्। यत्तु वचनं। यस्य संवत्सरादर्वाक् सपिंडीकरणं भवेत्। मासिकं चोदकुंभं च देयं तस्यापि वत्सरमिति। तत्कल्पसूत्रकारोक्तपुनरनुष्ठानविषयत्वेन योज्यं। अयं च द्वादशाहपक्षो ब्राह्मणस्यैव तस्य तावता शौचनिवृत्तेः। न त्वाद्यं श्राद्धं यथैकादशेह्नि आशौचमध्ये क्रियते तद्वन्मियाहिःसाग्निको द्वादशाहे सपिंडीकरणं करोतु को विरोध इति चेत्। आद्यस्यैकादशाह नियतत्वात्सर्वेषां तत्र करणं। सपिंडीकरणस्य च कालांतरमप्यस्तीति द्वादशाहः आ-

ह्मणविषय एवावतिष्ठते। तथाहिताग्निना ब्राह्मणेनक- र्त्रीकचैनकादर्शेह्निवा सपिंडीकरणं कार्यं॥ तदाह। हारीतः॥ या तु पूर्वममावास्या मृताहाद्दशमाद्भवेत्। सपिं- डीकरणं तस्यां कुर्याद्देवसुतोग्निमान्। मृताहाद्दशमहः तस्मात्परायामावास्यैकादशाहस्तत्रेत्यर्थः। आहिताग्निना क्षत्रियेण वैश्येन वा कर्त्राशौचानंतरदर्शे सपिंडीकरणं कर्त- व्यं। यदाह जाबालिः। सपिंडीकरणं कुर्यात्पूर्वदर्शेग्निमा- न्सुतः। परतो दशरात्रस्य पूर्णेब्दे तु तथापरः। अस्यार्थः। सपिंडीकरणं कुर्यात्पूर्वे दश इत्यनेन दशमदिनादर्वाग्यदाक- दाचिदपि प्राप्तस्य दर्शस्य सपिंडीकरणकालत्वे प्राप्ते स काल उत्कर्षेद्दशरात्रात्परत इति। परत्वं च दशरात्रसन्निहितानं- तरकाले आशौचानंतरकाले प्यविरुद्धमिति ज्ञाते छिन्न्याये- नाशौचानंतरकालीनदर्शे कर्तव्यं। तथा च दशरात्रशब्दो- प्याशौचानंतरकालोपलक्षकः। ब्राह्मणादीनां सर्वेषामाहि- ताग्नीनां कर्तृणामाशौचांतप्रथमदर्शयोर्मध्ये यः कालः सोपि सपिंडीकरणकालः॥ तथा च कात्यायनः॥

एकादशाहं निर्वर्त्य पूर्वे दर्शे यथाविधि। प्रकुर्वीताग्निमा- न्विप्रो मातापित्रोः सपिंडतां। आशौचानंतरं यो दर्शः तन्मध्ये एकस्मिन्दिने सपिंडीकरणं कुर्यादिति। आहिताग्नेः पिंडपितृ- यज्ञाधिकारिणो दर्शे पिंडपितृयज्ञार्थमयमुपदेशः॥ अत एव प्रजापतिः॥ नासपिंड्याग्निमान्पुत्रः पितृयज्ञं समाच-

रेत्। स पार्वणानाम्युदयं कुर्वन्न लभते फलं। एवं च पूर्वोक्त-
रीत्या द्वादशाहकालो दर्शान्तकालश्चाशौचान्तप्रथम-
दर्शयोर्मध्यकालश्चेति त्रयः कालाः साग्निककर्तुः। अनेनै-
वाभिप्रायेण परार्के। एवं च साग्निकस्य कर्त्तुः त्रयः सपिंडीक-
रणकाला उक्ता भवंति द्वादशाहस्तथा। शौचांत प्रथमदर्श-
योर्मध्ये किमप्यहः तथा आशौचानंतरं प्रथमो दर्श इति। अ-
नेनैवाभिप्रायेण कल्पतरावपि। द्वादशाहो द्वादशाहात्परकाली-
नाया अमावास्यायाः पूर्वं किमप्यहो द्वादशाहात्परामावास्या चे-
ति। यदा कर्त्ता नाहिताग्निः प्रेतश्चाहिताग्निस्तदा सुमंतुराह
प्रेतश्चेदाहिताग्निःस्यात्तत्कर्त्ता नाग्निर्यदा भवेत्। सपिंडीकरणं त-
स्य कुर्यात्पक्षे तृतीयके। यदा कर्त्ता प्रेतश्चाहिताग्नी तदापि त्रिपक्ष
एवात तस्य दाहादेकादशाहादिकस्य कर्त्तव्यत्वात्। साग्निकस्य
पूर्वोक्त काले लोपे कथमित्याकांक्षायां गोभिलः। द्वादशा-
हादिकालेषु प्रमादादयनुष्ठितं सपिंडीकरणं कुर्यात्कालेषू-
त्तर भाविषु। अनाहिताग्नेस्तु द्वादशाहादयः सप्तपक्षा भवंति।
तथा भविष्यत्पुराणे॥ सपिंडीकरणं कुर्याद्यजमान-
स्त्वनग्निमान्। अनाहिताग्नेः प्रेतस्य पूर्णेऽब्दे भरतर्षभ। द्वाद-
शेऽहनि षष्ठे वा त्रिपक्षे वा त्रिमासि वा। एकादशे वा मासि मंग-
लं स्यादुपस्थितं। षष्ठे वा मासोत्यन्वयः यदा मंगलं वृद्ध्याद्यु-
पस्थितं स्यात्ततः पूर्वमपि काल इत्यर्थः॥ व्याघ्रः॥ आनं-
त्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात्। अस्थितेस्तु शरी-

रस्य द्वादशाहः प्रशस्यते। शूद्रविषये सपिंडीकरणं कर्त्तव्य-
मित्यनुवृत्तौ॥ **विष्णुः**॥ मंत्रवर्जं हि शूद्राणां द्वादशेहनि
कीर्त्तितमिति। अमावास्याश्राद्धकारिशूद्रविषयमेतदपरार्के
कल्पतरौ च। वचनबलादाशौचमध्य एव कर्त्तव्यं॥ अथा-
भ्युदयिकश्राद्धं॥ तत्र मत्स्यपुराणे॥ उत्सवानंदसं-
तानयज्ञोद्वाहादिमंगले। मातरः प्रथमं पूज्याः पितरस्तदनं-
तरं। ततो मातामहानां च विश्वेदेवास्तथैव च। अत्र कालनि-
यममाह **गार्ग्यः**। मातृश्राद्धं तु पूर्वेद्युः कर्माहनि तु पैतृकं।
मातामह्यं चोत्तरेद्युर्वृद्धौ श्राद्धत्रयं स्मृतं। दिनत्रयकरणासं-
भवे **वृद्धशातातपः**। पृथग्दिनेष्वशक्तश्चेदेकस्मिन्पूर्व-
वासरे। श्राद्धत्रयं प्रकुर्वीत वैश्वदेवं तु तांत्रिकं॥ **शातात-
पः**॥ पूर्वाह्णे दैविकं कार्यमपराह्णे तु पैतृकं। एकोद्दिष्टं तु म-
ध्याह्ने प्रातर्वृद्धिनिमित्तकं। प्रातरिति संभवे। अन्यथा राज्या-
दौ पुत्रजन्मनि जातकर्मांगभूतनांदीमुखश्राद्धानुपपत्तेः।
आश्वलायनगृह्यपरिशिष्टं॥ आभ्युदयिकेयुग्मा
ब्राह्मणा अमूला दर्भाः प्राङ्मुखेभ्य उदङ्मुखो दद्यादुद-
ङ्मुखेभ्यो वा प्राङ्मुखो द्वौ दर्भौ पवित्रे इति। **कात्यायनः**
आभ्युदयिके प्रदक्षिणमुपचारः पित्र्यमंत्रवर्जय ऋजवो द-
र्भा यवैस्तिलार्थः संपन्नमिति तृप्तिप्रश्नो दधिबदराक्षतमि-
श्राः पिंडा नांदीमुखान्पितॄनावाहयिष्य इति वै पृच्छति च
नांदीमुखाः प्रीयंतामित्यक्षय्यस्थाने नांदीमुखान्पितॄ-

न्वाचयिष्य इति पृच्छति च नांदीमुखाः पितरः पितामहाः
प्रपितामहाः मातामहाः प्रमातामहा वृद्धप्रमातामहाश्च
प्रीयंतामिति। न स्वधां प्रयुंजीत युग्मानाश्रये दिति। अत्र नां
दीमुखाः पितर इति मातॄणां मातामहानामपि प्रदर्शनार्थं
यत्तु ब्रह्मपुराणे ॥ चतुर्थादिर्लेपभाजां नांदीमुखमत्व-
मुक्तं। पिता पितामहश्चैव तथैव प्रपितामहः। त्रयो ह्यश्रुमु-
खा ह्येते पितरः परिकीर्त्तिताः। तेभ्यः पूर्वतरा ये च प्रजावंतः सु-
खैधिताः। ते तु नांदीमुखा नांदीसमृद्धिरिति कथ्यत इति॥
तज्जीवत्पित्रादित्रितयस्य श्राद्धकर्त्तुर्वृद्धिश्राद्धे देवतात्व-
सिद्ध्यर्थं॥ मत्स्यपुराणादिवचनेषु पित्रादीनां नांदीमु-
खदेवतात्वमभिहितं। ब्रह्मपुराणवचने तु लेपभाजामभि-
हितं। अतः परस्परविरोधः परिहरणीयः। परिहारस्त्वपू-
र्वोक्तविषयभेदेन घटते नान्यथा। युक्तं चैतत् पित्रादीनां
त्रयाणामपि विद्यमानत्वात्। चतुर्थादयः प्रजावंतः। च-
तुर्थादिसन्निहितत्वेन पित्रादित्रयाणां तद्विषयदुःख-
भाक्त्वेन संनिहितमरणधर्म्मकत्वाच्चाश्रुमुखत्वमिति।
ततश्च विद्यमानपित्रादित्रयस्यापि वृद्धौ नांदीश्राद्धमावश्य-
कमिति गम्यते। न पार्वणादिश्राद्धं। पितरि पितामहे प्रपि-
तामहे च जीवति नैव कुर्यादिति विष्णुना निषेधात्। एवं।
मात्रादिषु मातामहादिषु च विद्यमानेषु वेदितव्यं न्याय
साम्यात्। एवं च यत्कैश्चिदुक्तं पित्रादिषु त्रिषु विद्यमाने-

पुनपितृवर्गेनांदीमुखश्राद्धं एवंमातृश्राद्धादिष्वपीति
तद्ब्रह्मपुराणवचनापरिज्ञाननिबंधनमित्युपेक्षणीयं।
आश्वलायनः॥ विश्वेदेवा इदं वोऽर्घ्यं नांदीमुखाः पि-
तर इदं वो अर्घ्यमिति यथालिंगमर्घ्यदानं पाणौ होमो अग्नये क-
व्यवाहनाय स्वाहा सोमाय पितृमते स्वाहेति मधुवाता ऋता-
यत इति तृचं स्थाने उपास्मै गायतेति पंच मधुमतीः श्रावये-
दक्षन्नमीमदंतेति च पक्षीमाचांतेषु भुक्त्वा शयानोमनयेनो-
पलिप्यांतेषु प्राचीनाग्रान्दर्भान्संस्तीर्य तेषु पृषदाज्यमिश्रे-
ण भुक्तशेषेणैकैकस्य द्वौ द्वौ पिंडौ दद्यादिति भुक्ताशयाभु-
क्तप्रदेशः। भोजनशालायां बहिर्वा दद्यात्॥ **वृद्धशाता-
तपः॥** प्रदद्यात्प्राङ्मुखः पिंडान्वृद्धौ नाम्ना सवाह्यतः।
वाह्यतः शालातो बहिः। आश्वलायनेन प्रतिवर्गं द्वौ द्वौ।
पिंडौ दर्शितौ। ब्रह्मपुराणे तु मिश्रीकृत्वा तु चत्वारि पिंडान्श्री-
फलसन्निभानिति या चतुःसंख्या सा षट्पिंडोपलक्षणा-
र्था चतुर्विंशतिमते। एकं नाम्नापरं तूष्णीं दद्यात्पिंडान्पृथ-
क्पृथक्। एकैकस्मै पृथक्पृथक् द्वौ द्वौ पिंडौ दद्यादेकं ना-
मोच्चारणपूर्वकमपरं तूष्णीमित्यर्थः। अर्घ्यदाने विशेषः
कात्यायनेनोक्तः॥ गोत्रनामभिरामंत्र्य पितृभ्योऽर्घ्यं नि-
वेदयेत्। नात्रापसव्यकरणं न पित्र्यं तीर्थमिष्यते। पात्राणां
पूरणादीनि दैवेनैव हि कारयेत्। ज्येष्ठोत्तरकरान्युग्मान्करा-
ग्राग्रपवित्रकान्। कृत्वार्घ्यं संप्रदातव्यं नैकस्यात्र प्रदीय-

ते। ज्येष्ठोत्तरेति द्वयोर्द्वयोर्ब्राह्मणयोर्हस्तौ मेलयित्वा तत्रा-
पि ज्येष्ठस्य प्रथमोपवेशितस्य हस्तमुपरि कृत्वार्घ्यदानं क-
र्त्तव्यमित्यर्थः॥ कात्यायनः॥ स्वपितृभ्यः पिता दद्यात्सुत-
संस्कारकर्मसु। पिंडानोद्वहनात्तेषां तस्याभावे तु तत्क्रमात्
पितुरभावे ज्येष्ठभ्रात्रादिकर्तृक्रमेणेत्यर्थः। आनुद्वहनाद्वि-
वाहपर्यंतं। जीवति पितरि पुत्रः स्वीयद्वितीयविवाहस्य संस्का-
रकर्मत्वाभावात्पितुरावश्यकत्वाभावेन तादृशविवाहे स्व-
पुत्रजातकर्मादिषु वा नांदीमुखश्राद्धकर्त्ता तदा पितृमातृभ्यः
पितृपितृभ्यः पितृमातामहेभ्य एव दद्यात्। येभ्य एव पिता-
दद्यात्तेभ्यो दद्यात्सुतः पुत्रक इति नियमात्। केचनैवं वर्णयंति
येभ्य एव पिता दद्यादित्यस्यायमभिप्रायः पिता स्वपित्रादिभ्यः
स्वमातामहादिभ्यश्च यथा ददाति एवमसावपि स्वसंबंधि-
नामेव दद्यादिति। एतदनुपपन्नं अत्र यत्तच्छब्दनिर्देशो।
न स्वशब्दनिर्देशः। येभ्य एवेत्यादिना पितृप्रतियोगिका
एव गृह्यंते न स्वप्रतियोगिकाः। तस्मात्पितृसंबंधिन एव
मातामहादयो ग्राह्याः। तथा तेभ्यः पूर्वतरा ये च प्रजाव-
तः सुखैधिताः। ते तु नांदीनांदीमुखानां वृद्धौ समृद्धिरिति कथ्य इ-
त्यस्मिन्प्रकरणे पूर्वदर्शितब्रह्मपुराणवचनात्स्वपितृपू-
ज्यानामेव पूज्यत्वं। वृद्धिश्राद्धे पिंडदानं वैकल्पिकं॥ त-
था च भविष्यत्पुराणे॥ पिंडनिर्वपणं कुर्यान्न वा कु-
र्यान्नराधिपः। वृद्धिश्राद्धे महाबाहो कुलधर्मानवेक्ष्य तु॥

पिंडनिर्वपणमित्युपलक्षणं। अतोयत्कुले यावतीनिक-
र्तव्यता वृद्धिश्राद्धेतावत्येव कर्त्तव्या नाधिकेत्यर्थः॥ कात्या-
यनः॥ कर्मादिषुतु सर्वेषु मातरः सगणाधिपाः। पूजनीयाः
प्रयत्नेन पूजिताः पूजयंति ताः॥ कर्मादिषु नांदीमुखादिषु।
तथाप्रतिमासु च शुद्धासु लिखितासु पटादिषु। अपि वाक्षतपुं-
जेषु नैवेद्यैश्च पृथग्विधैः। कुड्यलग्नां वसोर्धारांसप्तधारां घृ-
तेनतु। कारयेत्पंचधारां वा नातिनीचां नचोच्छ्रितां। आयुष्या-
णि च शांत्यर्थं जप्त्वा तत्र समाहितः। आयुष्याणि आयुर्वृद्धिक-
राणि। आनो भद्राः क्रतव इत्यादि सूक्तानि। तथा। गौरी पद्मा
शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लो-
कमातरः। धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह। आभ्यो-
र्घ्यं गंधपुष्पं च धूपं दीपं निवेदयेत्। चतुर्विंशतिमते। श्राद्धे
चाभ्युदये प्राप्ते देवतास्थापनं स्मृतं। जातिधर्मकुलश्रेणि-
लोकानां वृद्धिकारणं। तिस्रः पूज्याः पितुः पक्षे तिस्रो मातामह-
स्तथा। इत्येता मातरः प्रोक्ताः पितृमातृस्वसाष्टमी। ब्रह्मण्या-
द्यास्तथा सप्तदुर्गाक्षेत्रगणाधिपान्। पूजयेदिति शेषः। पितृ-
पक्षे पितृवर्गे तिस्रो मातृपितामहीप्रपितामह्यः। मातामहे त-
द्वर्गे तिस्रो मातामह्याद्याः पितृमातृस्वसाष्टमीति। पितृष्वसा।
सप्तमी मातृष्वसाष्टमीत्यर्थः। एता मनुष्यमातरः। ब्रह्मा-
णी वैष्णवी माहेश्वरी ऐंद्री वाराही कौमारी चामुंडेति सप्त देव-
मातरः। कात्यायनचतुर्विंशतिमतयोर्विकल्पः॥ कात्या-

यनः ॥ गणशः क्रियमाणेषु मातृभ्यः पूजनं सकृत् । सकृदेव भवेत् श्राद्धमादौ न पृथगादिषु । अयमर्थः । यदा संस्कारातिक्रमे एकदोपनयनकाले जातकर्मादीनि क्रियन्ते । पतितस्य कृतप्रायश्चित्तस्य वा पुनरुपनयनकाले क्रियन्ते । एवमन्यत्रापि यत्र संभूय यानि कर्माणि मङ्गल्यानि क्रियन्ते सकर्मगणस्तत्र सकृत्तन्त्रेण कुर्यात् । पृथगादिषु स्वस्वकाले पृथक् क्रियमाणेषु नैतन्त्रेण किंवावृत्त्येति ॥ अथ जीवत् श्राद्धं ॥ तत्र ब्रह्मपुराणं ॥ देशकालधनश्रद्धाव्यवसायसमन्विते । जीविते सति जीवाय दद्यात् श्राद्धं सकृत् नरः । समुच्चिते युक्ते विहिते पुण्यदेशादिषु सत्सु श्राद्धयोग्यादिमांश्च उज्जीवत् श्राद्धं कुर्यादित्यर्थः । कृतोपवासः सुस्नातस्त्रयोदश्यां समाहितः । त्रयोदश्यां कृष्णत्रयोदश्यां । कर्त्तारमथ ओङ्कारं विष्णुं सर्वेश्वरं यजेत् । यजेत् । पूजयेत् । स्थले जले वरे मूर्त्तौ कलशे पुष्करेऽरवौ । पुष्करे कमले । चंद्राग्निगुरुगोविप्रमातापितृषु सर्वगं । सदक्षिणाश्च सतिलाश्लिस्रस्तु जलधेनवः । निवेदयेत् पितृभ्यस्तु तदग्रे तु समाहितः । सोमाय त्वा पितृमते स्वधा नम इति स्मरन् । अग्रये कव्यवाहनाय स्वधा नम इति स्मरन् । दक्षिणेन तु दद्यात्तु तृतीयां दक्षिणायुतां । यमायाङ्गिरसे वाथ स्वधा नम इति स्मरन् । तयोर्मध्ये तु निक्षिप्य विप्रान्यं चोपवेशयेत् । प्रथमामुत्तरतः द्वितीयां दक्षिणतः तृतीयां मध्ये निक्षिप्येत्यर्थः । आवाहनादिना पूर्वं विश्वेदेवानभ्यर्च्य च ॥

अहं वसुभ्यस्त्वा विप्ररुद्रेभ्यस्त्वामहं ततः । सूर्येभ्यस्त्वाम-
हं विप्रभोजयामीति तामवदेत् । आवाहनादिकं शेषं कुर्याच्च
पितृकर्मवत् । सौम्यां धेनुं ततो दद्याद्वासवाय द्विजायतु ।
आग्नेयीं चाथ रौद्राय याम्यां सूर्यद्विजायतु । विश्वेभ्यश्चैव
देवेभ्यस्तिलपात्रं निवेदयेत् । वासवाय वसूद्देशेनोपवेशि-
ताय । एवमुत्तरत्रापि । त्वस्त्युदकमथाक्षय्यं जलं दत्त्वाथ ता-
न्द्विजान्विसर्जयेत्स्मरन्विष्णुं देवमष्टाक्षरं विभुं । ततः
कामकृत्ते श्मशानं निशि नारायणं स्मरेत् । चतुर्दश्यां ततो ग-
च्छेत् यथाम्नानमविह्वलः । सरिद्गमनं प्रतिवर्णविशेषस्य मा-
र्गविशेषमाह । पूर्वेण विप्रः सौम्येन राजा वैश्यो परेण च । सौ-
म्येनोत्तरेण अपरेण पश्चिमेन । दक्षिणेन तथा शूद्रो मार्गेण
विकिरेद्यवान् । वस्त्राणि लोहखंडानि जितं त इति संबंधिनी
ब्राह्मी । कृत्वा श्मशानिकं होमं पूर्णाहुत्यंतमेव हि । निरग्नि-
मथवा भूमिं यमं रुद्रं च संस्मरन् । हुत्वा प्राधानिके स्थाने
निरग्नि भूम्युद्देशेन तथा यमाद्युद्देशेन हुत्वा च तां प्रति कृति-
मन्यैर्ह्णीहापयेद्दाहयेत् । अपये चापरे वह्नौ मुद्गमिश्रं चरुं त-
तः । तिलतंडुलमिश्रं च द्वितीयं सपवित्रकं । पूरयेत्कर्षुकाश्चा-
त्र मधुक्षारघृतोदकैः । तद्रुपांते ततो मुद्गैः पात्राणि त्रीणि पू-
रयेत् । ओं पृथिव्यै नमस्तुभ्यमिति चैकं निवेदयेत् । ओं यमाय
नमश्चेति द्वितीयं तदनंतरं । नमस्त्वायतु रुद्राय श्मशानपतये
तथा । ततो दीप्तं समिद्धाग्निं भूमौ प्रकृति दाहकं । निर्वापयेदि-

त्वध्याहारः। निर्वापणप्रकारमेवाह। ओं क्रव्यादवह्नितप्तायै भू-
म्यै नम इति स्मरन्। क्षीराक्तं जलकुंभं तु विकिरेत्तत्प्रशांतये
नाभिमात्रं ततस्तोयं प्रविश्य यमदिङ्मुखः। सप्तभ्यो यमसं-
ज्ञेभ्यो दद्यात्सप्तजलांजलीन्। ओं यमाय धर्मराजाय मृत्यवे
चांतकाय च। वैवस्वताय कालाय सर्वप्राणहराय च। स्वधाका-
रनमस्कारप्रणवैः सह सप्तधा। अत्रायं मंत्रोच्चारक्रमः। ओं य-
माय स्वधा नम इति। एवं धर्मराजायेत्यादिष्वपि। सप्तजलांज-
लीन्सप्तधेत्युपक्रमोपसंहारवशान्न केवलस्वधादिशब्दो-
च्चारणेन यत्कर्तव्यं तदाह। लाजोदकाभ्यां पूर्णं तु कुंभं
च विकिरेद्भुवि। ततश्च। याम्योदङ्मुख एव दर्भेषु प्रदद्याद-
वनेजनं। स्वधेति शुक्रवाहाय रुद्रं नम इति स्मरन्। अमुका-
मुकगोत्रैतत्तुभ्यमस्तु तिलोदकं। तद्दानप्रकारमेव दर्शयति।
स्वधेत्यादिना। शुक्रवाहाय रुद्राय स्वधा नम इति रुद्रं संस्मर-
न्नमुकगोत्रैतत्तिलोदकं तुभ्यमस्त्विति दद्यादित्यर्थः। प्र-
दद्याद्दश पिंडांस्तु अर्घपुष्पसमन्वितान्। धूपो दीपो बलिर्गं-
धः सर्वेषामस्तु चाक्षयः। धूपादिदानानंतरं सर्वेषामक्षयो-
स्त्विति ब्रूयादित्यर्थः। दश पिंडांस्ततो दत्त्वा विष्णोः सौम्यं
मुखं स्मरेत्। निरूप्यराश्च तांस्तोयं नाभिमात्रं प्रविश्य तु।
प्रक्षिपेत्पूर्णकुंभेन जलमध्ये पृथक्पृथक्। पूर्णकुंभ एकै-
कं पिंडं निक्षिप्य जलमध्ये प्रक्षिपेदित्यर्थः। प्रदद्यात्सं च पंचा-
शत्कुंभानथ जलांजलीन्। द्वारोपांते गृहे चाथ क्षीरं तोयं च

निक्षिपेत्। जीवान्नस्ताहि दुग्धं च पिबेदं चाप्यनुस्मरन्।
जीवान्नस्ताहीत्यादिमंत्रद्वयं पठन्नित्यर्थः। यस्योनुवेधुदर्शेषु
मयेत्यश्चादुरडुरवः। अमावास्यायां कुर्याच्च जीवांतेन्
श्राद्धमतः परं। घृतान्नमांसदधिभिः पूरयेत्कर्षुकात्रयं।
कुर्याच्च मासिकं मासि सपिंडीकरणं ततः। आशौचांते त-
तः सर्वमात्मनो वा परस्य तु। कुर्यादस्थिरतां ज्ञात्वा शत्तया-
रोग्यधनायुषां। अमावास्यायां कुर्यादित्यभिधाय पुनर-
प्याशौचांत इत्यभिधानादमावास्यायां व्यतीतायामतः प-
रमाशौचांते पर्णशराशौचवद्विरात्रांते श्राद्धादिकं कुर्यादि-
त्यवगम्यते। एतदध्याहारसापेक्षत्वात् तत्राशौचांत इ-
त्यादिकस्योपसंहाररूपत्वेनानुवादत्वोपपत्तेः शुक्लप-
क्षे श्राद्धस्याप्रशस्तत्वात्कृष्णपक्षे च प्रशस्तत्वात्तत्राप्य-
मावास्यायां प्रशस्ततरत्वेनामावास्यापूर्वदिन एवाशौच-
मित्यमावास्यैवाशौचांतः अतस्तत्रैव श्राद्धं कुर्यात् ॥

इह मदनपारिजाते मदनक्षितिपालदानजलरूढे स्तव-
कः सप्तम आसीद्दामोदरकृष्णपण्डितभ्रमरः। मतिर्ये-
षां शास्त्रे प्रकृतिरमणीया व्यवहृतिः परार्घ्यत्वं श्लाघ्यं
जगति कृतजवस्ते कतिपये। चिरं चित्ते तेषां मुकुरतलभू-
ते स्थितिमियादियं व्यासारण्यप्रवरमुनिशिष्यस्य भणि-
तिः ॥ इति पंडितपारिजातकदारमल्लेत्या-
दिविरुदराजीविराजमानस्य श्रीमदनपाल-

स्य निबन्धे मदनपारिजाताभिधे सप्तमः
स्तवकः ॥

विभक्तानामेव पृथक् पृथक् श्राद्धाधिकारात् । आ-
द्यस्तवकानन्तरं दायविभागो निरूप्यते ॥ तत्र नार-
दः ॥ विभागोऽर्थस्य पैत्रस्य पुत्रैर्यत्र प्रकल्प्यते । दाय-
भाग इति प्रोक्तं तद्विवादपदं बुधैः । पैत्रस्येति पैतामहा-
देरप्युपलक्षणम् । तदिति विधेयविशेषणम् । चत्वा-
रः काला विभागस्य । जीवत्येव पितरि पितुर्यदा विभा-
गेच्छायामपि यदा पुत्रेच्छा सोऽन्यः । सरजस्कायाम-
पि मातरि अनिच्छत्यपि पितरि निस्पृहे अधर्मव-
र्तिनि अचिकित्स्यरोगग्रस्ते वा सति यदि पुत्रेच्छा सो-
ऽपरः । पितृमरणानन्तरमपर इति । तत्र प्रथमपक्ष-
माह ॥ याज्ञवल्क्यः ॥ विभागं चेत्पिता कुर्य्यादि-
च्छया विभजेत्सुतान् । ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा
स्युः समांशिनः । ज्येष्ठादिभागश्च मनुना दर्शि-
तः ॥ ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम् ।
ततोऽर्द्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः । अस्यार्थः ।
विभाज्ये द्रव्ये विंशतितमो भागः यच्च विभाज्यद्रव्ये
श्रेष्ठं तत् ज्येष्ठाय दातव्यम् । तथा । चत्वारिंशत्तमो
भागो मध्यमद्रव्यं च मध्यमाय । अशीतितमो भागो
हीनं च द्रव्यं कनिष्ठाय दातव्यं । ततो वशिष्टं द्रव्यं स-

मंविभज्य गृह्णीयादिति। एवमन्यान्यपि विषमविभागप्रति-
पादकानि गौतमादिवचनानि बहूनि संति तानि ग्रंथविस्तर-
भयान्नेह प्रदर्शितानि। एवं विषमविभागस्य शास्त्रसिद्ध-
त्वेपि लोकविरुद्धत्वादस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न-
त्विति वचनाद्यं विभागक्रमो नानुष्ठेयः। स्मर्यते च।
यथा नियोगधर्मो न्यो नानूबंध्यो वधोपि वा। तथोद्धारवि-
भागोपि नैव संप्रति वर्त्तते। यदि दैवात्पिता करोति विषम-
विभागं तदा न निवर्त्तत इत्याह याज्ञवल्क्यः। न्यूना-
धिकं विभक्ता तां धर्म्यः पितृकृतः स्मृतः। धर्म्यो यदि धर्मा-
दनपेतस्तर्हि न निवर्त्तनीय इत्यर्थः। अधर्म्यश्चेन्निवर्त्तत इ-
त्युक्तं भवति॥ तथा च नारदः॥ अन्यथा शास्त्रकारी च
न विभागे पिता प्रभुरिति। यत्र च विषमविभागे लोकविद्वे-
षाभावस्तत्र विषमविभागो भवत्येव॥ यदाह नारदः
द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पितेति। एतच्च स्व-
तंत्रोपार्जकपरं॥ यदाह वशिष्ठः॥ येन चैषां स्वयमु-
पार्जितं स्यात्स द्व्यंशमेव न भेतेति। एषां दायार्हपितृभ्राता-
दीनां। द्वितीयं पक्षमाह विभजेयुर्द्धनं सममित्यनुवृत्तौ। नार-
दः। मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च। निवृत्ते वापि र-
मणेपितर्युपरतस्पृहे। प्रत्तासु विवाहितासु। रमणे स्त्रीसं-
भोगः। तदिच्छानिवृत्तौ सत्यामित्यर्थः। स्पृहा द्रव्यविष-
या। तृतीयं पक्षमाह॥ शंखः॥ अकामे पितरि रिक्थवि-

भागो वृद्धे विपरीतचेतसि रोगिणि चेति। अकामेऽस्मिन्निच्छौ। वि-
परीतचेतसि। अधर्मवर्त्तिनि। चतुर्थपक्षमाह **याज्ञवल्क्यः**
विभजेरन्सुताः पित्रोरूर्द्ध्वं रिक्थमृणं समम्। पित्रोर्मातापित्रो-
रूर्द्ध्वं रिक्थं तदीयद्रव्यं तदीयमृणं च समं विभजेरन्नित्यर्थः।
पितृमरणानन्तरं पातित्यादिदोषदुष्टे वा पितरि जीवति यदा पु-
त्रा एव विभागकर्त्तारस्तदा विशेषमाह **स एव**। असंस्कृतास्तु सं-
स्कार्या भ्रातृभिः पूर्वसंस्कृतैः। भगिन्यश्च निजादंशाद्दत्वांशं तु
तुरीयकम्। असंस्कृतानां विवाहान्तसंस्कारैरसंस्कृतानां भ्रातृ-
णां भगिनीनां च विवाहान्तसंस्कारं कृत्वा पश्चाद्विभागः क-
र्त्तव्य इत्यर्थः। भगिन्यश्चेत्यादेरयं तात्पर्यार्थः। भगिनीनाम-
विवाहितानां विवाहं कृत्वा तास्यश्चतुर्थमंशं दद्यात्। कस्मान्नि-
जादंशात्। अत्र यज्जातीयपुत्रस्य योंऽशः चतुस्त्रिद्व्येकभागाः
स्युरिति वक्ष्यमाणाः सोंऽशो निजोंऽशः। तस्मात्। अयं च विभाग-
क्रमः। ब्राह्मणस्यैवैका पत्नी तत्पुत्रोऽप्येक एव। एका च कन्या।
तत्र पितृद्रव्यं द्वेधा विभज्य तन्मध्य एकमंशं चतुर्धा विभज्य च-
तुर्थमंशं कन्यायै दत्वा अवशिष्टं पुत्रो गृह्णीयात्। यदा पुत्रौ द्वौ
कन्या चैका तदा पित्र्यं त्रेधा विभज्य तत्रैकमंशं चतुर्द्धा कृत्वा
तुरीयांशं कन्यायै दत्वावशिष्टं द्वावपि पुत्रावर्द्धमर्द्धं गृह्णीतः
एवं पुत्रबहुत्वे कन्याबहुत्वे चोहनीयम्। यद्येकः पुत्रो द्वे च क-
न्ये तदा पितृधनं त्रेधा विभज्य तत्रैकं भागं चतुर्द्धा कृत्वा एक-
मेव चतुर्थांशं द्वाभ्यां कन्याभ्यां दत्वावशिष्टमखिलं पुत्र एव

गृह्णाति। एवमेव समानजातीयेषु भगिनीषु संख्यावैषम्यो
योजनीयं। यदा जातिवैषम्यं संख्यासाम्यं वैषम्यं वा तदेवं द्र-
ष्टव्यं। तद्यथा ब्राह्मणस्य ब्राह्मण्यादि भार्याः तत्र ब्राह्मणी-
पुत्रः कन्या च तथा क्षत्रियासुतः कन्या च। तथा वैश्यायाः शूद्रा-
याश्च एवमष्टावपत्यानि तत्र चत्वार्यपत्यानि स्त्रियश्चत्वारः
पुमांसः। चतुस्त्रिद्व्येकभागाः स्युरित्यनेन वचनेन ब्राह्मणयप-
त्ययोरष्टावंशाः। क्षत्रियापत्ययोः षट्। वैश्यापत्ययोश्चत्वा-
रः शूद्रापत्ययोर्द्वौ एवं विंशति भागान्कृत्वा ब्राह्मणी कन्यायै
स्वजातिपुत्रविहितादंशचतुष्टयरूपान्निजाद्भागाच्चतुर्थमंशं
दद्यात्। क्षत्रियकन्यकायै स्वजातिपुत्रविहितादंशत्रयरूपान्नि-
जाद्भागाच्चतुर्थमंशं दद्यात्। वैश्याकन्यायै स्वजातिपुत्रविहिता-
दंशद्वयरूपान्निजाद्भागाच्चतुर्थमंशं दद्यात्। शूद्राकन्यकायै
स्वजातिपुत्रविहितादेकांशरूपादेव निजाद्भागाच्चतुर्थमंशं दत्वा
तत्तद्भागादवशिष्टं द्रव्यमेकीकृत्य ब्राह्मण्यादिपुत्राः क्रमाच्च-
तुस्त्रिद्व्येकभागान् गृह्णीयुः भ्रातृणां भगिनीनां तु वैषम्ये याच-
त्यो व्यक्तयो भ्रात्रादीनां तावतः संशान् तत्तज्जात्यनुसाराच्च-
तुस्त्रिद्व्येकभागादिक्रमेण कल्पयित्वा कन्यकानां स्वस्वजाति
विहिताद्भागाच्चतुर्थं चतुर्थमंशं दत्वावशिष्टं च तत्तद्भागाद्द्रव्यं।
सर्वे सुतश्चतुस्त्र्यादिक्रमेण विभज्य गृह्णीयुरित्येवं योजनीयं।
केचनैवं मन्यन्ते। पूर्वोक्तरीत्या चतुर्थमंशं कन्यायै दत्वा तेनैव
विवाहः कर्तव्यो न तु समुदितद्रव्येण विवाहं कृत्वा पुनरपि।

चतुर्थांशप्रदानमिति। तन्मेधातिथिमिताक्षराकारादीनामन-
भिमतत्वादुपेक्षणीयं॥ अथ वा देशाचारतो व्यवस्था
दायविभागकालस्तत्र संगतं चेत्येतदुभयं निरूपितं सांप्र-
तं दायग्रहणव्यवस्थां दर्शयितुं मुख्यगौणपुत्राः प्रदर्श्यंते॥
तत्र याज्ञवल्क्यः॥ औरसो धर्मपत्नीजस्तत्समः पुत्रिका-
सुतः। क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा॥ गृहे प्रच्छन्नउत्प-
न्नो गूढजस्तु सुतः स्मृतः॥ दद्यान्माता पिता यं वा स पुत्रो दत्तको
भवेत्। क्रीतश्च ताभ्यां विक्रीतः कृत्रिमश्च स्वयं कृतः। दत्तात्मा
तु स्वयं दत्तो गर्भे विन्नः सहोढजः। उत्सृष्टो गृह्यते यस्तु सोपवि-
द्धो भवेत्सुतः। पिंडदोंशहरश्चैषां पूर्वाभावे परः परः। सजा-
तीयेष्वयं प्रोक्तस्तनयेषु यथाविधि। सवर्णा धर्मविवाहोढा
धर्मपत्नी तस्यां जातः पुत्र औरसः। स च मुख्यः। तथा चासुरा-
दिविवाहोढासवर्णापुत्रोपि तथा। अनुलोमविवाहितक्ष-
त्रियादिस्त्रीषु ब्राह्मणादुत्पन्नो मूर्द्धावसिक्तोंबष्ठो निषादा-
परपर्यायः पारशवश्च वैश्यादिस्त्रियां राज्ञ उत्पन्नो माहि-
ष्योग्रौ च शूद्रायां वैश्यादुत्पन्नः करणश्चेत्येते औरसा एव
पुत्रिकापुत्रः पुत्रिकायाश्च पुत्र इत्युभयविधोपि पुत्रिकासुत-
स्तत्समः औरससमः। तथा ह्यामुष्यायणोपि जनकस्यौरस
स एव। समानवर्णेन सगोत्रेण इतरेण सपिंडेन देवरेण वा
नियोगधर्मेणोत्पन्नः पुत्रः क्षेत्रजः अनिश्चितपुरुषविशेषा-
त्सवर्णाद्भर्तृगृहे प्रच्छन्नउत्पन्नो गूढजः। अनिश्चितपुरुष-

विशेषत्वं भर्तुरेव न स्त्रियाः । स्ववर्णत्वज्ञानं स्त्रीद्वारा तथा
तत्स्वरूपस्य ज्ञातत्वात् । यत्र बलाद्गृहस्थिपुरुषांतरसंभो-
गात्सापि सवर्णविशेषं न जानाति तत्र सगूढजनाममात्र-
धीनपूर्वोक्तगूढजवत्प्रशस्तः । सवर्णात्कन्यकायामु-
त्पन्नः कानीनः । समातामहसुतः । यदि सा अविवाहिता
पितृगृह एव तिष्ठति । यदि च विवाहिता तदा स पुत्रो वोढुरे-
व ॥ तथा च मनुः ॥ पितृवेश्मनि कन्या तु यं पुत्रं जनये-
द्रहः । तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवं । अत्र वो-
ढुरित्युपादानाद्विवाहिता चेत्तदा वोढुर्नो चेन्मातामहस्ये-
त्येतद्गम्यते । क्षता अक्षता चेति द्विधा पुनर्भूः । तस्यां स-
वर्णादुत्पन्नः पौनर्भवः । दत्तकोपि सवर्ण एव ॥ यदाह
मनुः ॥ माता पिता वा दद्यातां यमद्भिः पुत्रमापदि । सदृशं
प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः । सदृशं सवर्णं भर्त्तरि प्रो-
षिते मृते वा आपदि केवलमातुरधिकारो दाने तथा मातरि
मृतायामुन्मादादिदोषयुक्तायां वा आपदि केवलपितुर-
धिकारः । अन्यथोभयोरपि सहैव । आपदीत्यापच्छब्दो-
पादानादनापदि न देयमिति गम्यते । अनापदि दत्ते दातु-
र्दोषो न प्रतिगृहीतुः एकः पुत्रो न देयो नापि प्रतिग्राह्य इत्या-
ह वशिष्ठः । न त्वेवैकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वेति । तथा
ज्येष्ठोपि न देयः । पुत्रप्रतिग्रहप्रकारमाह वशिष्ठः ॥
पुत्रं प्रतिग्रहीष्यन्बंधूनाहूय राजनि चावेद्य निवेशनस्य म-

ध्येव्याहृतिभिर्हुत्वा। दूरबांधवं बंधुसंनिकृष्ट एव प्रतिगृह्णी-यादिति निवेशनस्य स्वगृहस्य। अत्यंतदेशभाषाविप्रकृष्ट-स्य प्रतिषेधार्थमदूरबांधवमित्युक्तं। अयं च विधिः क्रीतस्वयं-दत्तकृत्रिमेष्वपि यथायोग्यं योज्यः। एकपुत्रज्येष्ठपुत्रव्य-तिरेकेणान्यादिमातापितृभ्यां पूर्वोक्तरीत्या प्रत्येकं वा यो वि-क्रीतः स सवर्णः क्रीतपुत्रः॥ यत्तु मनुनोक्तं॥ सक्रीतस्सु-तस्तस्य सदृशोऽसदृशोऽथवेति। तद्गुणैः कृत्वा सदृशोऽस-दृशो वेत्येतत्परं न तु ब्राह्मणत्वादिवर्णैः। मातापितृरहितः सवर्णो धनादिकप्रदर्शनेन प्रलोभितः सन् पुत्रार्थिना पुत्रीकृ-तो यः स कृत्रिमः। मातापितृभ्यां विहीनस्त्यक्तो वाऽ-हं तव पुत्रो भवामीति प्राप्तः स्वयंदत्तः। अत्रापि सवर्ण इत्येव। सगर्भायां विवाहितायां तस्माद्गर्भाद्य उत्पन्नः स सहोढजः। यश्चित्त्सगर्भः सवर्णाजः। मातापितृभ्यामुत्सृष्टः परित्यक्तो यो गृह्यते पुत्रत्वेन सोऽपविद्धः। अत्र क्रमं दर्शयति पिंडदोंऽश-हरश्चेति। एते सवर्णा एव पुत्रा भवंतीत्याह सजातीयेष्वय-मिति। एते क्षेत्रजादयोऽयमधिकवर्णादुत्पन्नास्तदा पित-तन्नामधेयभाजो भवंत्येव अपितु सवर्णादुत्पन्नाद्भवप्रश-स्ततरा न भवंति। सजातीयेष्वयं प्रोक्त इति सजातीयनियमात् यदि हीनवर्णादुत्पन्नास्तदा प्रतिलोमजत्वेन निंद्या एवेति विवेचनीयं। कानीनगूढोत्पन्नसहोढजपौनर्भवानां सव-र्णत्वं जनकद्वारेण न स्वरूपतः। तेषां कुंडगोलकत्वेन स्व

तोवर्त्संज्ञात्वं नभौवाभावात्। पुत्रिकाकरणानंतरमौरसपुत्रो-
त्पत्तौ विशेषमाह मनुः। पुत्रिकायां कृतायां तु यदि पुत्रोनुजा-
यते। समस्तत्र विभागः स्यात् ज्येष्ठता नास्ति हि स्त्रियः॥ का-
त्यायनः। उत्पन्ने त्वौरसे पुत्रे चतुर्थांशहराः सुताः। सव-
र्णा असवर्णास्तु ग्रासाच्छादनभाजनाः। सवर्णाः क्षेत्रजद-
त्तक्रीतकृत्रिमस्वयंदत्तापविद्धाः। असवर्णाः कानीनगूढो-
त्पन्नसहोढजपौनर्भवाः॥ यत्तु विष्णुवचनं अप्रशस्ता-
स्तु कानीनगूढोत्पन्नसहोढजाः। पौनर्भवश्च नैवैते पिंड-
रिक्थांशभागिन इति। तदौरसे सति चतुर्थांशनिषेधपरं।
औरसाद्यभावे तु कानीनादीनामपि सकलपित्र्यधनग्रहण-
मस्त्येव पूर्वाभावे परः परः इति वचनादिति विज्ञानेश्वरमतं
यथा चायमेव क्रमस्तथास्माभिरुपपादितं विज्ञानेश्वरटी-
कायां सुबोधिन्यां दायविभागप्रकरणे। यस्त्वंशाधिकारी
सन्नपि लोभाभावात्स्वतोर्जनशक्तिसद्भावाद्वांशं नजिघृ-
क्षति तं प्रत्याह याज्ञवल्क्यः। शक्तस्यानीहमानस्य किंचि-
द्दत्त्वा पृथक्क्रियां। किंचिदसारमपि तस्मै दत्त्वा विभागः कर्त-
व्यः। एतच्च तत्सुतादीनां दायजिघृक्षा माभूदित्येतदर्थं।
द्व्यामुष्यायणस्य विशेषमाहात्र पुत्रेण परक्षेत्रे नियोगो-
त्पादितः सुतः। उभयोरप्यसौ रिक्थी पिंडदाता च धर्मतः।
यदा बीजी स्वयमपुत्रो बीजदानसमये ऽत्रोत्पन्नमपत्यमा-
वयोरिति प्रतिज्ञां करोति तदेवोभयोर्बीजिक्षेत्रिणो रिक्थ-

ग्राहीसमत्वाभावे तु क्षेत्रिराशव । विभागोत्तरकालमुत्पन्न-
पुत्रं प्रत्याह मनुः । ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्ध-
नं । पित्र्यमित्येकशेषः । अत एव मातापित्रोरिदं पित्र्यं ।
तथा । पुत्रैः सह विभक्तेन पित्रा यत्स्वयमर्जितम् । विभक्तज-
स्य तत्सर्वमनीशाः पूर्वजाः स्मृताः । तथा । संसृष्टास्तेन वा
ये स्युर्विभजेत स तैः सह । ये विभक्ताः संतः पुनः पित्रा सह सं-
सृष्टास्तैः संसृष्टैः सह विभक्तो विभजेदित्यर्थः । पितरि भ्रातरि
वा मृते अस्पष्टगर्भायां मातरि भ्रातृपत्न्यां वा सत्यामन्येषु
भ्रातृषु विभक्तेषु सत्सु तस्मादेव गर्भाद्विभागानंतरमुत्पन्न-
स्य पुत्रस्य कथं भागकल्पनेत्याकांक्षायां याज्ञवल्क्यः
दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितात् । तस्य विभा-
गस्तद्विभागः । अत्र तच्छब्देन पूर्वोक्तरीत्या विभागानंतरमु-
त्पन्नः परामृश्यते । तद्विभागो दृश्याद्वा दृश्यादेव । वाशब्दो
ऽवधारणे । कीदृशात् दृश्यात् । आयव्ययविशोधितात् ।
विभागानंतरं भ्रातिस्विकांशैः कृष्यादिप्रक्रियमाणेषु यो
लाभः स आयः । पितृकृतर्णापाकरणस्वकुटुंबपोषणा-
दिकं यदावश्यकं क्रियते स व्ययः । आयसंज्ञामध्ये परिग-
णाय्य व्ययं वोद्धृत्य सर्वेभ्योंशेभ्यो यस्मादंशाद्यावद्या-
वदुचितं तावत्तावदुद्धृत्य स्वभागसममंशं कृत्वा पूर्वो-
क्तरीत्या विभागानंतरपुत्रस्य दद्यादित्यर्थः । स्पष्टगर्भा-
यां मातरि भ्रातृपत्न्यां वा प्रसवानंतरं विभागः कर्तव्यः ॥

यदाह वशिष्ठः ॥ अथ भ्रातॄणां दायविभागे याश्चानप-
त्याः स्त्रियस्तासामा पुत्रलाभादिति । तासां स्वभर्तृभार्याणां ।
स्त्रीणां आ पुत्रलाभादा प्रसवात् एवं प्रतीक्ष्य दायविभागो ।
भवतीत्यर्थः । विभागानंतरं मात्रा पित्रा वा विभक्ताय पुत्रा-
यालंकरणादिके दीयमाने विभागानंतरमुत्पन्नेन न निषेधः
कार्यः ॥ तथा च योगीश्वरः ॥ पितृभ्यां यस्य यद्दत्तं त-
त्तस्यैव धनं भवेत् । विभागात्प्रागपि पित्रा मात्रा वा यस्मै य-
द्दत्तं तत्तस्यैव समानन्यायत्वात् । अत एवैकस्मै दीयमाने-
न्येन निषेधोपि न कार्यः ॥ अथ द्विजातीयपुत्रविभा-
गिनः ॥ वर्णशो वर्णे वर्णे ब्राह्मणक्षत्रियवैश्यशूद्रजाती-
यासु ब्राह्मणभार्यासूत्पन्ना ब्राह्मणपुत्राः क्रमेण चतुस्त्रि-
द्व्येकभागभाजः भवेयुः । शूद्रापुत्रापेक्षया चत्वारो भागा ब्रा-
ह्मणीपुत्रस्य एतदपेक्षया चतुर्थांशन्यूनत्वात् क्षत्रियापुत्र-
स्य त्रयो भागाः । वैश्यापुत्रस्यार्द्धन्यूनत्वात् द्वौ भागौ । शूद्रापु-
त्रस्यैको भागः । क्षत्रजाः क्षत्रिया क्षत्रियवैश्यशूद्रजातीया-
सु स्वभार्यासूत्पन्नास्ते त्रिद्व्येकभागभाजः । ब्राह्मणस्य ब्राह्म-
ण्यां स्वभार्यायामुत्पन्नपुत्रापेक्षयैकस्यांशस्य न्यूनत्वा-
त्क्षत्रियाक्षत्रियायामुत्पन्नस्य त्रयो भागाः । वैश्यायामुत्प-
न्नस्य द्वौ शूद्रायामुत्पन्नस्यैकः । विड् वैश्याद्वैश्यशूद्रजा-
तीयस्वभार्ययोरुत्पन्नाः अत्र बहुवचनं । पुत्रबहुत्वापेक्ष-
या न तु भार्यागतजातिबहुत्वापेक्षया ब्राह्मणस्य ब्राह्मण्यां

स्वभार्यायामुत्पन्नपुत्रापेक्षयांशद्वयस्य न्यूनत्वाद्वैश्या-
हैश्यायामुत्पन्नस्य द्वावंशौ। शूद्रायामुत्पन्नस्यैकोंशः।
अनेनैव प्रकारेण पुत्रगतसंख्यासाम्ये वैषम्ये च योजनी-
यं। ब्राह्मणादिक्षत्रियादिद्विजातीयासु स्वभार्यासूत्पन्नपुत्राः
प्रतिग्रहप्राप्तभूभागं न लभंते। तथा च निगमे। न प्रति-
ग्रहभूर्देया क्षत्रियादिसुताय वै। यद्यप्येषां पिता दद्यान्मृते
विप्रासुतो हरेत्। प्रतिग्रहग्रहणात्क्रयादिलब्धं लभंते। य-
था। शूद्र्यां द्विजातिभिर्जातो न भूमेर्भागमाप्नुयात्। द्विजाति-
मात्राच्छूद्रायामुत्पन्नः प्रतिग्रहक्रियादिलब्धाया अपि भु-
वो भागं न लभत इत्यर्थः। यत्तु शूद्रापुत्रस्यांशमात्रनिषेध-
कं कण्ववचनांतरं। ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थ-
भाक्। यदेवास्य पिता दद्यात्तदेवास्य धनं भवेदिति। तदपि
जीवता पित्रा यदि शूद्रापुत्राय किमपि दत्तं तदा विभागका-
ले भ्रातृभिर्न दातव्योंश इत्येतत्परं पित्रा न दत्ते त्वंशभाक्त्व-
मस्त्येव। शूद्राद्दास्यामुत्पन्नस्य विशेषमाह॥ याज्ञ-
वल्क्यः॥ जातोपि दास्यां शूद्रेण कामतोंशहरो भवेत्।
मृते पितरि कुर्युस्तं भ्रातरस्त्वर्द्धभागिकं। अभ्रातृको हरेत्स-
र्वं दुहितॄणां सुतादृते। कामतः पितुरिच्छयांशहरो भवेत्।
यदि पितांशं ददाति तदांशोस्तीत्यर्थः। अर्द्धभागिकं वि-
वाहितापुत्रास्तं स्वांशार्द्धभाजं कुर्युरित्यर्थः। अभ्रातृक-
विवाहितापुत्ररूपभ्रातृरहितः सर्वं पितृधनं गृह्णीयात्।

यदिपरिणीता दुहितरस्तत्पुत्रा वा न संति तत्सद्भावे त्वर्द्ध-
भागेव दासीपुत्रः। शूद्रेणेति विशेषोपादानात्। द्विजाति-
भ्यो दास्यामुत्पन्नस्य न केनापि प्रकारेणांशः अपितु ग्रा-
साच्छादनभागभवति स इति निर्णयः॥ अथ पितामह-
धनेपौत्रविभागः॥ तत्र याज्ञवल्क्यः॥ अनेकपितृ-
काणां तु पितृतो भागकल्पना॥ अनेकेभ्यो भ्रातृभ्यस्तद्भार्या-
सूत्पन्ना अनेकपितृकाः भ्रातृजा इत्यर्थः। तेषां स्वस्वपितृद्वारे-
ण पैतामहधनस्य भागकल्पना। अयमभिप्रायः। त्रयो भ्रात-
रस्तत्रैकस्यैकः पुत्रोऽपरस्य द्वावन्यस्य त्रयः पुत्रा एवं षट्। ए-
ते पैतामहधनं षड्धा विभज्य न गृह्णीयुः। अपितु पैतामहध-
नं भ्रातृणां त्रित्वात्त्रेधा विभज्य यस्यैकः पुत्रः स स्वपित्र्यंशं लभ-
ते यस्य द्वौ तावपि स्वपित्र्यंशमेव लभेते। एवमन्यत्रापीति पुत्रो-
त्पत्त्यनंतरं केषुचित् भ्रातृषु मृतेषु केषुचिद्ध्रियमाणेषु भ्रातृ-
णां भ्रातृपुत्राणामपि पूर्वोक्तरीत्यैव विभागः। भ्रातरः स्वांशं
भ्रातृपुत्राश्च स्वपित्र्यंशं लभंत इत्यर्थः। पितामहद्रव्ये पि-
त्रा सह विभागे विशेषमाह स एव। भूर्या पितामहोपात्ता निबं-
धो द्रव्यमेव वा। तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रःनचैव हि।
भूर्ब्रीहिक्षेत्रादिका निबध्यत इति निबंधः। एतस्यां पर्णवा-
टिकायामियंति पर्णानि भवंति एतस्यां क्रमुकवाटिकाया-
मियंति च क्रमुकफलानि भवंतीति तद्व्यापारकोविदैः संख्य-
यापर्णभरकादिकं निबध्यत इति निबंधः द्रव्यं प्रतिग्रह वि-

जयव्यापारकृष्यादिभिरुपार्जितं सुवर्णरजतादि एतादृशि समस्ते पैतामहधनेन पितुः पुत्रस्य स्वाम्यं सममेव। अतो जीवति पितरि पितुरिच्छयैव विभागः पितुश्च द्वावंशौ पितृतो भागकल्पने इत्यादि नियमा न संतीत्यर्थः। शूद्राद्दास्यामुत्पन्नस्य पौत्रस्याप्येवमेव स्वाम्यं परंतु विभागे विशेषः। स च विशेषोऽनंतरपुत्रविभागप्रकरणोक्तरीत्या वेदितव्यः। ननु अनेकपितृकाणां तु पितृतो भागकल्पने इत्यनेन पैतामहधनस्य पितृद्वारा भागकॢप्तिर्न स्वरूपत इत्युक्तं भूर्या पितामहोपात्ते इत्यनेन तु पित्रयोः पैतामहधने सममेव स्वाम्यमित्युच्यते। अतः पूर्वापरविरोध इति चेन्मैवं। अनेकपितृकाणामित्येतत्पितरि मृते पुत्राणां पैतामहधनविभागविषयं एतच्च पितृतो भागकल्पने इत्यनेन पदेन द्योत्यते। पितृद्वारेण पौत्राणामेवांशसंबंधोऽवगम्यते एतत्तु पितरि विद्यमाने न घटते तस्यापि जन्मनैव स्वत्वात्। पितरि मृते तु मरणादेव तस्य स्वत्वनिवृत्तेः पौत्राणामेवांशसंबंधो घटत इति पितृमरणानंतरं पौत्राणां पैतामहधनविभागप्रकारः अनेकपितृकाणामित्यनेन विपम्यते। भूर्या पितामहोपात्ते इत्येतत्तु पितापुत्रयोर्विद्यमानयोः पौत्रापेक्षया पैतामहधनविषयं एतच्च पितुःपुत्रस्य चैव हीत्यनेनांशेन द्योत्यतेऽन्यथा तस्य स्वाम्याभावादन्यतरमृतावपि तत्र स्यात्समदृष्टं स्वाम्यं पितुः पुत्रस्य चैव हीत्यनुपपन्नं स्यात्। यदा त्रयो भ्रातरस्तै-

कत्वेकत्रपुत्रसंततौ पुत्राः पौत्राश्च जीवंति पुत्रांतरसंततौ तु न
पुत्राः किंतु पौत्रा एव तत्राजीवंतः पिता पुत्रा भूर्यापिता पुत्रा
भूर्यापितामहोपात्तेत्यनेन न्यायेन पैतामहधनं लभंते।
यद्वर्गे पुत्रा मृताः पौत्रा एव वर्त्तंते तद्वर्गे पौत्रा एव स्वांशमात्
लभंते। अनेकपितृकाणां पितृतो भागकल्पने त्यनेन
न्यायेन न तु भूर्यापितामहोपात्तेत्यनेन न्यायेन तेषां प्रमी-
तपितृकत्वात्। अयं च विभागक्रमः। पितामहे मृत एव त-
स्मिन्विद्यमाने पितदिच्छया पुत्रेच्छया वा विभागो भवति न पौ-
त्रेच्छया पितरि विद्यमानेपि निच्छक्वचनपुत्रेच्छया वा विभा-
गः इति विभागकालकथनप्रस्तावेतिहितत्वात्॥ अथ
मातुरंशक्लृप्तिः॥ तत्र याज्ञवल्क्यः॥ यदि कुर्या-
त्समानंशान्पत्न्यः कार्याः समांशिकाः। न दत्तं स्त्रीधनं या-
सां भर्त्रा वा श्वशुरेण वा। समशब्दो न्यूनाधिकभावरहितां-
शपरः। अथवा समशब्दोत्र चतुस्त्रिद्व्येकभागाः स्युरित्यत्रो-
क्तांशपरः। शास्त्रोक्तसमत्वात्समव्यपदेशः। एवं स्थिते यदा
पिता स्वेच्छया पुत्रान्सर्वान्समांशभाजः करोति तदा पत्न्यै
पि समांशिकाः कार्याः। यदि ज्ञाज्ञरायाघुसन्नपुत्राणां सदृशा-
एवांशास्तदा तन्मातृणामपि सदृशा एव। यदा तु मूर्द्धसक्ता
दिपुत्राणां यथाक्रमेणात्रिद्व्येकांशास्तदा तन्मातृणामपि
स्वस्वपुत्रसमांशाः। एवं प्राप्तावपवादः। न दत्तमित्यादिस्त्री-
धनमलंकारादि। यदि स्त्रीधनं दत्तं तदा दत्ते त्वर्द्धं प्रकीर्त्ति-

मित्यधिवेदनप्रकरणोक्तप्रकारो विज्ञेयः। स च प्रकार इत्थं
अर्द्धशब्दोंऽशमात्रपरो न तु समविभक्तांशपरः। यावता धने-
न स्वपुत्रांशात् न्यूनं भवति स्त्रीधनं तावद्धनं दत्वा पत्न्यंशो-
ऽपि पुत्रांशसमः कर्त्तव्य इति नन्वेवं सति प्रकारांतरेण स्त्रीध-
नमपि विभाज्यमित्युक्तं स्यात्तथा च स्त्रीधनस्याविभाज्यत्व-
प्रतिपादकवचनविरोध इति चेत्॥ मैवं॥ यत्रापवादकं वच-
नमस्ति तत्रापवादकबलात्सामान्येन स्त्रीधनस्याविभाज्य-
त्वप्रतिपादकवचनानां बाधः। यत्रापवादो नास्ति न तत्र बाधः
अत्र च न दत्तं स्त्रीधनं यासामिति दत्तेत्वर्द्धं प्रकल्पयेदित्यन्व-
यो राथ्र्थिकैकवाक्यत्वेनापवादकत्वं। यदा तु पिता ज्येष्ठं वाश्रे-
ष्ठभागेनेत्याद्युक्तप्रकारेण विषमविभागं करोति तदा पत्नीनां
श्रेष्ठादिभागा न संति किंतु श्रेष्ठादिभागोद्धारे कृते यदवशि-
ष्टं समुदितद्रव्यं तस्मात्समानं शान्यत्योल्लभंते। तथा स्व-
कीयोद्धारं च॥ तथा चापस्तंबः॥ परीभांडं च गृहेऽलंकारो
भार्याया इति। गृहोपकरणं दृषदुपलमुशलशूर्पादि परी-
भांडमित्युच्यते। पितरि मृते पुत्रैः क्रियमाणे विभागेपि मा-
तुः समांश एव। तथा च योगीश्वरः पितुरूर्द्ध्वं विभजतां।
माताप्यंशं समं हरेत्। पितुरूर्द्ध्वं पितृमरणानंतरं। अत्रापि
न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वेति तथा दत्तेत्वर्द्धं प्र-
कल्पयेदित्येतद्वाक्यद्वयं योज्यं समानन्यायत्वात्प्रतिषे-
धाभावाच्च। एवमेव विज्ञानेश्वरधारेश्वरादीनामपि मतं॥

अथवा दत्तेत्वर्द्धं प्रकल्पयेदित्यत्रार्द्धशब्दः समविभागपरः
अतश्च स्त्रीधने विद्यमाने पुत्रांशस्यार्द्धं दशनिष्करूप पुत्रां-
शस्यार्द्धं पंचनिष्कात्मकं दद्यादित्युक्तं भवति भ्रातृभार्या-
णां योऽलंकारः सो विभाज्य एव। तथा स्त्रिय एव यदा विभा-
गाधिकारिण्यस्तदापि यस्यैव हि भूषणं पूर्वं दत्तं तदप्य-
विभाज्यमेव। एतच्च विभाज्यप्रकरणे व्यक्तं भविष्यति।
यदा तु पितामहोपार्जितं धनं पितापुत्रौ विभज्य गृह्णीतः॥
तदा पितामहपत्नी सपुत्रा पूर्वोक्तरीत्या समांशं लभते माता-
प्यंशं समं हरेदित्युक्तत्वात्पितामहोपार्जितद्रव्यत्वाच्च। य-
दि पितामहपत्न्यपुत्रा तर्हि स्वालंकारं प्रीतिदत्तं लभते नां-
शं। तथा पितामहधनविभागे मातांशं न लभते किंतु स्वाभ-
रणादिकमेव। यदि कुर्यात्समानंशान्पत्न्यः कार्याः समां-
शिकाः। तथा। पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेदि-
त्यनयोः केवलपितृप्रधानकस्वाम्योपेतत्वं चैवं ज्ञेयं।
यद्धनं पित्रा विभागलब्धं प्रतिग्रहादिभिर्वा तस्य तादृक्त्व-
मिति। पितृधनं पुत्रगामीत्युक्तं मातृधनं को वाधिक्रियत-
इत्याकांक्षायामाह याज्ञवल्क्यः मातुर्दुहितरः शेष-
मृणात्ताभ्य ऋतेऽन्वयः। मातृकृतर्णापाकरणानं-
तरं यदवशिष्टं मातृधनं तद्दुहितरो विभज्य गृह्णीयुः॥
तत्रायं विशेषो विवाहिताविवाहितदुहितृसद्भावे त्व-
विवाहिता एव गृह्णीयुः। अविवाहितानामभावे विवा-

हितदुहितृमध्ये या दरिद्राः दुहितरस्ता एव गृह्णीयुरिति।
तथा च गौतमः॥ स्त्रीधनं दुहितॄणामप्रत्तानामप्र-
तिष्ठितानां चेति। अप्रत्ता अविवाहिताः। अप्रतिष्ठिता द-
रिद्राः। ताभ्यऋते दुहितृभ्यो विना पुत्त्राभावे दुहितृसं-
तत्यभावे चान्वयः। पुत्रादिर्गृह्णीयात् दुहित्रभावे तत्संत-
तिरित्ययमर्थः उत्तरत्र वक्ष्यते॥ अथानपत्यस्त्रीध-
नग्रहणाधिकारिणः॥ तत्र याज्ञवल्क्यः॥
अतीतायामप्रजसि बांधवास्तदवाप्नुयुः। अप्रजस्त्रीधनं।
भर्त्तुर्ब्राह्मादिषु चतुर्ष्वपि। दुहितॄणां प्रसूता चेच्छेषेषु पितृ-
गामि तत्। स्त्रीधनमप्रजस्यापत्यरहितायां दुहितृदौहित्री
दौहित्रपुत्रपौत्ररूपापत्यरहितायां। स्त्रियां मृतायां बांध-
वा भ्रात्रादयस्तदाप्नुयुः। ब्राह्मदैवार्षप्राजापत्यविवाहसं-
स्कृतायां भार्यायां मृतायां तद्धनं भर्त्ता गृह्णातितदभावे ये
भर्तृकुले प्रत्यासन्नास्ते गृह्णीयुस्तदभावे पितृकुले ये
प्रत्यासन्नास्त इति विवेकः। शेषेषु आसुरगांधर्वराक्ष-
सपैशाचेषु विवाहेषु भार्यात्वं प्राप्तायां मृतायां धनं पि-
तरौ मातापितरौ गृह्णीतः। प्रथमं माता तदभावे पिता।
तदभावे पितृकुलप्रत्यासन्ना बांधवास्तदभावे भर्तृकु-
ले ये प्रत्यासन्नास्ते गृह्णीयुः। सर्वेष्वपि विवाहेषु यदि
सा प्रसूता तदा दुहितॄणां दौहित्रीणां। अत्र दुहितृश-
ब्देन साक्षाद्दुहित्रभिधाने मातुर्दुहितरः शेषमित्यनेन

पौनरुक्त्यं स्यात्। दौहित्रीष्वप्यूढानूढासमवाये मातृद्वारा वि-
भागः॥ यदाह गौतमः॥ प्रतिमातृवा स्ववर्गे भागविशे-
ष इति। दुहितॄणां दौहित्रीणां च विद्यमानत्वे दौहित्रीणां प्री-
त्या किमपि दातव्यं नांशदानं॥ तथाच मनुः॥ यास्तासां
स्युर्दुहितरस्तासामपि यथार्हतः। मातामह्या धनात्किंचि-
त्प्रदेयं प्रीतिपूर्वकं। तासां दुहितॄणां दुहितरः दौहित्राणाम-
भावे दौहित्राः॥ यदाह नारदः॥ मातुर्दुहितरोऽभावे दु-
हितॄणां तदन्वये। मातुर्धनं दुहितरः प्राप्नुयुः। तदभावे तु दुहि-
तॄणां दौहित्रीणां तदभावे तदन्वये ये जाता दौहित्रास्ते यामित्य-
र्थः। तदन्वय इति प्रथमाविभक्त्यंतोपि पाठः। तथापि दौहित्रा
एव गृह्यंते न दौहित्री संततिः। तस्या दौहित्रापेक्षयापि प्रकृ-
ष्टत्वात् दौहित्राणामप्यभावे मातुर्दुहितरः शेषमृणांताभ्य ऋ-
तेऽन्वय इत्यन्वयशब्दोपात्ताः पुत्रपौत्रादयः क्रमेण धनभाजः
अनेनैवाभिप्रायेण मनुः। जनन्यां संस्थितायां तु समं सर्वे
सहोदराः। भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः। सना-
भयो भगिन्यः। साक्षात्स्वमातृदुहितरः। तदभावे तद्दौहित्र-
पर्यंतास्तदभावे समृतायाः साक्षात्पुत्रा न सपत्नीपुत्रास्तद-
भावे पौत्रा इत्यस्य वचनस्य तात्पर्यार्थः। समं सर्वे सहोदरा-
इत्यत्र सहोदरग्रहणं भिन्नोदरनिवृत्त्यर्थं स्वपुत्राभावे स-
होदराः। मृतायाः साक्षात्पुत्रा न सपत्नीपुत्रास्तदभावे पौ-
त्रा इत्यस्य वचनस्य तात्पर्यार्थः समं सर्वे सहोदरा इत्यत्र स-

होदरग्रहणं भिन्नोदरनिवृत्त्यर्थं स्वपुत्राभावे सपत्नीपु-
त्रादयः। यदा सपत्नदुहिता उत्तमजातीया सापत्नपुत्रश्च
हीनजातीयस्तदोत्तमजातीयादुहितैव गृह्णातीति। तदभावे-
तादृग्विधदौहित्रो वा॥ तथाच मनुः॥ स्त्रियास्तु यद्भवे-
द्वित्तं पित्रा दत्तं कथंचन। ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य
वा भवेत्। स्त्रीधनं ब्राह्मणी क्षत्रियवैश्यकन्यका च गृह्णा-
ति। एवं वैश्या स्त्रीधनं ब्राह्मणी क्षत्रिया च। क्षत्रियास्त्रीध-
नं ब्राह्मणीति। अत्रोत्तमजातीयाया एव सापत्न्यकन्यका-
या धनग्रहणाभिधानाद्धीनजातीयपत्नीदुहितॄणामुत्त-
मजातीयसपत्नीपुत्रसद्भावे धनग्रहणं नास्तीति गम्यते।
पुत्रपौत्राभावे भ्राता तद्भावे तत्सुता इत्येवं क्रमेण भ्रात्राद-
यो धनभाजः। एतच्च स्त्रीधनं शुल्कव्यतिरिक्तमेव विभा-
ज्यं। शुल्कं तु सोदरा एव गृह्णीयुः॥ तथाच गौतमः।
भगिनीशुल्कं सोदर्याणामूर्ध्वं मातुरिति। दुहित्रादिषु पौ-
त्रपर्यंतेषु विद्यमानेष्वपि स्वभगिनीशुल्कं सहोदरा एव ह-
रेयुरित्यर्थः॥ स्त्रीधनप्रसंगाद्वाग्दत्ताविषयं किं-
चिदुच्यते॥ याज्ञवल्क्यः॥ दत्वा कन्यां हरन्दंड्यो
व्ययं दद्याच्च सोदयं। मृतायां दत्तमादद्यात्परिशोध्योभ-
यव्ययं। वाचा कन्यां दत्वा तस्मिन्दोषाभावेपि पिता यद्यहर-
न् जातिद्रव्यगुणाद्युत्कर्षेण दंडनीयो राजा। वाग्दान-
निमित्तं यद्धरेण तत्पित्रादिना वा व्ययीकृतं तत्सकलमपि स-

वृद्धिकं च राय देयं। वाग्दत्ता विवाहात्पूर्वं यदि मृता तदा
यत्पूर्वं दत्तमंगुलीयशुल्कं वा तद्वरस्त्वाददीत। किं कृत्वा उ-
भयव्ययं परिशोध्य उभयोरात्मनः कन्याप्रदातुश्च व्ययं
परिशोध्य वाग्दानादिनिमित्तं वर्गाहूय व्ययीकृतं धनं त-
स्मादंगुलीयकादिरूपात्कन्याधनाद्गृहीत्वावशिष्टं वर-
स्त्वाददीत। यत्तु कन्यायै वाग्दानसमयात्पूर्वं प्रीत्या मा-
तामहपित्रादिभिस्तस्या रावस्त्वलं कृत्वा समर्पितं शिरोभू-
षणादि तद्ग्रहणे विशेषमाह बौधायनः रिक्थं मृतायाः
कन्याया गृह्णीयुः सोदरास्तदभावे मातुस्तदभावे पितुरि-
ति। प्रसक्तानुप्रसक्ता स्त्रियां जीवंत्यामपि किंचिदुच्यते॥
योगीश्वरः। दुर्भिक्षे धर्मकार्ये च व्याधौ संप्रतिरोधके। गृही-
तं स्त्रीधनं भर्त्ता न स्त्रियै दातुमर्हति। धर्मकार्ये आवश्यककः-
र्त्तव्ये। संप्रतिरोधके वंदीग्रहणे निग्रहासावेषु द्रव्यांतराभा-
वे भर्त्ता स्त्रीधनं गृहीत्वा पुनस्तस्यै तद्धनं न दातुमर्हति।
अवश्यं दातव्यमिति नियमो नास्तीत्यर्थः। प्रकारांतरेण
ग्रहणे दातव्यमेव भर्त्तुरेवोक्तस्य लेख्यनुज्ञानान्येषां।
जीवंतीनां तु तासां ये तद्धरेयुः स्वबांधवाः। तान् शिष्यान्
चौरदंडेन धार्मिकः पृथिवीपतिरिति दंडविधानात्। स्त्री-
धनस्वरूपमप्याह याज्ञवल्क्यः। पितृपतिभ्रातृदत्त-
मध्यग्न्युपागतं। आधिवेदनिकाद्यं च स्त्रीधनं परिकी-
र्त्तितं। बंधुदत्तं तथा शुल्कमन्वाधेयकमेव च। अध्यग्न्यु-

पागतं विवाहकालेऽग्निसमीपे मातुलादिभिर्दत्तं। आधिवेद
निकं अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समं। न दत्तं स्त्रीधनं
यस्यै दत्ते त्वर्द्धं प्रकल्पयेदित्युक्तं। यस्या उपरि विवाहः क्रि
यते साऽधिविन्ना सा चासौ स्त्री च अधिविन्नस्त्री तस्यै अधिवे
दननिमित्तं धनमाधिवेदनिकं तत्समं दद्यात्। यावदधिवेद
नायालंकरणादिना वत्पूर्वस्त्रियै दद्यादित्यर्थः। अत्र विशेष-
माह न दत्तं स्त्रीधनमित्युत्तरार्द्धेन। अस्य चार्थो विस्तरतो मातुरं-
शकथनप्रस्तावे। आधिवेदनिकाद्यं च आद्यशब्देन कर्त्तन-
क्रयविभागपरिग्रहनिध्यधिगमनादिप्राप्तमुच्यते॥ कात्या-
यनः॥ विवाहकाले यत्स्त्रीभ्यो दीयते ह्यग्निसंनिधौ। तदध्य
ग्निकृतं सद्भिः स्त्रीधनं परिकीर्तितं। यत्पुनर्लभते नारी यजमाना
पितुर्गृहात्। आधिवेदनिकाद्यं च स्त्रीधनं तदुदाहृतं। प्रीत्या
दत्तं तु यत्किंचित् श्वश्र्वा वा श्वशुरेण वा। पादवंदनिकं चैव
प्रीतिदत्तं तदुच्यते। ऊढया कन्यया वापि पत्युः पितृगृहे पि-
वा। भ्रातुः सकाशात्पित्रोर्वा लब्धं सौदायिकं स्मृतं। विवाहात्स
रतो यत्र लब्धं भर्तृकुलात्स्त्रिया। अन्वाधेयं तु तद्द्रव्यं लब्धं पि
तृकुलात्तथेति॥ अथ विभक्तस्य स्वर्यातस्य पुत्रपौत्र-
रहितस्य दायग्रहणाधिकारिक्रमः॥ तत्र याज्ञ-
वल्क्यः॥ पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा। तत्सुता
गोत्रजा बंधाः शिष्याः सब्रह्मचारिणः। एषामभावे पूर्वस्य धन-
भाग् उत्तरोत्तरः। स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः। पत्नी

विवाहसंस्कृता। एकवचनं तु जात्यपेक्षया अतश्च यदा द्वेब-
ह्व्यः सवर्णा असवर्णा वा ताः सर्वाश्च तु स्त्रियो ह्येकभागाः स्युरि-
त्यनेन क्रमेण विभज्य धनं गृह्णंति। पत्न्यभावे दुहितरः।
तथा च कात्यायनः॥ पत्नी भर्तुर्धनहरी या स्यादव्यभि-
चारिणी। तदभावे तु दुहिता यद्यनूढा भवेत्तदा। यद्यनूढा-
भावे इति विशेषोपादानादूढानां समवाये अनूढैव गृह्णा-
ति। ऊढा स्वपितृरिक्थं गृह्णाति तदभावे संपन्ना स्त्रीधनं तु दु-
हितॄणामप्रत्तानामप्रतिष्ठितानां चेति गौतमवचनन्याय-
स्य पितृधनेऽपि समानत्वाद्दुहित्रभावे दौहित्रो धनभाक्॥
यदाह विष्णुः॥ अपुत्रपौत्रसंताने दौहित्रा धनमाप्नुयुः
पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रका मताः। अयमर्थो याज्ञ-
वल्क्येनापि दुहितरश्चेत्यत्र चकारेण सूचितः। दौहित्र-
स्याप्यभावे पितरौ धनभाजौ। माता च पिता च पितरौ अत्रैक-
शेषे क्रमाप्रतीतावपि विग्रहवाक्ये क्रमप्रतीतेर्विग्रहवाक्यक्र-
मोऽनुसर्तव्यो दायग्रहणेऽपि। ततश्च प्रथमं माता गृह्णाति तद-
भावे पिता। एतच्च तथा पत्नी दुहितर इत्येतस्मिन्समस्ते वा-
क्यसंदर्भे च योऽयं क्रमो धनभागुत्तरोत्तर इति वाक्यशेषेऽभि-
हितः तत्सकलमपि तथैवेत्यस्माभिरुपपादितं मिताक्षरा-
टीकायां सुबोधिन्यां व्यवहाराध्याये। विस्तरभयान्नेह-
लिखितं। पित्रभावे भ्रातरः। तत्रापि प्रथमं सहोदराः सहोद-
राणामेकमातृत्वेन संनिकर्षात्। सहोदराणामभावे भि-

न्नोदकाः। संनिकर्षविशेषादेव धनग्रहणं स्मर्यते। अनंत-
रः सपिंडाद्यस्तस्य तस्य धनं भवेदिति सपिंडाद्योऽनंतरः।
संनिहितः प्रत्यासन्नः शारीरसंबंधेन तस्य प्रत्यासन्नस्य ध-
नं सपिंडस्य धनं भवेदित्यर्थः। उभयविधभ्रात्रभावे तत्सु-
ताः। भ्रातृपुत्राः। तथापि प्रथमं सोदरभ्रातृपुत्रास्तदभावे भि-
न्नोदरभ्रातृपुत्राः। यदा त्वेकस्मिन्भ्रातरि मृते तद्धनं पत्नी
दुहितर इत्यनेन न्यायेन भ्रातृसंबंधित्वेन प्राप्ते प्राप्ते च तद्ध-
न विभागात्पूर्वमेवैको भ्राता मृतस्तत्पुत्राः संति तदा तत्पुत्रा-
णां पितृतो भागकल्पनेत्यनेन न्यायेन पितृभागोऽस्त्येव स्व-
पितुर्ग्रहणाधिकारानंतरं मृतत्वात्। भ्रातृपुत्राभावे गोत्र-
जा धनभाजः गोत्रजा इत्यनेन पितामही पितामहः पिताम-
हपुत्रास्तत्पुत्राश्च तदभावे प्रपितामहादयस्तेषामप्यभा-
वे समानोदकाश्च गृह्यंते। तत्रायं क्रमः। भ्रातृपुत्राभावे पित-
मही तस्या अभावे पितामहः। यथा मात्रानंतरमेव पितुरधि-
कारस्तथा पितामह्यनंतरं पितामहस्याभावे पितृव्याः तत्रा-
पि सोदरभिन्नोदरव्यवस्था पूर्ववदेव। साक्षात्पितामही-
पुत्राः प्रथमं धनभाजस्तदभावे सापत्न्यपितामहीपुत्रास्ते-
षामप्यभावे भ्रातृपुत्रन्यायेन पितृव्यपुत्रास्तेषामभावे प्र-
पितामही तस्याप्यभावे प्रपितामहस्तदभावे प्रपितामहपु-
त्रो भ्रातृन्यायेनैव। तदभावे तत्पुत्रा इत्येवं सप्तमपुरुषपर्यंतं
वेदितव्यम् एवं समस्तपुरुषावधिकसपिंडाभावे समानोदकाः।

तत्रापि पूर्वोक्तरीत्या प्रत्यासत्तिविशेषो द्रष्टव्यः। गोत्रजानाम-
भावे बंधवो ग्रहणाधिकारिणः। त्रिविधा हि बंधवः। आत्मबंध-
वः पितृबंधवो मातृबंधवश्चेति। यथोक्तं वृद्धशातातपेन
आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः। आत्ममातु-
लपुत्राश्च विज्ञेया आत्मबांधवाः। पितुः पितृष्वसुः पुत्राः पि-
तुर्मातृष्वसुः सुताः। पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबांध-
वाः। मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः। मातुर्मा-
तुलपुत्राश्च विज्ञेया मातृबांधवा इति। तत्रापि प्रथममंतरंग-
त्वात्पाठक्रमेणात्मबंधवो धनभाजस्तदभावे तथैव पितृ-
बंधवस्तदभावे तथैव मातृबंधव इति क्रमः। बंधूनामप्यभावे-
आचार्यस्तस्याप्यभावे शिष्यः॥ तथा चापस्तंबः॥ पुत्रा-
भावे यः प्रत्यासन्नः सपिंडस्तदभावे आचार्य आचार्या-
भावेंतेवासी शिष्याभावे सब्रह्मचारी सब्रह्मचारी एकार्योप-
नीतो ध्यापितो वा। सब्रह्मचारिणोप्यभावे श्रोत्रियाधनभा-
जः॥ यदाह गौतमः॥ श्रोत्रिया ब्राह्मणस्यानपत्यस्य
रिक्थं भजेरन्निति एकशाखाध्यायी श्रोत्रियः। तस्याप्यभा-
वे ब्राह्मणमात्रं समीपस्थितं गृह्णाति॥ तथा च मनुः।
सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः। त्रैविद्याः शु-
चयो दांतास्तथा धर्मो न हीयत इति। ब्राह्मणद्रव्यं कदा-
चिदपि राजा न गृह्णीयात्॥ यदाह नारदः॥ मनुः॥
आहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः॥ क्षत्रिया-

दिधनं सब्रह्मचारिपर्यंतानामभावेन ब्राह्मणो गृह्णीयात्‌।
पितुरजे व गृह्णीयात्‌॥ मनुः॥ इतरेषां तु वर्णानां सर्वाभा-
वे हरेन्नृप इति। एवं पुत्रादिक्रमेण दायग्रहणप्रकारे सर्वत्र
प्राप्ते क्वचिदपवादमाह याज्ञवल्क्यः॥ वानप्रस्थयति-
ब्रह्मचारिणामृक्थभागिनः। क्रमेणाचार्यसच्छिष्यधर्म-
भ्रात्रेकतीर्थिनः। ब्रह्मचारी नैष्ठिको नोपकुर्वाणः। सच्छि-
ष्यः। अध्यात्मशास्त्रश्रवणमननाद्युपेतः। धर्मभ्राता भ्रातृ-
त्वेनांगीकृताः। एकतीर्थ एकाश्रमी वानप्रस्थस्य स्वाश्रमनि-
कटवासी। धर्मभ्राता चासावेकतीर्थी च धर्मभ्रात्रेकतीर्थी।
अत्र क्रमशब्दः प्रतिलोमक्रमाभिप्रायः। वानप्रस्थस्य धनं।
अह्नो मासस्य षण्मासां वा तथा संवत्सरस्य वा। अर्थस्य निचयं
कुर्यात्कृतमाश्वयुजि त्यजेदित्यनेन प्रकारेणायदुपार्जितं
तदन्नादिरूपं वस्तु धर्मभ्रात्रेकतीर्थी गृह्णाति। यतेर्धनं
वस्त्रपुस्तकादि सच्छिष्यो गृह्णीयात्। नैष्ठिकब्रह्मचारि-
णो धनं वस्त्रादिकमाचार्यो गृह्णीयात्॥ अथ संसृष्टि-
विभागः॥ तत्र याज्ञवल्क्यः॥ संसृष्टिनस्तु संसृष्टी
सोदरस्य तु सोदरः। अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं
हरेत्। असंसृष्ट्यपि वादद्यात्संसृष्टी नान्यमातृजः। पूर्ववि-
भक्तं पुनरपि मिश्रीकृतं धनं संसृष्टं संसृष्टमस्यास्तीति संसृ-
ष्टी तस्य मृतस्य पुत्रपौत्ररहितस्य धनं पत्न्यां विद्यमानाया-
मपि अपरः संसृष्टी गृह्णीयात्। संसृष्टीत्येकवचनमवि-

पक्षितं। अतः संसृष्टिनौ संसृष्टिनो वा विभज्य गृह्णीयुः।
तत्पत्न्याश्च पोषणं कुर्युः। संसृष्टी च पितृभ्रातृपितृव्यैर-
न्यतमेनैव नान्येन॥ तदाह बृहस्पतिः॥ विभक्तो यः पु-
नः पित्रा भ्रात्रा चैकत्र संस्थितः। पितृव्येणाथ वा प्रीत्या स-
तु संसृष्ट उच्यते। यद्यविज्ञातगर्भायां मृतपत्न्यां सत्यां सं-
सृष्टिनस्तद्धनं विभज्य गृह्णन्ति। पश्चात्तस्या एव गर्भात्पुत्र उत्प-
द्यते तदा मृतसंसृष्टिधनं तत्पुत्रस्य दद्युः एवमुत्तरत्रापि वा-
क्ये पि विज्ञेयं। सोदरस्य तु सोदरः। संसृष्टिनो धनं संसृष्टिमात्रं न
गृह्णाति अपि तु सोदरस्यैकमातृजन्यस्य धनं सोदर एव गृह्णा-
ति न भिन्नोदरः। अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरेत्।
असंसृष्ट्यपि वादद्यात्संसृष्टो नान्यमातृजः। अन्योदर्यः सा-
पत्नभ्राता यदि संसृष्टी तदा धनं गृह्णाति। नान्योदर्यो धनं हरेत्
असंसृष्टा अन्योदर्यः सापत्नभ्राता यद्यसंसृष्टी तदा धनं न हरेत्
न गृह्णीयात्। अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरेत्। अ-
संसृष्ट्यपीत्यनेन वाक्येनेमदुक्तं भवति सापत्नभ्रातुः संसृष्टि-
त्वमेव धनग्रहणे हेतुरिति। असंसृष्ट्यपीत्येतत्पदं काकाक्ष-
वदुभयत्रान्वेति। अन्यस्य चासंसृष्ट्यपि वादद्यात्संसृष्टो न्यतरे-
के वाक्यान्तरं। अत्रैतदुक्तं पितृविभक्तधनस्य पुनर्मिश्रीकरणर-
हितोपि संसृष्टत्वेऽसंसृष्टः सोदरः संसृष्टिनो मृतस्य धन-
मादद्यात्। अनेन चासंसृष्टस्यापि सोदरस्य धनग्रहणे सोदर-
त्वं हेतुरित्युक्तं भवति। अतश्च संसृष्टपदं पूर्ववदुत्तरेणापि

संबध्यते। ततश्च संसृष्टो नान्यमातृज इत्येतद् परं वाक्यं।
अस्मिन् वाक्ये संसृष्टपदेन संसृष्ट्यभिधीयते। न सोदरः।
संसृष्टसंसृष्ट्यपि अन्यमातृजो भिन्नोदर एव धनं गृह्णीया-
त्। अत्रैवकारो मनुवचनानुसारेणाध्याहृतः। एतदुक्तं भवति
यथा संसृष्टेष्वेकोदरः संसृष्टी च भिन्नोदरः तत्र सोदरत्वहेतो-
र्विद्यमानत्वात्सोदरोप्यंशं लभते। संसृष्टित्वहेतोर्विद्यमान-
त्वाद्भिन्नोदरोपि लभत इति। मनुरपि। विभक्ताः सह जीवंतो विभ-
जेरन्पुनर्यदि। समस्तत्र विभागः स्यात् ज्येष्ठ्यं तत्र न विद्यते।
संसृष्टिभ्रातॄणां मध्ये अन्यतरो ज्येष्ठः कनिष्ठो मध्यमो वांश-
प्रदानतोंशप्रदाने। ज्येष्ठस्य विंशउद्धारः सर्वद्रव्याच्च यद्वरमि-
त्यादिनोक्तं विषमविभागात्मकं कर्म नास्तीत्यर्थः। तथा। येषां
ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः। म्रियेतान्यतरो वापि
तस्य भागो न लुप्यते। येषां संसृष्टिभ्रातॄणां मध्ये अन्यतरो
ज्येष्ठः कनिष्ठो मध्यमो वांशप्रदानतोंशप्रदाने विभागस-
मये हीयेत स्वकीयांशात् च्युतो भवेत्। आश्रमांतरस्वीकारे-
ण पातित्यादिना वा। उत म्रियेत तस्य भागो न लुप्यते। अ-
म एव तद्भागं पृथगुद्धृत्य स्थापयेत् विभज्य गृह्णीयुरित्य-
र्थः। उद्धृतस्य विनियोगप्रकारमाह। सौदर्या विभजेयुस्तं
समेत्य रहितास्समं भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः
वाक्यद्वयेन सोदर्या भ्रातर इति च पदद्वयोपादानात्सोदर्य-
ग्रहणेनैकोदराः। भ्रातृग्रहणेन च भिन्नोदरा अभिधीयंते।

अन्यथा वैयर्थ्यापत्तेः। भ्रातरो येच संसृष्टा इत्यत्र संसृष्टपदो-
पादानात्तत्प्रतियोगिभूतसोदर्या विभजेयुरित्यत्रच संसृष्टपदा-
नुपादानात्सोदर्या असंसृष्टा इतिगम्यते। अतोस्यश्लोक-
स्यायमर्थः। नमुक्तमंशं सोदर्याः सहोदराः संसृष्टा अपि
समेत्यदेशांतरगता अप्यागत्य महिताः संभूय समं न्यूना-
धिकभावरहितं यथा भवति तथा विभजेयुः। तथा भ्रातरो
भिन्नोदराश्च समानजातीया ये संसृष्टास्तेच तथा सनाभ-
यः सहोदर्यो भगिन्यश्च। एतेसोदर्यप्रभृतयो भगिन्यंताः स-
र्वे समं विभज्य गृह्णीयुरित्यर्थः। असमानजातीयानां भिन्नो-
दरसंसृष्टिभ्रातृणां तु चतुस्त्रिद्व्येकभागाः स्युरित्यनेन वक्ष्यमा-
णो विभागः। समशब्दस्य भिन्नजातीयभ्रातृव्यतिरिक्तसमा-
नजातीयभिन्नोदरभ्रातृविषयत्वेनापि चरितार्थत्वेन चतुस्त्रि-
द्व्येकभागाः स्युरित्यस्य बाधकाभावात्॥ प्रांरवः॥ भ्रातृ-
णामप्रजाः प्रेयात्कश्चिच्चेत्प्रव्रजेत वा। विभजेरन्धनं तस्य-
शेषास्तु स्त्रीधनं विना। भरणं चास्य कुर्वीरन् स्त्रीणामाजीव-
नक्षयात्। रक्षंति शय्यां भर्तुश्चेदाच्छिद्युरितरासु च। इतरासु
शय्यामरक्षंतीषु॥ बृहस्पतिः॥ संसृष्टानां तु यः कश्चिद्वि-
द्याशौर्यादिनाधिकं। प्राप्नोति तस्य दातव्यो ह्यंशः शेषाः स-
मांशिनः। द्व्यंशदानं तादृगादिकधनप्राप्तौ वेदितव्यं। अत्र
चायं निष्कृष्टार्थः। भिन्नोदरसंसृष्टिभ्रातृभावे सोदराणां
मध्ये यः संसृष्टी सोदरः स एव सोदरस्य संसृष्टिनो धनस्य-

मृतस्य धनं गृह्णाति। असंसृष्टसोदरभ्रात्रभावे भिन्नोदराणां मध्ये यः संसृष्टः स एव तद्धनं गृह्णाति। अथापि समानजातीया समानजातीयभिन्नोदरस्थाने तु चतुस्त्रिद्व्येकभागा तुल्यत्वं संधेयं। यदा सोदरा असोदराश्च संसृष्टिनस्तदा ते सर्वे गृह्णीयुः। पूर्वोक्तरीत्या यत्र संसृष्टाः सोदराः संसृष्टाश्च भिन्नोदराः तत्रापि सोदरा असोदरा गृह्णीयुः। यत्र संसृष्टा भिन्नोदराः संसृष्टा असोदरास्तदा सोदरा एव। सोदराणां मध्ये केचन संसृष्टाः केचन तदा संसृष्टत्वसोदरत्वरूपहेतुद्वयबलात्संसृष्टिन एव गृह्णीयुरिति। सर्वत्र स्त्री त्वाभरणं भरणं च लभते। एकमातृकत्वभिन्नमातृजत्वरूपविशेषेण भ्रातृष्वियं व्यवस्था दर्शितास्ता साक्षात्पितृव्यमातुलपितृव्येष्वपि योज्या न्यायस्य समानत्वादिति केचन। तदनुपपन्नं। सोदरस्य तु सोदर इति विधायकं वाक्यं। तत्र सोदरस्य विवक्षाकारणं नास्तीति सोदरपदस्य पितृव्योपलक्षकत्वत्वाभावात्सोपेक्ष्यं तद्विरुद्धत्वाच्च वचनविरोधान्न्यायस्तत्र न प्रवर्तत इति सर्वमनवद्यं॥ अथांशानर्हाः॥ तत्र याज्ञवल्क्यः॥ क्लीबोऽथ पतितस्तज्जः पंगुरुन्मत्तको जडः। अंधोऽचिकित्स्यरोगाद्या भर्तव्याः स्युर्निरंशकाः। तज्जः पतितात्सकाशात्प्रायश्चित्तादुत्पन्नः। पंगुः पादविकलः उन्मत्तकः। वातपित्तश्लेष्मसन्निपातग्रहावेशोत्पन्नैरुन्मादैरुपहतिमाधेयतया विष्टः। जडो विकलचित्तः। अन्ध-

शब्देन पितृद्विष्ट्यादयो गृह्यंते। तथाच नारदः॥ पितृद्वि-
पतितः षंढो यश्च स्यादौपपातिकः। औरसा अपि नैतेंऽशं लभेर-
न् क्षेत्रजाः कुतः॥ वसिष्ठः॥ अनंशास्त्वाश्रमांतरगताः।
आश्रमांतरागिणो नैष्ठिकवानप्रस्थोत्तमाश्रमाः॥ मनुः॥
अनंशौ क्लीबपतितौ जात्यंधबधिरौ तथा। उन्मत्तजडमूका-
श्च ये च किंचिन्निरिंद्रियाः। व्याधत्वादिना निर्गतमिंद्रियं य-
स्मात्स निरिंद्रियः। एते अंशभाजो न भवंति भरणं तु कर्त्तव्यमे-
व॥ तथाच मनुः॥ सर्वेषामपि तु न्याय्यं दातुं शक्त्या म-
नीषिणा। ग्रासाच्छादनमत्यंतं पतितो ह्यददद्भवेत्। सर्वेषा-
मंशानर्हाणां। अत्यंतं यावज्जीवं। एतेषामनंशत्वं विभागा-
त्पूर्वमप्रत्याख्येयदोषप्राप्तौ सत्यां न तु विभक्तानां यदि विभाग-
काले दुष्टो विभागोत्तरकालमौषधादिना निर्दुष्टः प्रायश्चित्तेन
वा तदा विभक्तेषु सुतो जातः सवर्णाया विभागभागित्यनेन-
न्यायेनांशप्राप्तिरस्त्येव। पतितादिषु पुल्लिंगमविवक्षितमुद्दे-
श्यगतत्वात्। अतो मातृपत्नीदुहित्रादयोपि दुष्टा अनंशा एव।
क्लीबादयस्त्वेषामनंशानां तनयास्तु ताः। दोषरहिताः। तथाच याज्ञ-
वल्क्यः॥ औरसक्षेत्रजास्त्वेषां निर्दोषा भागहारिणः। सुता-
श्चैषां प्रभर्त्तव्या यावद्वै भर्तृसात्कृताः। अपुत्रा योषितश्चैषां भ-
र्त्तव्याः साधुवृत्तयः। निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथै-
व च। क्लीबस्य क्षेत्रज एव पुत्रः इतरेषामौरसक्षेत्रजौ। केवलौर-
सक्षेत्रजयोर्ग्रहणादितरपुत्राणामंशो नास्तीति गम्यते। औ-

रसममत्वात्सुत्विकापिप्राप्नोति। साप्यौरसपदेनैवोपात्तादुहितरस्तु भर्त्तव्या विवाहपर्यंतं। तथा विवाहोपि कर्त्तव्यः। प्रतिकूलास्तथैव च। निर्वास्याः परं प्रतिकूलानां योषरां कर्त्तव्यं व्यभिचारदोषाभावात्॥ अथाविभाज्यं याज्ञवल्क्यः॥ पितृद्रव्याविरोधेन यदन्यत्स्वयमर्जितं। मैत्रमौद्वाहिकं चैव दायादानां न तद्भवेत्। क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेत्तु यः। दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च। पितृद्रव्याविरोधेन पितृद्रव्याविनाशेन। एतच्च मैत्रादिषु सर्वत्रानुषज्यते। मैत्रं मित्रसकाशाल्लब्धं औद्वाहिकं विवाहप्राप्तं। पितृक्रमायातमन्यैरपहृतं पित्रादिना सामर्थ्याभावादनुद्धृतं यत्किंचिद्द्रव्यं पुत्रादीनां दायाहराणां मध्ये य इतरस्त्वमेव साधयेत्यनुज्ञातः सन्नुद्धरत्यपहर्तृभ्यः स दायादेभ्यस्तद्धनं न दद्यात्स्वयमेवोद्धर्ता गृह्णीयात्। अन्यायहृतोद्धृत क्षेत्रे तु विशेषमाह। शंखः। पूर्वनष्टां तु यो भूमिमेकश्चेदुद्धरेत्क्रमात्। यथाभागं लभंतेन्ये दत्वांशं तु तुरीयकं। चतुर्थं भागमुद्धर्त्रे दत्वा विशिष्टां भुवमुद्धर्तृसहिताः सर्वे विभज्य गृह्णीयुरित्यर्थः। अध्यापनवेदार्थव्याख्यानद्वारा छायनादि लब्धं विद्यालब्धं। पितृद्रव्याविनाशेन लब्धमैत्रादिधनस्याविभाज्यत्वकथनात्। पितृद्रव्यविनाशेन लब्धमैत्रादिधनस्य विभाज्यत्वमुक्तं भवति। अत्र वचनोपात्तमैत्रादिविद्यालब्धधनानामेव पितृद्रव्याविरोधेनेत्येतद्विशेषणं। अतः पितृद्रव्याविरोधेना-

पिप्रतिग्रहे लब्धं विभजनीयमेव। तथा च शिष्टाचारो दृश्यते॥ नारदः॥ कुटुंबं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः। भागं विद्याधनात्तस्मात्स लभेताश्रुतोपि सन्॥ कात्यायनः॥ परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या। तया लब्धं धनं यच्च विद्याप्राप्तं तदुच्यते॥ मनुः॥ अनुपघ्नन्पितृद्रव्यं श्रमेण यदुपार्जितं। दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव वा। श्रमेण सेवा युद्धादिना॥ तथा॥ वस्त्रं पत्रमलंकारं कृतान्नमुदकं स्त्रियः। योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते। वस्त्राणामविभाज्यत्वं धृतानामेव। पत्रं वाहनमश्वशिबिकादि। तदपि यद्यस्य नियमेनारोहणसाधनं तत्र विभाज्यं। अथवा पत्रशब्दोऽत्र लेख्यनिविष्टधनपरः॥ तथा च। बृहस्पतिः॥ ऋणमुद्धाह्य लिखितमिति। उद्धाह्य दत्वा अत्राविभाज्यमित्यनुवर्त्तते॥ कात्यायनः॥ धनं यत्र निविष्टमिति। अत्रायमभिप्रायः। यावत्पत्रनिविष्टं ऋणं नोद्ध्रियते। तावदविभाज्यमिति। अथवा बृहस्पत्युक्तप्रकारो विज्ञेयः। युक्त्या विभजनीयं। तदन्यथानर्थकं भवेत्। विक्रीय वस्त्राभरणमृणमुद्धाह्य लेखितं। कृतान्नं चाकृतान्नेन परिवर्त्य विभज्यत इति। अश्वादिबाहुल्ये तद्विक्रयोपजीविनां विभाज्यमेव। यदजाविकादिविषमत्वेनाविभाज्यं तत्तज्ज्येष्ठस्य॥ तथा च मनुः॥ अजाविकं सैकशफं न जातु विषमं भजेत्। अजाविकं सैकशफं ज्येष्ठस्यैव विधीयते।

अलंकारोपियो येन धृतः सो विभाज्यः॥ मनुः॥ पत्यौ जीव-
ति यः स्त्रीभिरलंकारो धृतो भवेत्। न तं भजेरन्दायादा भ-
जमानाः पतंति ते। अत्र धृतत्वं नाम प्रीतिदानादिना प्राति-
स्विकस्वत्वोपेतत्वं। कृतान्नं तंदुलमोदकादि। तद्यथासं-
भवं सर्वैर्मिलित्वा भोक्तव्यं। उदकं तदाधारः कूपादिः एत-
दपि विषममेव न विभाज्यं किंतु पर्यायेण भोक्तव्यं स्त्रियः
दास्यश्चावरुद्धाश्च तत्र विषमसंख्याकदास्यः पर्यायेण
कर्म कारयितव्याः। समसंख्याका विभाज्याः। अवरुद्धाः
समा अपि न विभाज्याः॥ यदाह गौतमः॥ स्त्रीषु च संयु-
क्तास्वविभाग इति। संयुक्तास्ववरुद्धासु। योगक्षेमं। अल-
ब्धलाभो योगः। अलब्धलाभहेतुभूतं श्रौतस्मार्त्ताग्नि-
साध्यमिष्टं कर्म योगशब्देन लक्ष्यते। लब्धपरिरक्ष-
णं क्षेमः। लब्धरक्षणकारणभूतबहिर्वेदिदानतडा-
गारामनिर्माणादिपूर्त्तं कर्म क्षेमशब्देन लक्ष्यते। एतदु-
भयं पैतृकमपि न विभाज्यं। पितृद्रव्याविरोधोपार्जितम-
पि न विभाज्यं। क्षेमं पूर्त्तं योगमिष्टमित्याहुस्तत्त्वदर्शिनः
अविभाज्ये च ते प्रोक्ते शयनासनमेव चेति लौगाक्षिस्म-
रणात्। योगक्षेमादिकारिणो मंत्रिपुरोहितादयो-
योगक्षेमशब्देनोच्यंत इत्यन्ये। शस्त्रचामरछत्रोपान-
त्प्रभृतय इत्यपरे। प्रचारो गृहारामादिप्रवेशनिर्गममा-
र्गः अस्मिन्प्रकरणे विषमत्वं नामांशदानापर्यायत्वं न

त्वेकत्र्यादिसंख्यादि। तद्यथा। चत्वारःपुत्रास्त्रयोध्रुवाः।
तथाच अंशश्चतुष्टया पर्याप्तत्वाद्वैषम्यं। यत्तु वचनांतरं
अविभाज्यं सगोत्राणामासहस्रकुलादपि। याज्यं क्षेत्रं
च पत्रं च कृतान्नमुदकं स्त्रियमिति तद्ब्राह्मणजातस्य क्षत्रि-
यादिपुत्रविषयं। न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै इ-
ति विशेषस्मरणात्। याज्यं। याजनलब्धं शौर्यादिप्राप्तमवि-
भाज्यमित्युक्तं तत्रापवादमाह व्यासः। साधारणं समाश्रि-
त्य यत्किंचिद्वाहनादिकं। शौर्यादिनाप्नोति धनं भ्रातरस्तत्र
भागिनः। साधारणं समुदितद्रव्यमाश्रित्य॥ याज्ञवल्क्यः
सामान्यार्थसमुत्थाने विभागोपि समः स्मृतः। समुदितार्थस्य
कृषिवाणिज्यादिना संवर्द्धने कृतेपि सर्वेषां सम एव विभागः
नार्जकस्य द्वौ भागा वित्यर्थः॥ अथ सर्वभागविशेषः।
तत्र याज्ञवल्क्यः॥ अन्योन्यापहृतं द्रव्यं विभक्ते यदिद-
श्यते। तत्पुनस्ते समैरंशैर्विभजेरन्निति स्थितिः। विभागा-
नंतरमन्योन्यापहृतं द्रव्यं ज्ञात्वा तत्समैरेवांशैर्विभजेरन्न
ज्येष्ठस्य विंशोद्धार इति विषमोद्धारक्रमेणेत्यर्थः॥ तथा
विभागनिह्नवे ज्ञातिबंधुसाक्ष्यभिलेखितैः। विभागभावना
ज्ञेया गृहक्षेत्रैश्च यौतकैः। विभागानंतरं कालांतरे विभा-
गो न जात इत्यपलापे कृते ज्ञातिभिः पितृबंधुभिर्मातुलादि-
भिरुक्तलक्षणैः साक्षिभिर्लिखितेन विभागपत्रेण च विभा-
गस्य भावना निर्णयो विज्ञेयः। तथा यौतकैः पृथक्कृतगृह-

क्षेत्रैश्च विज्ञेयः । पृथक्कृष्यादिप्रवर्त्तनेन पृथक्पंचमहाय-
ज्ञाद्यनुष्ठानेन च विज्ञेय इत्यर्थः ॥ नारदः ॥ विभागधर्मसं-
देहे दायादानां विनिर्णयः । ज्ञातिभिर्भागलेख्येन पृथक्का-
र्यप्रवर्त्तनात् । भ्रातॄणामविभक्तानामेको धर्मः प्रवर्त्तते । वि-
भागे सति धर्मोऽपि भवेत्तेषां पृथक् पृथक् । साक्षित्वं प्रातिभा-
व्यं च दानं ग्रहणमेव च । विभक्ता भ्रातरः कुर्युर्नाविभक्ताः क-
थंचन । तथा । यद्येकजाता बहवः पृथग्धर्माः पृथक्क्रियाः ।
पृथग्धर्मगुणोपेता न चेत्कार्येषु संगताः । स्वभागानपि दद्यु-
स्ते विक्रीणीयुरथापि वा । कुर्युर्यथेष्टं तत्सर्वमीशास्ते स्वधन-
स्य वै ॥ बृहस्पतिः ॥ विभक्ता ह्यविभक्ता वा दायादाः स्थावरे
समाः । एको ह्यनीशः सर्वत्र दानाधमनविक्रये । साधनमाधीकरणं ।
एतच्च व्यवहारसौकर्याभिप्रायेण न तु पृथक्स्वत्वाभावा-
भिप्रायेण । विधिभागे नैव पृथक् पृथक्स्वत्वात् ॥ इह मदन-
पारिजाते मदनक्षितिपालदानजलरूढे । स्तवकस्त्वष्टम
आसीदामोदकृष्टपंडितभ्रमरः । मतिर्येषां शास्त्रे प्रकृतिर-
मणीया व्यवहृतिः । पराश्रीलं म्लानं जगति कृजवल्लेक-
तिपथे । चिरं चित्ते तेषां मुकुरतलभूते स्फुरतिरित्यादिर्व्याख्यासार-
णाय प्रवरमुनिशिष्यस्य भणितिः ॥ इति पंडितपारिजा-
तकहारमल्लेत्यादिविरुदराजिविराजमानस्य
निबंधे मदनपारिजाताभिधेऽष्टमस्तवकः ॥

अभिहिता वर्णाश्रमधर्माः। अथेदानीं तदुक्तमजनितदुरितापूर्वापहरणहेतुभूतः प्रायश्चित्तापरपर्यायो नैमित्तिकधर्मोऽभिधीयते। तत्र तावत्प्ररोचनार्थं पापकर्मफलादीनि प्रदर्श्यन्ते॥ हारीतः॥ अभक्ष्यभक्षणमभोज्यभोजनमपेयपानमयाज्ययाजनमसत्प्रतिग्रहः परदाराभिगमनं परद्रव्याभिहरणं प्राणिहिंसा चेति शारीराणि पारुष्यमनृतविवादः श्रुतिविक्रयश्चेति वाचिकानि परोपतापनं पराभिद्रोहः क्रोधो लोभो मोहोऽहंकारश्चेति मानसानि। तदेतान्यष्टादशैतानि कर्म्मणि यस्मिन्यस्मिन्वयसि यः कर्माणि करोति शुभाशुभानि तस्मिंस्तस्मिन्वयसि शारीरं वाचिकं मानसं वाप्नोति। एवं चाह। यस्यां यस्यामवस्थायां यत्करोति शुभाशुभं। तस्यां तस्यामवस्थायां तत्तत्फलमवाप्नुयात्। शारीरेण तु शारीरं वाङ्मयेन तु वाङ्मयं। मानसं मनसा चैव स्वकर्मफलमश्नुते॥ मनुः॥ चातुर्वर्ण्यस्य कृत्स्नोयमुक्तो धर्मस्त्वयानघ। कर्मणां फलनिर्वृत्तिं शंस नस्तत्त्वतः परं। स तानुवाच धर्मात्मा महर्षीन्मानवो भृगुः। अस्य सर्वस्य शृणुत कर्मयोगस्य निर्णयं। शुभाशुभफलं कर्म मनोवाग्देहसंभवं। कर्मजा गतयो नृणामुत्तमाधममध्यमाः। तस्येह त्रिविधस्यापि त्र्यधिष्ठानस्य देहिनः। दशलक्षणयुक्तस्य मनो विद्यात्प्रवर्तकं। त्रिविधस्योत्तममध्यमाधमरूपगतिभेदेन भिन्नस्य वाङ्मनःकायलक्षणाधिष्ठानभेदेन त्र्यधि-

ज्ञानस्य। वक्ष्यमाणापरद्रव्याभिध्यानादिरूपदशलक्षणोपे-
तस्य सर्वविधस्य देहिनो मनः प्रवर्तकं विद्यात्। दशलक्षणा-
न्येवाह। परद्रव्येष्वभिध्यानं मनसानिष्टचिंतनं। वितथाभि-
निवेशश्च त्रिविधं कर्म मानसं। पारुष्यमनृतं चैव पैशुन्यं चापि
सर्वशः। असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधं। अदत्ता-
नामुपादानं हिंसा चैवविधानतः। परदारोपसेवा च कायिकं त्रि-
विधं स्मृतं। मानसं मनसैवायमुपभुंक्ते शुभाशुभं। वाचा वाचा-
कृतं कर्म कायेनैव च कायिकं। शरीरजैः कर्मदोषैर्याति स्थावर-
तां नरः। वाचिकैः पक्षिमृगतां मानसैरंत्यजातितां। तथा।
येन यांस्तु गुणेनैषां संसारान्प्रतिपद्यते। तान्समासेन वक्ष्या-
मि सर्वस्यास्य यथाक्रमं। देवत्वं सात्विका यांति मनुष्यत्वं च
राजसाः। तिर्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः। त्रिवि-
धा त्रिविधैषा तु विज्ञेया गौणिकी गतिः। अधमा मध्यमाग्र्या
च कर्मविद्याविशेषतः। स्थावराः कृमिकीटाश्च मत्स्याः स-
र्पाः सरीसृपाः। पशवश्च शृगालाश्च जघन्या तामसी गतिः।
हस्तिनश्च तुरंगाश्च शूद्रा म्लेच्छाश्च गर्हिताः। सिंहा व्याघ्रा
वराहाश्च मध्यमा तामसी गतिः। चारणाश्च सुपर्णाश्च पुरु-
षाश्चैव दांभिकाः। रक्षांसि च पिशाचाश्च तामसीषूत्तमा ग-
तिः। तथा भिल्ला नटाश्चैव पुरुषाश्च कुवृत्तयः। द्यूतपानप्र-
सक्ताश्च प्रथमा राजसी गतिः। राजानः क्षत्रियाश्चैव राज्ञां चैव
पुरोहिताः। वादयुद्धप्रधानाश्च मध्यमा राजसी गतिः।

गंधर्वा गुह्यकायक्षा विबुधानुचराश्च ये। तथैवाप्सरसः सर्वा राजसे षूत्तमा गतिः। तापसा यतयो विप्रा ये च वैमानिका गणाः। नक्षत्राणि च दैत्याश्च प्रथमा सात्विकी गतिः। यज्वान ऋषयो देवा वेदाः ज्योतींषि वत्सराः। पितरश्चैव साध्याश्च द्वितीया सात्विकी गतिः। वेदवत्सर शब्दाभ्यां तदभिमानिन्यो देवते लक्ष्येते। ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च। उत्तमां सात्विकीमेतां गतिमाहुर्मनीषिणः॥ महान्बुद्धिः॥ अव्यक्तं प्रकृतिः। एष सर्गः समुद्दिष्टस्त्रिप्रकारस्य कर्मणः। त्रिविधस्त्रिविधः कृत्स्नः संसारः सार्वभौतिकः। यादृशेन तु भावेन यद्यत्कर्म निषेवते। तादृशेन शरीरेण तत्तत्फलमुपाश्नुत इति॥ अथ नरकाः॥ शंखलिखितौ॥ अथ निरयाः कुंभीपाकरौरवमहारौरवकूटशाल्मलिशिलासंघातवज्रकंटकशयनान्यसिपत्रवनान्ययस्तुंडाः पक्षिणः पूयशोणितकर्दमाः केशकश्मलशैवालाः क्षारनद्योज्वलितांगारकुल्यास्तप्तकरंभवालुका निस्त्रिंशमुद्गरनिपाताः सूचिप्रतोदवेधाश्चल्योदकाः साग्निगर्भाः प्रदीपायः पिंडलोहकंटकशयनानि मकरपंजरासिकालसूत्राणि तीक्ष्णाग्राश्च शूलाः। श्यामशबलौ वज्रदंष्ट्रिणौ तमोदक वैतरणी सम्प्रपच्यंते पापकर्मिण इति॥ याज्ञवल्क्यः॥ प्रायश्चित्तमकुर्वाणाः पापेषु निरता जनाः। अपश्चात्तापिनः क-

ष्वन्नरकान्यांति दारुणान्। तामिस्रं लोहशंकुं च महा-
रौरवशाल्मली। रौरवं कुड्मलं पूतिमृत्तिकं काल-
सूत्रकं। संघातं लोहितोदं च सविषं संप्रतापनं। महा-
नरककाकोलं संजीवननदीपथम्। अवीचिमंधतामि-
स्रं कुंभीपाकं तथैव च। असिपत्रवनं घोरं तपनं चैक-
विंशतिं। महापातकजैर्घोरैरुपपातकजैस्तथा। अन्वि-
ता यांत्यचरितप्रायश्चित्ता नराधमाः॥ यमः॥ सुरापो
ब्रह्महा गोघ्नः सुवर्णस्तेयकृन्नरः। पतितैः संप्रयुक्तश्च
कृतघ्नो गुरुतल्पगाः। एते पतंति सर्वेषु नरकेष्वनुपूर्वशः
महापातकसंयुक्ता युगांतिसुं त्यधोमुखाः। रौरवं कूटसा-
क्षी च यश्च मिथ्याभिशंसति। कुलग्राहे पक्षवादी स चा-
प्यत्र पतेन्नरः। कुलविषयसंदेहे उभाभ्यां वादिभ्यां
कुलग्राहे कुलज्ञानेयः प्रमाणी कृतकुलज्ञोपि सन्यः
पक्षं वदति स पक्षवादीत्युच्यते। रौद्रे तु ब्रह्महा गोघ्नः
सुरापो गुरुतल्पगः। सुवर्णस्तेयकृद्यश्च गारदश्चाग्नि-
दायकः। क्षत्रियं यो नरो हन्यात शूकरीं व्रजते तु सः। राज-
पत्नीं राजपुत्रं हत्वा राजभटाकरान्। तालांके पच्यते।
सखो वैश्यं हंति च यो नरः। न्यासापहर्त्ता कुमति र्विषमो
यश्च वर्त्तिषु। तप्तकुंभे स्वसृगामी गोघ्नो राजभटाश्च
ये। उत्तमाधमधर्मयो र्विपरीतप्रवर्त्तनं वृत्तिवैषम्यं।
राजभटा राजबलात्परोपद्रवकारिणः। ते च तप्तकुंभे

पतंतीत्यर्थः। महाज्वाले दुहितरं स्नुषां गत्वाथ मातरं।
आजाविकः सौकरिकः स्तेनश्च क्रोधनो नरः। रंगोपजी-
वी पशुहा शाकुनी ग्रामयाजकः। अभक्ष्यभक्षो वांता-
शी विप्रो धर्मबहिष्कृतः। अगम्यागामी गरदो नरकं प्रा-
बलं व्रजेत्। कुतूहलादिना पक्षिपोषकः शाकुनी।
भोजनार्थं स्वकुलगोत्रवक्ता वांताशीति कथ्यते। वेद-
विक्रयिणो येच केशविक्रयिणो नराः। वेदानां दूषका येन्य-
समयानां च दूषकाः। समयानां शास्त्राविरुद्धानां। दूषका
धर्मशास्त्राणां हेतुवादकुतूहलाः। एते विहंगमे घोरे प-
च्यंते पापकारिणः। सर्वविक्रयकर्तारो हेतुवादकुतूह-
लाः। एते विहंगमे घोरे पच्यंते भेदकारकाः। निर्मर्या-
दाः क्रोधना ये च कदर्यैश्वर्यसंयुताः। कोटरे ते निपा-
त्यंते बंधुभक्षाश्च वाणिजाः। दानोपभोगशून्यधनवत्त्वं
कदर्यैश्वर्यत्वं। बंधुपीडाकरा बंधुभक्षाः। वाणिजा नि-
षिद्धवाणिज्यकर्मकराः। विमुखे पतिते चौरे मर्यादां यस्तु लंघ-
ति। विमुखश्चाचारशून्यो युद्धादिषु पराङ्मुखो वा। पतितो-
पि वृद्ध एव। विमुखादिविषये मर्यादां यो लंघयतीत्यर्थः।
शाखामृगश्रोगोश्रोवा कृमिभक्षं व्रजंति ते। एकाकी मिष्टभक्ष्या-
ति वंचयित्वा सुहृत्सुतान्। दारान् भक्षयति यः स्वैव तथा
संबंधिबांधवान्। उत्सन्नपितृदेवेभ्यः पशुघाती वयोदृ-
ष्या। लालाभक्षे नरके घोरे दुर्गंधे पात्यते नरः। मांसकर्त्ता कु-

स्तात्लक्ष्म स्वर्णकारः चिकित्सकः। पतंतिनरके घोरेकूट-
कर्त्ताविषाशने। मानकर्त्रादीनां सर्वेषां कूटकर्त्तेति विशे-
षणं। देवब्राह्मणविद्वेष्टा गुरुं यश्चावमन्यते। अवाक्शि-
रः प्रपद्यंते रत्नं दूषयते च यः। मांसमद्यं सुरां लाक्षां गंधा-
न्लवणं घृतं पयः। विक्रीणाति य एतानि स तु पूयवहं व्र-
जेत्। आगारारामदाही वदुष्टः पापकृद्देवचापतंतिरु-
धिरार्द्रे तु छतघ्नाकांभिकानराः। शूद्रहत्यां तु यः कुर्यान्न-
वायो गुरुदूषकः। सीधुकृन्मधुकृद्दंडी कर्मकारो निराकृतिः
दंडी निषिद्धदंडग्राही। कर्मकारः कर्मकराधिष्ठाता। निरा-
कृतिरस्वाध्यायः। अतितीक्ष्णश्चंडहृत्तिरूपघातपरः श-
ठः। श्येनाजीवी कालहकः पुत्रोपाध्याय एव च। पुत्र उपा-
ध्यायो यस्य स तादृशः। द्यूतसंव्यवहारी च प्राणिहिंसार-
तास्तथे। वैतरण्यां निपात्यंते ये च वा वंधघातकाः। इत्येव-
मादीन्यन्यान्यपि वाक्यान्यनुसंधेयानि॥ अथ कर्मवि-
पाकः॥ याज्ञवल्क्यः॥ महापातकजान् घोरान्नरका-
न्प्राप्य दारुणान्। कर्मक्षयात्प्रजायंते महापातकिनस्त्विह
मृगश्वसूकरोष्ट्राणां ब्रह्महा योनिमृच्छति। खरपुल्क-
सवेनानां सुरापो नात्र संशयः। पुल्कसः प्रतिलोमः निषा-
देन शूद्रायां जातः। अंबष्ठ्यां वैदेहकेन जातो वेनः। कृमि-
कीटपतंगत्वं स्वर्णहारी समाप्नुयात्। तृणगुल्मलतात्वं
च क्रमशो गुरुतल्पगः। ब्रह्महा क्षयरोगी स्यात्सुरापः श्या-

वदंतकः। हेमहारी तु कुनखी दुश्चर्मा गुरुतल्पगः। योयेन संव-
सत्येषां सतल्लिंगोभिजायते। एतच्चाकामकारे। कामकारे
तन्यास्वपि पुंश्च बहुलासु तिर्यग्योन्यादिषु संसरति॥ त-
थाच मनुः॥ श्वसूकरखरोष्ट्राणां गोजाविमृगपक्षिणां
चंडालपुल्कसानां तु ब्रह्महा योनिमृच्छति॥ याज्ञवल्क्यः
अन्नहर्ता मयावी स्यान्मूको वागपहारकः॥ धान्यमिश्रोतिरि-
क्तांगः पिशुनः पूतिनासिकः। तैलहृत्तैलपायी स्यात्पूतिवक्त्र-
स्तु सूचकः। परस्य योषितं हृत्वा ब्रह्मस्वमपहृत्य च। अरण्ये
निर्जले देशे भवति ब्रह्मराक्षसः। हीनजातौ प्रजायेत पररत्ना-
पहारकः। पत्रं शाकं शिखी हृत्वा गंधान् छुछुंदरिः शुभान्।
मूषको धान्यहारी स्याद्यानमुष्ट्रः फलं कपिः। जलं प्लवः पयः
काको गृहकारी ह्युपस्करं। मधुदंशः पलं गृध्रो गां गोधाग्निं ब-
कस्तथा। श्वित्री वस्त्रं श्वा रसं तु चीरी लवणहारकः। प्रदर्शना-
र्थमेतत्तु मयोक्तं स्तेयकर्मणि। द्रव्यप्रकारा हि यथा तथैव प्रा-
णिजातयः॥ शंखः॥ ब्रह्महा कुष्ठी तैजसापहारी मंडली दे-
वब्राह्मणाक्रोशकः खल्वतिः गरदाग्निदावुन्मत्तो गुरुप्रति-
हंता परस्मारी गोघ्नश्चांधः। धर्मपत्नीं त्यक्त्वान्यत्र प्रवृत्तः शब्द-
वेधी प्राणिविशेषः। कुंडाशी भगभक्षो देवब्राह्मणस्वाप-
हारी पांडुरोगी न्यासापहारी काणः स्त्रीपण्योपजीवी षंढः
कौमारदारत्यागी दुर्भगः। मिष्टैकाशी वातगुल्मी। अभक्ष्य-
भक्षो गंडमाली। ब्राह्मणीगामी निर्बीजः। क्रूरकर्मा वाम-

नोवस्त्रापहारी पतंगः। शय्यापहारी क्षपणकः। शंखशुक्त्य-
पहारी कपाली। दीपापहारी कौशिको मित्रध्रुक् क्षयी माता-
पित्रोराक्रोशकः। खंडकारक इति॥ वृद्धगौतमः॥ अव-
तवाक् खल्वलो मुहुर्मुहुः संलग्नवाक् जल्लोदरी दारत्यागी
कूटसाक्षी श्लीपदी उच्चूनजंघाचरणो विवाहविघ्नकर्त्ता छि-
न्नोष्ठः अवगोरणो छिन्नहस्तो मातृघ्नो पितृघ्नो वा नेत्रविकलः
स्नुषागामी वातवृषणः। स्थूलैकह्रस्वश्चतुष्पथमूत्रविसर्ज-
ने मूत्रकृच्छ्री। कन्यादूषकः षंढः। ईर्ष्यालुर्मशकः। पित्रा विव-
दमानो पस्मारी। न्यासापहार्यनपत्यो रत्नापहार्यत्यंतदरि-
द्रः विद्याविक्रयी पुरुषमृगो वेदविक्रयी द्वीपी। बहुयाजको ज-
लप्लवः। अयाज्ययाजको वराहः। अनिमंत्रितभोजी वायसो
मिष्टैकभोजी वानरो यत्तस्ततो अन्नमार्जारः। कक्षवनदहनात्
खद्योतो दारकाचार्यो मुखविगंधः। पर्युषितभोजी कृमिः। अ-
दत्तादायी बलीवर्दो मत्सरी भ्रमरः। अग्न्युत्सादी मंडलकुष्ठी
शूद्राचार्यः श्वपाको गोहर्त्ता सर्पः। स्नेहापहारी क्षयी। अ-
न्नापहार्यजीर्णी ज्ञानापहारी मूकः चंडालीपुल्कसीगमने
अजगरः प्रव्रजितागमने मरुपिशाचः शूद्रागमने दीर्घकीटः।
सवर्णाभिगामी दरिद्रो जलहारी मत्स्यः। क्षीरहारी बलाको-
वार्द्धुषिकोंगहीनः। अविक्रय्यविक्रयी गृध्रो राजमहिषीगामी
नपुंसको राजाक्रोशको गर्दभो गोगामी मंडूकः। अनध्याया-
ध्ययने शृगालः। परद्रव्यापहारी परप्रेष्यो मत्स्यवधे गर्भवा-

सीत्येते अनूर्द्ध्वगामिन इति। अनूर्द्ध्वगामिनो नरकगामिन इत्यर्थः॥ मनुः॥ स्त्रियोप्येतेन कल्पेन हत्वा दोषमवाप्नुयुः। एतेषामेव जंतूनां भार्यात्वमुपयातिता इति॥ अथ प्रायश्चित्तकर्त्तव्यतानिर्णयः॥ गौतमः॥ अथ खल्वयं पुरुषः पापेन कर्मणा लिप्यते यथैतदयाज्ययाजनमभक्ष्यभक्षणमवद्यवदनं शिष्टस्याक्रिया प्रतिषिद्धसेवनमिति। तत्र प्रायश्चित्तं कुर्यान्न कुर्यादिति मीमांसंते न कुर्यादित्याहुर्नहि कर्म क्षीयत इति कुर्यादित्यपरं पुनस्तोमेनेष्ट्वा पुनः सवनमायांतीति विज्ञायते व्रात्यस्तोमेनेष्ट्वा तरति सर्वं पाप्मानं तरति ब्रह्महत्यां योश्वमेधेन यजते अग्निष्टुताभिशस्यमानं याजयेदिति च। शिष्टस्याक्रिया विहितस्याकरणं। नहि कर्म क्षीयत इति फलोपभोगमंतरेणेत्यर्थः। कुर्यादित्यपरं मतमिति सिद्धांत इत्यर्थः। पुनःस्तोमेनेत्यादिश्रुत्युक्तेन प्रायश्चित्तरूपेण पुनस्तोमेनेष्ट्वा। पुनरपि सवनं प्रातर्मध्यंदिनसायंसवनसाध्यं कर्मप्रायांति तत्कर्मानुष्ठानयोग्या भवंतीत्यर्थः॥ याज्ञवल्क्यः॥ विहितस्याननुष्ठानान्निंदितस्य च सेवनात्। अनिग्रहाच्चेंद्रियाणां नरः पतनमृच्छति। तस्मात्तेनेह कर्त्तव्यं प्रायश्चित्तं विशुद्धये। एवमस्यांतस्यांतरात्मा वलोकश्चैव प्रसीदति॥ हारीतः॥ यथा क्षारोपस्वेदचंडनिर्णोदनप्रक्षालनादिर्वासांसि शुध्यंत्येवं तपोयज्ञदानैः पापकृतः शुद्धिमुपयांति धम्यमाना इवाग्नौ धातवो दोषेभ्यस्तस्मादिमं आत्मने हातुलो-

भात्मसमाहारशुभं कृत्वा समग्रः। शौचं समाचरेत्। न ह्यशुद्धा-
नामयं लोको न परश्चेत्याचार्याः। एवं ह्याह। कर्मणा मनसा
वाचा यदभीक्ष्णं निषेवते। तदभ्यासो हरत्येनं तस्मात्कल्या-
णमभ्यसेदिति। दंडनिर्णोदनं। चुल्यविस्मयणादिनाक्ले-
दनं॥ अंगिराः॥ प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।
तपोनिश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतं। पापं कृत्वाभि-
मन्येत नाहमस्मीति पूरुषः। चिकीर्षन्नेव कल्याणं श्रद्दधा-
नोनसूयकः। वाङ्मनःकर्मसंभूतमेनआविः करोति यः। वि-
कर्मणा तप्यमानः पापाद्विपरिमुच्यते। उदयन्यहृदादि-
त्यस्तमः सर्वं व्यपोहति। तद्वत्कल्याणमातिष्ठन्सर्वं पापं
व्यपोहति। अत्र कल्याणशब्दः प्रायश्चित्तपरः॥ अथ
कामाकामकृतपापेषु प्रायश्चित्तकर्त्तव्यताविक-
ल्पः॥ तत्र याज्ञवल्क्यः॥ प्रायश्चित्तैरपैत्येनो यद-
ज्ञानकृतं भवेत्। कामतो व्यवहार्यस्तु वचनादिह जायते।
अज्ञानकृतमेनो ब्रह्महत्यादि पापं प्रायश्चित्तैर्वक्ष्यमाण-
लक्षणैरपगच्छति। कामतो ज्ञानकृतं महापातकादि प्रा-
यश्चित्तैर्नापैति अपि तु प्रायश्चित्ते कृते वचनादिह लोके
व्यवहार्यो भवतीत्यर्थः। एतच्च कामतो महापातकानां
मरणांतिकप्रायश्चित्तव्यतिरिक्तविषयं। मरणांतिकप्राय-
श्चित्ते कृते इह लोके प्रयोजनाभावात्पारलौकिकमेव प्रयोज-
नं कल्पनीयं। तच्च पापापनोदनमेवेति मरणांतिकैः पाप-

मपराच्छतीतिसिद्धं। ह्वारालेयोपि। प्रायश्चित्तमकामानां कामा
वाप्तौ न विद्यते। उपपातक एव स्यात्तथा चात्मोपघातने। अ-
स्यार्थः। कामावाप्तौ ज्ञानपूर्वकपापेन नरकोपभोगनिवारकं
प्रायश्चित्तं न विद्यते। उपपातकात्महननयोस्तु ज्ञानपूर्व-
त्वेपि स्यात् विद्यत एवेति। आत्महननार्थं विषभक्षणादि-
के कृते यदि जीवति तदा प्रायश्चित्तं विद्यते। अथ मृतस्त-
दा तद्धितेच्छुना कर्तव्यमित्युभयथापि प्रायश्चित्तं विद्यत इति
न विरोधः॥ **मनुः**॥ अकामतः कृते पापे प्रायश्चित्तं विधीयते।
कामकारकृतेप्याहुरेके श्रुतिनिदर्शनात्। अकामतः कृतं
पापं वेदाभ्यासेन शुध्यति। कामतस्तु कृतं मोहात्प्रायश्चि-
त्तैः पृथक् पृथक्। इंद्रो यतीन् सालावृकेभ्यः प्रायच्छत्तम-
श्लीलावागभ्यवदत्स प्रजापतिमुपाधावत्तस्मा एतमुपह-
व्यमेतं प्रायच्छदित्यादि निदर्शनं। तस्मात्कामकारकृतेपि
प्रायश्चित्तमस्तीत्यर्थः। श्रुतेस्त्वयं तात्पर्यार्थः। स्वयं साला-
वृकेभ्यः श्वविशेषेभ्यो यतीन् बुद्धिपूर्वकं खादयितुं प्रदव-
त इंद्राय प्रजापतिरुपहव्याख्यं कर्म प्रायश्चित्तत्वेन दत्तवान्
तस्मात्कामकृतेपि प्रायश्चित्तमस्तीति॥ **हारीतः**॥ मनसा
कल्पयति वाचा वदति कर्मणा करोतीति कामकृतमकामकृ-
तमप्यशनिवदभिघातकं भावि तस्मादकामकृते प्रायश्चित्तं
कामं कृते त्वेक इति॥ **देवलः**॥ यस्त्वादनभिसंधाय पापक-
र्म सकृत्कृतं। तस्येयं निःकृतिः प्रोक्ता धर्मविद्भिर्मनीषिभिः।

विधेः प्राथमिकात्तस्माद्द्वितीये द्विगुणं स्मृतं । तृतीये त्रिगुणं कृच्छ्रं चतुर्थे नास्ति निःकृतिः । अभिसंधिकृते पापे सकृद्द्वाने-ह निःकृतिः । अपरे निःकृतिं प्राहुरभिसंधिकृते पि च । अत्र कृच्छ्रमिति विहित प्रायश्चित्तोपलक्षणं । चतुर्थे नास्ति निःकृतिरित्यस्यायमर्थः । यथा अज्ञानात् द्वितीय वारं कृते पापे द्विगुणं प्रायश्चित्तं यथा तृतीय वारं कृते त्रिगुणं एवं चतुर्थवारकृते पूर्वन्यायेन चतुर्गुणप्रायश्चित्तेन निःकृतिर्न अपित्वधिके नैव केचन । अपरे तु चतुर्थे प्रायश्चित्तमेव नास्तीति वदंति । वयं तु ब्रूमः । प्रथममभिसंधिकृते महापातके द्वादशवार्षिकं द्वितीयवारकृते द्वे तृतीये त्रीणि चतुर्थे चत्वारीति द्वादशवार्षिकाणि दश भवंति । एतेषामाचरणकालो विंशत्युत्तरशतं शरदो भवंति । एतावत आयुषः अभावात्कर्तुमशक्यत्वेन प्रायश्चित्ताभावो न तु स्वरूपत एव प्रायश्चित्ताभावइति । कासुचित्स्मृतिषु बुद्धिपूर्वकृते प्रायश्चित्तं नास्तीत्युक्तं कासुचित्तु विद्यत इति । तत्रेयं व्यवस्था मरणांतिकप्रायश्चित्तं सर्वत्र महापातकेषु विद्यत एव । कामाच्च द्विगुणं प्रोक्तमित्यादिवचनबलाद्द्वादशवार्षिकादि द्वैगुण्यादियुक्तं प्रायश्चित्तमपि विद्यते । तेन च प्रायश्चित्तेन इह लोक व्यवहार्यत्व नित्यकर्मानुष्ठानप्रतिबंधक पापशमन पनयनं भवति तथा च कर्मस्वधिकाराहित कर्माकरणात्प्रत्यवायाभावेन पापांतरं नोत्पद्यते । अतः प्रायश्चित्तमस्तीति प्रायश्चित्तास्तित्वप्रतिपादकवच-

नानामभिप्रायः। परलोके यानरकोपभोगहेतुभूता पापशक्तिस्त-
स्याश्च नपायात्तादृशशक्त्यपनायकप्रायश्चित्ताभावात्प्रायश्चित्तं
नास्तीति प्रायश्चित्ताभावप्रतिपादकवचनानामभिप्रायः। परलो-
के या नरकोपभोगहेतुभूता पापशक्तिस्तस्याश्चनपायात्तादृशश-
क्त्यपनायकप्रायश्चित्ताभावात्प्रायश्चित्तं नास्तीति प्रायश्चित्ता-
भावप्रतिपादकवचनानाममभिप्रायः॥ अथ कृच्छ्रादिलक्ष-
णानि॥ तत्र पादकृच्छ्रमाह॥ याज्ञवल्क्यः॥ एकभ-
क्तेन नक्तेन तथैवापायात्तादृशशक्त्यपनायकप्रायश्चित्ताभावा-
त्प्रायश्चित्तं नास्तीति प्रायश्चित्ताभावप्रतिपादकवचनानामभि-
प्रायः॥ अथ कृच्छ्रादिलक्षणानि॥ तत्र पादकृच्छ्र-
माह। याज्ञवल्क्यः॥ एकभक्तेन नक्तेन तथैवायाचितेन
च। उपवासेन चैवायं पादकृच्छ्रः प्रकीर्तितः। एकभक्तेन दिवै-
वोक्तकाले कृतभोजनेन। तथा रात्रावुक्तकाले कृतभोजनेन।
तथा रात्रावुक्तकाले सकृतभोजनेन नक्तेन। दिवा रात्रौ वा अप्रा-
र्थितोपनतभोजनेनायाचितेन। परकीयान्नस्य स्वीयान्नस्य च।
पाचनं न कुर्यात्॥ तथा च गौतमः॥ अथापरं त्र्यहं न कंचन
याचेतेति। न रात्रौ न दिवा भोजनमुपवासः। तेन च। एवं चतुरह-
साध्यः पादकृच्छ्रः। एकभक्तादौ ग्राससंख्यानियमः पराशरे-
णोक्तः। सायं तु द्वादश ग्रासाः प्रातः पंचदश स्मृताः। चतुर्विं-
शतिरयाच्याः परं निरशनं स्मृतमिति। सायं नक्ते। प्रातरेक-
भक्ते। आपस्तंबस्तु प्रकारांतरेणाह। सायं द्वाविंशतिर्ग्रासाः

प्रातः षड्विंशतिः स्मृताः। चतुर्विंशतिरायाच्याः परे निरशनास्त्र-
यः। कुक्कुटांडप्रमाणाः स्युर्यथा वास्य विशेन्मुखमिति। अन-
योश्च पक्षयोः शक्त्यपेक्षया विकल्पः। एवमुत्तरत्रापि शक्त्यपे-
क्षो विकल्पो विज्ञेयः। आपस्तंबस्तु चतुर्धा प्राजापत्यकृच्छ्रं वि-
भज्य वर्णानुक्रमेण पादकृच्छ्रव्यवस्थामाह। त्र्यहं निरशनं
पादः पादश्चायाचितं त्र्यहं। सायं त्र्यहं तथा पादः पादः प्रातस्त-
था त्र्यहं। प्रातः पादं चरेत् शूद्रः सायं वैश्यस्य दापयेत्। अया-
चितं तु राजन्ये त्रिरात्रं ब्राह्मणे स्मृतं। प्रातः पाद एकभक्तत्रयं।
सायं पादो नक्तत्रयं। अयाचितमयाचितत्रयं। त्रिरात्रमुपवासत्रयं
अयाचितपाद उपवासपादश्चेति पादद्वयमिति स्यादर्धकृच्छ्रः।
नक्तपादरहितमवशिष्टं पादत्रयं पादोनकृच्छ्रः। पराह स एव।
सायं प्रातर्विनार्द्धः स्यात्पादोनं नक्तवर्जितमिति। अर्द्धकृच्छ्रस्य
प्रकारांतरमाह स एव। सायं प्रातस्तथैकैकं दिनत्रयमयाचितं।
दिनद्वयं च नाश्नीयात् कृच्छ्रार्द्धं तद्विधीयते॥ अथ प्राजाप-
त्यकृच्छ्रः॥ याज्ञवल्क्यः॥ यथाकथंचित्त्रिगुणः प्राजा-
पत्योऽयमुच्यते। यश्चोक्तो दिनचतुष्टयात्मकः पादकृच्छ्रः स
एवायमित्यनेन निर्दिश्यते। अयं पादकृच्छ्रो यथाकथंचित्त्रि-
गुणः प्राजापत्यो भवति। यथाकथंचिदित्यनेन चत्वारः पक्षा उ-
पात्ताः। एकभक्तेन तथैवायाचितेन च। उपवासेन चैवायमित्ये-
तत्क्रमेणैकभक्तादीनामानुलोम्येन त्रयस्याभ्यावृत्तिरित्येकः।
प्रातिलोम्येन त्रयस्याभ्यावृत्तिरिति द्वितीयः। दंडकलितवदावृ-

त्तिरितितृतीयः। सर्वत्रजपादिरहितपक्षश्चतुर्थः। तत्राद्यंप-
क्षमाहमनुः। त्र्यहंप्रातस्त्र्यहं सायंत्र्यहमद्यादयाचितं।
त्र्यहंपरंचनाश्नीयात्प्राजापत्यंचरन्द्विजः। अत्रैकभक्ता-
दीनांस्वस्वस्थानएवाभिवृद्धित्वात्स्वस्थानविवृद्धिः। द्वि-
तीयमाहवशिष्ठः॥ प्रातिलोम्यंचोरयुक्ताः कृच्छ्रंचांद्रा-
यणोत्तरं। उपवासत्रयमयाचितत्रयंनक्तत्रयमेकभक्तत्रय-
मितिप्रातिलोम्यं। तृतीयमपिसएव॥ अहःप्रातरहर्नक्तम-
हमेकमयाचितं। अहःपराकंतत्रैकमेवंचतुरहौपरौ।
पराकशब्दउपवासपरःतथा। अनुग्रहार्थंविप्राणांमनु-
र्धर्मभृतांवरः। बालवृद्धातुरेष्वेवंशिशुकृच्छ्रमुवाचहेति।
चतुर्थंपक्षमाहांगिराः। तस्मात्शूद्रंसमासाद्यसदाधर्मप-
थेस्थितं। प्रायश्चित्तंप्रदातव्यंजपहोमविवर्जितं। जपाद्यधि-
कारवतउद्दिश्येतिकर्त्तव्यताविशेषमाहगौतमः। अथा-
तःकृच्छ्रान्व्याख्यास्यामोहविष्यान्प्रातराशान्भुक्त्वातिस्रो
रात्रीर्नाश्नीयादथापरंत्र्यहंनक्तंभुंजीताथापरंत्र्यहंनकं-
चनयाचेताथापरंत्र्यहमुपवसेत्तिष्ठेदहनिरात्रावासीत-
क्षिप्रकामः। सत्यंवदेदनार्यैर्नसंभाषेतरौरवयौधाजपेनि-
त्यंप्रयुंजीतानुसवनमुदकोपस्पर्शनापोहिष्ठेतितिसृभिः
पवित्रवतीभिर्मार्जयीतहिरण्यवर्णाःशुचयःपावकाःइत्य-
ष्टाभिरथोदकतर्पणंनमोहमायमंहमायधुन्वतेतापसा-
यपुनर्वसवेनमोमौंज्यायोर्व्यायवसुविंदायसर्वविंदायवसु-

विदे सर्वविद्याय नमः पराय सुपराय महापाराय पारदाय पार-
विष्णवे नमो रुद्राय पशुपतये महते देवाय त्र्यंबकायैकच-
राधिपतये हराय शर्वायेशानायोग्राय वज्रिणे घृसत्वा-
पपादकाय पावकवर्णाय कामाय कामरूपिणे नमो दीप्ता-
य दीप्तरूपिणे नमः सौम्याय पुरुषाय महापुरुषाय मध्यमपु-
रुषायोत्तमपुरुषाय ब्रह्मचारिणे नमश्चंद्रललाटाय कृत्तिवा-
ससे नम इति। तथा एतदेवादित्योपस्थानमेताश्चाज्याहु-
तयो हारदशरात्रस्यांते चरुं श्रपयित्वैताभ्यो जुहुयादग्नये
स्वाहा सोमाय स्वाहाग्नीषोमाभ्यामिंद्राग्निभ्यामिंद्राय वि-
श्वेभ्यो देवेभ्यो ब्रह्मणे प्रजापतयेऽग्नये। स्विष्टकृत इत्यंते ब्रा-
ह्मणभोजनमिति। अस्यार्थः हृदिध्यान्प्रातराशान्
भुक्त्वा तिस्रो रात्रीर्नाश्नीयादिति। प्रातराशा एकभक्तानि
तेष्वेकभक्तदिनेषु तिसृष्वपि तिस्रो रात्रीर्नाश्नीयात् रा-
त्रिभोजनं न कुर्यात्। तिष्ठेदहनि रात्रावासीत क्षिप्रकाम
इति। यस्तु प्राजापत्यकृच्छ्रे हूयापनोद्यात्यापाक्षिप्रमे-
केनैव कृच्छ्रेण विमुक्तो भविष्यामीत्येवं कामयते अयम-
हन्यावश्यककर्माविरुद्धेषु कालेषु तिष्ठेत्। रात्रावासीत।
तयोरेव योः प्राजपसामजपं कुर्यात्। अनुसवनं संध्या-
त्रय उपस्पर्शनं स्नानं त्रिषवणस्नानमित्यर्थः। हिरण्य-
वर्णा इत्यष्टाभिरपि मार्जनमेव एतच्च मार्जनं स्नानानं-
तरमेव। अथोदकतर्पणं॥ तत्र मंत्राः नमो हमाये त्या-

रयः। अत्र मंत्रसंदर्भस्यादावंते च नमः। शब्दश्च वरुणान्मंत्रादा-
वंते च नमः शब्दो भवति। तथा चैवं मंत्रप्रयोगः। नमोहमाय
मंहमाय धुन्वते तापसाय पुनर्वसवे नम इति एवं नमो मौंज्या-
येत्यारभ्य सर्वविंदाय नम इत्यंत एको मंत्रः। एवमुत्तरत्रा-
पि द्रष्टव्यं। एवं त्रयोदशमंत्रैस्तर्पणं कुर्यात्। ततश्च एतदे-
वादित्योपस्थानं एतदेव मंत्रजातं आदित्योपस्थानसाध-
नं। कार्यकारणयोरभेदोपचारः। तर्पणानंतरमेतैरेव मंत्रै-
रादित्योपस्थानं कुर्यादित्यर्थः। एता एवाज्याहुतयः।
अत्राप्यभेदोपचारः। एतैरेव मंत्रैराज्यहोमः कर्तव्यः।
स च लौकिकाग्निं प्रतिष्ठाप्य। एवं प्रतिदिनं कृत्वा द्वादशरा-
त्रस्यांते चरुं श्रपयित्वा एताभ्यो वक्ष्यमाणाभ्योग्न्यादि-
देवताभ्यो जुहुयात्। नव मंत्राः स्वाहाकारांता भवंति। ततश्च
ब्राह्मणभोजनमिति। एतच्च गौतमीयं। प्राजापत्यं याज्ञव-
ल्क्याद्युक्तप्राजापत्यद्वयस्थाने द्रष्टव्यं। इतिकर्तव्यताबा-
हुल्यात् क्षिप्रकाम इति विशेषोपादानाच्च॥ अथातिकृ-
च्छ्रः॥ मनुः॥ एकैकं ग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्ववत्।
त्र्यहं चोपवसेदंत्यमतिकृच्छ्रं चरन् द्विजः॥ त्रीणि त्र्यहाणि नव दि-
नानि। पूर्ववत् एकभक्तादिकाले तन्नियमयुक्तः सन्नित्यर्थः।
याज्ञवल्क्यः॥ अयमेवातिकृच्छ्रः स्यात् पाणिपूरान्नभो-
जनः। अयमेव पूर्वोक्तप्राजापत्यधर्मक एव। अयं तु विशेषः।
एकभक्तनक्तायाचितदिनेषु पाणिपूरणमात्रं प्रसृतिपूरण

साच भक्तं भुंजीत न तु पूर्वोक्तद्वाविंशत्यादिग्रासानिति। अत्रच पा-
णिपूरणान्नमेव विधेयं न तु भोजनं। अतो येषु दिनेषु प्राजापत्ये
भोजनं शास्त्रं तदनुवादेन पाणिपूरान्नमात्रं विधीयते इति उपवासदि-
नेषु पाणिपूरान्नभोजनप्राप्तिः मनुयाज्ञवल्क्योक्तपाणि-
पूरग्रासयोः शक्त्यपेक्षो विकल्पः॥ पापापेक्षो वा। अति-
कृच्छ्रप्राजापत्यादिव्यवस्था प्राजापत्यवदेव॥ अथ कृच्छ्रा-
तिकृच्छ्रः॥ गौतमः॥ अब्भक्षस्तृतीयः स कृच्छ्रातिकृच्छ्र इति
द्वादशरात्रमुदकेनैव वर्त्तनं माम्नेमेति॥ यमः॥ एकैकं पिंड-
मश्नीयात् त्र्यहं कल्ये त्र्यहं निशि। अयाचितं त्र्यहं पिंडं वायुभक्ष-
स्त्र्यहं परं। अतिकृच्छ्रं चरेदेतत्सर्वपापनाशनं। चतुर्विंशति-
रात्रं तु नियतात्मा जितेंद्रियः। कृच्छ्रातिकृच्छ्रं कुर्वीत एकस्थाने।
द्विजोत्तम इति। कल्ये प्रातः। एकभक्तकाल इति यावत्। एक-
स्थान इति वचनाच्चतुर्विंशतिरात्रसाध्यमतिकृच्छ्रद्वयं कृच्छ्रा-
तिकृच्छ्रात्मक एकः कृच्छ्रो भवतीत्यर्थः॥ याज्ञवल्क्यः॥
कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिं। यमेन चतुर्विंशति-
रात्रसाध्ये कृच्छ्रातिकृच्छ्रे भोजनादिष्वेकैकग्रासविधानात्।
दुग्धभोजनेऽपि पत्रपुटिकादिभिर्ग्रासपरिमाणं कृत्वा एक-
ग्रासपर्याप्तं दुग्धमश्नीयात्। एवं कर्तुमशक्तश्चेत्कृच्छ्रप्रकृति-
भूतप्राजापत्योक्तरीत्या द्वाविंशत्यादिग्राससंख्यया तावद्दु-
ग्धं पातव्यं। अथवा यावता प्राणधारो भवति तावत् ग्राह्यं अ-
नुक्तद्रव्यपरिमाणेषु सर्वत्रैवं ग्राह्यं प्राणयात्रामात्रमेवेति।

गौतमाद्युक्तपक्षे शुश्रूषाद्यपेक्षया विकल्पः॥ एवमु-
त्तरत्रापि द्रष्टव्यं॥ अथ पराकः॥ याज्ञवल्क्यः॥ द्वाद-
शाहोपवासेन पराकः परिकीर्तितः॥ अथ सौम्यकृच्छ्रः।
जाबालिः॥ पिण्याकं सक्तु तक्रं च चतुर्थे हन्यभोजनं। वा-
सो वै दक्षिणां दद्यात्सौम्योयं कृच्छ्र उच्यते। अथ सौम्ये पिण्या-
कं पिंडी पिण्याकादिकं प्राणयात्रोपयुक्तं ग्राह्यं नाधिकम्॥
याज्ञवल्क्यः॥ पिण्याकाचामतक्राम्बुसक्तूनां प्रतिवास-
रं। एकरात्रोपवासश्च कृच्छ्रः सौम्योयमुच्यते। आचामश्चोद-
नावस्रावः। एतच्च षड्दिनसाध्यं॥ अथ तुलापुरुषाख्य-
कृच्छ्रः। याज्ञवल्क्यः॥ एषां त्रिरात्रमभ्यासादेकैकस्य
यथाक्रमं। तुलापुरुष इत्येष ज्ञेयः पंचदशाहिकः। एषां पिण्या-
काचामतक्राम्बुसक्तूनां पंचानां प्रत्येकं क्रमेण त्रिरात्रमभ्यासा-
त्पंचदशाहिकस्तुलापुरुषसंज्ञकः कृच्छ्रो भवति। यमस्त्वेक-
विंशतिरात्रसाध्यं तुलापुरुषमाह। आचाममथ पिण्याकं त-
क्रं चोदकसक्तवः। त्र्यहं त्र्यहं प्रयुंजानो वायुभक्षस्त्र्यहं त्र्यहं।
वायुभक्षस्त्र्यहद्वयमित्यपि पाठः। एकविंशतिरात्रस्तु तुला-
पुरुष उच्यत इति। हारीतः॥ अथातस्त्रिनयनोक्तस्य
तुलापुरुषस्य कल्पं व्याख्यास्यामः॥ अयाज्ययाज-
नं कृत्वा आश्यसूत्रपरीषके। अप्रतिग्रहमादाय याजयित्वा
तु निंदितान्। विनायकोपसृष्टस्य महाव्याधिहतस्य तु। ए-
तत्कृच्छ्रं तुलापुरुषं महापातकनाशनं। स्वर्गद्वारमिदं पुण्यं

महादेवेन निर्मितं। आचाममथ पिण्याकं तक्रं चोदकसक्तु-
कान्। त्र्यहं त्र्यहं प्रयुंजानो वायुभक्षस्त्र्यहं परं। वाक्पादचैल-
स्त्रोऽभिहतानि विहतानि च। आचामस्तानि निर्हंति नवश्राद्धं
तु सूतकं। तिलस्य दारुणं किंचित्कृष्णकीटहतं तु यत्। प्राश्य
मूत्रपुरीषं च ब्रह्महस्तहतमेव च। पिण्याकं तानि निर्हंति अ-
स्थि भित्वा तु यत् स्थितं। आमामेव तु ये दोषाः स्नेहदोषाश्च ये
क्वचित्। खरोष्ट्रसुरवसंस्पृष्टं मद्यसंस्पृष्टमेव च। तक्रेण तानि
निर्हंति यच्चान्यात् श्वादलोकितं। कनकाश्च तिला गावो भूमि-
राच्छादनं स्त्रियः। सर्वं पुनाति धर्मात्मा गृह्णं चोदकसक्तुभिः
ब्रह्महत्यां भ्रूणहत्यां सुवर्णस्तेयं सुरापानं गुरुदाराभिगम-
नं कन्यादूषणं स्त्रीवाभिगमनं वायुभक्षः पुनाति तत्। गंधोशी-
रमयौ कार्यौ पुरुषौ पलसंमितौ। नदीमृत्तिकया वापि पुरुषौ
द्वौ तु कारयेत्। महापशुर्येन प्रारेण विज्ञायश्चापि खस्तमुभ-
यो लक्ष्य लक्षं। तेना वसीं सुकृतां कारयित्वा प्रादेशमात्रा मु-
भयोत्कांतशिक्यां। सौवर्णी राजती वापि तुल्यां देवीं तु का-
रयेत्। अपि चंदनवृक्षस्य खदिरस्यापि कारयेत्। तस्याला-
भे तुला कार्या यथा वाह्युपलभ्यते। यः पुरुषः पिंगलो बभ्रुर्ह-
लमुशलवज्रपाणिमावहि ध्यामि स्वन एहि नाग एहि क-
श्यपजिन एहि स्वागत मनु स्वागतं भवते तुलापुरुषाय महा-
देवाय इदमर्घ्यं इदं पाद्यमिदमाचमनीयं इदमासनं चप-
मोदं गंधमाल्यधूपदीपं प्रतिगृह्णातु पदे नो ममरुद्रः सुम-

नाभव। अथ तुलामभिमंत्रयते॥ ऋषिसत्यं देवसत्यं
ब्रह्मसत्यं यत्सत्यं तेन सत्येन सत्यवादिनि दिशानां संपदं
ब्रूहि किं देशं वर्द्धयिष्यसि। बीजानां संपदं ब्रूहि किं बीजं वर्द्धु-
यिष्यसि। राज्ञां च संपदं ब्रूहि किं नृपं वर्द्धयिष्यसि। अस्माकं सं-
पदं ब्रूहि किमस्माकं भविष्यति। यदा तु गुरुमात्मानमसकृ-
त्तुलया धृतं। परं चैव लघुं मन्येत्तदा कर्म समाचरेत्। अग्नये
पृथिव्यधिपतये स्वाहा। सूर्याय दिवोधिपतये स्वाहा। सोमन-
क्षत्राधिपतये स्वाहा। कुबेराय यक्षाधिपतये स्वाहा। इंद्राय दे-
वाधिपतये स्वाहा। ब्रह्मणे त्रैलोक्याधिपतये स्वाहा। देव्यै
भगाधिपतये स्वाहा। शालकटंकटाय स्वाहा। कूष्मांडराज-
पुत्राय स्वाहा। महावक्रतुंडाय तिदेवाय मरुद्भिः सदेव सुनरा का-
मनाय स्वाहा। सकृत्कृत्वा शुचिः कर्मणो भवति द्विस्त्वरित्वा
गाणपत्यमवाप्नोति त्रिः कृत्वा महादेवाद्वीमनं प्राप्नोति। आ-
षाढ्यां कार्त्तिक्यां फाल्गुन्यां पुराध्ये वा नक्षत्रे एषां विहितो ध-
र्म इति॥ यमः॥ अथातो भगवतस्तु पुरुषस्य कल्पं
व्याख्यास्यामः॥ अभक्ष्यभक्षणं कृत्वा विकर्मकरणं
तथा। प्रसूतानां द्विजातीनां संकीर्णासु च योनिषु। संकीर्ण-
योनिषु प्रतिलोमयोनिषु। तथा निषिद्धयोनिषु च प्रसूताना-
मत्यादितपत्यानां। प्राश्य मूत्रं पुरीषं च भोजयित्वा च निंदि-
तान्। अगम्यागमनं कृत्वा दूषयित्वा च कन्यकां। विनायको-
पसृष्टस्य महाव्याधिहतस्य च। पाप्मना च गृहीतस्य सिद्धि

हीनस्य चापुनः। स्वर्गमार्गावलंबस्य निर्दग्धोपहतस्य च।
स्वर्गमार्गावलंबस्य स्वर्गेच्छोः। इदं यंत्रं दुराधर्षं महापातकना-
शनं। स्वर्गद्वारमिदं श्रेष्ठं महादेवप्रचोदितं। वाङ्मनोभ्यां च
कायेन यानि पापानि देहिनः। आमासमस्तानि निहंति नवश्राद्धं
च सूतकं। तैलस्य दारुणं किंचित्केशापक्षिहतं तु यत्। पिण्या-
कस्तानि निहंति अस्थि भित्वा तु यत्स्थितम्। तैलस्य भक्ष्य-
माणस्य तथा निषिद्धदिने अभ्यंगादिषु योज्यमानस्य दारुण-
मलक्ष्मीकरणं यत्पापं। केशपक्षिहतं। केशापक्ष्युपहतं। अस्थि
भित्वा स्थितं। यत्पूर्वं कृतं पापं दीर्घकालत्वाद्दृढं संस्थितं तद-
स्थि भित्वा स्थितमित्युच्यते। आहारे प्रचये दोषाः सर्पिर्दोषाश्च
ये क्वचित्। तत्क्षणात्तानि पूतानि स्वसिर्यश्चावलोकितं। कनकं च ति-
ला गावो भूमिराच्छादनं स्त्रियः। सर्वं पुनाति धर्मात्मा तथैवोद-
सक्तुभिः। कनकादिप्रतिग्रहजनितं पापं पुनातीत्यर्थः। वाचाकृ-
तं कर्म कृतं मनसा दुर्विचिंतितं। सर्वमेतत्त्रिरात्रेण पुनातीति न सं-
शयः। अयाज्ययाजनं चौर्यं कन्यायामथ दूषणं। यच्च गोमैथुना-
त्पापं वायुं पीत्वा पुनाति तत्। आहाराग्रमपि जुहोति। आचामा-
दिकोप आहारस्तस्याग्रं ग्रासचतुष्टयं। कुक्कुटांडपरिमितग्रासा-
नुमानेन ग्रासचतुष्टयं जुहोति। आहाराग्रमपि जुहोतीत्यपिश-
ब्दोपादानादाज्यहोमोपि गम्यते। अग्नये पृथिव्यधिपतये स्वाहा
सूर्याय दिवस्पतये स्वाहा। इंद्राय सुराधिपतये स्वाहा। ब्रह्मणे
लोकाधिपतये स्वाहा। विष्णवे सर्वाधिपतये स्वाहा। येन देवा-

पवित्रेण तुलापुरुषमारुह्य पुनरुद्धृताः। तमहं पवित्रं पवित्राणां
तुलापुरुषमावाहयामि स्वाहा। करालं पिंगलं बभ्रुं विश्वरूप-
मुमापतिं। योऽहिर्वेदांततो जातस्त्वष्टृतं च महामतिः। त्र्यंबकस्य पा-
रे भुवनस्य मध्ये नाकस्य पृष्ठे महितो महिमानं महीयते। उद्व-
यति यो ब्रह्मासनं समनयति उरण्यातियः। यो भोग्रहराजातो म-
नुस्मो हमहोध्वजः। एकाक्षरं बहुयात् मानं वर्णप्रधानं बहु-
धा विश्वरूपः प्राणान्विहितो भिहितो विश्वकर्मणे नमो नमइ-
ति। स्वागतं भवते तुलापुरुषाय इदमासनमास्यतां भवते ततः
पाद्यार्घाचमनानुलेपनमाल्यदीपधूपनैवेद्यैरभ्यर्च्य गाः
वंतं सपत्नीकं सपार्षदं पशुपतिमभ्यर्चयेत्। सपार्षदं सगणं
धूपमंत्रः। वनस्पतिरसोद्दिव्यो गंधाढ्यो गंधउत्तमः। आहारः
सर्वदेवानां धूपोऽयं प्रतिगृह्यतां। सर्वत्रायं धूपमंत्रः। अथ तुला
भवति। महापशुर्येन शरेण विद्धो यत्रापि शस्त्रं तु भयोर्लक्ष्यलक्ष्यं
तेनायसीं तुलां सुकृतां कारयित्वा त्रिप्रादेशमात्रामुभयोर्जातशि-
क्यां। महापशुर्महाजः। यच्छस्त्रमुभयोर्लब्धलक्ष्यं उभयो-
रग्रंताभ्यां प्रहृतलक्ष्यं। आद्यं तयोस्तीक्ष्णं सहिंस्रमृगादिकं
अथवा। उभयोः पार्श्वयोः प्रहृतलक्ष्यं धाराद्वयेन प्रहृतल-
क्ष्यं खड्गादिकमेवं विधेन लोहेतु प्रादेशत्रयपरिमिता तुला
कार्येत्यर्थः। उभयोर्जातशिक्यां पार्श्वद्वयकृतशिक्यां। सौव-
र्णी राजती वापि तुला देवीनुसास्मृता। अथ चंदनवृक्षस्य ख-
दिरस्याथ कारयेत्। एतेषामथ भावेतु तुलान्यायोपपद्यते।

प्रतिमा चांदनी कार्या एकैव स्वर्गसंज्ञिता । उशीरस्यापराकार्या तथा नरकसंज्ञिता । नदीमृत्तिकया वापि प्रतिमे द्वे तु कारयेत् । विहिते सूपलिप्ते च तत्र बीजानि स्थापयेत् । विहिते न्यूनाधिकरहिते । हारीतोक्तपलपरिमाणे इति यावत् । सूपलिप्ते एघतः सुसंस्पृष्ट इति मंजर्यां । पृष्ठभागे अवयवविभागो यथा न ज्ञायते तथा समीकृते इति तात्पर्यार्थः । तत्र तत्स्थापनप्रदेशे बीजानि व्रीह्यादिबीजानि स्थापयेत् । अदितिस्तु तुला माता त्वयं सृजनि तातव । त्वं हि सत्यं व धर्मं अत्वयि लोकाः प्रतिष्ठिताः । सत्यं वद सत्यवादिनि सत्येन रमतां मन । सस्यानां संपदं ब्रूहि किं सस्यं वर्द्धयिष्यसि । बीजानां संपदं ब्रूहि किं बीजं वर्द्धयिष्यसि । राज्ञां च संपदं ब्रूहि कं नृपं वर्द्धयिष्यसि । अस्माकं संपदं ब्रूहि किमस्मान्वर्द्धयिष्यसि । यदा तु गुरुमात्मानमसत्कृत्तुलया धृतं । परं च लाघवं मन्येत्ततः कर्म समारभेत् । एतेनैव तु कल्पेन ब्राह्मणस्य विधीयते । राजन्यवैश्ययोश्चैव काष्ठप्रतिकृती स्मृते । परं च लाघवं मन्ये । परशिक्यारोपितमस्मादिलघुपक्षभवनीति स्मृतिमंजर्यां व्याख्यातं । यदा तु गुरुमात्मानमित्यादेरयमर्थः । अत्रा । सकृत्तुलयाधृतमित्यभिधानात् । तथा राजन्यवैश्ययोश्चैव काष्ठप्रतिमे स्मृते इत्युक्त्वाङ्गंधादिप्रतिमाद्वयस्योक्त्वाद्य स्वप्रतिकृतिरूपं प्रत्येकं पलपरिमितचंदनादिनाद्वयं कृत्वा पलपरिमितपाषाणादि एकस्मिन् शिक्ये निक्षि

प्य द्वितीयशिक्ये स्वप्रतिकृतिद्वयमपि पृथक् पृथग्निक्षि-
प्य तोलयेदिति। अत एवासकृत्तोलनं भवति। विप्रादे-
शमात्रतुलाविधिरपि प्रतिकृतितोलनस्यैवोपपद्यते। सा-
क्षात्स्वरूपतोलने तस्या अपर्याप्तत्वात्। तथा श्वेताश्वो
गुरुदक्षिणा। श्वेता गौर्गुरुप्रसादो वा। नमस्तुल्यापुरुषायेति
यमद्रुति। यत्किंचिद्दत्त्वा गुरुराचार्यः प्रसादनीयः। स एव प्र-
सादो वा दक्षिणेत्यर्थः। अश्वादिसंपादनासमर्थविषयमे-
तत्। अत्रानुष्ठानक्रमः। हारीतवचने तुलारोहणानंतरं हो-
ममंत्राः पठिताः यमेन तूपक्रम एव। अतश्च होमे क्रमो विक-
ल्पते। होमं कृत्वा उमामहेश्वरपुरः स्थितं प्रतिमाद्वयमादाय
तुलां पृथक् पृथक् कृत्वा पूर्वोक्तविधिनारोपयेत्। ततो वा हो-
मः कर्तव्यः। स्मृतिद्वयेपि यस्तु गुरुमात्मानमित्युपक्रम्य।
ततः कर्म समारभेदित्युक्तत्वात्। तुलारोहणानंतरमेव आ-
चामपिण्याकादिभक्षणादिना व्रतमाचरेत्। अत्र गुरुमि-
त्युपलक्षणं साम्येति कर्तव्यं तुलादिव्यप्रकरणे साम्येपि
दोषयुक्तत्वाभिधानात्। एतच्च दोषसंदेहे। दोषनिश्चये
तु दैवाल्लघुत्वेपि प्रायश्चित्तं कर्तव्यमेव। संदेहे तु लघुत्वे उ-
त्तरत्र क्रियमाणं प्रायश्चित्तं न कर्तव्यमिति गम्यते। आत्मा-
नं लाघवं मन्ये ततः कर्म समारभेत् इति हेतूपादानात्। के-
वलपुण्योपार्जनार्थं तुलापुरुषकरणे तु गुरुत्वे साम्ये
लघुत्वे च कर्तव्यमेव विशिष्टस्यैव सुकृतोत्पादनहेतुत्वात्

हारीतेन यो यमापात्रादिकान्तोऽभिहितः सोऽपि सुकृतार्थिन एव
दुरितोपेतस्य निमित्तानन्तरमेव कर्तव्यत्वात्॥ अथ सांतपन
कृच्छ्रं॥ याज्ञवल्क्यः॥ कुशोदकं तु गोक्षीरं दधि मूत्रं शकृ-
त् घृतं। प्राश्यापरेऽह्नि उपवसेत् कृच्छ्रं सांतपनं चरेत्। इत्यपरार्कपा-
ठः मिताक्षरापाठस्तु गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकमि-
ति। गोमूत्रादीनि षड्द्रव्यैकीकृत्य पीत्वाहोरात्रान्तराहितः सन्तिष्ठे-
त् परेद्युरुपवसेदिति नहूयसाध्यः कृच्छ्रः। याज्ञवल्क्येनोक्त-
शास्त्रोक्त गोमयादीनां पृथक् पृथक् षट्सु दिनेषु प्राशनविधाना-
त्। अत्र मिलितानामेकदिन सर्वप्राशनं गम्यते। पराशरः। गोमू-
त्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं। निर्दिष्टं पंचगव्यं तु पवित्रं का-
यशोधनं। गोमूत्रं ताम्रवर्णायाः श्वेतायाश्चापि गोमयं। पयः कां-
चनवर्णाया नीलायाश्च तथा दधि। घृतं च कृष्णवर्णायाः सर्वं
कापिलमेव वा। अलाभे सर्ववर्णानां पंचगव्येष्वयं विधिः। गो-
मूत्रे माषकास्त्वष्टौ गोमयस्य तु षोडश। क्षीरस्य द्वादश प्रोक्ता
दध्नस्तु दश कीर्तिताः। गोमूत्रवत् घृतस्येष्टं तु कुशोद-
कं। गायत्र्यादाय गोमूत्रं गंधद्वारेति गोमयं। आप्यायस्वेति
च क्षीरं दधिक्राव्णोति वै दधि। तेजोऽसि शुक्रमित्याज्यं देवस्य-
त्वा कुशोदकं। पंचगव्यमृचा पूतं होमयेदग्निसंनिधौ। सप्तप-
त्रास्तु ये दर्भा अच्छिन्नाग्राः शुकत्विषः। एतैरुद्धृत्य होतव्यं पं-
चगव्यं यथाविधि। इरावती इदं विष्णुर्मानस्तोके वशावती।
एताभिश्चैव होतव्यं हुतशेषं पिबेद्द्विजः। प्रणवेन समालो-

ह्यप्रणवेनाभिमंत्र्य च। प्रणवेन समुद्धृत्य पिबेत्तत्प्रणवेन तु।
मध्यमेनैव पलाशस्य पद्मपत्रेण वा पिबेत्। स्वर्णपात्रेण ताम्रेण
ब्रह्मतीर्थेन वा पुनः। यत्त्वगस्थिगतं पापं देहे तिष्ठति मानवे।
ब्रह्मकूर्चोपवासस्तु दहत्यग्निरिवेंधनमिति। याज्ञवल्क्यो-
क्तं सांतपनमेव ब्रह्मकूर्च इति ब्रह्मकूर्चोपवास इति चाभिधी-
यते। विज्ञानेश्वरस्तु पूर्वेद्युरुपोष्यापरेद्युरुक्तरीत्या पंचगव्य-
प्राशने ब्रह्मकूर्च इति मन्यते॥ मरीचिः॥ देवताः संप्रवक्ष्या-
म्यानुपूर्व्येण यस्य याः। वरुणो देवता मूत्रे गोमये हव्यवा-
हनः। सोमः क्षीरे दध्नि वायुर्घृते रविरुदाहृतः। गोमूत्रं ताम्रव-
र्णायाः श्वेतायास्त्वथ गोमयं। पयः कांचनवर्णाया नीलायाः
स्त्वथवा दधि। घृतं वै कृष्णवर्णाया दिभक्तं गोचवं। उद-
कं सर्ववर्णानां तस्य वर्णो न गृह्यते। गोमूत्रस्य पलं ग्राह्यं अं-
गुष्ठार्द्धं तु गोमयं। क्षीरस्य त्रिपलं ग्राह्यं पलमेकं कुशोदकं
आपो हि ष्ठेति चालोड्य उद्धृत्य प्रणवेन तु। अग्नये स्वाहा।
सोमाय इंद्रवते इदं विष्णुर्मानस्तोके गायत्र्या प्रजापतेन
त्वदेतानीत्याज्याहुतीरग्नौ जुहुयात्। नदीप्रस्रवणे तीरे र-
हस्ये निर्झरे तथा। शुक्लवासाः पवित्रात्मा होमान्ते पितः
पिबेत्। पालाशेन च मात्रेण बिल्वपात्रेण वापिबेत्। तृती-
यं ताम्रपात्रं वा ब्रह्मपात्राणि तानि वै। प्रतिमासं पौर्णमास्या-
ममावास्यायां च वा पिबेत्। ब्रह्महा परदारी च येऽन्ये स्थि-
गतामलाः। ब्रह्मकूर्चो दहेत्सर्वं यथाग्निस्तृणमेव च॥

अथापरं ब्रह्मकूर्चं गोमूत्रभागस्तस्यार्द्धं शकृतः क्षीरस्यते त्रयः द्वयं दध्नो घृतस्यैकमेकं तु कुशवारिण इति ॥ जाबालिः ॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं । एकैकं प्रत्यहं पीत्वा त्वहोरात्रमभोजनं । कृच्छ्रः सांतपनो नाम सर्वपापप्रणाशन इति एतच्च सप्ताहसाध्यं ॥ अथ यतिसांतपनं ॥ शंखः ॥ एतदेव त्र्यहाभ्यस्तं यतिसांतपनं स्मृतं । एतदेव मिश्रितं पंचगव्यं दिनत्रयं पिबेदित्यर्थः ॥ अथ महासांतपनं ॥ शंखः ॥ एतदेव त्र्यहाभ्यस्तं ॥ याज्ञवल्क्यः ॥ पृथक्सांतपनद्रव्यैः षडहः सोपवासकः । सप्ताहेन तु कृच्छ्रोऽयं महासांतपनः स्मृतः गोमूत्रगोमयक्षीरदधिघृतकुशोदकैः । सांतपनद्रव्यैरेकैकस्मिन् दिन एकैकं पिबेत् । सप्तमदिवसउपवासः । एतानि कुशोदकादिप्राशनान्याहारांतरनिवर्त्तकानि एवमुत्तरत्रापि । यमः ॥ त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै गोमयं पिबेत् । त्र्यहं दधि त्र्यहं सर्पिस्त्र्यहं क्षीरं ततः शुचिः ॥ महासांतपनं ह्येतत्सर्वपापप्रणाशनं । एतत्पंचदशाहसाध्यं ॥ जाबालिः ॥ षण्णामेकैकमेतेषां त्रिरात्रमुपयोजयेत् । त्र्यहं चोपवसेदंत्यं महासांतपनं विदुरिति । षण्णां पूर्वोक्तगोमूत्रादीनामयमेकविंशतिरात्रसाध्यः ॥ अथातिसांतपनं ॥ यमः ॥ एतान्येव तथा पेयान्येकैकं तु त्र्यहं त्र्यहं । अतिसांतपनं नाम श्वपाकमपि शोधयेदिति । एतानि गोमूत्रादिकुशोदकांतानि षड्द्रव्याणि । एतच्च द्वादशाहसाध्यं ॥ अथ पर्णकृच्छ्रः

याज्ञवल्क्यः ॥ पर्णोदुंबरराजीवबिल्वपत्रकुशोदकैः ।
प्रत्येकं प्रत्यहाभ्यस्तैः पर्णकृच्छ्र उदाहृतः । पर्णैः पलाश-
पर्णादिपत्राणां कुशानां चैकैकस्य क्वाथोदकमेकैकस्मि-
न्दिने पिबेत् । एषपंचदिनसाध्यः ॥ जाबालः ॥ पालाश-
बिल्वपत्राणां पर्णान्यौदुंबराणि च । अश्वत्थस्य च पर्णा-
निअश्रोदेकैकशस्तथा । अहोरात्रोपवासश्च पर्णकृच्छ्रः प्रकी-
र्तितः । अयंचषडहसाध्यः ॥ विष्णुः ॥ कुशपलाशोदुंबर-
पद्मशंखपुष्पीवटब्रह्मसुवर्चलापत्रैः क्वथितस्यांभसः प्रत्यह-
पानं पर्णकृच्छ्र इति । शंखपुष्पी लताविशेषः ब्रह्मसुवर्चला
ब्राह्मीविशेषः । कुशादीनां मध्येऽन्यतममनिक्षिप्य क्वाथः
कर्त्तव्यः । अयंतु सप्ताहसाध्यः । शंखलिखितौ । पत्रबि-
ल्वपलाशोदुंबरकुशोदकान्येकैकमभ्यस्तानि पर्णकृच्छ्रः
समस्तान्येतानि त्रिरात्रेण प्रयुक्तानि पर्णकूर्च इति । अत्रापि
क्वाथस्याभ्यासे विशेषमाह यमः । एकैकं त्र्यहमश्नीयात्प-
र्णकृच्छ्रो विधीयत इति । एवं च पंचदशाहसाध्योयं । स-
मस्तान्येतानीत्यादि । पद्मबिल्वपलाशोदुंबरकुशोदका-
न्येतानि समस्तानि क्वाथयित्वा त्रिरात्रोपोषितः सन्पिबेत्स
पर्णकूर्चः ॥ तथा च यमः ॥ एतान्येव समस्तानि त्रिरात्रोपो-
षितः शुचिः । क्वाथयित्वा पिबेदद्भिः पर्णकूर्चो विधीयत इ-
ति ॥ अथ फलादिकृच्छ्रः ॥ मार्कंडेयः ॥ फलैर्मा-
सेन कथितः फलकृच्छ्रो मनीषिभिः । शरीरयात्रामात्रोप-

युक्तफलानि मासं भक्षयेत्। तत्र सर्वत्र साधारणी इतिकर्त्तव्यता
पि कर्त्तव्या। तानि च फलानि कानीत्याकांक्षायामाह स एव।
श्रीकृच्छ्रः श्रीफलैः प्रोक्तः पद्माक्षैरपरस्तथा। मासेनाम-
लकैरेवं श्रीकृच्छ्रमपरं स्मृतं। पत्रैर्मतः पत्रकृच्छ्रः पुष्पैस्त-
त्कृच्छ्र उच्यते। मूलकृच्छ्रः स्मृतो मूलैस्तोयकृच्छ्रो जले-
न तु इति। पत्रैः श्रीवृक्षादिपत्रैः तत्कृच्छ्रः पुष्पकृच्छ्रः। पुष्पा-
ण्यपि श्रीवृक्षादीनामेव। मूलान्यपि तेषामेव॥ अथ तप्त-
कृच्छ्रः॥ याज्ञवल्क्यः॥ तप्तक्षीरघृतांबूनामेकैकं प्रत्य-
हं पिबेत्। एकरात्रोपवासश्च तप्तकृच्छ्र उदाहृतः। दिनचतुष्ट-
यसाध्यः कृच्छ्रः। मिताक्षरायां तु अयं महातप्तकृच्छ्रः एभि-
रेव समस्तैः सोपवासैर्द्विरात्रसमाप्यः सांतपनवत्तप्तकृच्छ्र इ-
त्युक्तं॥ मनुः॥ तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिला-
न्। प्रतित्र्यहं पिबेदुष्णान् सकृत्स्नायी समाहितः। प्रतित्र्य-
हं जलादीन्प्रत्येकं त्र्यहं त्र्यहं पिबेदित्यर्थः। अयं च द्वादश-
रात्रसाध्यः। जलादिपरिमाणमाह पराशरः। अपां पिबे-
त्तु त्रिपलं द्विपलं तु पयः पिबेत्। पलमेकं पिबेत्सर्पिः त्रिरात्रं चो-
ष्णमारुतमिति। त्रिरात्रस्य पूरणमुष्णोदकवाष्पं पिबेदित्य-
र्थः। प्रकारांतरेणाप्याह तप्तकृच्छ्रं पराशरः। षट्पलं तु
पिबेदंभस्त्रिपलं तु पयः पिबेत्। पलमेकं पिबेत्सर्पिस्तप्तकृच्छ्रे
विधीयते। जलादिकमुष्णमेव ग्राह्यं॥ अथ शीतकृच्छ्रः
विष्णुः॥ त्र्यहमुष्णाः पिबेदापस्त्र्यहमुष्णं पयः पिबेत्।

त्र्यहमुष्णं घृतं पीत्वा नाश्नीयादेष तप्तकृच्छ्रः। एष एव शीतः शीतकृच्छ्रः। अयं दशदिनसाध्यः॥ पराशरः॥ त्र्यहं शीतं पिबेत्तोयं त्र्यहं शीतं पयः पिबेत्। त्र्यहं शीतं घृतं पीत्वा वायुभक्षस्त्र्यहं परं। द्वादशदिनसाध्य एषः॥ अथान्येपि कृच्छ्राः॥ शंखः॥ बिसान्युदकसिद्धानि मासमश्नीत संयतः। सक्तून्वा सोदकान्मासं कृच्छ्रो वारुण उच्यते। बिल्वैरामलकैर्वापि पद्माक्षैरथवा शुभैः। मासेन लोके श्रीकृच्छ्रः कथ्यते द्विजसत्तमैः। गोपुरीषाद्यवान्नं तु मासं नित्यं समाहितः। व्रतं तु यावकं कुर्यात्सर्वपापापनुत्तये॥ विष्णुः॥ उदकादिसक्तूनां मासाभ्यवहरणेनोदककृच्छ्रः बिसाभ्यवहरणे शीतकृच्छ्रः। उदकादीनि। उदकप्रधानानां सक्तूनां॥ जाबालः॥ अनश्नन् जलमध्यस्थो होरात्रं जपन्बुधः। संवत्सरकृतं पापं जलकृच्छ्रो व्यपोहति। जपो वारुणसूक्तानां॥ योगियाज्ञवल्क्यः॥ वायुभक्षो दिवा तिष्ठेद्रात्रिं नीत्वाप्सु सूर्यदृक्। सहस्राष्टाधिकां जप्त्वा गायत्रीं जलसंज्ञकः। द्वितीयदिने सूर्यं दृष्ट्वाष्टोत्तरसहस्रगायत्रीजपं कृत्वा पारणं कुर्यादित्यर्थः। अयं जलकृच्छ्रः॥ तथा। मासोपवासो विज्ञेयो दिनत्रिंशदुपोषणात्॥ तथा गोमूत्रकृच्छ्रः॥ आतपे स्थापितां गां गोधूमान्यवमिश्रितान्। तान्मे गोमयोत्थान्संगृह्य पचेद्गोमूत्रपावकमिति॥ अथ चांद्रायणं॥ याज्ञवल्क्यः॥ तिथिवृद्ध्या चरेत्पिंडान्शुक्ले शिख्यंडसंमितान्। एकैकं ह्रासयेत्कृष्णे पिंडं चांद्रायणं चरेत्। इंदुक्षये न भुंजीत एष चांद्रायणो विधिः। तिथिवृद्ध्या

प्रथमद्वितीयादिचंद्रकलायुक्तप्रतिपद्द्वितीयादितिथिषु ग्रासाचरे-
त्। भक्षयेत्। शुक्ले शुक्लपक्षेपि एवं तु संमितान्यपूर्वाणि प्रमाणा-
त्। चांद्रायणं। ह्रासवृद्धिभ्यां चंद्रस्यायनं चरणमिव चरणं यस्मि-
न्कर्मणि तच्चांद्रायणं संज्ञायां दीर्घः। इदं यवमध्यचांद्रायणं
मध्ये ग्रासाधिक्येन स्थूलत्वात्। गौतमस्त्वन्यथाह। अथा-
तश्चांद्रायणं तस्योक्तो विधिः कृच्छ्रे इति। कृच्छ्रे यदुक्तं तिष्ठेदह-
नीत्यादि तत्सर्वमत्र भवतीत्यर्थः। अत्र विशेषमाह। वपनं व्रतं चरे-
त्। व्रतं प्रायश्चित्तं। तदर्थं चांद्रायणं यत्र तत्र वपनं भवति। अभ्युद-
यार्थिनो न भवतीत्यर्थः। तथा पूर्वभूतां पौर्णमासीमुपवसेत्। पौर्ण-
मासीमाश्रित्य चतुर्दश्यामित्यर्थः। तथा आप्यायस्व सं ते पयांसि।
नवो नव इत्येताभिस्तर्पणमाज्यहोमो हविषश्चानुमंत्रणं उपस्था-
नं चंद्रमसो यद्देवा देवहेडनमिति च तसृभिराज्यं जुहुयाद्देवकृत-
स्येति चांते समिद्भिरों भूर्भुवः स्वस्तपः सत्यं यशः श्रीरूर्गिडोजस्ते-
जः पुरुषो धर्मः शिव इत्येतैर्ग्रासानुमंत्रणं प्रतिमंत्रं मनसा नमः स्वा-
हेति सर्वान्तैरेव ग्रासान् भुंजीत। आप्यायस्वेत्यादिभिर्नवो नव इत्यं-
तैस्त्रिभिर्मंत्रैस्तर्पणं कृत्वा चंद्रमस उपस्थानं कृत्वा आज्यहोमं ह-
विरनुमंत्रणं च कुर्यात्। चंद्रोपस्थाने मंत्रा आप्यायस्वेत्यादयः।
यद्देवा देवहेडनमिति चत्वार आज्यहोमे प्रतिमंत्रं च होमः। देवकृत-
स्यैनसोवयजनमसीत्यादिकैका ऋक्। समिद्भिरिति बहुवचना-
त्कपिंजलन्यायेन यद्यपि त्रित्वमेव प्रतीयते तथापि यद्देवा देवहेड-
नमिति च तसृभिरिति पूर्वमेव चतुःसंख्योपादानात्त्रित्वं तावदप-

गतं प्रकरणबलात्। अपगते च त्रित्वे देवकृतस्येत्येतस्मिन्नृगात्म-
कवाक्ये अवांतरवाक्यानां षट्संख्याकत्वात्समिद्भिरिति बहुवच-
नं षट्त्वे पर्यवस्यतीति वाक्यबलात् षडाहुतयः समिधां भवंति। पिं-
डकरणात्पूर्वं हविरनुमंत्रणे मंत्रा आप्यायस्वेत्यादयः। पिंडकर-
णानंतरं ॐमित्येवमादयः। ओं भूः भुवः स्वः। तपः। सत्यं। यशः। श्रीः।
ऊर्क्। इड्। ओजः। तेजः। पुरुषः। धर्मः। शिवः। इत्येते ग्रासानुमंत्र-
णे। अत्र मंत्रांते मनसा नम इति स्वाहेति वा प्रयुंजीत। तपःप्रभृति-
मंत्राश्चतुर्थ्यंताः। नमः स्वस्ति स्वाहेत्यादिसूत्रेण चतुर्थीविधाना-
त्। तथा ग्रासप्रमाणमास्याविकारेण चरुभैक्षसक्तुकणयाव-
कपिण्याकपयोदधिघृतमूलफलोदकानि हवींष्युत्तरोत्तरं प्र-
शस्तानि। पौर्णमास्यां पंचदश ग्रासान्भुक्त्वैकापचयेनापर-
पक्षमश्नीयादमावास्यायामुपोष्यैकोपचयेन पूर्वपक्षं। विपरीत-
मेकेषामेष चांद्रायणो मास इति। ग्रासप्रमाणमास्याविकारे-
णेति यदुक्तं तच्छिखंड्यंडपरिमितपंचदशग्रासभोजनासम-
र्थबालादिविषयं। एवमेव कुक्कुटांडामलकपरिमाणमपि
शक्त्यपेक्षया योज्यं। चतुर्दश्यामुपवासः पौर्णमास्यां पंचदश
ग्रासभोजनं तत एकैकग्रासह्रासश्चामावास्यायामुपवासः। ततः
पौर्णमासीपर्यंतं पंचदशग्रासवृद्धिरिति द्वात्रिंशद्दिनसाध्यं
भवति। ग्रासवृद्धौ ह्रासे च तिथिवृद्धिक्षयवशात्कदाचित्षो-
डशत्वं कदाचिच्चतुर्दशत्वमपि भवति। ग्रासस्तु चंद्रोदये जाते
ग्रसनीयः। उदयश्च कदाचिन्नक्तं कदाचिद्दिवेति तदनुसारेण।

कर्त्तव्यं ग्रासग्रसनं ॥ तथाच हारीतः ॥ चांद्रमसं चरुं श्रपयित्वा । नमो नम इति हुत्वा ज्योत्स्नायां चरुशेषात्पिंडान्साविश्यमिमंत्रितान्प्राश्नीयादिति । ग्रासग्रसनसमये यास्तिथयस्तत्स्वरूपा ग्राससंख्योपादेया ज्योत्स्नाशब्देन चंद्रोदयो लक्ष्यते । तथा चाहोरात्रावपि भोजने दोषो नास्ति ॥ शंखः ॥ आर्द्रामलकमात्रास्तु ग्रासा इंदुव्रते स्मृताः । तथैवाहुतयस्तत्र शौचार्थं चैव मृत्तिकाः ॥ मनुः ॥ एकैकं ह्रासयेत्पिंडं कृष्णे शुक्ले च वर्धयेत् । उपस्पृशंस्त्रिषवणमेतच्चांद्रायणं स्मृतं । अथ चांद्रायणांतराणि ॥ याज्ञवल्क्यः ॥ यथा कथंचित्पिंडानां चत्वारिंशच्छतद्वयं । मासेनैवोपयुंजीत चांद्रायणमथापरं । पिंडानां चत्वारिंशदधिकं शतद्वयं मासेनोपयुंजीत यथाकथंचिदिति । तत्रायं क्रमः दिने दिनेऽष्टौ ग्रासान्भुंजीत । अथवा नक्तं चतुरो दिवा चतुर इति । यद्वैकस्मिन् दिने चतुरोपरस्मिन्द्वादश उतैकरात्रमुपोष्यापरस्मिन्षोडश । यद्वा दिनद्वयमुपोष्य तृतीयदिने चतुर्विंशतिरित्यादिप्रकाराणां मध्ये शक्त्यपेक्षया भुंजीतेति । अत्र तिथ्यपेक्षया ग्रासनियमो नास्ति । उपक्रमस्तु शुक्लकृष्णप्रतिपदोरन्यतरत्र कर्त्तव्यः । यस्तु नैरंतर्येणैवंविधचांद्रायणानुष्ठानं करोति तस्य तिथिवृद्धिह्रासवशेन कदाचिद्द्वितीयादिष्वारंभो भवति तत्र न दोषः । चंद्रगत्यनुसरणमंतरेण त्रिंशद्दिनात्मकसावनमासानुष्ठेयत्वात् । अत्र चांद्रायणशब्दो गौणस्तद्धर्मप्राप्त्यर्थः । कुंडपायिनामयने अग्निहोत्रशब्दवत् । अस्मिंश्चांद्रायणे पूर्वप्रक्रांतमेकादश्युपवासादि न लुप्यते ।

तिथिनियमेन ग्रासनियमाभावात्। यत्र तु तिथिनियमेन ग्रासनिय-
मस्तत्र पूर्वप्रक्रांतमुपवासादिकमन्येन कारयेत्। एषेव प्रकारेण।
त्वन मनुना विशेषसंज्ञा दर्शिता। अष्टावष्टौ समश्नीयात्पिंडान्म-
ध्यदिने स्थिते। नियतात्मा हविष्यस्य यति चांद्रायणं चरन्। चतुरः
प्रातरश्नीयात्पिंडान्विप्रः समाहितः। चतुरोऽस्तमिते सूर्ये शिशुचां-
द्रायणं चरन्। यथा कथंचित्पिंडानां तिस्रोऽशीतीः समाहितः। मा-
सेनाश्नन्हविष्यस्य चंद्रस्येति सलोकतामिति। यमस्तु मासमध्ये
नवतिग्रासग्रसनमाह। त्रींस्त्रीन्पिंडान्समश्नीयान्नियतात्मा दृढ-
व्रतः। हविष्यान्नस्य वै मासमृषिचांद्रायणं स्मृतमिति॥ अथ
सोमायनं॥ एतदपि चांद्रायणधर्मकमेव। अथातश्चांद्रायणा-
मनुक्रमिष्यामः। इति हारीतेनेतिकर्त्तव्यतासहितं चांद्रायण-
मभिधाय एवमेव सोमायनमित्यादिशेषात्। तच्च कृष्णचतुर्थीमा-
रभ्य शुक्लद्वादशीपर्यंतमनुष्ठेयं॥ तथा च हारीतः॥ चतुर्थी-
प्रभृति चतुस्तनेन त्रिरात्रं त्रिस्तनेन त्रिरात्रं द्विस्तनेन त्रिरात्रमेकस्त-
नेन त्रिरात्रमेवमेकस्तनप्रभृति पुनश्चतुस्तनांतं याते सोम चतुर्थीत-
नूस्तपानः पाहि तस्यै स्वाहा। याते सोम पंचमी षष्ठीत्येवं यथार्थो-
स्तिथिहोमा एव माज्ञ एनोभ्यः पूतश्चंद्रमसा मान्यतां समानलो-
कतां सायुज्यं च गच्छतीति। चतुस्त्र्यादिक्रमेण स्तनानां ह्रासात्पु-
नरेकादिक्रमेणावृद्धेः कृष्णचतुर्थ्यैवारंभदिनमिति गम्यते। स्तनेन
त्रिरात्रमित्यभिहितत्वात्स्तन एव दोह इति प्रतीयते तदनुपपन्नं सा-
क्षान्न स्तनं तृप्तिसाधनमपि तु तत्स्थितं पयः। अग्रे च होमो विहितः

होमश्च द्रव्यसाध्यः। तच्च द्रव्यं क्लृप्तं तु गव्यपरित्यागेन कल्प्यमाज्या-
दिकं न युज्यते। तस्माच्चतुस्तनादिस्थितं दुग्धं गृहीत्वा यातेसोमे-
त्यादिभिर्मंत्रैः प्रतितिथि एकैकामाहुतिं हुत्वा पयः पिबेत्। चांद्राय-
णधर्मातिदेशाच्चांद्रायण एव पयःपानं। संन्यासस्त्वेवं कर्तव्यः। यातेसो-
मपंचमीतनूस्तपानः पाहि तस्यैस्वाहा इति पंचम्यां। एवं षष्ठ्याव-
द्यापदप्रयोगः। उत्तरत्राप्यमावास्यापर्यंतमेवमेव। पुनः प्रतिप-
दि प्रथमातनूरित्येवं प्रयोगः। ततो द्वितीयादिषु द्वितीयातनूरित्या-
दि। एतच्चतुर्विंशतिदिनसाध्यं। यथार्थोक्ततिथिहोमादित्युक्तत्वा-
च्चतुर्थीद्वादशीमध्ये यत्र तिथिक्षयो न भवेच्चतुर्विंशतिदिनानि
भवंति तदैव कर्तव्यं। एतत्सोमायनमशक्तविषयं। शक्तविषये
तु मार्कंडेयः। गोक्षीरं सप्तरात्रं तु पिबेत्स्तनचतुष्टयात्। स्तनत्रया-
त्सप्तरात्रं स्तनद्वयात्। स्तनेनैकेन षड्रात्रं त्रिरात्रं वायुभुग्भवेदि-
ति॥ अथ यावकव्रतं॥ शंखः॥ गोपुरीषाद्यवान्नं तु मासं नि-
त्यं समाहितः। व्रतं तु यावकं कुर्यात्सर्वपापापनुत्तये॥ अथाघम-
र्षणव्रतं॥ त्र्यहं तूपवसेद्युक्तस्त्रिरह्नोभ्युपयन्नपः। मुच्यते पा-
तकैः सर्वैस्त्रिर्जपित्वाघमर्षणं। यथाश्वमेधः क्रतुराट् सर्वपापा-
पनोदनः। तथाघमर्षणं सूक्तं सर्वपापापनोदनं। अत्रैव विशेष-
माह॥ विष्णुः॥ त्र्यहं त्रिषवणस्नानमाचरेत् त्रिःप्रतिस्नानम-
प्सु निमज्जेन्मग्नश्च त्रिरघमर्षणं जपेत्। दिवास्थितस्तिष्ठेत् रात्रौ
चासीनः कर्मणोंते पयस्विनीं दद्यादिति॥ याज्ञवल्क्यः॥ अना-
दिष्टेषु पापेषु शुद्धिश्चांद्रायणेन तु। धर्मार्थं यश्चरेदेतच्चंद्रस्येति

सलोकतां । कृच्छ्रकृद्धनकामस्तु महतीमश्नुते श्रियम् ॥ अ-
थ कृच्छ्रचान्द्रायणसाधारणेतिकर्त्तव्यता ॥ याज्ञव-
ल्क्यः ॥ कुर्यात्त्रिषवणस्नायी कृच्छ्रं चान्द्रायणं तथा । पवि-
त्राणि जपेत्पिंडान् गायत्र्या चाभिमंत्रयेत् । त्रिषवणस्नायी सन्
कुर्यात् । पवित्राणि अघमर्षणं देवकृतः शुद्धवत्यस्तरत्समंदी-
त्यादि वशिष्ठादिप्रदर्शितानि ऋग्यजुःसामसु व्यवस्थितानि
यथाशाखं जपेत् । अविरुद्धकालेषु पिंडान् ग्रासान् गायत्र्याभि-
मंत्रयेत् । ग्रासानुमंत्रणे गौतमोक्तैर्वा भूरित्यादिमंत्रैः सह गाय-
त्र्या विकल्पः । एवं जपादिष्वप्येककार्याणां मंत्राणां विकल्पः
भिन्नकार्याणां समुच्चय इति ज्ञातव्यं ॥ मनुः ॥ महाव्याहृतिभि-
र्होमः कर्त्तव्यः स्वयमन्वहं । अहिंसासत्यमक्रोधमार्जवं तु समाच-
रेत् । त्रिरह्नस्त्रिर्निशायां तु सवासा जलमाविशेत् । स्त्रीशूद्रपति-
तांश्चैव नाभिभाषेत कर्हिचित् । स्थानासनाभ्यां विहरन्नशक्तो-
ऽधः शयीत वा । ब्रह्मचारी व्रती च स्याद्गुरुदेवद्विजार्चकः । सावि-
त्रीं च जपेन्नित्यं पवित्राणि च शक्तितः । सर्वेष्वेव व्रतेष्वेवं प्राय-
श्चित्तार्थमादृत इति । दिवा त्रिः रात्रौ त्रिरिति पदद्वयं षट्सवनन
स्नानं तच्छ्रकविषयं । एवं न्यूनाधिकस्नानान्यन्यान्यपि शास्त्रव्यव-
स्थया योज्यानि । तप्तकृच्छ्रे तु सकृदेव स्नानं सकृत्स्नायी समाहित
इति तत्र मनुना विशेषाभिधानात् ॥ जाबालः ॥ प्रारंभे सर्व-
कृच्छ्राणां समाप्तौ च विशेषतः । आज्येनैव वह्निप्रालाग्नौ जुहु-
याद्व्याहृतीः क्रमात् । श्राद्धं कुर्याद्व्रतान्ते तु गोहिरण्यान्नदक्षि-

णा। गृहे गृही वसन् कुर्वन्निह लोके महीयते। स्त्रीणां होमो न दातव्यः पंचगव्यं तथैव च॥ पराशरः। स्त्रीशूद्रस्य तु शुद्ध्यर्थं प्राजापत्यं समाचरेत्। पंचगव्यं तु कुर्वीत स्नात्वा पीत्वा शुचिर्भवेत्। पंचगव्यस्य विहितत्वात् इति षिद्धत्वाद्विकल्पः। जाबालेन गृह्यस्याग्नौ होमं विधाय स्त्रीणां होमो न दातव्य इति निषेधात् गृह्याग्नावेव होमनिषेधः। अतश्च स्त्रीशूद्रयोरपि ब्राह्मणद्वारा लौकिकाग्नौ होमो भवत्येव। अत एव धर्मविवृतौ। उपवासो व्रतं होमं तीर्थस्नानं जपादिकं। विप्रैः संपादितं यस्य संपन्नं तस्य तद्भवेदिति। यत्तु विवचने। पंचगव्यं पिबेत् शूद्रो ब्राह्मणस्तु सुरां पिबेत्। उभौ तौ तुल्यकर्माणौ पूयास्ये नरके व्रजेदिति। तत्प्रायश्चित्तांगपंचगव्यप्राशने वेदितव्यं॥ वैशंपायनः॥ स्नानं द्विकालमेव स्याद्विकालं वा द्विजन्मनः॥ शंखः॥ एकवासा आर्द्रवासा लघ्वाशी स्थंडिलेशाय इति॥ हारीतः॥ अवरं शुद्धवतीभिः स्नात्वाघमर्षणमंतर्जले जपित्वा धौतमहतं वासः परिधाय सम्यक् आद्। सौम्येनादित्यमुपतिष्ठेतेति। षड्विंशन्मतेपि। जपहोमादि यत्किंचित्कृच्छ्रोक्तं संभवेन्न चेत्। सर्वव्याहृतिभिः कुर्याद्गायत्र्या प्रणवेन चेति॥ शंखः॥ एकवासाचरेद्दीक्षां स्नात्वा वासो न पीडयेत्। गायत्र्या दशसाहस्रमाह्निकं जप उच्यते॥ बौधायनः॥ अहतं वासो वसीत। सावित्रीं व्याहृतीश्चैव जपेदष्टसहस्रकं। ओंकारमादितः। कृत्वा रूपे रूपे तथा ततः। सूर्मो वीरासने युक्तः कुर्याज्जप्यं सुसंयतः। आसीनः शल्क्वाविद्धो-

त्पिबेद्गव्यं पयः सकृत्। गव्यस्य पयसोऽलाभे गव्यमेव भवे-
द्दधिः। दध्नोऽलाभे भवेत्तक्रं तक्रालाभे तु यावकं। एषामन्यत-
मं यत्तु उत्पद्यते तच्च तत्पिबेत्। शल्यविद्धोवेत्यत्र वाशब्द उप-
मार्थे शल्यविद्ध इव निश्चलः सन्नासीनः पयः पिबेदित्यर्थः
॥ यमः ॥ अंगुल्यग्रे स्थितं पिंडं गायत्र्या चाभिमंत्रितं। प्राश्या-
चम्य पुनः कुर्याद्दन्यस्याप्यभिमंत्रणं। आपोशानकर्मानंतरं
पंच प्राणाहुतयोऽपि पंचभिर्ग्रासैः प्राणाय स्वाहेत्यादिमंत्राभि-
मंत्रिते भवंति। अत्र चौमित्यादिमंत्राः समुच्चीयंते। यदि गाय-
त्र्या पिंडाभिमंत्रणं तदा गायत्री प्राणाय स्वाहेत्यादयश्च।
अथों भूरित्यादिभिस्तर्हि ते प्राणाय स्वाहेत्येवमादयश्च भ-
वंति। यदा चत्वारस्त्रयो वा ग्रासाः तत्र बौधायनोक्तो विशेषः
अश्नीयात्प्राणायेति प्रथममपानायेति द्वितीयं व्यानायेति
तृतीयमुदानायेति चतुर्थं समानायेति पंचमं। यदा चत्वारस्त-
दा द्वाभ्यां प्रथमं यदा त्रयस्तदा द्वाभ्यां द्वाभ्यां पूर्वौ यदा द्वौ तदा
द्वाभ्यामेवोत्तरमेकं सर्वैरिति। अस्यार्थः। यदा चत्वारो ग्रासा भ-
क्ष्यंते तदाद्यद्वितीयाभ्यां प्रथमं ग्रासं ग्रसेत्। तृतीयेन द्वितीयं
चतुर्थेन तृतीयं पंचमेन चतुर्थं। यदा त्रयस्तदाद्यद्वितीयाभ्यां
प्रथमं तृतीयचतुर्थाभ्यां द्वितीयं पंचमेन तृतीयं। यदा द्वौ तदा
प्रथमत आरभ्य त्रिभिः प्रथमं निमाभ्यां द्वाभ्यां द्वितीयं यदा
त्वेकस्तदा तं सर्वैरेव ग्रसेदिति॥ अथ कृच्छ्रप्रत्याम्नायाः॥
मन्वाद्युक्तद्वादशवार्षिकादिचरणं मुख्यं। तदशक्तौ द्वादश-

द्वादशाहिनान्येकैकं प्राजापत्यं । एवं गणयमाने द्वादशवार्षि-
के प्राजापत्यानां षष्ट्यधिकं शतत्रयं भवति । तदशक्तौ तावत्यो
धेनवः । धेन्वसंभवे तावन्निष्कदानं । निष्कशब्देन धेनुमूल्यम-
प्यभिधीयते । तथा च स्मर्यते । प्राजापत्यक्रियाऽशक्तौ धे-
नुं दद्याद्द्विजोत्तमः । धेनोरभावे दातव्यं मूल्यं तुल्यं न संशय इ-
ति । तुल्यं संपूर्णं । संपूर्णमूल्यदानाशक्तौ तावंत उपवासाः ।
तत्राप्यशक्तावयुतगायत्रीजपः कृच्छ्रप्रत्याम्नायः ॥ तथा च
पराशरः ॥ कृच्छ्रोऽयुतं तु गायत्र्या उदवासस्तथैव च । धेनुप्रदा-
नं विप्राय सममेतच्चतुष्टयमिति । षट्त्रिंशन्मते । कृच्छ्रोऽयुतं
च गायत्र्या द्वादश ब्रह्मभोजनं । तिलहोमसहस्रं तु सममेतच्चतु-
ष्टयं । धेनुर्निष्कस्तदर्द्धार्द्धं प्राणायामशतद्वयं । तिलहोमसह-
स्रं तु वेदाध्ययनमेव च विप्राध्ययनं संहितामात्रपारायणं । विप्रा
द्वादश वा भोज्याः पावकेष्टिस्तथैव चेति । एते समानप्रत्याम्नायाः
महापातकेषु षष्ट्यधिकं शतत्रयं भवंति शक्त्याद्यपेक्षया द्विगुण-
त्रिगुणादिकं कल्पनीयं । महापातकसमेषु महापातकप्राय-
श्चित्तापेक्षयार्द्धेनं । अतिदिष्टेषु चार्द्धं । त्रैवार्षिकप्राजापत्यवि-
षयमूलेषूपपातकेषु पादकः । त्रैमासिकप्रायश्चित्तविषये षूप-
पातकेषु सार्द्धसप्तप्राजापत्यानि । मासिकव्रतविषये तु सार्द्धप्रा-
जापत्यद्वयं । चांद्रायणापनोद्य उपपातके प्राजापत्यत्रयं ॥
तथा च धर्मविवृतौ ॥ चांद्रायणं मृगारेष्टिः पवित्रेष्टिस्त-
थैव च । मित्रविंदा पशुश्चैव कृच्छ्रत्रयमथापि वा । तिलहोमाद्यु

तच्चैव पाराकद्वयमेव च। गायत्र्या लक्षमेकं तु सामान्याहुर्मनीषिण इति। पिपीलिकामध्यादिचांद्रायणासमर्थस्यातिधनिनो धनद्वारा प्रायश्चित्तं चिकीर्षतः प्राजापत्यप्रत्याम्नाया षष्टिर्भवंति॥ **तथा च चतुर्विंशतिमते**॥ षष्टिश्चांद्रायणे देयाः प्रत्याम्नायविधौ सदेति। प्रत्याम्नायाधिक्यात् पूर्वोक्तविषयताकल्पना। मासातिकृच्छ्रविषयभूत उपपातके सार्द्धसप्तप्राजापत्यानि। **तथा च चतुर्विंशतिमते**। प्राजापत्ये तु गामेकां दद्यात्सांतपने द्वयं। पराकतप्तातिकृच्छ्रे तिस्रस्तिस्रस्तु गाः तथैवेति। द्वादशदिनसाध्यः प्रतिकृच्छ्रः। तस्य मासमाचरणे सार्द्धसप्त प्राजापत्यकृच्छ्रा भवंति। एतच्चैकैकं ग्रासमश्नीयादिति मनूक्तातिकृच्छ्रो याज्ञवल्क्योक्तपाणिपूरान्नभोजनातिकृच्छ्रे तु प्राजापत्यद्वयमेवातिकृच्छ्रस्थाने। प्राजापत्ये एकभक्तत्रयेपि सायंतनभोजनत्रयनिवृत्तावेकोपवासनिष्पत्तिः। **तथा हि** एकस्मिन्दिवसे दिवा रात्रौ चेति द्विर्भोजनं। तत्र भोजनद्वयनिवृत्तौ सार्द्धोपवासः प्राप्नोति यद्यपि तथापि दिनत्रयेपि किंचित्किंचिदुन्यत इत्येकोपवास एव परिकल्पनीयः। एवं नक्तत्रयेपि अयाचितत्रयेपि। एवमुपवासत्रयं दिनत्रयं शुद्धोपवास इति षडुपवासाः प्राजापत्ये भवंति। एवमन्यत्राप्यूहनीयं। ऋषभैकादश गोदानयुक्तत्रिरात्रोपवासात्मकगोवधव्रते तु सार्द्धैकादशप्राजापत्यकृच्छ्रः। पराकात्मकोपपातकव्रते प्राजापत्यत्रयं मासपयोव्रते सार्द्धप्राजापत्यद्वयं। **तथा च षड्विंशन्मते**।

पाराकतमातिकृच्छ्रस्थाने कृच्छ्रत्रयं चरेत् । सांतपनस्य चा-
र्द्धार्द्धमशक्तो व्रतमाचरेदिति । पराकाद्य ऽ शक्तो प्राजापत्यत्रयं
सांतपनाशक्तो मार्द्धप्राजापत्यं चरेदित्यर्थः । सर्वत्र शक्त्याद्यपेक्ष-
याद्विगुणात्रिगुणादिकं कल्पनीयं ॥ **अथ तीर्थप्रत्याम्ना-
यः** ॥ तत्र समूलत्वप्रदर्शनार्थमादित्यपुराणोक्तं किंचिल्लि-
ख्यते । पांडवा राज्यलाभाय दुरितोपशमाय च । श्रीकृष्णना-
रदव्यासश्रीकंठब्रह्मजरोमशाः मार्कंडेयपुलस्त्याजसप्तर्षि-
प्रमुखास्तथा । द्वादशद्वादशाब्दाभि कृच्छ्राण्यायायभक्तितः
तीर्थैरकुर्वन्नित्यादिपुराणेश्रूयते कथेति । स्मृतिसंग्रहस्मृत्यर्थ-
साराद्भिरुक्तप्रकारोस्माभिरपि लिख्यते । तत्र संकल्पपूर्व-
कं पङ्गुः षष्टियोजनागतस्य भागीरथ्यां स्नानं षडब्दकृच्छ्र-
समं । अत्र एकैकस्य यात्रायोजनस्य द्वादशार्द्धकृच्छ्रवृद्धिः प-
रिकल्पनीया षष्टियोजनागतस्य षडब्दत्वात् दशयोजना-
गतस्याब्दप्रायश्चित्तं भवति । एवं च न्यूनीयं दशाधिकयोजना-
दागतस्य भागीरथ्यां विध्युक्तस्नाने नैकः कृच्छ्रो भवति । म-
ध्ये चेत्पर्वतादिभिः व्यवधानं भवति । पर्वताद्यभावे मार्गस्या-
दुर्गमत्वे च योजनागतस्य शक्तस्य गंगास्नानमेकः कृच्छ्रः
अशक्तस्यार्द्धयोजनादागतस्य शक्तस्यापि मार्गस्य दुर्गम-
त्वे अर्द्धयोजनादागतस्येत्येवं कल्पनीयं । पूर्वं सप्तमातृकारा-
क्षसभयान्नद्यो जाताः । गते च भये पुनर्देवता अभूवन् । ततो
नद्यः शुष्काः । तेषु स्थानेषु भागीरथी समभवत् । तासु विष्णु

गंगादिसप्तमातृकाणामनुगंगासु स्नानं षष्टियोजनागतस्य षडब्दकृच्छ्रतुल्यं प्रयागे वाराणस्यां गंगाद्वारे गंगासागरसंगमे च द्विगुणं। यमुनायां विंशतियोजनागतस्य स्नानं द्व्यब्दकृच्छ्रसमं मथुरायां द्विगुणं सरस्वत्यां चत्वारिंशद्योजनागतस्य चतुरब्दसमं। प्रभासे द्वारावत्यां च द्विगुणं यमुनासरस्वत्योर्यथा योजनह्रासे पादकृच्छ्रवृद्धिः ह्रासस्तु पूर्वोक्तरीत्या कल्प्यः। दृषद्वती शुतुद्री विपाशा वितस्ता शरावती मरुद्वृधा मधुमती पयस्विनी घृतवती इत्यादिदेवनदीषु स्नानं त्रिंशत्कृच्छ्रसमं पंचदशयोजनागतस्य। चंद्रभागा वेत्रवती सरयू गोमती देविका कौशिकी नित्यजला मंदाकिनी सहस्रवक्त्रा पौनःपुन्या पूर्णा प्रणाया बाहुदा गंडकी वारुण्यादिदेवनदीषु स्नानं पंचदशयोजनागतस्य पंचदशकृच्छ्रसमं। एतासु महानदीषु परस्परसंगमे योजनागतस्य कृच्छ्रत्रयफलं। समुद्रगामहानदीभिः सह पूर्वोक्तदेवनदीनां संगमे योजनागतस्य षट्कृच्छ्रफलं। अनुक्तस्थलेषु यथा योजनसंख्या कृच्छ्रसंख्या विज्ञेया। महानदेषु महानद्यर्द्धफलं। शोणामहानदे तु गंगार्द्धफलं। नदेषु नद्यर्द्धफलं। गयामहानदीं सेतुं रामेश्वरं पद्मनाभं श्रीरंगं पुरुषोत्तमं कुरुक्षेत्रं नैमिषं बदर्याश्रमं प्रयागारण्यं केदारं श्रीशैलं महालयं रुद्रकोटिं पुष्करं नर्मदामाम्नातकेश्वरं कुब्जाम्रं प्रभासं कोकामुखं विजयेशं पुरींद्रं पंचनदं गोकर्णं मथुरामयोध्यां द्वारवतीं गयां कांचीं शा

ल्पग्रामं यं भक्त्या प्राप्य मिस्यादि मुक्तिकोशारिणां सेव्यं गंगासमं फ-
लं लभेत । चतुर्विंशतियोजनागतस्य नर्मदायां स्नानं चतुर्विं-
शतिकृच्छ्रफलं । कुब्जिकासंगमे द्विगुणं । शुक्लतीर्थे चतुर्गु-
णं । अष्टयोजनागतस्य ताप्यामष्टकृच्छ्रफलं । तथापयो-
ष्ण्यामपि । पूर्णासंगमे द्विगुणं । षष्टियोजनागतस्य गोदावर्यां
षष्टिकृच्छ्रसमं । त्रिंशद्योजनागतस्यैकादशतीर्थप्रतिलो-
मानुलोमस्नानं षष्टिकृच्छ्रसमं । वंजरासंगमे तद्द्विगुणं । सप्त-
गोदावरे भीमेश्वरे त्रिगुणं । कृष्णानर्मदयोर्द्वादशयो-
जनागतस्य द्वादशकृच्छ्रसमं । प्रणीतायामष्टयोजनागतस्या-
ष्टकृच्छ्रफलं । पूर्णायां तद्वत् । कृष्णावेण्यां योजनसंख्यया
कृच्छ्रसंख्या । तथा तुंगभद्रायामपि । पंपासंगमे द्विगुणं । हरिह-
रे त्रिगुणं । भीमरथ्यामपि योजनसंख्यया कृच्छ्रसंख्या । ककु-
द्मिनीसंगमे दशयोजनागतस्य पंचदशकृच्छ्रफलं । मला-
पहारिण्यां योजनसंख्यया कृच्छ्रसंख्या । तथा निवृत्त्यामपि ।
कुद्मिनीसंगमे दशयोजनागतस्य पंचदशकृच्छ्रं । गोदावर्यां या-
या योजनशतेऽष्टौ पादकृच्छ्रवृद्धिः । सिंहे गुरौ सर्वत्र जाह्नवीस-
मा । कन्यास्थे गुरौ कृष्णावेण्यां सर्वत्र जाह्नव्यूर्ध्वं तुंगभद्रा-
यां तुलास्थे रवौ कर्कस्थे च गोगांगं । कृष्णावेण्यां मलापहा-
रिणीसंगमे त्रिंशद्योजनागतस्य त्रिंशत्कृच्छ्रसमं । भीमरथी-
संगमे द्विगुणं । तुंगभद्रासंगमे त्रिगुणं । निवृत्तिसंगमे चतुर्गु-
णं । ब्रह्मप्रवरे पंचगुणं । मल्लिकार्जुनसमीपे नालगंगायां

षड्गुणं। कावेर्यां महानद्यां दशयोजनागतस्य पंचदशकृच्छ्रफ-
लं। द्वादशयोजनागतस्य द्वादशकृच्छ्रसमं। तासु परार्द्धकीर्त्ति-
मात्मपयस्विनीषु। महाद्रिपादोद्भूतानद्यो योजनमविच्छि-
न्नप्रवाहरूपा एव देव्यो नुसारेण योजनागतस्यैकद्वित्रिकृच्छ्र-
फलदाः। विंध्यश्रीशैलोद्भवा द्विगुणाः। हिमाचलोद्भूतास्त्रिगु-
णाः। स्मृतिपुराणादिषु यथा कथंचिदनुक्तकुल्यायोजनगत-
स्य त्रिरात्रफलदाः। अल्पनद्यः कृच्छ्रफलदाः। नद्यो हि कृच्छ्र-
फलदाः। महानद्यः कृच्छ्रत्रयफलप्रदाः। एकयोजनगादिषट्
योजनगांताः स्वयंस्रवः कुल्याख्याः तो द्वादशयोजनगांता अल्प-
नद्यः। चतुर्विंशतियोजनगांता नद्यः। चतुर्विंशतियोजना-
धिकगा महानद्यः समुद्रगाश्च। यत्र च महानदीति व्यपदेश-
स्ताश्च महानद्यः। उपवाससहितं महानदीस्नानं योजनाद-
र्वागपि कृच्छ्रसमं। कुत्सितनाम्न्यो नद्यः पापनाम्न्यश्च वर्ज्याः।
समुद्रस्नानं सर्वत्र दर्शे कार्यं। देवतासमीपे सरो नदी संगमेषु
च सर्वदा कार्यं। पंचदशयोजनागतस्य समुद्रस्नानं पंचदश
कृच्छ्रफलं। प्रसिद्धदेवतासमीपे द्विगुणं। तत्र स्नात्वा तद्देवता-
दर्शने तु त्रिगुणं। त्रिंशद्योजनदूरान्सेतुगमनं त्रिंशत्कृच्छ्र-
समं। तत्र स्नात्वा रामेश्वरदर्शने द्विगुणं। विंध्यदेशीयानां
सेतुरामेश्वरे जाह्नव्यां त्रिगुणफलं। तथैव जाह्नवीकेदार-
योरपि। दक्षिणदेशीयानां जाह्नव्यां षड्गुणं। गंगादेशीया-
नां सेतुरामेश्वरे षड्गुणं। सर्वत्र भाषाभेदे पर्वतादिनिर्व्यवधा-

ने मार्गस्य दुर्गमत्वे चोक्तयोजनसंख्यातो योजनसंख्याह्रासेन
कृच्छ्रादिफलानि कल्प्यानि। अयासाधिक्यात्। सार्वदैशाव-
माहेश्वरसौरशाक्तेयपीठप्रदर्शने न योजनसंख्यया कृच्छ्रसं-
ख्याप्रख्याते पुष्टिगुणं। तीर्थतीरस्थितस्यापि योजनपरिमि-
तात्स्वदेशादागमनमंतरेणापि विधिवत्स्नात्वा धौतवासः प-
रिधाय शिरोरुहे मुंडनादेशमस्तु पुनः स्नातव्यं एवं द्वादशभिः
स्नानैरेकः कृच्छ्रो भवति। परार्थं गंतुः षोडशांशफलं। प्रसंग-
गंताऽर्द्धफलं लभते। अनुषंगेण तीर्थप्राप्य स्नानफलमेव
लभते न यात्राफलं। पितृपितामहभ्रातृमातामहमातुलश्व-
शुरपोषकार्थं तदर्द्धं गुर्वाचार्योपाध्यायार्थं तेषां पत्न्यर्थं मातृश्व-
सृपितृष्वसर्थं च स्नात्वा स्वयमष्टमांशं लभते। साक्षात्पित्रोः
कुर्वन्पुत्रश्चतुर्थांशं लभते। दंपती च सपत्न्यश्च मिथोऽर्द्धं लभ-
ते फलं॥ देवलः॥ अभिगम्य तीर्थानि पुण्यान्यायतना-
नि च। प्रमुच्यंते नराः पापात् ब्राह्मणा ये तपस्विनः। सर्वास-
मुद्रगाः पुण्याः सर्वे पुण्या नगोत्तमाः। सर्वमायतनं पुण्यं सर्वे
पुण्या वनाश्रया इति॥ **अथ सामान्येन पापनिःकृति-
हेतवः॥ तत्र गौतमबौधायनौ॥** तस्य निःक्रमणा-
नि जपः तपो होम उपवासो दानं। उपनिषदो वेदांताः सर्वच्छं-
दःसु संहिताः मधून्यघमर्षणं। अथर्वशिरो रुद्राः पुरुषसूक्तं
राजनरौहिणे सामनी बृहद्रथंतरे पुरुषगतिर्महानाम्न्यो
महावैराजं महादिवाकीर्त्यं ज्येष्ठसामान्यन्यतमं बहिःपव-

मानं कूष्मांडानि पादमान्यः सावित्री चेति पावनानि। पयो-
व्रतं शाकफलभक्षता प्रसृतयावको हिरण्यप्राशनं घृतप्रा-
शनं सोमपानमिति मेध्यानि। सर्वे शिलोच्चयाः सर्वाः स्रवं-
त्यः पुण्याः ह्रदास्तीर्थान्यृषिनिवासो गोष्ठं परिस्कंद इति दे-
शाः। ब्रह्मचर्यं सत्यवचनं सवने शूद्रकोपस्पर्शनं आर्द्रव-
स्त्रता अधःशायिता ऽनाशक इति तपांसि। हिरण्यं गौर्वासो
ऽश्वो भूमिस्तिला घृतमन्नमिति देयानि। संवत्सरः षण्मासाः
चत्वारः त्रयो द्वावेकश्चतुर्विंशत्यहो द्वादशाहः षडहस्त्र्य-
हो ऽहोरात्र इति कालाः। एतान्येवानादेशे विकल्पेन क्रियेर-
न्नेनःसु गुरुषु गुरूणि लघुषु लघूनि कृच्छ्रातिकृच्छ्रौ
चांद्रायणमिति सर्वप्रायश्चित्तमिति। अस्यार्थः। तस्य पा-
पस्य निष्क्रयणानि संशोधनकारणानि। जपादीनाम-
न्यतमस्यापि पापनिर्हरणहेतुत्वमस्त्येव। प्रत्येकमस-
मस्तत्वेन निर्देशात्। रहस्यब्राह्मणान्युपनिषदः। बृह-
दारण्यकादयो वेदांताः। उपनिषत्स्वेपि बृहदारण्यका-
दीनां पृथग्ग्रहणमाधिक्यद्योतनार्थं। सर्वशाखासु पद-
क्रमरहिताः मंत्रग्रंथाः सर्वछंदस्सु संहिताः। मधुवाता-
इत्यादि यजूंषि मधूनि। ऋतं च सत्यं चेति सूक्तमघमर्षणं
अथर्वशिरोऽथर्ववेदैकदेशः प्रसिद्धः। नमस्ते रुद्रमन्यव
इत्यध्यायो रुद्राः। सहस्रशीर्षेत्यध्यायः पुरुषसूक्तं।
राजन्यरौहिणे सामनी इंद्रं नरो नेमधिता हिरण्मय इत्य-

स्यामृच्चि गीयेते। बृहद्रथंतरे त्वामिद्धि हवामहे अभि त्वा शूर
नोनुम इत्यनयोर्गीतिः। पुरुषगतिः अहमस्मि प्रथमजा ऋ-
तस्येत्यस्यां गीतं सामैव। विदामघवन्निस्यास्यामृचो महाना-
म्नः। पिबा सोममिंद्रेत्यस्यां गीतं साम महावैराजं। विभ्राड्बृह-
त्पिबतु सोम्यं मध्वित्यस्यां गीतं सामं महादिवाकीर्त्यं। आज्यदो-
हाख्यानि सामानि ज्येष्ठसामानि। उपास्मै गायतेति स्तोत्रं बहि-
ष्पवमानं। यद्देवा देवहेडनमित्यादीनि यजूंषि कूष्मांडानि। स्वा-
दिष्ठया मदिष्ठयेत्यस्या ऋचः पावमान्यः। गोमयमध्यस्थित-
यवसाधितायवागूः प्रसृतयावकः। गोस्थं प्रसिद्धं। परिस्कंदो गो-
व्रजनमार्गः। सर्वप्रायश्चित्तं सर्वत्रादेशेच प्रायश्चित्तमित्यर्थः।
विश्ववामित्रः॥ उपपातकयुक्तानामन्नादिष्वेवहि। प्रका-
शे च रहस्ये च अभिसंध्यायाद्यापिवा। शक्तिजातिगुणान्दृ-
ष्ट्वा सकृद्बुद्धिकृतं लघु। अनुबंधादिकं दृष्ट्वा कल्प्यं सर्वं यथाग-
मे। प्रकाशउक्तं यत्किंचिद्धि शाड्भागो रहस्यके। विंशद्भागः ष-
ष्टिभागः कल्प्योजात्याद्यपेक्षया॥ अथ पर्षत्॥ तत्र धर्म-
विवृतौ॥ क्षत्रियो ह्यथ वैश्यो वा शूद्रो वा न कथंचन। प्राय-
श्चित्तविधानं हि कुर्वीतेति विदुर्बुधाः। अव्रतानाममंत्राणां
जातिमात्रोपजीविनां। सहस्रशतयुक्तानां पर्षत्त्वं नैव विद्यते।
पातके तु शतं पर्षत्सहस्रं महदादिषु। उपपापेषु पंचाशत्स्व-
ल्पे स्वल्पा तथा भवेत्। बहुभिर्विद्वद्भिर्मिलित्वा विचार्य प्राय-
श्चित्तं विधेयमिति शतादिशब्दानां तात्पर्यार्थः॥ अत एव॥

याज्ञवल्क्यः ॥ चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा।
सा ब्रूते यं स धर्मः स्यादेको वाध्यात्मवित्तम इति। वेदधर्म-
शास्त्रज्ञाः चत्वारो ब्राह्मणाः पर्षत्। ऋग्यजुःसामात्मिका-
स्तिस्रो विद्याः। तत्समूहस्त्रैविद्यं ते न चतरध्येतारस्त्रयो ब्रा-
ह्मणास्तत्त्रयं ते त्रयः पर्षदित्यर्थः। अत्रापि धर्मशास्त्रज्ञत्वम-
नुवर्तते। एवमुत्तरत्रापि। आत्मानमधिकृत्य प्रवृत्तं शास्त्र-
मध्यात्मं ॥ अंगिराः ॥ चातुर्विद्यं विकल्पी च अंगविद्धर्मपा-
ठकः। त्रयश्चाश्रमिणो वृद्धाः पर्षदेषा दशावराः। चतुर्णा-
मपि वेदानां पारगाश्च द्विजोत्तमाः। यथा कर्म विनांगैश्चा-
तुर्विद्यमिति स्मृतं। धर्मस्य पर्षदश्चैव प्रायश्चित्तक्रमस्य च।
त्रयाणां यः प्रमाणज्ञः स विकल्पी भवेद्द्विजः। शाब्दे छंदसि
कल्पे च शिक्षायां च सुनिश्चितः। ज्योतिषामयने चैव सनिरु-
क्तेंगविद्भवेत्। वेदविद्याव्रतस्नातः सत्यसंधो जितेंद्रियः। अ-
नेकधर्मशास्त्रज्ञः प्रोच्यते धर्मपाठकः। त्रयश्चाश्रमिणः स-
र्वे पर्षदेषा दशावरेति। हैतुकोनुमानज्ञः। तर्कोस्यास्तीति
तर्की। संशये सत्येकस्मिन्कोटौ प्रामाणिकत्वारोपे कृते बा-
धकादर्शनात्तत्त्वमारोपमात्रं भवितव्यमिति यः प्रत्ययः स त-
र्कः स च वेदशास्त्राविरोधी ग्राह्यः॥ अथ पर्षदुपस्थानं।
मनुः ॥ प्रायश्चित्तीयतां प्राप्य दैवात्पूर्वकृतेन वा। न संसर्गं
व्रजेत्सद्भिः प्रायश्चित्तेऽकृते द्विजः। दैवादृष्टवशादिहजन्म-
कृतपापेन पूर्वकृतेन। अपित्वश्यावदंतत्वाद्यनुमितेन।

यथा कुनखिश्यावदंतास्यः कुनखादीन्युत्पाद्य कुनखी-
श्यावदंतश्च कृच्छ्रं द्वादशरात्रं चरेदिति वशिष्ठाद्युक्तप्राय-
श्चित्तं कुर्युः। केवलकुनखादिनिमित्तं न कुनखादिनिदान-
भूतसुवर्णस्तेयादिनिमित्तं। यथा क्षयित्वेपि रोगनिमित्त-
दानादिरूपप्रायश्चित्तमेव न तु निदानभूतब्रह्महत्यादिप्रा-
यश्चित्तं। युक्तं चैतत्। चरमफलविनाश्यं हि कर्म रोगादी-
नि चरमफलानि। विस्तृतं चैतन्मिताक्षराटीकायां सुबोधि-
न्यां प्रायश्चित्ताध्याये॥ अंगिराः॥ उपस्थितस्तु न्यायेन-
ह्यनादेशनमर्हति। कृते निःसंशये पापेन भुंजीतानुपस्थि-
तः। भुंजानो वर्द्धयेत्पापमसत्यं पर्षदि ब्रुवन्। संशये तु न भो-
क्तव्यं यावत्कार्यस्य निःकृतिः। प्रमादश्च न कर्त्तव्यो यथैवा-
संशयस्तथा। कृत्वा पापं न गूहेत गूह्यमानस्य वर्द्धते। बहु-
वाल्पकं वापि कर्म विज्ञो निवेदयेत्। प्रायश्चित्ते समुत्प-
न्ने ह्रीमान्सत्यपरायणः। मृदुरार्जवसंपन्नः शुद्धिं याचेत-
मानवः। सचैलं वाग्यतः स्नात्वा क्लिन्नवासाः समाहितः।
क्षत्रियो वापि वैश्यो वा पर्षदं ह्यनुतिष्ठति। क्षत्रियास्तु पाद-
नं प्रदर्शनार्थं। उपस्थाय ततः शीघ्रमार्त्तिमान्धरणीं व्र-
जेत्॥ गात्रैश्च शिरसा चैव न च किंचिदुदाहरेत्। ततस्ते
प्रणिपातेन दृष्ट्वा तं समुपस्थितं। वृद्धाः पृच्छंति किं कार्यं
उपविश्याग्रतः स्थितं। किं ते कार्यं वदास्माभिः किं वास-
गयसे द्विज। तत्त्वतो ब्रूहि तत्सर्वं सत्यं हि गतिरात्मनः।

अस्माकं चैव सर्वेषां सत्यमेव परम्बलम् । यदि चेद्दृश्यसेस-
त्यं नियतं प्राप्स्यसे शुभम् । यस्यागतो स्यसत्येन नत्वं शुध्यसि
कर्हिचित् । एवं सर्वमनुज्ञातः सर्वं ब्रूयाद्दशोपत इति । नभु-
ञ्जीत अनुपस्थित इति पर्षदमनुपस्थितः । संशये पार्ष-
दुपस्थानुः स्वगतपापसंदेहे । कार्य्यस्य निःकृतिः पापस्य
निश्चयः । प्रमादश्च न कर्त्तव्यः । पुनः पापं न कुर्य्यादित्य-
र्थः । अथवा दीर्घकालसंदेहानुवृत्तौ हविष्यभोजना-
दिना शरीररक्षणे प्रमादः स न कर्त्तव्यः । यथैवासंशये
पापस्य निश्चये देशान्तरादिव्यवहितेषु विद्वत्सु शागुप-
स्थानात् । यथा हविष्यभोजनादिना शरीररक्षणं क्रि-
यते तथा संशयस्थलेपीत्यर्थः । पर्षदग्रे विख्यापनं द-
क्षिणादीनानन्तरं कुर्य्यादित्याह पराशरः ॥ पापंप्र-
ख्यापयेत्पापी दत्वा धेनुं तथा वृषमिति ॥ अत्र वि-
शेषमाह विष्णुः ॥ पादव्रते वस्त्रदानं कृच्छ्रार्द्धे तैल-
कांचनम् । पादहीने तु गामेकां कृच्छ्रे गोमिथुनं स्मृ-
तमिति । अनयैव दिशा शक्त्याद्यपेक्षयोह्यम् ॥ यत्तु
वचनम् ॥ विख्याप्य पापं वक्तृभ्यः किंचिद्दत्वा व्रतं-
चरेदिति । तत्प्रकीर्णकविषयम् ॥ अथ प्रायश्चित्तनि-
र्णयः ॥ अंगिराः ॥ तेषां निवेदिते कार्य्ये उत्साव्योहि
स कार्य्यवान् । तस्मिन्नुत्सादिते विप्रे येयथाधर्मपाठकाः
ते तथा तत्र जल्पेयुर्विमृशंतः परस्परम् । धर्मशास्त्रेषु यच्चो-

क्तं यच्च सानुग्रहं भवेत्। विमृश्य पर्षदि यत्सर्वं प्रायश्चित्तं। प्रकल्पयेत्। यथाकालं यथादेशं यच्च कार्यांतरं भवेत्। पर्षदः संपतं चैव कारिणश्च बलाबलं। सर्वेषां निश्चितं यच्च यच्च प्राणान्न पीडयेत्। कार्यांतरं वृद्धमातापितृशुश्रूषादि। यच्च प्राणान्न पीडयेत्। यन्न प्राणपीडाकरं व्यतिरिक्तप्रायश्चित्तांतरमस्ति तत्र प्राणबाधाकरं न देयमित्यर्थः ॥ देवलः ॥ कृच्छ्राणां दापको राजा निर्देष्टा धर्मपाठकः। अपराधी प्रयोक्ता च रक्षिता कृच्छ्रपालकः। राजा कृच्छ्राणां दापकः। धर्मपाठकः प्रायश्चित्तनिर्देष्टा धर्मपाठकलक्षणं पर्षल्लक्षणेऽभिहितं। अपराधी पापकारी। कृच्छ्रप्रयोक्ता रक्षिता राजपुरुषः कृताकृतावेक्षणेन प्रायश्चित्तपरिपालकः ॥ तथा ॥ विचारस्तादृशः कार्यो यथा सर्वे सभासदः। एकवाक्यतया ब्रूयुस्तथाश्रेयोऽधिगच्छति ॥ वृद्धशातातपः ॥ यद्विना धर्मशास्त्रेण प्रायश्चित्तं विधीयते। नैव शुद्धिमवाप्नोति प्रायश्चित्ते कृतेऽपि सः। अदृष्टा धर्मशास्त्राणि प्रायश्चित्तं वदंति ये। प्रायश्चित्ती भवेत्पूतस्तत्पापं पर्षदं व्रजेत् ॥ अंगिराः ॥ कृत्वा पूर्वमुदाहारं यथोक्तं धर्मकर्तृभिः। पश्चात्कार्यानुसारेण शक्त्या कुर्युरनुग्रहं। धर्मकर्तृभिर्धर्मशास्त्रकारैः। कार्यानुसारेण मातापितृशुश्रूषादिकार्यानुसारेण ॥ देवलः ॥ एको नार्हति तत्कर्तुमनूचानोऽप्यनुग्रहं। धर्मज्ञा बहवो विप्राः कर्तुमर्हंत्यनुग्रहं। स्नेहाद्वा यदि वा लोभा

द्द्याद्ज्ञानतोपि वा। कुर्वंत्यनुग्रहं ये तु तत्पापं तेषु गच्छति। शारी-
रस्यात्यये कार्यः संयमे नियमो द्विजैः। महता चोपरोधेन न समु-
त्थस्य कदाचन। अनुग्रहः कार्य इत्यर्थः। महानुपरोधो महत्
पापं॥ अंगिराः॥ आर्त्तानां मार्गमाणानां प्रायश्चित्तानि ये
द्विजाः। जानंतोपि न यच्छंति तेषां तु समभागिनः। तस्मादार्त्तं समा-
साद्य ब्राह्मणं च विशेषतः। जानद्भिर्धर्मपंथानं न भाव्यं तु परा-
ङ्मुखैः। अनर्चितैरनाहूतैरपृष्टैरेव संसदि। प्रायश्चित्तं न दात-
व्यं जानद्भिरपि कल्पतः। सर्वेषां निश्चितं यत्र यच्च प्राणान्न पा-
तयेत्। आहूय आह यो देवः पर्षदा यो नियोजितः। शृणु भोस्त्व-
मिदं विप्रैर्यत्तु चादिश्यते व्रतं। तत्ते यत्नेन कर्त्तव्यमन्यथा त-
द्वृथा भवेत्। यदा त्वया भवेच्चीर्णं व्रतं शुद्धिकरं महत्। तदा-
कुर्याः प्रयत्नेन शक्त्या विप्राभिपूजनं। ब्राह्मणो ब्राह्मणानां तु
क्षत्रियाणां पुरोहितः। वैश्यानां याजकश्चैव प्रायश्चित्तं समादि-
शेत्। अगुरुः क्षत्रियाणां यो वैश्यानां चाप्ययाजकः। प्रायश्चित्तं
समादिश्य तप्तकृच्छ्रं समाचरेत्। एवमुक्तेषु वर्णेषु ब्राह्मणादिषु
दर्शितं। अत्रोक्तकृत्स्नं द्विजातीनां वृत्त्यातिप्राययोगात्। निकृष्ट-
त्वं द्विजातिषु वृत्तराहित्यं तत्र ब्राह्मणमंतरा कृत्वोपदिशे-
दित्यर्थः। निकृष्टानां च वक्ष्यामि प्रायश्चित्तमतः परं। प्राय-
श्चित्तं प्रायश्चित्तदानं। न्यायतो मार्गमाणस्य क्षत्रियादेः
प्रमाणमिनः। अंतरा ब्राह्मणं कृत्वा व्रतमेषां समादिशेत्।
तथा शूद्रं समासाद्य सदा धर्मपुरःसरं। प्रायश्चित्तं प्रदा-

तव्यं वेदमंत्रविवर्जितं ॥ पुंरवलिरिवतो ॥ कृच्छ्राणि द्विजा-
तीनामेव नावरस्य कामं धर्मे स्वोर प्रतिषेधः । साधारणो हि ध-
र्मो नियमश्च । अवरस्य शूद्रस्य वेदमंत्रसहितस्य प्रायश्चित्त-
स्य निषेधः । तद्रहितस्याभ्यनुज्ञा ॥ सुमन्तुः ॥ अथवा-
रागद्वेषादलभ्यमानेषु प्रायश्चित्तेषु यज्ञहवनाध्ययनब्र-
ह्मचर्यपरो भैक्षाशी दंडी मेखली स्वयमेव संवत्सरेण महा-
पातकानि तरणो व्यपोहति किल्विषीन ब्राह्मणस्य पतन-
मिच्छंत्याचार्याः ॥ अस्यार्थः ॥ रागादिवशात्पर्षदः सका-
शात्प्रायश्चित्तमलभमानः स्वयमेव यज्ञहोमाध्ययनादि-
निष्ठो ब्राह्मणः । संवत्सरेणेत्युपलक्षणं । यावता काले-
न यत्यापनिवृत्तिस्तावता महापातकादीनि व्यपोहति
॥ पुंरवः ॥ तस्करश्वापदाकीर्णे बहुव्यालमृगे वने ।
न व्रतं ब्राह्मणः कुर्यात्प्राणबाधभयात्सदा । शरीरं धर्म-
सर्वस्वं रक्षणीयं प्रयत्नतः । शरीरात्स्रवते धर्मः पर्वता-
त्सलिलं यथा इति ॥ अथ व्रतस्य ग्रहणकालस्त-
त्प्रकारश्च ॥ व्रतग्रहणं व्रतानुष्ठानदिवसात्पूर्वदिने-
ऽपराह्ने कार्यं ॥ तथा च विष्णुः ॥ सर्वपापेषु सर्वेषां व्रता-
नां विधिपूर्वकं । ग्रहणं संप्रवक्ष्यामि प्रायश्चित्ते चिकीर्षते
दिनांतेन खरोमादीन् प्रवाप्य स्नानमाचरेत् । भस्मगोम-
यमृद्वारिपंचगव्यादिकल्पितैः । मलापकर्षणं कार्यं ब्रा-
ह्मण्ये चोपसिद्धये । दंतधावनपूर्वेण पंचगव्येन संयुतं ।

व्रतं निष्पन्नमुखे ग्राह्यं बहिस्तारकदर्शने। आचम्यातः परं मौनी ध्या-
येद्दुष्कृतमात्मनः। मनःसंतापनं तीव्रमुद्वहेच्छोकमंततः इति।
बहिर्ग्रामाद्बहिः॥ **वसिष्ठः**॥ कृच्छ्राणां व्रतरूपाणि श्मश्रु-
केशादि वापयेदक्षिरोमशिखावर्जमिति। व्रतरूपाणि प्रायश्चि-
त्तरूपाणि यानि तं तत्रोक्तरीत्या वपनं। केवलपुण्यार्थिनो वप-
नं नास्तीत्यर्थः॥ **बौधायनः**॥ केशश्मश्रुनखरोमवापनं चां-
द्रायणादिषु तदेव स्त्रियाः केशवर्जमिति। अत्र विशेषः। केशा-
नां नास्ति नारीणां वपनं व्रतयज्ञयोः। गोवधादिषु सर्वेषु छेदये-
दंगुलित्रयं। सधवानां तु नारीणां मलं कारय सर्वदा। केशसंधा-
रणं प्रोक्तं प्रायश्चित्ते द्विजोत्तमैः इत्यत्र सधवाशब्दोपादानाद्वि-
धवानां वपनमस्त्येव। नांगुलित्रयपरिमाणेन छेदः। यस्तु वप-
नं नेच्छति तं प्रति हारीतः॥ राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रु-
तः। केशानां वापनं कृत्वा प्रायश्चित्तं समाचरेत्। केशानां रक्ष-
णार्थं तु द्विगुणं व्रतमाचरेत्। द्विगुणे व्रत आचीर्णे दक्षिणा-
द्विगुणा भवेत्। अत्र राजादय उपलक्षणार्थाः। यत्र राजादीना-
मप्येवं किमन्येषामित्यर्थः। एतच्च द्विगुणदक्षिणादानादि
महापातकादिव्यतिरिक्तस्थले वपनानिच्छोः। विद्वद्विप्रनृप-
स्त्रीणां नेष्यते केशवापनं। ऋते महापातकिनो गोहंतुश्चाव-
कीर्णिन इति विशेषस्मरणात्। नेष्यते सर्वात्मना न विधीयते
वपनमपि तु वपनाभावेपि द्विगुणव्रताद्याचरणे शुद्धिर्भवती-
त्यर्थः। अतो महापातकगोवधावकीर्णिप्रायश्चित्तेषु वपनमेव

इतरप्रायश्चित्तेषु वपनानिच्छोर्द्विगुणव्रतं। तथा दक्षिणा चेति
विवेकः। अत्र सर्वत्र वर्णादिविशेषानुपादानेन वपनविधानात्सर्वेषा-
मपि द्वादशरात्रादिसाध्यप्रायश्चित्ताधिकारिणां वपनं भवति।
सर्वत्र कृच्छ्राणां व्रतं रूपाणामित्यादिविधायकवाक्येषु निरु-
पपदकृच्छ्रशब्दोपादानात्तस्य च प्राजापत्यपरत्वात्॥
तथाच पैठीनसिः॥ द्वादशाहे संपूर्णे वपनमिति। संपूर्ण
इति वचनाद्द्वादशाहान्न्यूनेन भवति। यत्र च द्विरात्रत्रिरात्रादि-
साध्यकृच्छ्राणामावृत्त्या द्वादशरात्रादिसमता तत्रापि वपन-
मस्त्येव। तच्च वपनमक्षिरोमशिखावर्जं भवति। अक्षिरोमशि-
खावर्जमिति वशिष्ठेनाभिधानात्। यत्र तु मुंड इत्यादिपदैर्विशे-
षो विधीयते तत्र तथैव वपनं कार्यमिति निर्णयः। एतच्च व्रत-
मुपक्रांतं परिसमापनीयं। तथा च छागलेयः। पूर्वं व्रतं गृहीत्वा तु
नाचरेत्काममोहितः। जीवन्भवति चांडालो मृतः श्वा चैव जा-
यते इति॥ अथ विप्रशस्त्रग्रहणकालः॥ तत्र प्रथमं किं-
चित्तत्कृतोपयोगि विचार्यते॥ मनुः। शस्त्रं द्विजातिभिर्ग्राह्यं-
धर्मो यत्रोपरुध्यते। द्विजातीनां च वर्णानां विप्लवे कालकारिते।
आत्मनश्च परित्राणे दक्षिणानां च संगरे। स्त्रीविप्राभ्युपपत्तौ
च घ्नन्धर्मेण न दुष्यति। कालकारिते विप्लवे। राजाभावकाल-
जनिते। यज्ञदक्षिणानामपहारे सति तत्परित्राणे। संगरे दै-
वादापतिते युद्धे। अभ्युपपत्तौ रक्षा। धर्मेणाऽकूटशस्त्रेणा-
ऽकूटप्रकारेण च। गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं।

आततायिनमायान्तं हन्यादेवाविचारयन्॥ वसिष्ठः॥ अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहृत्। क्षेत्रदारहरश्चैव षडेते आततायिनः। अत्रायमभिप्रायः आततायिनो गुर्वादयोपि हन्तव्याः किमुतान्य इति। केचित्तु कन्याब्राह्मणगुर्वादिव्यतिरिक्ताततायिवधे दोषाभावः प्रतिपाद्यते नतु गुर्वादिहननं विधीयत इति। ब्राह्मणो न हन्तव्य इति ब्राह्मणजात्याधारव्यक्तिहनननिषेधात्। अतएव सुमन्तुः। आततायिन्यदोषोऽन्यत्र गोब्राह्मणेभ्य इति। अतो ब्राह्मणानां पूर्वोक्तस्थले आततायिब्राह्मणाद्युद्देशेन शस्त्रग्रहणं त्रासजननार्थमात्मरक्षणार्थं चेति विवेकः। अथवा। आततायिनमायान्तं हन्यादेवाविचारयन्नित्यादिषु न हननं विधीयते। हननस्य रागप्राप्तत्वात्। अपितु दोषाभावः प्रतिपाद्यते। दोषाभावोपि न सर्वात्मना तथा सति अन्यत्र गोब्राह्मणेभ्य इत्यादिवचनविरोधात्। तस्मादेवं व्यवस्था। दोषसद्भावप्रतिपादकवचनानि स्वरूपतो दोषं प्रतिपादयन्ति। दोषाभावप्रतिपादकानि तु अनाततायिब्राह्मणादिवधे यावान्दोषस्तावान्न किन्तु ततोन्यून इति संपूर्णदोषाभावं प्रतिपादयन्तीति न विरोधः॥ अथ महापातकोद्देशः॥ मनुः॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः। महान्ति पातकान्याहुः संयोगंचैव तैः सह। च्यवनः॥ ब्रह्महत्या सुरापानं गुरुतल्पं ब्राह्मणसुवर्णहरणं द्विजानां महापातकानि द्विजानामिति पदं शूद्रं प्रति सुरापातकत्वव्युदा।

सार्थे। इति साधारण्येन महापातकान्यभिधायासाधारण्येनाह सस्रष्ठ। अदंड्यदंडनं ब्रह्महत्या गुरुस्त्र्यारोहणं युधि पलायनं क्षत्रियस्य। मानतुल्याः तत्वं वैश्यस्य मांसविक्रये ब्रह्महत्या ब्राह्मणीगमनं कपिलापानं शूद्रस्य। तत्सं पङ्क्त्यं च ममिति। कलिलापानं कपिलादुग्धपानं। एतानि पातकानीति पातकानि महत्त्वेन गुरुत्वं चोन्यते॥ अथ ब्रह्महत्याप्रायश्चित्तं॥ याज्ञवल्क्यः॥ शिरःकपाली ध्वजवान्भिक्षाशी कर्म वेदयन्। ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात्। साक्षाद्यो ब्राह्मणं व्यापादयति मरस्व्यापादित ब्राह्मणशिरःकपालैकदेशेन तदभावे वान्यत ब्राह्मणशिरःकपालैकदेशेन हस्ते शिरःकपाली तथा कपालैकदेशान्तरं दंडाग्रे समारोप्य तेन दंडेन ध्वजवान्। भिक्षाशी स्वकर्म रख्यापयन्द्वादशाब्दानि व्रतं चरेत्॥ शातातपः॥ ब्राह्मणो ब्राह्मणं घातयित्वा तस्यैव शिरःकपालमादाय तीर्थान्यनुसंचरेदिति॥ मनुः॥ ब्रह्महा द्वादशाब्दानि कुटिं कृत्वा वने वसेत्। भिक्षाश्यात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजमिति। एतदुभयं पाणिना ग्राह्यमित्याह॥ गौतमः॥ खट्वांगकपालपाणिरिति। खट्वाचाव शवनिर्हरणार्थातदंशमेव ध्वजशब्देन विवक्षितमित्यपरार्के। खट्वांगशब्देन दण्डारोपित शिरःकपालात्मको ध्वजो गृह्यतेन पुनः खट्वैकदेशः महोक्षः खट्वांगमित्यादौ तत्रैव प्रसिद्धेरिति विज्ञानेश्वरे। एतत्कपालधारणं चिह्नार्थं न तु

भिक्षाद्यर्थमापस्तंबेन भिक्षार्थं पात्रविधानात्। लोहितकेन
खंडशरावेण ग्रामं भिक्षार्थं प्रविशेदिति॥ वसिष्ठः॥ सप्तागा-
राण्यसंकल्पितानि चरेद्भैक्षमिति। अत्र मृष्टं लप्स्यते लाभेत्ये-
वमचिंतितानीत्यर्थः। इयं च भिक्षा एककाल एव। तथा च स
एव। एककालाहार इति। तच्च भैक्षं वर्णचतुष्टय एव॥ तदा-
ह संवर्त्तः॥ चातुर्वर्ण्यं चरेद्भैक्षं खट्वांगी संयतः पुमान्।
चातुर्वर्ण्यमुत्तमवर्णगृहेषु भिक्षासंभवे क्षत्रियादिगृहेषु भि-
क्षा ग्राह्या। एतच्च भैक्षाशित्वमन्यैर्जीवनाशक्तस्य। तथा च
स एव। भिक्षार्थं प्रविशेद्ग्रामं वन्यैर्यदि न जीवतीति॥ मनुः॥
कृतवापनो वा निवसेद्ग्रामान्ते गोव्रजेऽपि वा। आश्रमे वृक्षमूले
वा सर्वभूतहिते रतः। कृतवापनो वेति वाशब्दो विकल्पद्योत-
नार्थः। ब्रह्महा द्वादशाब्दानि बालवासा नदीध्वजीति संवर्त्तस्म-
रणात्॥ शंखः॥ स्थानवीरासनी चैव मौंजीदंडकमंडलुः।
भिक्षाचर्याग्निकार्याच्च कूष्मांडाभिः सदा जपेदिति। कूष्मांडा-
मंत्रैरग्निकार्यं कुर्यादित्यर्थः॥ गौतमः॥ खट्वांगकपाल-
पाणिर्द्वादश संवत्सरान्ब्रह्मचारी भिक्षायै ग्रामं प्रविशेत्स्व-
कर्माचक्षाणः। यथोपक्रामेत्संदर्शनादार्यस्य स्थानासना-
भ्यां विहरन्सवनेषूदकोपस्पर्शी शुध्येदिति। ब्रह्मचारिग्र-
हेण वर्जयेन्मधुमांसगंधमाल्यदिवास्वप्नांजनाभ्यंजनोपा-
नच्छत्रकामक्रोधलोभमोहहर्षनृत्यगीतपरिवादनभया-
नीत्यादीनि गृह्यते। सवनेषूदकस्पर्शीत्यनेन स्नानविधाना-

तदंगभूतमंत्रादीनामपि प्राप्तिः। तथा संध्यापि कर्त्तव्या॥ अत्र तत्र दक्षः॥ संध्याहीनोशुचिर्नित्यमनर्हः सर्वकर्मसु यत्किंचित्कुरुते कर्म न तस्य फलभाग्भवेत्। ननु द्विजातिकर्मभ्यो हानिः पतनमिति वचनात्संध्यायामपि हानिर्भवत्विति चेत्। मैवं। द्विजातिकर्महानिवचनस्य व्रतचर्यानंगभूतद्विजातिकर्महानिविषयत्वेनाप्युपपत्तेः। अन्यथा दक्षवचनस्य सर्व्वप्राक्संकोचापत्तेः। संध्यायाश्च शुध्यापादनद्वारेण सर्वकर्मांगत्वमस्त्येव। एवमन्येपि धर्माः स्मृत्यंतरोक्ता द्रष्टव्याः। तेषां धर्माणां यत्र विरोधः तत्र विकल्पः यत्र च विरोधाभावस्तत्र समुच्चय इति व्यवस्था। प्रतिनिमित्तं नैमित्तिकमावर्त्तते। इति न्यायेन द्विस्त्रिर्ब्राह्मणवधे प्रायश्चित्तमावृत्तं भवति॥ तथाच मनुदेवलौ॥ विधेः प्राथमिकादस्माद्द्वितीये द्विगुणं चरेत्। तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निःकृतिः॥ रिति। अस्यायमभिप्रायः। महापातकप्रायश्चित्तस्यातिगुरुत्वात्। चतुर्थप्रायश्चित्ताचरणे कालाभाव आयुषोल्पत्वेन। तस्मात्प्रायश्चित्ताभावो न स्वरूपत अभावः। अथवा चतुर्थे निःकृत्यभाववचनं त्रासजननार्थं। यतो निःकृतिरेव नास्ति अतस्तादृक्पापं न कर्त्तव्यमिति। एवंच महापातकव्यतिरिक्तपापेषु चतुरादृत्त्यादिष्वपि प्रायश्चित्तं कर्त्तव्यमेव। एतच्च द्वादशवार्षिकव्रतमकामतो ब्राह्मणमात्रवधे॥ तथाच भविष्यत्पुराणे॥ तत्र सामान्यतो हत्वा ब्राह्मणं सुरसत्तम॥१॥

مدن پارجات - ۵۴۷

प्रायश्चित्तं तु वै कृत्वा विधिवद्द्वादशाब्दिकम्। प्राप्नोति शुद्धिं जीव-
न्वैसर्गं च स्वजनैः सहेति। एवं च द्वादशवार्षिकादिप्रायश्चित्तं
कुर्वन्नंतरा यदि मृतस्तदा शुद्ध एवेत्याह यमः। प्रायश्चित्ते
व्यवसिते कर्त्तुमुपक्रांते॥ अंगिराः॥ यो यदर्थं चरेद्धर्मम-
प्राप्य म्रियते तु तं। स तत्पुण्यफलं प्रेत्य प्राप्नुयान्मनुरब्रवी-
दिति॥ यत्पुनरापस्तंबेनोक्तं॥ विप्रहारण्ये कुटिं कृ-
त्वा वाग्यतः शवशिरोध्वजः शाणीपक्षमधोनाभ्युपरिजा-
न्वाच्छाद्येदित्युपक्रम्य गुरुं हत्वा श्रोत्रियं वा एतदेव व्रतमो-
त्तमादुच्छ्वासाच्चरेन्नास्मिन् लोके प्रत्यापत्तिर्विद्यत इति त-
न्मातापित्राचार्यादिविषयं॥ तथैव भविष्यत्पुराणे
मातरं पितरं हत्वा सोदर्यां भ्रातरं तथा। गुरुं हत्वा श्रोत्रि-
यं चेत्युपक्रम्यास्यैव प्रायश्चित्तस्य विधानात्। प्राणीप-
क्षः प्राणास्त्रमयवस्वैकदेशः। उत्तमादुच्छ्वासात्। आमरणा-
त॥ अत्राशक्तस्य प्रभवः॥ प्रमाप्य द्वादश संवत्सरान् षट्-
त्रीन्सार्द्धं संवत्सरं च व्रतान्यादिशेत्। तेषामंते गोसहस्रं तदर्द्धं
तस्यार्द्धमर्धं च दद्यात्सर्वेषां वर्णानामानुपूर्व्येणेति। एतदेव
व्रतमोत्तमादुच्छ्वासाच्चरेदित्यत्रासमर्थो द्वादशवार्षिकव्रतच-
र्यांतरं गोसहस्रदानं। तत्राप्यशक्तस्य षड्वार्षिकव्रतचर्यानंत-
रं तदर्द्धं गोसहस्रार्धदानं। अत्राप्यशक्तस्य त्र्यब्दव्रतानंतरं
तस्यार्द्धं पंचशत्यर्द्धं। अत्राप्यशक्तस्य सार्द्धसंवत्सरव्रतचर्या-
नंतरमर्द्धं गवां पंचविंशत्युत्तरशतमिति सर्ववर्णानामशक्तानु-

स्तारेणानुपूर्व्येण क्रमेण द्वादशवार्षिकादिगोसहस्रादीनां समुच्चयो भवति । एतच्च पूर्वोक्तविषय एव कल्पनीयं प्रायश्चित्तस्यातिगुरुत्वात् । ननु द्वादशवार्षिकादिव्रतचतुष्टयं गोसहस्रादिदानचतुष्टयसहितमभिधाय सर्वेषां वर्णानामानुपूर्व्येणास्याभिधानात् ब्राह्मणादिवर्णचतुष्टयस्य क्रमेण व्रतचतुष्टयविधानं किमिति न स्यात् । मैवं । पर्षद्या ब्राह्मणानां तु सा राज्ञां द्विगुणा मता । वैश्यानां त्रिगुणा प्रोक्ता पर्षद्वच्च व्रतं स्मृतं ॥ तथा ॥ शूद्रो वा ब्राह्मणं हत्वा प्रायश्चित्तचतुष्टयमिति यथाक्रमं चांगिरोभविष्यत्पुराणवचनाभ्यां ब्राह्मणापेक्षयोत्तरवर्णानामधिकप्रायश्चित्तविधानात् । तस्मादस्मदुक्तैव व्यवस्था ज्यायसी ॥ चतुर्विंशतिमते ॥ प्रायश्चित्तं यदाम्नातं ब्राह्मणस्य महर्षिभिः । पादोनं क्षत्रियः कुर्यादर्द्धं वैश्यः समाचरेत् । शूद्रः समाचरे । शूद्रः समाचरेत्पादमशेषेष्वपि पापकेष्विति तत्सातिलोम्यानुचितचतुर्विधसाहसव्यतिरिक्तविषयमिति विज्ञानेश्वरकारः । ब्रह्मचार्याद्याश्रमिषु विशेषमाहांगिराः गृहस्थोक्तानि पापानि कुर्वंत्याश्रमिणा यदि । शौचवच्छोधनं कुर्युरर्वाग्ब्रह्मनिदर्शनादिति । ब्रह्मनिदर्शनादर्वाक् ब्रह्मसाक्षात्कारादर्वाक् । एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणां । त्रिगुणं तु वनस्थानां यतीनां च चतुर्गुणमित्येतच्छौचवदित्यनेन ज्ञाप्यते । शोधनं प्रायश्चित्तं । ब्रह्मचारिणः षोडशवर्षादूर्द्ध्वं द्वैगुण्यं । ततः पूर्वं त्वर्द्धमेव । पादो बालेषु दातव्य इति स्मरणात् । आषोडशाच्च बालः ।

ब्रह्महा द्वादशाब्दानीत्युक्तत्वात्साक्षाद्धंतुरेवैतत्प्रायश्चित्तं न-
प्रयोजकादीनां। ननु यथान्यद्रव्ये स्वाम्याज्ञादिनान्येन दीय-
माने आज्ञादिकर्तुरेव फलं संपूर्णं न तु साक्षाद्दातुस्तद्वदाज्ञादि-
नान्येन हते सति आज्ञादिकर्तुरेव हननफलं संपूर्णमस्त्विति चे-
त्। मैवं॥ हननदानयोर्लौकिकयोर्वैषम्यात्तथा हि। दानं स्वकृतापूर्वो-
त्पादकं। हननं तु विना पूर्वोत्पादकं। स्वत्वत्यागपूर्वकपरस्वत्वो-
त्पादनं दानं। स्वत्वत्यागश्च स्वामित्यागादेव न स्वामित्यागात्
स्वस्याज्ञाकारिणः ऋत्विगादिवत्कर्त्रैव न स्वामी। अतो नाज्ञा-
कारिणस्तत्फलं ब्रह्मभ्रूणवृत्रेषु क्विबित्यनेन सूत्रेण ब्राह्मणं
हतवानित्यस्मिन्नर्थे क्विप्प्रत्ययो विहितः साक्षाद्धननमपेक्ष्य
प्रयोजकादिरूपेण हननं प्राणवियोजनेऽव्यवहितमिति संनिहि-
तस्य साक्षाद्धननस्यैव परमनुग्राहकप्रयोजकादीनां तु पा-
पानुसारेण प्रायश्चित्तं कल्प्यं॥ यदाहापस्तंबः॥ प्रयोज-
यितानुमंता कर्ता चेति स्वर्गनरकफलेषु कर्मसु भागिनो यो भू-
य आरभते तस्मिन्फलविशेष इति। तत्राहंतारमन्येभ्यः परि-
रक्षन् हन्यमानमुपरुंधन् घातकस्य सहायकर्मानुग्राहकः
स यत्नाय प्रवृत्तमनुपक्राति तत्पापप्रायश्चित्तं पादोनं कुर्या-
त्। प्रयोजकस्त्रिविधः। यः प्रभुर्भृत्यादिकं नीचं प्रस्थापयत्यस्म-
च्छत्रुं व्यापादयेति। स आज्ञापयिता। स्वयमसमर्थो नीचं स्वश-
त्रुव्यापादने प्रवर्त्तयति प्रार्थनादिना सोऽभ्यर्थयिता। यः पुनर्म-
र्मोद्घाटनादिना त्वच्छत्रुमित्थं जहीति प्रेरयति स उपदेष्टा॥

अत्र पूर्वौ द्वावप्यनुग्राहकस्य पादोनत्वात्कृच्छ्रापेक्षयान्यूनमर्द्धं प्रायश्चित्तं लभते। तृतीयस्त्वर्द्धापेक्षया किंचिन्न्यूनमर्द्धं मध्ये पादोनं लभते। स्वतः प्रवृत्तं प्रत्युपदेशात्। स्वतःप्रवृत्तस्य व्यापारमनुजानाति यः सोऽनुमन्ता सोऽर्द्धं पादव्रतं कुर्यात्। आक्रुष्टस्ताडितो वापि धनैर्वापि प्रयोजितः। यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकमित्यादिवचनोपात्तनिमित्तवान्निमित्ती। तस्य पादं प्रायश्चित्तं। तथा च ब्रह्महत्याप्रायश्चित्तपादं निमित्तिनो दर्शयति सुमन्तुः। तिरस्कृतो यदा विप्रो हत्वात्मानं मृतो यदि। निर्गुणः सहसा क्रोधात् गृहक्षेत्रादिकारणात्। त्रिवार्षिकं व्रतं कुर्यात्प्रतिलोमां सरस्वतीं। गच्छेद्वापि विशुद्ध्यर्थं तत्पापस्येति निश्चितं। अत्यर्थं निर्गुणो विप्रो ह्यत्यर्थं निर्गुणोपरि। क्रोधाद्धि म्रियते यस्तु निमित्तं तु भवेत्ततः। वत्सरत्रितयं कुर्यान्नरः कृच्छ्रं विशुद्धये। यत्तु तेनैवोक्तं। केशश्मश्रुनखादीनां कृत्वा तु वपनं वने। ब्रह्मचर्येचरन्विप्रो वर्षेणैकेन शुद्ध्यतीति। तन्निमित्तिनोऽत्यंतगुणवत्त्वे आत्मघातनोऽत्यंतनिर्गुणत्वे च वेदितव्यं॥ विष्णुः। उद्दिश्य कुपितो हत्वा तोषितः श्रावयेत्पुनः। तस्मिन्मृते न दोषोऽस्ति द्वयोरुच्छ्रावणे कृते। द्वयोरात्मघातकाक्रोशकयोः। जनसमक्षमाक्रोशकस्यापराधो नास्तीत्युच्चैर्वाक्य उच्चारिते सतीत्यर्थः। यत्र त्वाक्रोशनादिकमंतरेणापरमुद्दिश्यात्मानं हंति तत्र दोषो नास्तीत्याह सुमन्तुः। आमं बंधेन यः कश्चिद्द्विजः प्राणान्परित्य

जेत्। नस्यैव तद्भवेत्पापं नतु यं परिकीर्त्तयेदिति ॥ पैठीनसिः
हंतामंतोपदेष्टा च तथा संप्रतिपादकः। प्रोत्साहकः सहायश्च
तथा मार्गानुदेशकः। आश्रयः शस्त्रदाता च भक्तदाता विकर्मि-
णां तुष्टोपदेशकश्चैव तद्विनाशप्रदर्शकः। उपेक्षाकार्ययुक्त-
श्च दोषवक्तानुमोदकः। अनिषेद्धा समो यस्तु सर्वे तत्कार्यका-
रिणः। यथाशक्त्यनुरूपं च दंडमेषां प्रकल्पयेत्॥ विष्णुपरा-
शरवृद्धस्पत्यंगिरसः॥ अशीतिर्यस्य वर्षाणि बालो वा
प्यूनषोडशः। प्रायश्चित्तार्द्धमर्हंति स्त्रियो रोगिण एव च। अर्वा-
क्द्वादशाद्वर्षादशीतेरूर्द्धमेव च। अर्द्धमेव भवेत्पुंसां तुरीयं तत्र
योषितां। स्त्रीणामर्द्धं प्रदातव्यं वृद्धानां रोगिणां तथा। पादो बाले-
षु दातव्यः सर्ववर्णेष्वयं विधिरिति। एवं च यानि शंखादिवचना-
नि बालातुरस्य प्रायश्चित्ताभावप्रतिपादकानि तानि संपूर्णद्वा-
दशवार्षिकादिप्रायश्चित्ताभावप्रतिपादकानि। प्रासंगिकमभि-
हितं प्रकृतमनुसरामः। एवं पूर्वोक्तप्रकारेण यो ब्रह्महत्याव्र-
तं द्वादशवार्षिकं कुर्वन् व्रतसमाप्तेः पूर्वमेव चौरव्याघ्रादिभिर्ह-
न्यमानं ब्राह्मणं मोचयति स्वशरीरमंतरा कृत्वा। मोचयितुं वा
प्रवृत्तः सन् तन्त्राणकारणमंतरेणापि स्वयं म्रियेत तदापि शुद्धो
भवेत्। तथा द्वादशसंख्याकगोरक्षणादपि। तथा परकी-
याश्वमेधांगभूतावभृथस्नानकाले वक्ष्यमाणरीत्या स्ना-
त्वा ब्रह्महत्यायाः शुद्धिमवाप्नोति॥ तथा च शंखः॥
द्वादशे वर्षे शुद्धिं प्राप्नोति अंतरा वा ब्राह्मणं मोचयित्वा गवां

वा ह्यादश्रणानां परित्राणात्सद्य एवाश्वमेधावभृथस्नानादपू-
तो भवतीति ॥ मनुः ॥ ब्राह्मणार्थे गवार्थे च सद्यः प्राणान् परि-
त्यजेत् । मुच्यते ब्रह्महत्याया गोप्ता गोर्ब्राह्मणस्य तु । अत्र स-
द्यः प्राणान्परित्यजेत् । इत्यनेन ब्राह्मणार्थमरणं गोप्ता-
गोर्ब्राह्मणस्य चेत्यनेन तद्रक्षणं च पृथगुपात्तं । अतः स्वयं
जीवन् रक्षणे कृतेपि शुद्धो रक्षणमकुर्वन्कुर्वन्वा स्वशक्त्या तदनु
सारेण तदर्थं प्रवृत्तः सन्यदि मृतस्तदापि शुद्ध इति गम्यते ॥ अव
भृथस्नाने विशेषमाह मनुरेव । शिष्ट्वा वा भूमिदेवानां नर
देवसमागमे । स्वमेनोऽवभृथस्नातो हयमेधे विशुध्यति । अत्र
भूमिदेवा ऋत्विजः । अभिषिक्तः क्षत्रियो यजमानो नरदेवः
तेषामन्योन्यसंगमे तत्समूहे स्वमेनः शिष्ट्वा ख्यापयित्वा अ-
वभृथं गत्वा तत्र स्नात्वा शुद्धो भवतीत्यर्थः ॥ याज्ञवल्क्यः
दीर्घतीव्रामयग्रस्तं ब्राह्मणं गामथोपि वा । दृष्ट्वा पथि निरा-
तंकं कृत्वा वा ब्रह्महा शुचिः । पूर्वोक्तगुणविशिष्टं ब्राह्मणं गां वा पथि
स्थितं दृष्ट्वा नीरुजं कृत्वा प्रक्रांतब्रह्महत्याप्रायश्चित्तांतरा
शुद्धो भवतीत्यर्थः । एतच्च द्वादशवार्षिकमकामविषयं ।
क्षत्रियस्य कामकारविषये तु याज्ञवल्क्य आह । लोमभ्यः
स्वाहेत्येवं हि लोमप्रभृति वै तनुं । मज्जांतां जुहुयाद्वापि मंत्रै-
रेभिर्यथाक्रमं । मंत्राश्च वाजसनेयके परिपठिताः । लोमभ्यः
स्वाहा त्वचे स्वाहा । लोहिताय स्वाहा । मेदसे स्वाहा । मांसेभ्यः
स्वाहा । स्नावभ्यः स्वाहा । अस्थिभ्यः स्वाहा । मज्जभ्यः स्वाहा

एतैर्मंत्रैर्यथाक्रमं। होमं कृत्वा अंते स्वशरीरं त्ववाक्शिरा जुहुयात्। अत्र च लोमादीनां मंत्रसामर्थ्याद्देवतात्वं तेषामेव। लोमप्रभृति वैतज्जुहुयादिति वचनसामर्थ्याद्विषयामपीत्यपरार्के। मिताक्षरायां तु भ्रूणहननं च वक्ष्यामो ब्राह्मणं हत्वा भ्रूणहा भवति अविज्ञातं च गर्भम् अविज्ञाता हि गर्भाः पुमांसो भवंति तस्मात्पुंस्कृत्य जुहुत इत्येतद्वसिष्ठवचनस्यार्थभागं परित्यज्य तथा च वसिष्ठः इत्युपक्रम्य भ्रूणहाग्निमुपसमाधाय जुहुयात् कोन्मानि मृत्योर्जुहोमि लोमभिर्मृत्युं वाशय इति प्रथमां। त्वचं मृत्योर्जुहोमि त्वचा मृत्युं वाशय इति द्वितीयां लोहितं मृत्योर्जुहोमि लोहितेन मृत्युं वाशय इति तृतीयां। मांसानि मृत्योर्जुहोमि मांसैर्मृत्युं वाशय इति चतुर्थीं। मेदो मृत्योर्जुहोमि लोहितेन मृत्युं वाशय इति पंचमीं। स्नावानि मृत्योर्जुहोमि स्नावभिर्मृत्युं वाशय इति षष्ठीं। अस्थीनि मृत्योर्जुहोमि मज्जभिर्मृत्युं वाशय इत्यष्टमीं इति। अत्र लोमप्रभृति तनुं जुहुयादिति लोमादीनां होमद्रव्यत्वावगमाल्लोमभ्यः स्वाहेति सत्यपि चतुर्थीनिर्देशे लोमादीनां न देवतात्वं कल्प्यते। अर्थप्रकाशनेनैव मंत्राणां होमसाधनत्वोपपत्तेः। किंतु लोमभिर्मृत्युं वाशय इत्यादिवसिष्ठमंत्रपर्यालोचनया मृत्योरेव हविःसंबंधावगमाद्देवतात्वं कल्प्यत इति। अत्र निबंधकारयोः परस्परविरोधः प्रतीयते। स च विरोध इत्थं परिहरणीयः। प्रायश्चित्तरूपे लोमादिहोमे वाजसनेयेन्ये मंत्राः वासिष्ठे त्वन्ये अतो मंत्रा-

रणमेककार्ये विधानाद्विकल्पः। तत्र वाजसनेयगृह्यहोममंत्रेषु
चतुर्थ्यंतनिर्देशाल्लोमादीनामेव देवतात्वं। तथा च भट्टवा-
र्त्तिकं तद्धितेन चतुर्थ्या वा मंत्रवर्णेन वेष्यते। देवतासंगतिस्त-
त्र दुर्बलं तु परंपरमिति। हविरपि लोमादीनि। नन्वेकस्यैव ह-
विष्ट्वं देवतात्वं च कथमिति चेत्॥ मैवं॥ लोमादीनि द्रव्याणि
हवींषि देवता तु तत्तच्छब्दसमवायिनी द्रव्यदेवतयोरस्त्येव
भेदः। यदा तु वाशिष्ठमंत्रा होमे गृह्यंते तत्र तद्धितचतुर्थ्योरभा-
वान्मंत्रवर्णेन देवता मृग्या। तत्र लोमादिहविषां मृत्युसंबंधा-
वगमान्मंत्रप्रकाश्यमृत्योरेव देवतात्वमिति न विरोधः। अयं
च होमो लौकिकाग्निं प्रतिष्ठाप्य तत्र कर्त्तव्यः। पतिताग्नीनां प्र-
तिपत्त्यंतरविधानात्। शरीरप्रक्षेपे विशेषमाह मनुः॥
प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः इति॥ काठ-
कश्रुतिः॥ अनशनेन कर्षितोऽग्निमारोहेदिति। पूर्वेद्युःकृतो-
पवासः कुर्यादित्यर्थः॥ भविष्यत्पुराणे॥ हत्वा तु क्षत्रियो
विप्रं गुणाढ्यमिह कामतः। प्रायश्चित्तं चरेद्धार विधिवत्काय-
शुद्धये। लक्ष्यं शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मनः। प्रा-
स्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिराः यजेत वाश्वमेधेन
क्षत्रियो विप्रघातकः। प्रायश्चित्तत्रयं ह्येव क्षत्रियस्य प्रकीर्त्ति-
तमिति। विदुषां प्रायश्चित्तार्थं लक्ष्यभावमापन्न इति जान-
तां। इच्छया आत्मनः। न राजादिबलप्रेरितः। क्षत्रियव्यति-
रिक्तस्यापि भृगुपतनेन मरणांतिकं प्रायश्चित्तं भवत्येव।

यदाह यमः ॥ यः कामतो महापापं नरः कुर्यात्कथंचन ॥
न तस्य शुद्धिर्निर्दिष्टा भृग्वग्निपतनादृत इति । अग्निपतनस्य
क्षत्रियविषयत्वात् भृगुपतनमितरविषयं । मरणांतिकाशक्त-
स्य पर्षदा ब्राह्मणानां त्वित्यनेन प्रकारेण तत्तद्वर्णापेक्षयो-
क्तं प्रायश्चित्तं द्विगुणं भवति । अत्यंतगुणवतानिर्द्धनेन विदुषा
हंत्रा प्रमादान्निर्गुणो व्यापादिते पदक्रमरहितमंत्रब्राह्मणा-
त्मकवेदस्यारण्ये त्रिर्नियताहारपूर्वकपठनेन शुद्धिः । पूर्वोक्त-
विषय एव हंता यदि वेदरहितस्तदा सरस्वतीं प्रतिस्रोतो गत्वा
शुद्ध्यति ॥ तथा च मनुः ॥ जपेद्वा नियताहारस्त्रिर्वै वेदस्य
संहितां ॥ याज्ञवल्क्यः ॥ अरण्ये नियतो जप्त्वेति ॥ भवि-
ष्यत्पुराणे ॥ हंता यदा वेदहीनो धनेन च भवेद्गुह । तदैत-
त्कल्पयेत्तस्य प्रायश्चित्तं निबोध मे । हविष्यभुग्वानुसरेत्प्र-
तिस्रोतः सरस्वतीं । स्रोतः स्रोतः प्रति प्रति स्रोतः । धनवतो नि-
र्गुणस्य हंतुर्निर्गुणहनने मनुः । सर्वस्वं वा वेदविदे ब्राह्मणा-
योपपादयेत् । धनं वा जीवनायालं गृहं वा सपरिच्छदमिति ।
जीवनपर्याप्तधनदानाशक्तः सोपस्करं गृहं दद्यात् । अना-
शक्तः सर्वस्वं दद्यात् । सर्वस्वपरिमाणमाहांगिराः ॥ साशी-
तिपणसाहस्रादूर्ध्वं सर्वस्वमुच्यते । निर्धनो ब्रह्महा शुध्ये-
त्सुखाधिक्यान्नरेश्वर इति ॥ भविष्यत्पुराणे ॥ जातमा-
त्रं यदा हन्याद्ब्राह्मणो ब्राह्मणं गुह । वेदाभ्यासविहीनो वै ।
धनवानग्निवर्जितः । प्रायश्चित्तं तदा कुर्यादिदं पापविशुद्धये ।

धनं वाजीवनायालं गृहं वा सपरिच्छदं॥ यद्वा पराशरोक्तेन प्रायश्चित्तेन शुध्यति॥ पराशरोक्तं प्रायश्चित्तं यथा॥ चातुर्विद्योपपन्नस्तु विधिवद्ब्रह्मघातके। समुद्रसेतुगमनं प्रायश्चित्तं विनिर्दिशेत्। सेतुबंधपथे भिक्षां चातुर्वर्ण्यात्समाहरेत्। वर्जयित्वा विकर्मस्थान् छत्रोपानद्विवर्जितः अहं दुष्कृतकर्मा वै महापातककारकः। वेश्मद्वारेषु तिष्ठामि भिक्षार्थी ब्रह्मघातकः। गोकुलेषु च गोष्ठेषु ग्रामेषु नगरेषु च। तपोवनेषु तीर्थेषु नदीप्रस्रवणेषु च। एतेषु ख्यापयन्नेनः पुण्यं गत्वा तु सागरं। ब्रह्महा विप्रमुच्येत स्नात्वा तत्र महोदधौ। ततः पूतो गृहं प्राप्य कृत्वा ब्राह्मणभोजनं। दत्त्वा वसुपवित्राणि पूतात्मा प्रविशेद्गृहं। विंध्यादुत्तरतो यस्य निवासः परिकीर्त्तितः। पराशरमतं तस्य सेतुबंधस्य दर्शनमिति। मनसा ब्राह्मणं हन्तुमध्यवस्य यदा स्वतएव जिघांसाया उपरतस्तदा वसिष्ठोक्तं द्वादशरात्रद्वयं। द्वादशरात्रमभक्षो द्वादशरात्रमुपवसेदिति। निर्गुणस्य हंतुरप्रत्यानेयपुंस्त्वं षंढं ब्राह्मणं ज्ञानवधे षड्विंशन्मतोक्तं। षंढं तु ब्राह्मणं हत्वा शूद्रहत्याव्रतं चरेत्। चान्द्रायणं च कुर्वीत पराकद्वयमेव चेति। अत्रैवाज्ञानपूर्वकत्वे बृहस्पतिः। अरुणायाः सरस्वत्याः संगमे लोकविश्रुते। शुद्ध्येत्त्रिषवणस्नायी त्रिरात्रोपोषितो द्विज इति। एवमन्यान्यपि स्मृत्यंतरोक्तानि प्रायश्चित्तानि न्यूनाधिकानि जातिशक्त्याद्यपेक्षया योजनीयानि। मूर्द्धावसि-

कस्य ब्राह्मणवधे ब्राह्मणादधिकं क्षत्रियान्न्यूनं सार्द्धद्वाद-
शवार्षिकं। अनयैव दिशा इतरानुलोमजानां स्वसंनिहितो-
त्तमापेक्षयाधिकं स्वसंनिहितनीचापेक्षयान्यूनमित्येवं प-
रिकल्पनीयं। यस्तु सोमयागं कुर्वंतं ब्राह्मणं व्यापादयति
तस्य पर्षदा ब्राह्मणानां तु साराज्ञां द्विगुणाभावेदित्यनेन न-
न्यायेन प्रायश्चित्तं प्राप्तं। तद्द्विगुणं भवति॥ तथा च याज्ञ-
वल्क्यः॥ द्विगुणं सवनस्थे तु ब्राह्मणे व्रतमादिशेदिति।
सवनसंपाद्यः सोमयागः सवनशब्देनोच्यते। तत्रस्थः स-
वनस्थः सोमयागं कुर्वाण इत्यर्थः॥ यच्च भविष्यत्पुरा-
णवचनं॥ ब्राह्मणं यजमानं तु हत्वा निःकृतिमाचरेत्।
चरित्वा द्वादशाब्दानि सेतुबंधं तु पश्यतीति। एतच्च गुर्वा-
चार्यादिरूपसोमयागकर्तृविषयं। यतस्तत्रैव। निहत्य-
सुरशार्दूल हं तु वै ब्राह्मणस्य तु। अथवा गुरुविषयं प्राय-
श्चित्तमिदं गुरुवचनादेव शार्दूलतत्वतस्ते ब्रवीम्यहमि-
त्युपक्रम्य ब्राह्मणं यजमानं चेति परिपठितं। अत्र द्वादशा-
ब्दानीति बहुवचनं कपिंजलन्यायेन त्रित्वपर्यवसितं॥
युगपत्कामतः अकामतो वानेकब्राह्मणवधे भविष्यत्पु-
राणे विशेषोभिहितः॥ एककाले यदा हन्याद्युगपत्सुरनं-
दन। निमित्तमेकमाश्रित्य हंत्यनेकेन वा विभो। ब्राह्मणं
ब्राह्मणोवीरब्राह्मणान्सुबहूनपि। निहत्य युगपद्वीर स-
वं प्राणांतिकं चरेत्। किंत्वत्र सुरशार्दूल विशेषं गदतः शृ-

णु। बुद्धिपूर्वाबुद्धिपूर्वविशेषं शृणु पुत्रक। अकामतो यदा हन्या-
द्ब्राह्मणान्मानवो गुह। चीरहूनेन दा घोरे यावत्प्राणपरिक्षयं।
कामतश्च यदा हन्यात्ब्राह्मणान्सुरसत्तम। तदात्मानं दहेदग्नौ
विधिना येन तं शृणु। भूत्वा निःकालको वीर वेष्टयित्वा तु वाससा
घृताक्तेन महाबाहो दत्वा सर्वस्वमेव हि। हित्वा पादौ करीषाग्नौ द-
हेदात्मानमात्मना। उत्तमांगाद्धि विधिवदंतः स्यात्सुरसत्तम।
एवमत्र महाबाहो निर्दोषः परिकीर्त्तित इति। निःकालकः का-
लांतरानपेक्ष इति स्मृतिमंजर्यां। निर्गतं कालं कृष्णावर्णालो-
मकं केशादि यस्मात्स निःकालक इत्यपरार्कादौ॥ अथ ब्र-
ह्महत्यासमानानां प्रायश्चित्तं तत्स्वरूपं चाभिधी-
यते॥ याज्ञवल्क्यः॥ गुरूणामध्यधिक्षेपो वेदनिंदा सु-
हृद्वधः। ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनं। गुरूणाम-
ध्यधिक्षेपः पित्रादिगुरूणामुपर्युपर्याक्षेपः अनृतेनतो का-
विदितपतनीयपापशंसनं॥ तथा च गौतमः॥ गुरोरनृता-
भिशंसनमिति पातकसमानीति। अत्र यद्यपि सामान्येनानृता-
भिशंसनमित्युक्तं। तथापि प्रायश्चित्तस्य महत्वादनृताभिशं-
सनेपि महत्त्वं कल्पनीयं। आपस्तंबो दोषं बुद्ध्वा न पूर्वः परेषां-
समाख्याता स्यादिति। अत्र प्रथमतएव दोषकथनं निषिद्धमि-
ति प्रथमं गुरुविषये मिथ्याभिशंसकस्य ब्रह्महत्यासमप्राय-
श्चित्तं। सुहृद्वधः। मित्रस्य ब्राह्मणस्यापि वधः। अधीतस्य च
नाशनं। अधीतवेदस्यासच्छास्त्रविनोदेनालस्यादिना वाना-

शानं दिसमरणं। यच्च स्वाध्यायत्यागस्योपपातकमध्ये परिगणनं
स्वाध्यायाग्निसुतत्याग इति तत्स्वेच्छया स्वाभ्यासनिष्ठत्वेन कु-
टुंबपोषणाव्यग्रतया वा परित्यागे द्रष्टव्यं। यत्तु मनुना सुरापान
समत्वमुक्तं। ब्रह्मोक्तानां वेदनिंदा कूटसाक्ष्यं सुहृद्वधः। गर्हि-
तानाद्ययोर्जग्धिः सुरापानसमानि षडिति तत्प्रायश्चित्तवि-
कल्पार्थं। एवमन्यत्रापि द्रष्टव्यं॥ तथा॥ अनृतं च समुत्क-
र्षे राजगामि च पैशुनं॥ गुरोश्चालीकनिर्बंधः समानि ब्रह्मह-
त्यया। राजाकुलादिष्वचतुर्वेदाभिज्ञ इत्यभिभाषणादि।
समुत्कर्षे अनृतं। यत्र गुणवत्तायां सत्यां परीक्षको जानन्नपि
समुत्कर्षविषयेऽसत्यवादी सोपि ब्रह्महत्यासमपापं प्राप्नोति।
विष्णुः॥ शरणागतहननं ब्रह्महत्यासममिति॥ प्रचेताः॥
गोगर्भिणीस्त्रीगर्भिणीबालवधो ब्रह्महत्यासमानीति। एव-
मन्यान्यपि वचनानि गवेषणीयानि। अत्र समत्वाभिधानाच्छि-
ष्टाचारबलेन पादोनं कल्प्यं। ऋषिसमो ब्राह्मणो राजसमो मंत्री-
त्यादिषु समशब्दस्य किंचिन्न्यूने प्रयोगदर्शनात्। अत्रापि जाति-
शक्तिवयोवस्थाद्यपेक्षया द्वादशवार्षिकादीनि यथायोगं यो-
ज्यानि। अथ ब्रह्महत्याव्रतानि देशः॥ याज्ञवल्क्यः॥
यागस्थक्षत्रविड्घाती चरेद्ब्रह्महणि व्रतं। गर्भहा च यथावर्णं
तथात्रेयीविषूदकः। यागोत्र सोमयागः। यः क्षत्रं निधाय स्वा-
न्यायुधानि ब्रह्मणएवायुधैर्ब्रह्मणो रूपेण ब्रह्म भूत्वा यज्ञ-
मुपावर्तत इति श्रुत्या सोमयागं प्रति क्षत्रियस्य सोमयागकर्तु-

ब्राह्मणत्वाभिधानात्। दर्शितोऽपि सवनगतौ राजन्यवै-
श्ययोरिति सवनसंपाद्यसोमयागमेव निर्दिशति। दीक्षणीया-
या ऊर्द्ध्वमवभृथात् प्राक् सोमयागे वर्त्तमानयोः क्षत्रवैश्ययो-
र्हनने ब्रह्महत्याव्रतं चरेत्। यद्यपि न्यायतः किंचिन्न्यूनं प्रा-
यश्चित्तं प्राप्तमिति दृष्टत्वात्। तथापि संपूर्णमेव प्रायश्चित्तं
कर्त्तव्यं। आपस्तंबेन पूर्ववर्णयोर्वेदाध्यायिनं हत्वेत्युप-
क्रमे सवनस्थक्षत्रविड्वधे द्वादशवार्षिकविधानात्। पूर्वयोर्व-
र्णयोः क्षत्रियवैश्ययोरिति तद्भाष्ये। अत्रापि जात्याद्यपेक्ष-
या न्यूनाधिककल्पा योज्याः। गर्भहा च यथावर्णमित्यादि।
विवाहितासु संभूतं स्त्रीपुंव्यंजकैरनभिव्यक्तं गर्भं हत्वा यद्व-
र्णपुरुषवधे यत्प्रायश्चित्तं तद्वर्णगर्भवधे तत्प्रायश्चित्तं चरेत्।
तथा॥ यद्वर्णा वै यो वधस्तद्वर्णं प्रायश्चित्तं कुर्यात्॥ तथा-
च मनुः॥ हत्वा गर्भमविज्ञातमिति। स्त्रीपुंनपुंसकव्यक्ति-
विशेषज्ञाने तु यथालिंगं प्रायश्चित्तं॥ अंगिराः॥ आहि-
ताग्नेर्द्विजाग्र्यस्य हत्वा पत्नीमनिंदितां। ब्रह्महत्याव्रतं कुर्या-
दात्रेयीघ्नस्तथैव चेति॥ पराशरः॥ सवनस्थां स्त्रियं हत्वा ब्र-
ह्महत्याव्रतं चरेदिति। आत्रेय्या अग्निहोत्रिगर्भाः सवनस्था-
याश्च प्रत्येकवधे ब्रह्महत्याव्रतातिदेशः। एतद्व्यतिरिक्तब्रा-
ह्मणस्त्रीवधे त्वुपपातकप्रायश्चित्तं। अतिदेशिकेषु प्राय-
श्चित्तस्यैवातिदेशो न पातित्यस्य। अतः अपतितत्वाद्द्वि-
जातिकर्मभ्यो हानिर्नास्तीति गम्यते। आत्रेयी अत्रिगोत्रजा।

अत्रिगोत्रविवाहिता ऋतुमती च॥ यदाह विष्णुः॥ एतदुक्त्वा व्रतं ब्राह्मणीं हत्वा दश संवत्सरान् कुर्यादत्रिगोत्रां वा नारीं मित्रं चेति। अत्र मित्रहनने संपूर्णद्वादशवार्षिकविधानं गुणवन्मित्रविषयं। याज्ञवल्क्येन ब्रह्महत्यासमेऽभिधानमगुणवद्विषयमिति विवेकः॥ यमः॥ जन्मप्रभृति संस्कारैः संस्कृता मंत्रवत्तु या। गर्भिणी त्वथवा यास्यात्तां मात्रेयीं विदुर्बुधा इति। संस्कारैः संस्कृता मंत्रवत्त्वेति ब्रह्मवादिनी इत्यर्थः वसिष्ठः॥ रजस्वला ऋतुस्नाता मात्रेयीं च विदुर्बुधा इति। संस्कारैः संस्कृता मंत्रवत्त्वेति ब्रह्मवादिनी इत्यर्थः॥ वसिष्ठः॥ रजस्वलामृतुस्नातामात्रेयीमाहुरत्र ह्येष्यदपत्यं भवतीति। अत्र ह्येष्यदपत्यं भवतीति व्युत्पत्तिप्रदर्शनं वन्ध्याव्युदासार्थमपरथा निरर्थकं स्यादिति केचित्। व्युत्पत्तिमात्रप्रदर्शनपरमित्यपरे। गर्भहा च यथा वर्णमित्युक्तं। यथा वर्णप्रायश्चित्तापेक्षं प्रत्याह वसिष्ठः। अनात्रेय्यां राजन्यहिंसायां राजन्यां वैश्यहिंसायां वैश्यां शूद्रहिंसायां शूद्रां हत्वा संवत्सरमिति। अस्यार्थः। अनात्रेयीमित्यादिषु लिंगमविवक्षितं। अनात्रेया विज्ञातब्राह्मणगर्भहनने राजन्यहिंसाप्रायश्चित्तं चरेत्। एवमुत्तरत्रापि॥ शूद्रागर्भहनने तु ब्रह्महत्याव्रतं संवत्सरं चरेदिति। यस्तु ब्राह्मणादिहननार्थं कृतनिश्चयः शस्त्रादिना प्रहारं करोति ततश्च दैविकादिप्रतिबंधवशादसौ न मृतो न तु स्वोद्यमशेषि स्यात्। तत्रापि यस्मिन्वर्णे

हते यत्प्रायश्चित्तं तदाचरेत्॥ तथाच याज्ञवल्क्यः॥
चरेद्व्रतमहत्वापि घातार्थं चेत्समागत इति। अत्र यथावर्ण-
मित्यनुवर्त्तते। अनेन ब्रह्महत्याप्रायश्चित्तमेवातिदिश्यते।
ततश्च द्वादशवार्षिकादीनि यथा तथा द्यपेक्षया योज्यानि॥
तत्रायं निर्णयः। यत्र समत्वाभिधानमतिदिशो वा प्राय-
श्चित्तस्य तत्रन्यायतः प्रायश्चित्तस्य किंचिन्न्यूनत्वेपि यत्र सा-
क्षात्संपूर्णव्रतोपदेशो यथा वै श्यावेत्रात्रेयीवधविषये यथा
चापस्तंबीये यागस्थक्षत्रविड्वधविषये तत्र सर्वत्र संपूर्णव्रत-
मेव। यत्र च साक्षादुपदेशो नास्ति तत्र किंचिन्न्यूनं कल्प्यं।
यत्र ब्रह्महत्यादिसमत्वाभिधानं तत्र पातकिस्वरूपसाम्यम-
भिधीयते यथा राजसमो मंत्रीत्यत्रैव पूर्वयोर्वेतराजस्वरूपसम-
ता। अतः किंचिन्न्यूनं पादोनं प्रायश्चित्तं। समत्वाभिधानं च
तत्प्रायश्चित्तातिदेशार्थं। यत्र साक्षात्प्रायश्चित्तस्यैवातिदे-
शस्तत्र न स्वरूपं समता। अतउपदिष्टापेक्षयातिदिष्टं किंचि-
न्न्यूनमेव। कियत्तन्न्यूनमित्याकांक्षायां महापातकप्राय-
श्चित्तातिदेशस्थलेतिदिष्टस्यापि महत्वात्। साक्षाद्ब्रह्म-
हननस्थल इवातिदिष्टस्थलेपि यागस्थक्षत्रादिहननेपि षड्-
त्रिंशाब्दात्पादोनमेव कल्पनीयं। यत्तु कर्मविपाके ब्रह्मह-
त्याप्रायश्चित्तातिदेशात्तदर्द्धमिति कल्पयंति तत्पापस्यो-
पभुक्तत्वेन स्वल्पावशिष्टत्वात्। तस्मान्महापातकसमे-
ष्वतिदिष्टेषु च पादोनं प्रायश्चित्तं कल्प्यं। अनेनैवाभिप्राये-

णामिताक्षरायां। अत एवौपदेशिकेभ्यो न्यूनत्वादातिदेशिकानां
पादोनान्येव ब्रह्महत्याव्रतानि द्वादशवार्षिकादीनि भवन्तीति।
अपरार्केऽपि। नववधं कृतवतो कृतवतश्चैकमेव व्रतमुक्तं। तेना-
घ्नतः पादोनं कल्प्यमिति चरेद्व्रतमहत्वापि घातार्थं चेत्समाग-
त इत्येतद्वचनव्याख्यानसमयेऽभिहितं। महापातकप्रकरणे
स्मृतिमंजर्यामपि आतिदेशिकेषु चातिदेशविधानादौपदेशि-
केभ्यः किंचिन्न्यूनता विज्ञेयेति। एतच्च समेष्वतिदिष्टेषु च पादो-
नकल्पनं ब्रह्महत्यासमेषु तद्धूनातिदेशेषु च ब्रह्महत्याया म-
हापातकक्रमेणार्द्धं पादोनं च कल्पनीयं।। तथाहि।। समत्वेऽभिहि-
ते पश्चात्प्रायश्चित्तमतिदेशेन प्राप्नोतीति द्वितीयकक्षायां प्रायश्चि-
त्तप्राप्तिः साक्षाद्धूनातिदेशेषु प्रथमकक्षायामेव व्रतप्राप्तिरिति
साक्षाद्धूनातिदेशस्याधिकत्वात्तत्र पादोनं साम्यद्वारातिदेशप्राप्तौ
व्यवहितत्वादर्द्धं प्रायश्चित्तमिति युक्तं। अनेनैवाभिप्रायेण स्मृति-
मंजर्यामुक्तं। समानां चातिदेशिकेभ्योऽपि न्यूनमिति। अत एव मिता-
क्षरायां यानि सुवर्णस्तेयसमत्वेन प्रतिपादितानि तेष्वप्यर्द्धमेव
कार्यमिति। अपरार्केऽपि सुवर्णस्तेयप्रकरणे तत्समान्यर्द्धप्रायश्चि-
त्तानीति। येषां च कौटसाक्ष्यादीनां व्रतैर्ब्रह्महत्यासाम्यं सुरापा-
णसाम्यं चाभिहितं तत्राधिकयज्ञाश्रयणेन पादोनमेव कल्प्यं।
अथवा शक्तिमतः पादोनं शक्तिरहितस्यार्द्धमिति कल्पनीय-
मिति स्मृतिकारनिर्णयः।। तत्र न्यायेन त्वतिदेशो संपूर्णमेव प्रा-
प्नोति अतिदेशस्याखंडत्वात्।। अथ सुरापाणप्रायश्चित्तं।।

सुरापेस्यैव । तदाह मनुः ॥ सुरा वै मलमन्नानां पाप्मा च मल-
मुच्यते । तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदिति । यत्तु तेनै-
वोक्तं । गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा । यथैवैका तथा स-
र्वा न पातव्या द्विजोत्तमैरिति तद्द्विजोत्तमानां ब्राह्मणानां गौडीमा-
ध्व्योरपि पैष्ट्याः समत्वप्रतिपादनार्थं । अत्र द्विजोत्तमग्रहणाद्ब्राह्म-
णस्य सुरादिसकलमद्यनिषेधः उक्तद्वादशानि मद्यानि ब्राह्मणा-
स्यत्विति ॥ पुलस्त्यः ॥ पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवं ।
मधूत्थं सैरमारिष्टमैरेयं नालिकेरजं । समानानि विजानीयान्म-
द्यान्येकादशैव तु । द्वादशं तु सुरामद्यं सर्वेषामधमं स्मृतमिति ॥
मनुः ॥ यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवं । तद्ब्राह्म-
णेन नात्तव्यं देवानामश्नता हविरिति । राजन्यवैश्ययोः सुरानिषे-
धान्न गौड्यादिमद्यनिषेधः । तत्रापि ब्रह्मचारिणोस्त्वेव निषेधः ।
सामान्येन ब्रह्मचारिणो मध्वादिनिषेधात् ॥ व्यासः ॥ उभौ म-
ध्वासवक्षीवौ रक्तौ मे केशवार्जुनाविति ॥ बृहद्याज्ञवल्क्यः ॥
कामादपि हि राजन्यो वैश्यो वापि कथंचन । मद्यमेवासुरां पीत्वा
न दोषं प्रतिपद्यत इति ॥ सुरा तूत्पत्तिप्रभृति द्विजातिमात्रस्य नि-
षिद्धा तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदिति स्मरणा-
त् । तथा सुरापाननिषेधस्तु जात्याश्रय इति स्थितिरिति ॥ शू-
द्रस्य न सुरानिषेधो नापि मद्यनिषेधः ॥ इति स्वरूपनिरूप-
णं ॥ अथ प्रायश्चित्तं ॥ तत्र मनुः ॥ सुरां पीत्वा द्विजो मो-
हादग्निवर्णां सुरां पिबेत् । तया स काये निर्दग्धे मुच्यते किल्बि-

धात्ततः। मोहाच्छास्त्रार्थपरिज्ञानात्॥ नतु स्वरूपापरिज्ञानात्।
अग्निवर्णां क्वाथेनाग्निवर्णां॥ याज्ञवल्क्यः॥ सुरांबुघृतगो-
मूत्रपयसामग्निसंनिभं। सुरापोन्यतमं पीत्वा मरणात् शुद्धिमृ-
च्छति। गोमूत्रमपि न बलीवर्दस्यापि तु स्त्रीव्यक्तेरेव घृतगोपयः
साहचर्यात्। एतच्च सकृत्कामकारे॥ तथा चांगिराः॥ सुरापा-
णं सकृत्कृत्वाऽग्निवर्णां सुरां पिबेदिति॥ बृहस्पतिः॥ सुरापाने
कामकृते ज्वलंतीं तां विनिक्षिपेत। मुखे तया विनिर्दग्धो मृतः शुद्धिम-
वाप्नुयात्। गोमूत्रमग्निवर्णं वा पिबेत्सलिलमेव वा। कुर्यात्स्नानश-
नं तावद्यावत्प्राणैर्विमुच्यत इति। अत्र मरणांतिकप्रायश्चित्तानंतरं
शरीरं विद्यते तत्र मरणादेव पापस्यापगतत्वाद्दाहादिसंस्काराः सद्य
एव भवति॥ तथा च भविष्यत्पुराणं॥ आयसे भाजने तप्तां ता-
म्रेणो वा वारुणीं पिबेत्। अग्निवर्णां पापहंतां ततः पापात्प्रमुच्यते।
जीवितस्यांतकाले तु श्मशाने विहितो विधिरिति। कर्त्तव्य इति
शेषः। श्मशाने विहितो विधिर्दाहादिः। शरीराभावेऽस्थिपाला-
श विधिना वा संस्कारः कर्त्तव्यः। अत्र विशेषमाह पैठीनसिः॥
सुरापस्यार्द्रवासा अग्निवर्णां सुरां पिबेदिति॥ प्रचेताः॥ सुरापो-
ऽग्निवर्णामायसेन पात्रेण वा पिबेदिति॥ अंगिराः॥ भृगुप्रपा-
ते पतनं ज्वलनं वा समाविशेत्। महाप्रस्थानमातिष्ठन्मुच्यते सर्व-
किल्बिषादिति। एतच्च मतिपूर्वकपाने द्विगुणं मत्याभ्यासे वशि-
ष्ठोक्तं॥ अभ्यासे तु सुरायाः अग्निवर्णां सुरां पिबेन्मरणात्पूतो भ-
वतीति। अत्र सुराशब्दो गौडीमाध्वीपरः। साक्षात्सुरायाः सकृत्पा-

नेपि मरणांतिकस्योक्तत्वात्॥ तथा भविष्यत्सुराणां॥ गौडी-
माध्व्योस्तथाभ्यासे प्राणांतिकमुदाहृतमिति। केचित्तु याज्ञव-
ल्क्यवचनमन्यथा पठन्ति॥ लक्षयेत्तु समांनिशीत्येव-
वचनात्तत्वेन। तन्मानवेन समानार्थीकरणात्वा भक्षयेदब्दंपि-
ण्याकं वा सकृन्निशि। सुरापानापनुत्यर्थं बालवासा जटी ध्वजी-
ति। एतच्चाबुद्धिपूर्वसुरायास्तालुमात्रसंयोगे द्रष्टव्यं। प्रायश्चि-
त्तस्याल्पत्वाद्दोषोप्यल्प एव कल्पनीयः। अत एव पानशब्दो-
प्यत्र पानाविनाभूततात्वादिसंयोगे वर्त्तते। अत्रापि बालवृद्धा-
दीनां पूर्ववदेवार्द्धपादश्चेति कल्पनीयं। उपनीतानां बालानामर्द्ध-
मनुपनीतानां पादः। एवं विवाहिताविवाहितभेदेन स्त्रिया अपि
उपनयनस्थानत्वाद्विवाहस्य॥ बौधायनः॥ त्रैमासिकमम-
त्या सुरापाने कृच्छ्राब्दपादं चरित्वा पुनरुपनयनमिति। एतदन-
न्य साध्व्युपशमार्थे पाने वेदितव्यं। अत्रैव विषये वार्हस्पत्यमपि।
गौडीमाध्व्यौ सुरां पैष्टीं पीत्वा विप्रः समाचरेत्। तप्तकृच्छ्रं पराकं
च चान्द्रायणमनुक्रमादिति। यदा मद्यसंसृष्टं शुष्कं रसमेवान्नं
भक्षयति तदामनूक्तं पुनरुपनयनं। अज्ञानात्प्राश्य विण्मूत्रं सु-
रासंसृष्टमेव च। पुनः संस्कारमर्हंति त्रयो वर्णा द्विजातय इति।
पुनरुपनयनप्रकार आश्वलायनेनोक्तः। अथोपेतपूर्वस्य कृ-
ताकृतं केशवपनं मेधाजननं चानिरुक्तं परिदानं कालश्च तत्स-
वितुर्वरीमह इति सावित्रीमित्यादि। शुष्कसुराभांडोदकपाने
शातातपः॥ सुराभांडोदकपाने छर्दनं घृतप्राशनमहोरात्रोप-

वासश्चेति सरसुराभांडोदकपाने साक्षात्सुरावयवानां विद्यमा-
नत्वात्पादोनं सुरापाणप्रायश्चित्तं कल्प्यं। तत्राप्यवयवाधि-
क्ये संपूर्णमेव। शुष्कसुराभांडस्थपर्युषितोदकपाने बौधा-
यनः॥ सुरापानस्य यो भांडे ह्यपः पर्युषिताः पिबेत्। शंखपु-
ष्पीविपक्वं तु क्षीरं सनु पिबेत्त्र्यहमिति। पूर्वोक्तविषये त्वकाम-
तोऽभ्यासे स एव। अपः सुराभाजनस्था मद्यभांडस्थितास्तथा।
पंचरात्रं पिबेत्पीत्वा शंखपुष्पीशृतं पय इति। मतिपूर्वकं शुष्क-
मद्यभांडस्थितोदकस्य सकृत्पाने॥ विष्णुः॥ अपः सुराभा-
जनस्थाः पीत्वा सप्तरात्रं शंखपुष्पीशृतं पयः पिबेदिति। अत्रैवा-
भ्यासे वृद्धयमः। सुराभांडस्थितं तोयं यदि कश्चित्पिबेद्द्विजः।
सप्ताहं शाद्वं क्षीरेण पिबेद्ब्राह्मीसुवर्चलामिति। सोमयाजिनः
सुरापमुखगंधघ्राणे मनुः। ब्राह्मणस्तु सुरापस्य गंधमाघ्राय
सोमपः। प्राणानप्सु त्रिरायम्य घृतं प्राश्य विशुद्ध्यतीति। एत-
च्चाकामकारे। कामकारे तु द्विगुणं। असोमयाजिनस्तु जाति-
भ्रंशकरोक्तं प्रायश्चित्तं। पैष्टी गौडी माध्वी व्यतिरिक्तमद्यज्ञा-
नतो ब्राह्मणेन पीते तथा ब्रह्मक्षत्रविशामज्ञानतो रेतोविण्मूत्र-
पाने याज्ञवल्क्यः। अज्ञानात्तु सुरां पीत्वा रेतोविण्मूत्रमेव तु।
पुनः संस्कारमर्हंति त्रयो वर्णा द्विजातय इति। अत्र सुरापैष्ट्या-
दित्रयव्यतिरिक्तमद्यं प्रायश्चित्तस्याल्पत्वात्। पुनरुपनयनं
च तप्तकृच्छ्रपूर्वकं तथा च गौतमो मद्यपानं प्रयुक्ते। अमत्या-
मद्यपाने पयो घृतमुदकं वायुं प्रति त्र्यहं तप्तानि पिबेत्स कृ-

स्ततोस्य संस्कारो मूत्रपुरीषकुणपरेतसां प्राशने चेति। ज्ञान-
तस्तु वशिष्ठोक्तं द्रष्टव्यं। मत्या मद्यपाने त्वसुरायाः सुरायाश्चा-
ज्ञाने कृच्छ्रातिकृच्छ्रौ घृतं प्राश्य पुनः संस्कारश्चेति। सुराया-
श्चाज्ञान इति। एतच्च द्रव्यांतरसंसृष्टायाः सुराया बलात्पा-
ने तत्राप्यप्राक्तस्य वेदितव्यं॥ यच्चापस्तंबेनोक्तं॥ अभ-
क्ष्याणामपेयानाममेध्यानां च भक्षणे। रेतोमूत्रपुरीषाणां
प्रायश्चित्तं कथं भवेत्। पद्मोदुंबरबिल्वानां पलाशस्य कुश-
स्य च। एतेषामुदकं पीत्वा षड्रात्रेण विशुद्ध्यतीति। तदज्ञाना-
त्त्वादि मद्यस्य सकृत्पाने वेदितव्यं। एवमन्यान्यप्युच्चाव-
च प्रायश्चित्तानि जातिशक्तिवयोनुबंधज्ञानाज्ञानसकृदभ्या-
सात्यंताभ्यासबलात्काराद्यपेक्षया योज्यानि। एनसि गुरु-
णि गुरूणि लघुनि लघूनीति गौतमस्मरणात्। तिस्रो वर्णा-
नुपूर्व्येणेत्यनेन क्रमेण या द्विजातिभार्याः शूद्रापर्यंतास्ता-
भिः। सुरा न पातव्या यदि पिबेत्तदार्द्धं प्रायश्चित्तं॥ तथा च
मनुः॥ पतत्यर्द्धं शरीरस्य यस्य भार्या सुरां पिबेत्। ब्राह्मण-
स्य भार्यया शूद्रयापि मद्यमात्रं न पातव्यं। ब्राह्मणस्य नि-
षिद्धत्वात्। यदि पिबन्ति तदा पातित्यं नास्ति निषेधस्य शू-
द्रवर्णाविषयत्वाभावात्। तत्संसर्गात्पत्युर्ब्राह्मणस्यापि
न पातित्यदोषः। किं त्वेनस्वी भवति गर्भे च दोषो जायते। प्रथ-
मतः शूद्रावेदनमेव न सर्वसंमतं तत्रापि पीतमद्यया सह संसर्ग इ-
ति स्वल्पो दोषोस्त्येव। अतएवोपपातकमध्ये मद्यपस्त्रीनिषेवण-

मितिपरिगणितं। एतत्सर्वमभिप्रेत्याह शंखः॥ सुरालशुनपलां-
डुगृंजनकमांसादीन्यभक्ष्याणि। विवर्जयेदाहारमयं हि शरीरं त-
न्मयत्वाद्ब्राह्मणः संकीर्यते। मातुरशितपीताभिर्गर्भः संभवती-
ति॥ अथ सुरापानसमानि॥ तत्र मनुः॥ ब्रह्मोज्झता वेदनिं-
दा कूटसाक्ष्यं सुहृद्वधः। गर्हितानाद्ययोर्जग्धिः सुरापानसमानि
षट्। गर्हितं पलांड्वादि अनाद्यममेध्यादीनि स्मृतिमंजर्यां। क-
ल्पतरौ तु गर्हितं शास्त्रप्रतिषिद्धमपि लोके निंदितं। अनाद्यं ल-
शुनादीनि। मतिपूर्वमनयोर्भक्षणे सुरापानसमत्वं॥ अत
एव मनुः॥ छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटं। पलांडुं गृंज-
नं चैव मत्या जग्ध्वा पतेन्नर इति। अमतिपूर्वं त्वेतु प्रायश्चित्तांतरं ते-
नैवाभिहितं। अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सांतपनं चरेदिति॥
याज्ञवल्क्यः॥ निषिद्धभक्षणं जैह्म्यमुत्कर्षे च वचोऽनृतं। रज-
स्वलामुखास्वादः सुरापानसमानि षट्॥ जैह्म्यं कौटिल्यं। तच्च
गुरुविषयं॥ देवलः॥ मृतां द्वितीयां यो भार्यां दहेद्वैतानिकाग्नि-
भिः। जीवंत्यां प्रथमभार्यायां तु सुरापानसमं हि तदिति। समत्वकथनं
तत्प्रायश्चित्तातिदेशार्थमतः अर्द्धं प्रायश्चित्तं भवति। व्रतातिदेशे
तु पादोनं भवतीति प्राग्निरूपितं॥ अथ सुवर्णस्तेयप्रायश्चि-
त्तं॥ याज्ञवल्क्यः॥ ब्राह्मणः स्वर्णहारी तु राज्ञे मुसलमर्पये-
त्। स्वकर्म ख्यापयंस्तेन हतो मुक्तोऽपि वा शुचिः। राजा चाभिषेका-
दिगुणायुक्तः क्षत्रियः। तेन मुसलेन हतो मरणान्मुक्तो वा शुद्ध ए-
व॥ अहनने राज्ञो दोषोऽस्त्येव॥ अत एव मनुः॥ अत ऊर्ध्वं

प्रवक्ष्यामि सुवर्णस्तेयनिःकृतिं। सुवर्णस्तेयकृद्विप्रो राजानम-
भिगम्य तु। स्वकर्म ख्यापयन्ब्रूयान्मां भवाननुशास्त्विति।
गृहीत्वा मुसलं राजा सकृद्धन्यात्तु तं स्वयं। वधेन शुध्यति स्तेनो
ब्राह्मणस्तपसैव वा। राजा स्तेनेन गंतव्यो मुक्तकेशेन धावता।
आचक्षाणेन तत्स्तेयमेवं कर्मास्मि शाधि मां। स्कंधेनादाय
मुसलं लकुटं वापि खादिरं। अभ्रिं वोभयतस्तीक्ष्णामायसं दं-
डमेव वा। शासनाद्वा विमोक्षाद्वा स्तेनः स्तेयाद्विमुच्यते। अशा-
सित्वा तु तं राजा स्तेनस्याप्नोति किल्बिषमिति। शाधि जहि। अभ्रिः
काष्ठकुद्दालः। शक्तिं वोभयतस्तीक्ष्णामित्यपि पाठः। ब्राह्मणो-
पि वधमर्हति। वधेन शुध्यति स्तेनो ब्राह्मणा इति तेनैवाभिधाना-
त्। यत्तु ब्राह्मणो न हंतव्य इति। न जातु ब्राह्मणं हन्यात्सर्वपापे-
ष्ववस्थितमिति च निषेधवचनं तत्प्रायश्चित्तव्यतिरिक्तविषयं प्राय-
श्चित्तप्रकरण एव सुवर्णस्तेयकृद्विप्र इत्याद्यभिधानात्॥ गौत-
मः॥ अप्रम्मेन स्वीराजेति॥ संवर्त्तः॥ ततो मुसलमादाय सकृद्ध-
न्यात्तु तं स्वयं। यदि जीवति स स्तेनस्ततः स्तेयाद्विमुच्यत इति॥
शंखः॥ सुवर्णस्तेनः प्रकीर्णकेश आर्द्रवासा आयसं मुसलमादा-
येति। ब्राह्मणस्वर्णहारी राज्ञे मुसलमर्पयेदिति सामान्येनाभिधा-
नादिदं मरणांतिकप्रायश्चित्तं सार्ववर्णिकं। अत्र सुवर्णशब्दः परि-
माणविशेषविशिष्टहिरण्यद्रव्यवचनः। परिमाणमाह याज्ञ-
वल्क्यः॥ जालसूर्यमरीचिस्थं त्रसरेणू रजः स्मृतं। तेऽष्टौ लिक्षा
तु तास्तिस्रो राजसर्षप उच्यते। गौरस्तु ते त्रयः षट् ते यवो मध्यस्तु ते

षयः । कृष्णलः पंच ते माषस्ते सुवर्णास्तु षोडश इति । एवं च षोड-
शमाषपरिमिते हेम्नि सुवर्णसंज्ञा पारिभाषिकी । परिमाणविशेषे-
णाप्रायश्चित्तविशेषः षड्विंशन्मते ॥ वालाग्रमात्रे पहृते प्रायश्चि-
त्तं समाचरेत् । लिक्षामात्रेपि च तथा प्राणायामत्रयं बुधः । राजसर्ष-
पमात्रे च प्राणायामश्चतुष्टयं । गायत्र्यष्टसहस्रं तु जपेत्पापविशुद्धये ।
गौरसर्षपमात्रे तु गायत्रीं वेदिनं जपेत् । यवमात्रे सुवर्णस्य प्रायश्चित्तं
दिनद्वयं । सुवर्णकृष्णलं ह्येकमपहृत्य द्विजोत्तमः । कुर्यात्सांतपनं
कृच्छ्रं तत्पापस्यापनुत्तये । अवघ्नरं पावकी भवेत् । ऊर्द्ध्वं प्राणांतिकं
ज्ञेयमथवा ब्रह्महाव्रतमिति । एतच्च संवत्सरयावकव्रतं किंचिन्न्यून-
सुवर्णपरिमाणापहारे द्रष्टव्यं । एतच्च सुवर्णस्तेयप्रायश्चित्तं हृता-
देकादशगुणद्रव्यं स्वामिने दत्त्वैव कार्यं ॥ तथा च लघुविष्णुः
स्तेयेन ज्ञत्वधेनु सुवर्णहरणे कृते । पश्चात्तेन दातव्यं तस्मै ह्येकाद-
शाधिकं । करणसंशुद्धिभावाय ततश्चांद्रायणत्रयं । संवत्सरेण क-
र्त्तव्यं निपुणां शुद्धिमिच्छता । एकादशगुणदानं सर्वस्तेयप्राय-
श्चित्तशेषः । तस्य करणसंशुद्धिरूपत्वात् चांद्रायणत्रयं । यवमध्य-
पिपीलिकामध्ययतिचांद्रायणात्मकं । संवत्सरेण कर्त्तव्यं चांद्राय-
णत्रयाभ्यासेन संवत्सरं यावत्प्रायश्चित्तं कर्त्तव्यमित्यर्थः । एतच्च
संवत्सरयावकव्रतेन विकल्पते । एकादशगुणदानासमर्थं प्रति स-
एवाह । अभावे कांचनस्यास्य हृतमेतच्चतुर्गुणं । चरेद्देशविनिःसंवः
पूर्णं वर्षचतुष्टयं । समात्रे कांचनं गाश्च रजतं वापि शक्तितः । देयम-
न्नं द्विजाग्र्येभ्यः शुभं न्यायोपशांतये । एतद्व्रतं चांद्रायणत्रयं संव-

त्सरेण कर्त्तव्यमित्येतत्। मरणांतिकप्रायश्चित्तादर्वाचीनेषु स्ते-
यप्रायश्चित्तेष्वेकादशगुणदानासमर्थस्य चानुगुण्याचरणमने-
नन्यायेन प्राप्तं। तत्र जातिशक्त्याद्यपेक्षया द्विगुणादिकं कल्प्यं।
यदा राजा मुसलादिना हंतुमसमर्थः शरीरशक्त्यभावात्तदा वशि-
ष्ठोक्तं द्रष्टव्यं। स्तेनः प्रकीर्णकेशो राजानमभियाचेत ततस्तस्मै राजौ-
दुंबरं शस्त्रं दद्यात्तेनात्मानं प्रमापयेन्मरणात्पूतो भवतीति विज्ञा-
यत इति। औदुंबरं ताम्रमयं। क्षत्रियादिभिर्ब्राह्मणसुवर्णहरणे
ब्राह्मणादिभिर्गुरुश्रोत्रिययागस्थविप्रसुवर्णहरणे च वशिष्ठोक्त-
मेव मरणांतिकं प्रायश्चित्तं। निष्कालको घृताक्तो गोमयाग्निना पा-
दप्रभृत्यात्मानं प्रमापयेन्मरणात्पूतो भवतीति विज्ञायत इति नि:
कालकशब्दः पूर्वमेव व्याख्यातः। यस्तु रजतादिद्रव्यांतरबुद्ध्या
वस्त्रवद्वा सुवर्णमपहरति तदज्ञानापहृतमुच्यते। तत्र प्रायश्चि-
त्तमाह याज्ञवल्क्यः॥ अनिवेद्य नृपे शुद्ध्येत्सुरापव्रतमाचरन्
आत्मतुल्यं सुवर्णं वा दद्याद्वा विप्रतुष्टिकृत्। राजन्यकथयित्वैव
द्वादशवार्षिकव्रतं संपूर्णमाचरेत्। आत्मतुल्यवर्णदानादिरु-
तरप्रायश्चित्तसमपाठात्। सुरापव्रतमित्यनेन प्रावशिरोध्वजन-
त्कपालधारणनिरासः। यद्यपहर्तात्यंतधनवांस्तदात्मतुल्य-
सुवर्णदानं। आत्मतुल्यसुवर्णाभावे विप्रस्य यावज्जीवं कुटुंबभ-
रणक्षमत्वेन तुष्टिकरं धनं दद्यात्। यत्तु व्यासवचने एतदेव व्रतं स्तेनः
पादन्यूनं समाचरेदिति नववार्षिकं तन्निर्गुणस्वामिकसुवर्णापहारे
यच्चाङ्गिरसोक्तं। षडब्दं वा चरेत्कृच्छ्रं यजेद्वा धातुमाहिजःतीर्था-

निवार्य मे हिंस्रांस्ततः स्तेयात्प्रमुच्यत इति। तन्निर्गुणस्वामिकस्य क्षु-
द्रस्याम कुटुंबरक्षणार्थापहारे। क्रतुः स्वर्जिदादिः। एवमादीन्यन्यान्य-
पि गुरुलघुप्रायश्चित्तानि विषयविशेषेषु शक्त्याद्यपेक्षया योज्या-
नि॥ तथाच भविष्यत्पुराणे॥ महापातकनिर्देशे तृतीयं स्ते-
यमुच्यते। ब्राह्मणद्रव्यविशेषात्प्रयोजनविशेषतः। अनुबंधविशे-
षाच्च प्रायश्चित्तं विधीयते। हृत्वा तु कांचनं विप्रो गुणिनो ब्राह्मणस्य-
तु। स्वयं च निर्गुणो वीर चरेद्ब्रह्महणो व्रतं। यदा च निर्गुणः स्वामी क्ष-
त्रियो वैश्य एव वा। हृतं च ब्राह्मणो वीर तदाप्यस्तंब भाषितं। क्षत्रि-
यस्य सुरश्रेष्ठ गुणो हीनस्य सत्तमः। हृत्वा तु कांचनं विप्रः प्रायश्चि-
त्तमिदं चरेत्। चतुर्थकाले भुंजानस्त्रिकालं स्नानमाचरेत्। स्थाना-
सनाभ्यां विहरंस्त्रिभिर्वर्षैर्विमुच्यते। क्षत्रादीनां गुणवतामल्पा-
पहरणे गुह। अल्पानुबंधे च तथा स्तदेव भवेद्विभो। श्रेष्ठविप्रसु-
वर्णं तु पश्चुतमपहृत्य च। सातिशयानुबंधं च ब्राह्मणो द्यूतवल्लभः।
प्रायश्चित्तमिदं कुर्याद्वदतो मे निबोधय। लोमहीनो घृताक्तस्त्वा-
त्मानं पावके क्षिपेत्। हृत्वा तु कांचनं वीर क्षत्रियो ब्राह्मणस्य तु।
सानुबंधो ह्यनाढ्यस्य गुणैर्गुरुपरो गुह। आत्मानं स हरेद्वीर शास्त्रे-
णौदुंबरेण तु। ततः शुद्धिमवाप्नोति दिष्टांते प्राणवर्जितः। हृत्वा
तु कांचनं वैश्यो गुणिनो ब्राह्मणस्य च। व्यसनी गुणहीनश्च सा-
नुबंधः सुराधिप। कृत्वा पाशं केशदाम्ना तदात्मानं सुराधिप। तद्व-
त्त्यजति प्राणांस्ततः शुद्धिमवाप्नुयात्। चरेत्सांतपनं कृच्छ्रं त-
न्निर्यात्यात्मशुद्धये। तन्निर्यात्य गृहीतं स्वामिने दत्वा। आत्म-

शुद्धये मरणांतिकप्रायश्चित्तं करणायोग्यतायै। अमुमेवमर्थमाह। त-
न्निर्यात्येति तु वाक्यं प्रवदंति मनीषिणः। तत्पूर्वं मरणांतिकप्राय-
श्चित्तात्पूर्वं। योग्यस्य। भावप्रत्ययोयं निर्दिष्टः। योग्यत्वसूचकमि-
त्यर्थः। अपहृतद्रव्यं दत्त्वा सांतपनाचरणानंतरं मरणांतिकप्रा-
यश्चित्तं कुर्यादित्यर्थः। क्षत्रियस्य तु बालस्य ब्राह्मणो हरते य-
दि। पंचनिष्कप्रमाणं तु सुवर्णं केतवं व्रति। कृष्णाजिनीयती
दंडी मिताशी विजने वने। जपमानोर्कसूक्तं च चरेद्ब्रह्महणो
व्रतं। क्षत्रियस्य गुणाढ्यस्य हृत्वा विप्रस्तु निर्गुणः। चतुर्थका-
ले भुंजानस्त्रिभिर्वर्षैर्विशुध्यति। क्षत्राद्योपि गुणिनः स्व-
मल्पानुबंधिदे। कृत्वा चौर्यमनेनैव शुद्ध्येयुर्नात्र संशयः। वि-
प्रस्य गुणवान्विप्रो निर्गुणस्यापहृत्य तु। चतुर्थे काले भुंजान-
स्त्रिभिर्वर्षैर्व्यपोहति। ब्राह्मणस्य गुणाढ्यस्य हृत्वा विप्र-
स्तु निर्गुणः। प्रभूतं सानुबंधं तु स शुद्ध्येत्तु कदाग्निना। गु-
णवान् ब्राह्मणो हृत्वा क्षत्रियस्यागुणस्य च। चरेत्सांतपनं
कृच्छ्रं तन्निर्यात्यात्म शुद्धये। एवमन्यान्यपि विभोप्रायश्चि-
त्तानि भागशः। सुवर्णस्तेयविषये स्थापनीयानि पंडितैरिति।
चतुर्विंशतिमते। रूप्यं हृत्वा द्विजो लोभाच्चरेच्चान्द्रायणव्रतं।
राघाणकचणहृद्दुमाश्वतान्द्विगुणं चरेत्। आसहस्रं तु त्रिगुण-
मूर्द्ध्वं हेमविधिः स्मृतः। सर्वेषां धातुलोहानां पाराकं तु समाचरेत्।
धान्यानां हरणे कृच्छ्रं तिलानामेवं स्मृतं। रत्नानां हरणे वि-
प्रश्चरेच्चान्द्रायणव्रतमिति। किंचिदधिकपणत्रीयमाषत्रयेणवा-

णकशब्दं प्रयुंजते। केचन टंकपरिमिते प्रयुंजते। रत्नहरणे चा-
न्यायरत्नस्वल्पमूल्यविषयं। क्षत्रियादिरत्नापहारविषयं वा। उ-
त्तमरत्नहरणस्य सुवर्णस्तेयसमत्वात्॥ अथ सुवर्णस्तेय-
समानि॥ याज्ञवल्क्यः॥ अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं
तथा। निक्षेपस्य च सर्वं हि सुवर्णस्तेयसंमितं। अश्वादीनि ब्रा-
ह्मणसंबंधीनि। निक्षेपः सुवर्णव्यतिरिक्तस्य॥ अथ गुरुत-
ल्पप्रायश्चित्तं॥ यमः॥ गुरुदाराभिगमनं कृत्वा मोहेन वै द्वि-
जः। ज्वलंतीमायसीं शय्यां सेविशेद्गुरुतल्पगः। सूर्मीं ज्वलंतीं
माश्लिष्य मृत्युना स विशुद्ध्यति। अथवा शिश्नवृषणावुत्कृत्य
प्रतिगृह्य तु। गुरोरभिमुखस्तिष्ठेन्मृतो भवति किल्बिषात्। नै-
ऋतीं वा दिशं गच्छेदानिपातादजिह्मगः। प्राणत्यागाद्विशुद्धो-
हे मनुः स्वायंभुवोऽब्रवीत्। सूर्मी कार्ष्णायसी स्त्रीप्रतिकृतिः।
गुरोरभिमुखस्थितावपि प्राणत्यागे नैव शुद्धिः। अत्र गुरुर्निषेक-
कर्त्ता। अतो द्विजग्रहणमुपलक्षणं। संपूर्णगमनं च योनौ रेतः
सेके सत्येव। अतस्ततो वाग्निवृत्तौ न महापातकत्वं। एतच्च जननी-
मकामतः तत्सपत्नीं सवर्णामुत्तमवर्णां च कामतो गच्छतः॥
तथा च षट्त्रिंशन्मते॥ पितृभार्यां तु विज्ञाय सवर्णां योऽधिग-
च्छति। जननीं वाप्यविज्ञाय मृतः शुद्धिमवाप्नुयात् इति। जनन्यां
कामकारे वक्ष्यते। अथ यः शय्यायां शयनं स्वकर्म विख्याप्य कुर्या-
त्॥ तथा च मनुः॥ गुरुतल्प्यभिभाष्यैनस्तप्ते स्वप्यादयो-
मय इति। मृन्मयी वा स्त्रीप्रतिकृतिर्भवति॥ यदाह वृद्धहारीतः

गुरुतल्पगो मृण्मयीमायसीं वा स्त्रियाः प्रतिकृतिमिति। अत्रापरो-
विशेषो वशिष्ठेनोक्तः। निष्कालको घृताभ्यक्तस्तप्तां सूर्मीं परिष्वजे-
दिति। उभयं चैतदतिप्रवृत्तौ तन्नायः प्रायनत्वापरूपप्रायश्चित्तं। स्व-
प्नोऽस्मातृन प्रवृत्तौ तु अथवा शिश्नवृषणावुत्कृत्य प्रतिगृह्य चेत्या-
दि प्रायश्चित्तं। अत्र विशेषमाह मनुः स्वयं वा शिश्नवृषणावुत्कृत्य
प्रतिगृह्य चेत्यादि प्रायश्चित्तं। अत्र विशेषमाह मनुरुत्कृत्याचाय-
चांजलाविति। एतत्तः अनीक्षमाणो नैव गमनं कर्तव्यं॥ आहतुः शं-
खलिखितौ॥ सुरेण शिश्नवृषणावुत्कृत्यानैवक्षमाणो व्रजेदि-
ति। वशिष्ठः। सवृषणं शिश्नमुत्कृत्यांजलावाधाय दक्षिणाभिमु-
खो गच्छेद्यत्रैव प्रतिहन्यात्तत्रैव तिष्ठेदाप्रलयादिति। पितृदारप्रोत्सा-
हितस्य गुरुतल्पगमने मनुः। यो रन्यनरद्रष्टव्यं गुरुतल्पमभिमा-
घेन तल्पे स्वप्यादयोमये। सूर्म्यां ज्वलन्तीं वाश्लिष्य मृत्युना सवि-
शुद्ध्यतीति। तन्नायः प्रायनेत्वापरूपकं। सूर्म्या लिंगमपरं॥ कामतो
जननीगमने वशिष्ठः॥ निष्कालको घृताक्तो गोमयाग्निना पाद-
प्रभृत्यात्मानमवदाहयेदिति। अधिकदुःखोत्पादकत्वात्कामकार-
विषयमेव युज्यते अकामतोऽभ्यासेऽप्येतदेव। इदं च प्रायश्चित्तं मुख्य-
पुत्रत्वं॥ अत एव मनुः॥ क्षेत्रजादीन्सुतानेकनानेकादशापो-
चितान्। पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः इति। एवं
सपत्नमातृगमने यत्प्रायश्चित्तं तन्न क्षेत्रजादीनां भवति। अका-
मतः सवर्णोत्तमवर्णपितृपत्नीगमने शंखोक्तं द्वादशवार्षिकं।
अधःशायी जटाधारी पर्णमूलफलाशनः। एककालं समश्न-

चैवर्षे तु द्वादशे गते । उक्ता स्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः ।
व्रतेनैतेन शुद्ध्यंति महापातकिनस्त्विमे इति । अस्मिन्नेव विषये
कामतः प्रवृत्तस्य रेतःसेकादर्वाग्निवृत्तौ षड्वार्षिकं । अकामत-
स्तु रेतःसेकात्प्राग्निवृत्तौ षड्वार्षिकं कल्प्यमिति मिताक्षरायां ।
ब्राह्मणीपुत्रस्यामतिपूर्वं शूद्रजातीयगुरुपत्नीगमने प्राजापत्य-
कृच्छ्रान्वर्षत्रयमाचरेत् । अमतिपूर्वं सवर्णा व्यभिचारिणी गु-
रुपत्नीगमने पदक्रमरहितसंहितामात्रजपसहितं चांद्रायण-
त्रयं ॥ अत्र याज्ञवल्क्यः ॥ प्राजापत्यं चरेत्कृच्छ्रं समा वा-
गुरुतल्पगः । चांद्रायणं वा त्रीन्मासानभ्यस्यन्वेदसंहितामि-
ति । पूर्वोक्तविषयद्वये कामतःप्रवृत्तौ यथाक्रमेणौशनसो-
क्तं द्रष्टव्यं । गुरुतल्पगः । व्रतेनैतेन शुद्ध्यंति महापातकिनस्त्वि-
मे इति । अस्मिन्नेव विषये कामतः प्रवृत्तस्य रेतःसेकादर्वाग्नि-
वृत्तौ षड्वार्षिकं । अकामतस्तु रेतःसेकात्प्राग्निवृत्तौ षड्वार्षिकं
कल्प्यमिति मिताक्षरायां । ब्राह्मणीपुत्रस्यामतिपूर्वं शूद्रजा-
तीयगुरुपत्नीगमने प्राजापत्यकृच्छ्रान्वर्षत्रयमाचरेत् । अम-
तिपूर्वं सवर्णा व्यभिचारिणी पत्नीगमने पदक्रमरहितसं-
हितामात्रजपसहितं चांद्रायणत्रयं । अत्र याज्ञवल्क्यः ॥
प्राजापत्यं चरेत्कृच्छ्रं समा वा गुरुतल्पगः । चांद्रायणं वा-
त्रीन्मासानभ्यस्यन्वेदसंहितामिति । पूर्वोक्तविषयद्वये
कामतः प्रवृत्तौ यथाक्रमेणौशनसोक्तं द्रष्टव्यं । गुरुतल्पा-
भिगामी संवत्सरं ब्रह्महत्याव्रतं षण्मासान्वा तप्तकृच्छ्रं च-

रेदिति। ब्राह्मणीपुत्रस्य कामतः क्षत्रजातीयपितृपत्नीगमने प्राजापत्यकृच्छ्रान्वर्षत्रयमाचरेत्। अमतिपूर्वं सवर्णाव्यभिचारिणीगुरुपत्नीगमने पदक्रमरहितसंहितामात्रजपसहितं चांद्रायणत्रयं॥ अत्र याज्ञवल्क्यः॥ प्राजापत्यं चरेत्कृच्छ्रं समा वा गुरुतल्पगः। चांद्रायणानि वा त्रीणि मासानभ्यस्य वेदसंहितामिति। पूर्वोक्तविषयद्वये कामतः प्रवृत्तौ यथाक्रमेणोपानमोक्तं द्रष्टव्यं॥ गुरुतल्पाभिगामी संवत्सरं ब्रह्महत्याव्रतं षण्मासान्वा तप्तकृच्छ्रं चरेदिति। ब्राह्मणीपुत्रस्य कामतः क्षत्रजातीयपितृपत्नीगमने नववार्षिकं। मातुः सपत्नीं भगिनीमाचार्यस्य तनयां तथा। आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पग इति। याज्ञवल्क्येन गुरुतल्पातिदेशात्। अत्रैव कामतोऽभ्यासे कवषोक्तं मरणांतिकं। मत्या गत्वा पुनर्भार्यां गुरोः क्षत्रसुतां द्विजः अंडाभ्यां रहितं लिंगमुत्कृत्य स मृतः शुचिरिति। ब्राह्मणीपुत्रस्य कामतो वैश्यायां पितृपत्न्यां गमने षड्वार्षिकं॥ तथा च पुलस्त्यः॥ ब्रह्मपुत्रस्य क्षत्रियायां नववार्षिकं। वैश्यायां षड्वार्षिकं। क्षत्रियापुत्रस्य वैश्यायां मातरि नववार्षिकं। शूद्रायां तु षड्वार्षिकं एवमेव वैश्यापुत्रस्यापीति। एवमेव नववार्षिकं शूद्रायां तु षड्वार्षिकं गुरोर्भार्यां तु यो वैश्यां गत्वा गच्छेत्पुनः पुनः। लिंगाग्रं छेदयित्वा तु ततः शुद्ध्येत किल्बिषादिति। शूद्रायां कामतो त्यामउपमन्यूक्तं द्वादशवार्षिकं। पुनः शूद्रां गुरोर्गत्वा बुद्ध्या विप्रः समाहितः। ब्रह्मचर्यमदुष्टात्मा समाचरेद्द्वादशाब्दिकमिति। ब्राह्मणीपु-

स्याबुद्धिपूर्वकं क्षत्रियायां पितृपत्न्यां गमने यमोक्तं द्रष्टव्यं । का-
लेऽष्टमे वा भुंजानो ब्रह्मचारी सदाव्रती । स्थानासनाभ्यां विहरं-
स्त्रिरह्नोऽभ्युपयन्नपः । अधःशायी त्रिभिर्वर्षैस्तदपोहेत पातक-
मिति । अत्रैवाभ्यासे ज्ञातूकर्ण्यः । गुरोः क्षत्रसुतां भार्यां पुनर्गत्वा
तु कामतः । अंडमात्रं समुत्कृत्य शुद्धो जीवन्मृतो पिवेति । वैश्या-
यां त्वकामतो गमने प्राजापत्यं चरेत्कृच्छ्रं समां वा गुरुतल्पग इति
याज्ञवल्क्योक्तं वर्षत्रयप्राजापत्यचरणं कल्प्यं ॥ वृद्धमनु-
रपि ॥ अब्दत्रयमकामात्तु कृच्छ्रं नित्यं समाचरेदिति । अत्रैवाका-
मतोऽभ्यासे हारीतोक्तमरणांतिकं ब्रह्मचर्यं । अभ्यस्य विप्रो वैश्या-
यां गुरोरज्ञानमोहितः । षडंगं ब्रह्मचर्यं च प्रसरेद्यावदायुषमिति ।
षडंगं वाक्पाण्युपस्थचक्षुःश्रोत्रमनांसि षडंगानि । अमतिपूर्वं
शूद्रायां पितृपत्न्यां गमने मनूक्तं सुमंतूक्तं वा ज्ञेयं ॥ मनुः ॥ खट्वां-
गी चीरवासा वा श्मश्रुलो विजने वने । प्राजापत्यं चरेत्कृच्छ्रम-
ब्दमेकं समाहित इति ॥ सुमंतुः ॥ अथवा गुरुदाराभिगामी सं-
वत्सरं कंटकिनीं शाखां परिष्वज्याधःशायी त्रिषवणी भैक्षाहारः
पूतो भवतीति । अत्रैवाभ्यासे पूर्वमनूक्ताब्दकृच्छ्रमेव द्विगुणं कु-
र्यात् । क्षत्रियया पितृपत्न्या प्रोत्साहितस्य कामतः प्रवृत्तस्य ब्रा-
ह्मणस्य पुत्रस्य रेतःसेकात् प्राग्निवृत्तस्य मासत्रयं प्राजापत्यच-
रणं । अत्रैवोभयेच्छातः प्रवृत्तस्य मासत्रयमिति कृच्छ्रचरणं ।
अत्रैव स्वयमेव प्रोत्साहनं कृत्वा प्रवृत्तस्य मासत्रयं कृच्छ्राति-
कृच्छ्रानुष्ठानं । अनेनैवाभिप्रायेण व्याघ्रः । कृच्छ्रं चैवातिकृ-

च्छ्रं च तथा कृच्छ्रातिकृच्छ्रकं। चरेन्मासत्रयं विप्रः क्षत्रियागमने गुरोरिति। पूर्वोक्तविषय एव तया प्रोत्साहितस्याकामतः प्रवृत्तस्य रेतःसेकात्प्राग्निवृत्तावतिकृच्छ्रः। अत्रैवोभयेच्छातः प्रवृत्तस्य तप्तकृच्छ्रः। तत्रैव स्वेन प्रोत्साहितायां प्रवृत्तस्य चांद्रायणं अनेनैवाभिप्रायेण कारावः। चांद्रायणं तप्तकृच्छ्रं प्राजापत्यं तथैव च। सकृद्गत्वा गुरोर्भार्यामज्ञानात् क्षत्रियां द्विज इति। वैश्यायां पितृपत्न्यां कामत उभयेच्छातः प्रवृत्तस्य रेतःसेकात् प्राग्निवृत्तस्य ब्राह्मणीपुत्रस्य मासं तप्तकृच्छ्रः। अत्रैव स्वेन प्रोत्साहितायां प्रवृत्तस्य मासं पराकः। अत्रैव तया प्रोत्साहितस्य मासं सांतपनकृच्छ्रः। अनेनैवाभिप्रायेण कारावः। तप्तकृच्छ्रं पराकं च तथा सांतपनं गुरोः। भार्यां वैश्यां सकृद्गत्वा बुद्ध्या मासं चरेद्बुधः इति। अत्रैवाकामतः प्रवृत्तस्य तया प्रोत्साहितस्य पंचरात्रं। उभयेच्छातः प्रवृत्तस्य सप्तरात्रं। स्वेन प्रोत्साहितायां प्रवृत्तस्याष्टरात्रं। एतत्सर्वमभिप्रेत्याह प्रजापतिः। पंचरात्रं तु नाश्नीयात्सप्ताष्टौ वा तथैव च। वैश्यां भार्यां गुरोर्गत्वा सकृदज्ञानतो द्विज इति। शूद्रायां पितृपत्न्यां कामतः प्रवृत्तस्य तया प्रोत्साहितस्य रेतःसेकात्प्राग्निवृत्तस्यातिकृच्छ्रः। स्वेन प्रोत्साहितायां प्रवृत्तस्य पराकः। एतदेवाभिसंधायाह जाबालिः॥ अतिकृच्छ्रं तप्तकृच्छ्रं पराकं च तथैव च। गुरोः शूद्रां सकृद्गत्वा बुद्ध्या विप्रः समाचरेदिति। अत्रैवाकामतः प्रवृत्तस्य तया प्रोत्साहितस्य प्राजापत्यं। उभयेच्छातः प्रवृत्तस्य सांतपनं। स्वेन प्रोत्साहितायां प्रवृत्तस्य सप्तरात्रोपवासः। एतदभिप्रेत्याहती-

र्धतमः। प्राजापत्यं सांतपनं सप्तरात्रोपवासकं गुरोः। शूद्रां सकृद्गत्वा
चरेद्विप्रः समाहित इति। ब्राह्मणीपुत्रस्य क्षत्रियागमने वैश्यागा-
मने च यत्प्रायश्चित्तं तदेव क्षत्रियापुत्रस्य वैश्यागमने शूद्रागमने
च। अनंतरत्वादेकांतरितत्वाच्च। ब्राह्मणीपुत्रस्य क्षत्रियागमने
यत्प्रायश्चित्तं तदेव वैश्यापुत्रस्य शूद्रागमन इति द्रष्टव्यं। यत्र-
तु शृंगग्राहिकया विशेषोभिहितस्तत्र स एव ग्राह्यः। एवमन्यान्य-
पि स्मृतिवचांस्यनुबंधाद्यपेक्षया योज्यानि। एवंविधं पापेषु प्रवृ-
त्तानां स्त्रीणामपि महापातकिनीत्वाविशेषामकृते मरणांतिकं।
तथाच कात्यायनः॥ एष दोषश्च शुद्धिश्च पतितानामुदाहृता
स्त्रीणामपि प्रसक्तानामेष एव विधिः स्मृत इति॥ याज्ञवल्क्यो-
पि॥ छित्वा लिंगं वधस्तस्याः सकामायाः स्त्रियास्तथेति। अकाम-
कृते तु द्वादशवार्षिकस्यार्द्धं। स्त्रीणामर्द्धस्य विहितत्वात्। अयं
तु विशेषः। अरण्यादिस्थितिर्नास्ति गृह एव वास इति॥ तथा
च योगयाज्ञवल्क्यः। पतितानामेष एव विधिः स्त्रीणां प्रकी-
र्तितः। वासो गृहांतिके देयमनुवासश्च रक्ष्य इति। रक्षणार्थमनु-
वासः समीप एव वासः कर्त्तव्य इत्यर्थः॥ मनुः॥ एतदेव व्रतं
कार्यं योषित्सु पतितास्वपीति। एतदेव द्वादशवार्षिकमेव। अ-
नुलोमगमने नूक्ता निःकृतिः। प्रतिलोमगमने कामाकामभेदे-
न संवर्त्तः॥ शूद्रस्तु विप्रागमने गुरुतल्पव्रतं चरेत्। अज्ञानात्
ज्ञानतो गत्वा प्राणांतिकमिति स्थितिः॥ वशिष्ठः॥ शूद्रश्चे-
द्ब्राह्मणीमभिगच्छेद्वीरणैर्वेष्टयित्वा शूद्रमग्नौ प्रास्येत्। ब्राह्म-

याया: शिरसि वपनं कारयित्वा सर्पिषाभ्यज्यन ग्नां ब्राह्मणीं कृत्वा खरमारोप्य महापथमनुसंप्राजयेत्पूता भवतीति विज्ञायते। वपनमित्यनेनैव प्राप्तेपि चानेकशिखवपनप्राप्तये शिरसीत्युक्तिः यस्य तृणविशेषस्योशीरं मूलं तानि तृणानि वीरणानि। तथा वैश्यश्चेद्ब्राह्मणीमभिगच्छेल्लोहितदर्भैर्वेष्टयित्वा वैश्यमग्नौ प्रास्येद्ब्राह्मण्याया: शिरसि वपनं कारयित्वा सर्पिषाभ्यज्य गौरखरमारोप्य महापथमनुसंप्राजयेत्पूताभवतीति विज्ञायते विज्ञायते। राजन्यश्चेद्ब्राह्मणीमभिगच्छेच्छरपत्रैर्वेष्टयित्वा राजन्यमग्नौ प्रास्येद्ब्राह्मण्याया: शिरसि वापनं कारयित्वा श्वेतखरमारोप्य महापथमनुसंप्राजयेत्पूता भवतीति विज्ञायते। एवं राजन्यायां वैश्यशूद्रयो: शूद्रस्य वैश्यायां चेति। एतच्च वचनं स्मृतिसंजर्याम परार्के च गुरुतल्पप्रकरणे लिखितं। तत्रापरार्के एवं विख्यातं। महापथो राजमार्ग:। पूता भवति प्रायश्चित्तयोग्या भवतीत्यर्थ इति। विज्ञाने खरकारेणाप्युपपातकेषु पारदार्यप्रकरणे लिखितं। तेन चैवं व्याख्यातं पूता भवतीति वचनाद्राजवीथीपरिव्राजनमेव दंडरूपं प्रायश्चित्तं तत्र निरपेक्षं शुद्धिसाधनमिति दर्शयतीति। वयं तु ब्रूम:। महापातकस्थले कामतः शतिन्नास्येन शूद्रादिषु प्रवृत्ताया: स्त्रिया महापथगमनं महाप्रस्थानं आमरणादजिस्रगमनं। उपपातकेषु राजवीथीपरिव्राजनेनैव शुद्धिरिति॥ अथ गुरुतल्पसमानि॥ मनु:॥ रेत: सेक: स्वयोनीषु कुमारीष्वंत्यजासु च। सख्यु: पुत्रस्य च

स्त्रीषु गुरुतल्पसमं विदुरिति। रेतःसेक इति विशेषोपादानाद्रेतः सेकाभावे गुरुतल्पाभावात्तत्तुल्यं प्रायश्चित्तं कल्प्यं॥ याज्ञवल्क्यः॥ सखिभार्याकुमारीषु स्वयोनिष्वंत्यजासु च। सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं स्मृतं। स्वयोनिर्भगिनी। अंत्यजा श्वानचांडाल्याद्याः। न तु रजक्याद्यास्तत्र स्वल्पप्रायश्चित्तत्वात्। चंडालादयश्च मध्यमांगिरसा दर्शितः। चंडालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा। मागधायोगवौ चैव सप्तैतेंत्यावसायिन इति। सगोत्राग्रहणेनैव सुतस्त्रीप्राप्तौ पुनरुपादानमधिकदोषख्यापनार्थं॥ तथा च हारीतः॥ मातृदुहितृस्नुषागमनमित्यतिपातकानि। अतिपातकिनस्त्वेते प्रविशेयुर्हुताशनं। न ह्यन्या निष्कृतिस्तेषां विद्यते हि कथंचनेति॥ विष्णुः पितृव्यमातामहमातुलश्वशुरनृपपत्न्यभिगमनं गुरुदारगमनसमं। मातृपितृस्वसागमनं च। श्रोत्रियर्त्विगुपाध्यायमित्रपत्न्यभिगमनं च। स्वसुः सख्युः सगोत्राया उत्तमवर्णाया अंत्यजायाः कुमार्या रजस्वलायाः शरणागतायाः प्रव्रजिताया निक्षिप्तायाश्चेति। अत्र यत्र यद्विशेषप्रायश्चित्तमभिहितं तत्र तदेवेतरथा गुरुतल्पप्रायश्चित्तादि सामान्याभिधानात्। गुरुतल्पसमेषु विष्णुना पितृव्यस्वादिग्रहणमानुलोम्येन हीनजातीयपितृव्यस्वादिविषयं। एवमन्यत्राप्यूहनीयं॥ अथ गुरुतल्पातिदेशः॥ नारदः॥ माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा। पितृव्यसखिशिष्या-

स्त्री भगिनी तत्सखी स्नुषा। दुहिता चार्यतनया। तथाचाचा-
र्यपत्नीं तनयां गच्छंस्तु गुरुतल्पगः। लिंगं छित्वा वधस्तस्य स-
कामायाः स्त्रिया अपि। अयमेव वधो दंडार्थे प्रायश्चित्तार्थे च।
गुरुतल्पसमेषु परिगणितानां गुरुतल्पातिदेशेषु परिगण-
नं प्रायश्चित्तविकल्पार्थं। तच्च जातिप्रात्यत्याद्यपेक्षया योज्यं।
योजना चेत्थं मिताक्षरायां। समेष्वेकरात्रादूर्ध्वमकामतोऽभ्या-
से षड्वार्षिकं। अतिदिष्टेषु नववार्षिकं। जात्युक्तं पारदार्यं च
कन्यादूषणमेव च। साधारणस्त्रियो नास्ति गुरुतल्पत्वमे-
व चेति। अथ प्रसंगाच्चांडाल्यादिगमने विशेषोऽभिधीयते।
ज्ञानतश्चांडाल्यादिषु सकृद्गमने संवत्सरं कृच्छ्रचरणं।
अज्ञानतो गमने चांद्रायणद्वयं। तथाच यमः॥ चंडाल-
पुल्कसानां च भुक्त्वा गत्वा च योषितं। कृच्छ्राब्दमाचरेत् ज्ञा-
नादज्ञानादैंदवद्वयमिति। भगिन्यादिष्वप्येवं विज्ञेयं। स-
योनिषु त्यजासु चेत्येकवाक्यपाठात्। अत्रैव कामतः प्रवृ-
त्तस्य रेतःसेकात्प्राग्निवृत्तावंगिरसोक्तं द्रष्टव्यं। पतितांत्यस्त्रि-
यो गत्वा भुक्त्वा च प्रतिगृह्य च। मासोपवासं कुर्वीत चांद्रायण-
मथापि वेति। रेतःसेकादर्वाक् स्नुषादिगमनेऽप्येवमेव। त-
थाच बृहद्यमः॥ चांडालीं पुल्कसीं म्लेच्छीं स्नुषां च भगिनीं
सखीं। मातापित्रोः स्वसारं च निक्षिप्तां शरणागतां। मातुलानीं
प्रव्रजितां तथैव नृपयोषितं। शिष्यभार्यां गुरोर्भार्यां गत्वा चां-
द्रायणं चरेत्। चांडाल्यादिष्वकामतः प्रवृत्तस्य रेतःसेका-

पूर्वंनिवृत्तौसंवर्तोक्तं। भगिनींमातुराप्तांचस्वसारंचान्यमातृजं।
एतागत्वास्त्रियोमोहात्तप्तकृच्छ्रंसमाचरेदिति। एकरात्रंचंडाल्या-
दिषुगमनाभ्यासेमनूक्तंद्वैवार्षिकं। यत्करोत्येकरात्रेणवृषली-
सेवनाद्विजः। तद्भैक्ष्यभुग्जपन्नित्यंत्रिभिर्वर्षैर्व्यपोहतीति। अत्र
वृषलीचंडाली॥ तथाचस्मृत्यंतरं॥ चंडालीबंधकीवेश्या
रजस्थायाचकन्यका। ऊढायाचसगोत्रास्याद्वृषल्यःपंचकीर्ति-
ताइति। अज्ञानतश्चांडालीगमनाभ्यासेपतितप्रायश्चित्तंद्वादश-
वार्षिकं। ज्ञानतोभ्यासेमरणांतिकंकल्प्यं। कल्पनायांमूलंमनु-
वचनं। चांडालांत्यस्त्रियोगत्वाभुक्त्वाचप्रतिगृह्यच। पतत्य-
ज्ञानात्साम्यंतज्जातीयत्वंप्राप्नोति। अतस्तत्राभ्यासेमरणांति-
कमेवयुक्तं। एतच्चमरणांतिकंबहुकालाभ्यासविषयं॥ अथ
महापातकिसंसर्गप्रायश्चित्तं॥ मनुः॥ संवत्सरेणपतति
पतितेनसहाचरन्। याजनाध्यापनाद्यौनान्नतुयानाशनात्।
अयमर्थः। पतितेनसहयानशयनासनानिकुर्वन्संवत्सरेणप-
तितोभवति। याजनादिभिस्तुनसंवत्सरेणापितुसद्यएवेति॥ तथा
चविष्णुः॥ यासंवत्सरात्पतितेनसहाचरन्पततिसहयानाभ्यां
यौनस्रौवसंधात्सद्यएवेति। योनिजननंतत्सुतेन। पतितेनपतितया
वामैथुनयोगइत्यर्थः। स्रौवसंबंधोयाजनं॥ बृहद्विष्णुः॥ संव-
त्सरेणपततिपतितेनसहाचरन्। एकयानभोजनासनशयनैःयौ-
नस्रौवमुखैस्तुसंबंधैःसद्यएवेति। एकभोजनमेकपंक्तिभोज-
नं। नत्वेकामत्रभोजनं। तत्रदेवलेनसद्यःपातित्यस्याभिहितत्वात्

याजनं योनिसंबंधं स्वाध्यायं सह भोजनं। कृत्वा सद्यः पतत्येव पति-
तेन न संशय इति। मुखैः मुखभवं मुख्यमध्यापनं। ननु यौनस्रौव-
मुखैरिति द्वंद्वनिर्देशान्मिलितानामेव सद्यः पतनहेतुत्वमस्तु॥ मैवं
यः पतितैः सह यौनमौंजस्रौवाणां संबंधानामन्यतमसंबंधं कुर्या-
त्तस्याप्येतदेव प्रायश्चित्तमिति सुमंतुना प्रत्येककरणे द्वादशवा-
र्षिकाभिधानात्। मौंजसंबंधोऽध्यापनमेकयानादीनां चतुर्णां समु-
दितानामेव पतनहेतुत्वं एवं यानभोजनासनशयनैरितीतरेतर-
यो ननिर्देशात्॥ याज्ञवल्क्यः॥ एभिस्तु संवसेद्यो वै वत्सरं सो-
पि तत्समः। कन्यां समुद्वहेदेषां सोपवासामकिंचनां। कन्यां प-
तितावस्थायां उत्पन्नां॥ वृद्धहारीतः॥ पतितस्य तु कुमारीं
विवस्त्रामहोरात्रोपोषितां प्रातः शुक्लेनाहतेन वाससाच्छादितां
नाहमेतेषां न ममैत इति त्रिरुच्चैरभिदधानां तीर्थे स्वगृहे वोद्व-
हेदिति॥ वसिष्ठः॥ पतितेनोत्पन्नः पतितो भवति अन्यत्र स्त्रियाः
सा हि परगामिनी तामरिक्थामुपेयादिति। संवत्सरेण भवतीति य-
दप्यतिदेशात्प्रायश्चित्तं प्राप्तं तथापि संपूर्णमेव द्वादशवार्षिकं
कर्तव्यं। महापातकत्वात्। अनेनैवाभिप्रायेण मनुः। यो येन प-
तितेनैषां संसर्गं याति मानवः। स तस्यैव व्रतं कुर्यात्तत्संसर्गविशु-
द्धय इति। अत्रापि जातिशक्त्याद्यपेक्षया तत्तत्संसर्गे तत्तत्प्राय-
श्चित्तानि गुरूणि लघूनि च योज्यानि। अकामतः संवत्सरान्न्यू-
नसंसर्गे पराशरः। संसर्गमाचरन्विप्रः पतितादिष्वकामतः। पं-
चाहं वा दशाहं वा द्वादशाहमथापि वा। मासार्धं मासमेकं वा मा-

सत्रयमथापि वा। अब्दार्द्धमब्दमेकं वा भवेदूर्द्ध्वं तु तत्समः। त्रिरा-
त्रं प्रथमे पक्षे द्वितीये कृच्छ्रमाचरेत्। चरेत्सांतपनं कृच्छ्रं तृतीये
पक्ष एव च। चतुर्थे दशरात्रं स्यात्पराकः पंचमे ततः। षष्ठे चांद्रायणं
कुर्यात्सप्तमे त्वैंदवद्वयं। अष्टमे च तथा पक्षे षाण्मासान्कृच्छ्रमासे-
चांद्रायणं चरेत्। मासत्रये तु कुर्वीत कृच्छ्रं चांद्रायणोत्तरं। षा-
ण्मासिके तु संसर्गे कृच्छ्रं त्वब्दार्द्धमाचरेत्। संसर्गे त्वाब्दिके कुर्या-
दब्दं चांद्रायणं नर इति। संसर्गे त्वाब्दिक इति किंचिन्न्यूनत्वाब्दि-
क इत्यर्थः। संपूर्णाब्दिकसंसर्गे मन्वादिभिर्द्वादशवार्षिकस्योक्तत्वा-
त्॥ बृहस्पतिः॥ षाण्मासिके तु संसर्गे याजनाध्यापनादिना।
एकत्रासनशय्याभिः प्रायश्चित्तार्द्धमाचरेदिति। अत्र याजनाध्या-
पनयोरेकपात्रभोजनैः षाण्मास संसर्गप्रायश्चित्तार्द्धमुक्तं। अस्या-
यं विषयः। याजनमत्र कामतोत्यंतापरिचितमहायज्ञादिप्राययाजनं। अध्यापनं पूर्ववद्वेदाध्यापनं। योनिसंबंधो दुहितृभगि-
न्यादिव्यतिरिक्तः। एवं कल्पनायां मूलं प्रकृष्टयाजनादिभिः स-
द्यःपातित्यकथनमेव। यत्र त्वनेकनिमित्तानुप्रवेशस्तत्र प्रतिनि-
मित्तं नैमित्तिकमावर्त्तत इति यावंति निमित्तानि तावंति नैमित्ति-
कानि भवंति। तद्यथा। पतितां गुरुभार्यां रजस्वलामभ्यक्तामभ्य-
क्तो कल्यां प्रारगतां सगोत्राममावास्यायां दिवा जनसमक्षमा-
रूढकुंचितः सन् गच्छतीत्यादि। यत्र यद्विना यन्न निवर्त्तते त-
न्नप्रधानप्रायश्चित्ते नैव तन्नांतरीयकसिद्धानामपि निःकृतिर्भवति।
तद्यथा ब्रह्महनने क्रियमाणे हननेच्छा ततः प्रवृत्तिः। शस्त्रायुध-

मनमित्यादीनि। अत्र यद्यपि ब्रह्महादिषु मरणांतिकमुपदिष्टं तथा-
पि तत्संसर्गिषु तन्न तत्तस्यैव व्रतं कुर्यादिति व्रतस्यैवातिदेशात्।
मरणांतव्रतप्राब्दं न वृद्धाः प्रयुंजते। एवमुपपातकादिसंसर्गेपित-
त्तत्प्रायश्चित्तान्यतिदेष्टव्यानि। तत्रापि जातिशक्त्याद्यपेक्षया-
योज्यानि॥ इति महापातकप्रायश्चित्तानि॥ अथोपपा-
तकनिर्देशः प्रायश्चित्तानि॥ अतिदिष्टान्युपपातकानीति प-
र्यायौ समान्युपपातकानि पातकानीति पर्यायाः। एतानि महापा-
तकोपपातकमध्यस्थितानि। अत एव महापातकान्न्यूनानि उ-
पपातकादधिकानि। तस्मान्महापातकप्रायश्चित्तप्रकरणस-
व तत्समत्वादिति दिष्टप्रायश्चित्तान्यभिधायाधुनोपपातकप्राय-
श्चित्तं वक्तुं। तत्स्वरूपमभिधीयते। तत्र याज्ञवल्क्यः॥ गो-
वधो व्रात्यता स्तेयमृणानां चानपाक्रिया। अनाहिताग्निता
पण्यविक्रयः परिवेदनं। भृताद्ध्ययनादानं भृतकाध्यापनं
तथा। पारदार्यं पारिवित्त्यं वार्द्धुष्यं लवणक्रिया। स्त्रीशूद्रवि-
ट्क्षत्रवधो निंदितार्थोपजीवनं। नास्तिक्यं व्रतलोपश्च सुता-
नां चैव विक्रयः। धान्यकुप्यपशुस्तेयमयाज्यानां च याजनं।
पितृमातृसुतत्यागस्तडागारामविक्रयः। कन्यासंदूषणं चैव
परिविंदकयाजनं। कन्याप्रदानं तस्यैव कौटिल्यं व्रतलोपनं।
आत्मनोऽर्थे क्रियारंभो मद्यपस्त्रीनिषेवणं। स्वाध्यायाग्निसुतत्यागं
तथा बान्धवत्याग एव च। इंधनार्थं द्रुमच्छेदः स्त्रीहिंसौषधिजीवनं।
हिंस्रमंत्रविधानं च व्यसनान्यात्मविक्रयः। शूद्रप्रेष्यं हीनसख्यं

हीनयोनिनिषेवणं। तथैवानाश्रमे वासः परान्नपरिपुष्टता। असत्-
छास्त्राधिगमनमाकरेष्वधिकारिता॥ भार्याया विक्रयश्चैषामे-
कैकमुपपातकमिति। व्रात्यता संस्कारहीनत्वं। स्तेयं ब्राह्मण-
सुवर्णव्यतिरिक्तस्य चौर्यं सुवर्णस्तेयसमव्यतिरिक्तस्य च। ऋणा-
नामनपाक्रिया यज्ञप्रजोत्पादनस्वाध्यायाध्ययनानामकरणं।
सत्यधिकारे। तथोत्तमर्णाद्गृहीतस्य सुवर्णादेरप्रदानमपि।
अधिकारे सत्यनाहिताग्नित्वं च। अपण्यानां प्रतिषिद्धविक्रयाणां
लवणादीनां विक्रयः। दाराग्निपरिग्रहयोगं ज्येष्ठमतिक्रम्य क-
नीयसो यथानुक्तं स्वीकारः परिवेदनं। पणपूर्वाध्यापको भृतो
भृतकस्य। ततः अध्ययनादानं शिष्यस्य तादृशाध्यापनं गुरोः
गुरुतल्पतल्पव्यतिरिक्तं पारदार्यं। ज्येष्ठस्य विवाहात्पूर्वमेव-
कनिष्ठे कृतविवाहे ज्येष्ठो विवाहितः। परिवित्तिः। तस्य भावः पा-
रिवित्त्यं। धान्यवृद्ध्युपजीवनं निषिद्धवृद्ध्युपजीवनं च वार्धुष्यं।
लवणस्योत्पादनं लवणक्रिया। एतच्च वानगच्छव्यतिरिक्त-
स्य। तस्य लवणं च स्वयं कृतमिति मनुनोपदेशात्। अग्निहो-
त्रिणायाजेयी सवनस्थस्त्रीमात्रव्यतिरिक्ता स्त्रीवधः। तथा सव-
नस्थव्यतिरिक्तक्षत्रियवैश्ययोः शूद्रस्य च प्रत्येकं वधः। निंदि-
तार्थोपजीवनं। अराजस्थापितार्थोपजीवनं। नास्ति परलोक
इति बुद्धिमान्नास्तिकः। ब्रह्मचारिणः स्त्रीसंसर्गे व्रतलोपः।
ब्रह्महत्यादिप्रायश्चित्तस्य पञ्चकं तस्य परित्यागश्च। सुतानामप-
त्यानां विक्रयः। धान्यं व्रीह्यादि कुप्यं त्रपुसीसादि पशुर्गवादिर्गो

वधोद्धाख्यातास्तेयमित्यनेनैवधान्यादिस्तेयसिद्धेः पुनर्ग्रहण-
मधिकदोषख्यापनार्थं। एवमन्यदपि पुनर्ग्रहणं व्याख्येयं।
अयाज्यानां शूद्रपतितादीनां याजनं। पित्रादीनामपतितानां
त्यागो गृहान्निष्कासनमरक्षणं वा। तडागारामविक्रय इति
धर्मविक्रयप्रदर्शनार्थं। अंगुल्यादिना योनिविदारणात्दोष-
ख्यापनं चाकन्यासंदूषणं। कन्यासंभोगे गुरुतल्पसमत्वमेव।
कौटिल्यं गुरोरन्यत्रागुरौ तु कौटिल्यं सुरापाणसमं। पुनर्व्रतलो-
पोपादायं शास्त्राविरुद्धशिष्टाहृतविष्णुसंदर्शनात् पूर्वतांबूलं
नभक्षयामीत्यादिव्रतलोपस्याप्युपपातकत्वप्राप्त्यर्थं क्रियारं-
भः पाकक्रियारंभः। मद्यपायाः स्वकीयस्त्रिया अप्युपभोगः।
स्वाध्यायाग्निसुतत्यागः। सच्छास्त्राभ्यासनिष्ठत्वेन कुटुंबपो-
षणाव्यग्रतया वा त्यागः। अग्नीनां श्रौतानां स्मार्तानां। सुतस्या-
पत्यस्य जातकर्मादिसंस्काराकरणं। पाकादिदृष्टप्रयोजनार्थ-
मशुष्कद्रुमच्छेदः। स्त्रीहिंसौषधिजीवनं। भार्यावेश्यात्वकर-
णेन प्राणिवधोत्थवशीकरणाद्यौषधेन च जीवनं। तिलेक्षु-
प्रभृतिपीडनयंत्रं हिंस्त्रयंत्रं। मृगयादीन्यष्टादशव्यसना-
नि हीनसख्यं जातितो गुणतश्च हीनमैत्री अनूढसवर्णदार-
स्य केवलहीनवर्णोपयमस्तदेकभार्यत्वं च हीनयोनिनिषेवणं
बाहुल्येन परान्नोपजीवनं परान्नपरिपुष्टता। असच्छास्त्रस्य
वेदविरोधिनोऽधिगमः। एतानि प्रत्येकमुपपातकानि। इति उ-
पपातकप्रायश्चित्तानि॥ अथ गोवधप्रायश्चित्तमाह

याज्ञवल्क्यः ॥ पंचगव्यं पिबेद्गोघ्नो मासमासीत संयतः। गोष्ठे-
शायी गोनुगामी गोप्रदानेन शुद्ध्यति। कृच्छ्रं चैवातिकृच्छ्रं च चरे-
द्वापि समाहितः। दद्यात्त्रिरात्रं चोपोष्य वृषभैकादशास्तु गाः। अ-
न्यव्रतचतुष्टयं विहितं। आहारांतरनिरपेक्षेण पंचगव्यं पिबन् एवं
गोशालायां शयानः। प्रातस्ता एव वनं गच्छंतीरनुगच्छन् तिष्ठं-
तीरनुतिष्ठन् अन्यैश्चापि नियमैर्युक्तो मासमासीत। ततो मासांते
गां ब्राह्मणाय दत्वा शुद्ध्यतीत्येकं प्रायश्चित्तं। पंचगव्याहारव्य-
तिरेकेण पूर्वोक्तधर्मयुक्तो मासं प्राजापत्यकृच्छ्रं चरेदिति द्वि-
तीयं। तथैव प्राजापत्यस्थाने तिकृच्छ्रं मासं चरेदिति तृतीयं।
त्रिरात्रं व्रतं कृत्वा एकं वृषभं दश गाश्च दद्यादिति चतुर्थं। अत्रे-
यं व्यवस्था। अज्ञानतो जातिमात्रब्राह्मणसंबंधिगोमात्रव-
धे दद्यात्त्रिरात्रं चोपोष्य वृषभैकादशास्तु गा इत्येतत्। अज्ञा-
नतः क्षत्रियसंबंधिगोमात्रव्यापादने पंचगव्यं पिबेद्गोघ्नो मा-
समासीत संयतः। गोष्ठेशायी गोनुगामी गोप्रदानेन शुद्ध्यती-
त्येतत्। षडुपवासा एकप्राजापत्यस्थाने प्राजापत्यप्रत्याम्ना-
य एका गौः। एवं च मासपंचगव्याशने पंच धेनवो भवंतितदं-
ते हीयमाना एका गौरिति षट् धेनवः। ततश्च वृषभैकादश-
गोदानसहितत्रिरात्रोपवासापेक्षया मासमपंचगव्याशनं न्यू-
नमिति क्षत्रियगोहननविषयत्वं युक्तं। एवमुत्तरत्रापि वि-
ज्ञेयं। अस्मिन्नेव विषये। गां हत्वा तच्चर्मणा प्रावृतो मासं-
गोष्ठेशायी त्रिषवणस्नायी नित्यं पंचगव्याहार इति काश्यपो-

क्तं द्रष्टव्यं। यानि च विष्णुनोक्तानि त्रीणि व्रतानि। गोघ्नस्य पंचगव्येन
मासमेकं पसावयं। मत्स्यहं स्यात्पराको वा चांद्रायणमथापि वे-
ति ॥ एतान्यप्यस्मिन्नेव विषये योज्यानि। एवमन्यान्यपि
मासमसाध्यान्यत्रैव योज्यानि। अमत्या वैश्यसंबंधिगोमात्र-
व्यापादने मासमतिकृच्छ्रं कुर्यात् ॥ यत्तु शंखेनोक्तं ॥ गो-
घ्नः पंचगव्याहारः पंचविंशतिरात्रमुपवसेत्सशिखं वपनं कृ-
त्वा गोचर्मणा प्रावृतो गाश्चानुगच्छन् गोष्ठे शयीत गां च दद्यादिति
तदप्यस्मिन्नेव विषये। अस्मिन्नेव विषये पंचविंशतिरात्रं पंच-
गव्याहारासमर्थः कायपोक्तं कुर्यात्। षष्ठे काले पयोभक्षो वा
गच्छंतीष्वनुगच्छेत्स्थासु च सुखोपविष्टासु नोपविशेन्नाति-
सवं गच्छेन्नातिविषमेणावतारयेन्नाल्पोदके पाययेदंते ब्रा-
ह्मणान् भोजयित्वा तिलधेनुं दद्यादिति। अत्र मासमित्यनुव-
र्तते। षष्ठे काले तृतीयवासरे रात्रौ। अत्राप्यशक्तः पैठीनस्युक्तं
कुर्यात्। गोघ्नो मासं यवागूं प्रसृततंदुलप्रसृतां भुंजानो गोभ्यः
प्रियं कुर्वन् शुद्ध्यतीति। शूद्रस्यापि कगोव्यापादने मासं प्राजा-
पत्यं कुर्यात्। यत्तु बृहस्पतिनोक्तं। द्वादशरात्रं पंचगव्याहार
इति यच्च संवर्तोक्तं। सक्तुयावकभैक्षाशीपयो दधि घृतं सकृत्।
एतानि क्रमशोऽश्नीयात् मासार्द्धं तु समाहितः। ब्राह्मणान्भो-
जयित्वा तु गां दद्याद्दात्मशुद्धये इति। इत्यादीन्यन्यान्यप्येत-
त्समानि शूद्रस्वामिकगोहननं एव योज्यानि। अथवा ब्राह्म-
णादिवर्णत्रयसंबंधिस्मृतकल्पगोहननविषये वा योज्यानि

तत्स्वामिनो द्रव्यादिना परितुष्टिं कृत्वा कार्य्यं ॥ यदाह मनुः
हिंस्याद्यो यस्य द्रव्याणि ज्ञानतोऽज्ञानतोपि वा। स तस्योत्पादयेत्तु-
ष्टिं राज्ञे दद्याच्च तत्सममिति। राज्ञे तत्समद्रव्यदानं दंडः। यदा तु जा-
तिमात्रब्राह्मणस्वामिकं गोमात्रं कामतः प्रमापयति तदा केशमू-
लादिना शरीरयात्रां कुर्वन् वृषभैकादशगोदानसहितं त्रैमासि-
कं कुर्यात्। कामतस्त्वादृशक्षत्रियगोव्यापादने मासद्वयं चतुर्थ
काले हविष्यभोजनं कुर्यात्। कामतस्त्वादृशवैश्यगोहनने या-
ज्ञवल्क्योक्तमासातिकृच्छ्रमवद्विगुणं। कामतः शूद्रगोव्यापा-
दने मासं यवागूपानं कुर्यात् ॥ तथा च मनुः। उपपातकसं-
युक्तो गोघ्नो मासं यवान्पिबेत्। अत्र यवशब्दो यवागवादिविका-
रपरः। एतत् शूद्रसंबंधिहननविषयं तथा कृतवापो वसेद्गोष्ठे च-
र्मणार्द्रेण संवृतः। चतुर्थकालमश्नीयादक्षारलवणं मासौ नि-
यतेंद्रियः। दिवानुगच्छेत्तां गास्तु तिष्ठन्नूर्द्ध्वं रजः पिबेत्। शुश्रूषित्वा
नमस्कृत्य रात्रौ वीरासनं वसेत्। तिष्ठंतीष्वनुतिष्ठेत्तु व्रजंतीष्वप्यनु-
व्रजेत्। आसीनासु तथासीनो नियतो वीतमत्सरः। आतुरामभि-
शस्तां वा चौरव्याघ्रादिभिर्भयैः। पतितां पंकलग्नां वा सर्वप्राणैर्वि-
मोक्षयेत्। उष्णे वर्षति शीते वा मारुते वाति वा भृशं। न कुर्वीता-
त्मनस्त्राणं गोरकृत्वा तु शक्तितः। आत्मनो यदि वान्येषां गृहे
क्षेत्रेथवा खले। भक्षयंतीं न कथयेत्पिबंतीं चैव वत्सकमिति ॥
एतच्च कामतः क्षत्रियसंबंधिगोमात्रव्यापादने। वीरासनं भि-
त्तिशय्यादावनिपद्य यदुपविष्टस्यावस्थानं तदुच्यते। तथा

अनेन विधिना यस्तु गोघ्नो गामनुगच्छति । स गोहत्याकृतं पापं त्रि-
भिर्मासैर्व्यपोहति । वृषभैकादशा गास्तु दद्यात्सुचरितव्रतः । अ-
विद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेत् इति । एतच्च कामतो ब्रा-
ह्मणसंबंधिगोमात्रव्यापादने । अत्राहारांतरानभिधानात्कंद-
मूलादिना वर्त्तनमर्थसिद्धं । अथवा अनेन विधिनेत्यनेन-
पूर्वोक्तद्वैमासिकेतिकर्त्तव्यतातिदेशाच्चतुर्थकालमश्नीया-
दक्षारलवणमितमित्युक्तरीत्या शरीरयात्रा कर्त्तव्या । वृ-
षभैकादशगोदानासमर्थः सर्वस्वदानं कुर्यात् । यदा तु ब्रा-
ह्मणसंबंधिनीं गां पुष्टिताहरणादिगुणोपेतां कामतो व्या-
पादयति । तदा चांगिरसोक्तप्रकारेण त्रैमासिकं पूर्वोक्तरीत्या क्ष-
त्रियसंबंधिगोव्यापादने तैरसाक्षादुक्तं द्वैमासिकं च कर्त्त-
व्यमेवं वैश्यादिसंबंधिव्याहनने प्रायश्चित्ताधिकामूह्यं ॥
अंगिराः ॥ उपपातकसंयुक्तो गोघ्नो मासं यवान् पिबेत् । अ-
स्यैव विषयः पूर्वोक्तपैठीनसिवाक्यविषयेण दर्शितः । तथाक्ष-
क्षारलवणान् भक्ष्यान् षष्ठे काले मिताशनः । कृतवापो वसेद्गो-
ष्ठे चर्मणा तेन संवृतः । मासद्वयं च नियतो गोमूत्रस्नानसंय-
तः । पानशौचक्रियां चैवमद्भिः कुर्वीत केवलं । व्रतवद्धारये-
द्दंडमजिनं मेखलां तथा । गाश्चैवानुव्रजेद्युक्तो रजस्तासां-
पिबेत्तथा । गोमतीं च जपेद्विद्यामोंकारं वेदमेव वा । वृषभैका-
दशा गास्तु दद्यात्सुचरितव्रतः । अविद्यमाने तल्लिंगां तद-
र्थे वापि दापयेदिति । अविद्यमाने वृषभैकादशगोदानस-

त्वभावे तल्लिंगां प्रमापितगोवधः सामर्थ्याद्विमांश्चस्मिन्नेव वनेमा-
सद्वयमित्यत्र मासद्वयमित्यूह्यं । तच्च ब्राह्मणसंबंधितारण्यादि
गुणयुक्तगोव्यापादने । गोमती विद्या यमेन दर्शिता । गोमतीं की-
र्त्तयिष्यामि सर्वपापप्रणाशनीं । तां तु मे गदतो विप्राः शृणुध्वं
सुसमाहिताः । गावः सुरभयो नित्यं गावो गुग्गुलुगंधिकाः ।
गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत् । अन्नमेव परं गावो
देवानां हविरुत्तमं । पावनं सर्वभूतानां क्षरंति च वहंति च । ह-
विषा मंत्रपूतेन तर्पयंत्यमरान् दिवि । ऋषीणामग्निहोत्रेषु
गावो होमप्रयोजिकाः । सर्वेषामेव भूतानां गावः शरणमुत्तमं ।
गावः परं पवित्रं च गावो मंगलमुत्तमं । गावः स्वर्गस्य सोपानं गा-
वो धन्याः सनातनाः । नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य ए-
व च । नमो ब्रह्मसुताभ्यश्च पवित्रेभ्यो नमो नमः । ब्राह्मणाश्चै-
व गावश्च कुलमेकं द्विधा कृतं । एकत्र मंत्रास्तिष्ठंति हविरेकत्र
तिष्ठति इति । मदनरत्ने गोत्रयगोवधे त्वज्ञानकृते हारीत आह
गोघ्नस्तद्धर्म्मऊर्ध्ववालं परिधायेत्युपक्रम्य मासत्रीनितिकर्त्त-
व्यतामभिधाय वृषभैकादशगाश्च दत्त्वा त्रयोदशे मासे पूतो
भवतीति । अस्मिन्नेव विषये गां चेद्धन्यात् स्याच्चर्मणार्द्रेण
परिवेष्टितः षण्मासान् कृच्छ्रं तप्तकृच्छ्रं वा तिष्ठेद् वृषभवे-
हतौ दद्यातामिति वशिष्ठोक्तमपि योज्यं । तत्र यः पुंगवं हन्या-
त्स वृषभं दद्याद्यस्तु स्त्रीगवीं स वेहतमिति स्मृतिमंजर्यां ।
गर्भघातिनी गोर्वेहत् । पूर्वोक्तविषय एव होमकारे कात्या-

यमोक्तं त्रैवार्षिकं द्रष्टव्यं। गोघ्नस्तु चर्मसंवीतो वसेद्गोष्ठे यवाशनः गाश्चानुगच्छेत्सततं मौंजीवीरासनादिभिः। वर्षशीतातपक्लेशावह्निपंकभयादितः। मोक्षयेत्सर्वयत्नेन मूयते वत्सरैस्त्रिभिरिति। यत्तु यमेन मानवीति कर्त्तव्यतासहितं मासद्वयव्रतं गोसहस्रदानयुक्तं। यच्च गौतमेन त्रैवार्षिकं गोशालदानसहितमुक्तं। यत्पुनः कात्यायनोक्तं त्रैवार्षिकं। इदं त्रितयमपि शिष्टात्यंतदुर्वृत्तब्राह्मणासंबंधिकर्मांगभूतबहुक्षीरकपिलत्वादिगुणोपेतबालवत्सदुर्भिक्षकुटुंबाधारभूतसानुबंधबह्वादिपीडातिशयप्रदप्रहारगोहनने हंतुरतिदुःशीलस्य दानतपःसमुदितं प्रायश्चित्तमिति स्मृतिमंजर्यां मिताक्षरायां तु। एवमन्यान्यपि प्रायश्चित्तानि पूर्वोक्तानि जातिशक्तिगुणाद्यपेक्षया योज्यानि। पूर्वोक्ताधिकप्रायश्चित्तविषयेषु पूर्वोक्तव्रतानि कृत्वा काष्ठादिसाधनविशेषहननप्रयुक्तप्रायश्चित्तमिति स्मृतिमंजर्यां मिताक्षरायां तु। एवमन्यान्यपि प्रायश्चित्तानि पूर्वोक्तानि जातिशक्तिगुणाद्यपेक्षया योज्यानि। पूर्वोक्ताधिकप्रायश्चित्तविषयेषु पूर्वोक्तव्रतानि कृत्वा काष्ठादिसाधनविशेषहननप्रयुक्तं प्रायश्चित्तांतरमपि कार्यमिति। अनेनैवाऽभिप्रायेणाह यमः काष्ठलोष्ठाश्मभिर्गावः शस्त्रैर्वा निहता यदि। प्रायश्चित्तं कथं तत्र शास्त्रे शास्त्रे विधीयते। काष्ठे सांतपनं कुर्यात्प्राजापत्यं तु लोष्ठके। तप्तकृच्छ्रं तु पाषाणे शस्त्रे चाप्यतिकृच्छ्रकमिति। तथा च अतिवृद्धामतिकृशामतिबालां च रोगिणीं। हत्वा पूर्वविधानेन न चरेद्व्रतं द्विजः।

ब्राह्मणान्भोजयेच्छक्त्या दद्याद्धेमतिलांस्तथेति। यस्मि-
न्नीरोगादिविषये यत्प्रायश्चित्तं विहितं तदर्द्धमित्यर्थः। वृद्ध-
प्रचेताः। एकवर्षे हते वत्से कृच्छ्रपादो विधीयते। अबुद्धिपूर्वे पु-
सः स्यात् द्विपादस्तु द्विहायने। त्रिहायने त्रिपादः स्यात्प्राजापत्य-
मतः परं। गर्भग्रहणप्रभृति पूर्णगर्भिणीगोवधे षड्विंशन्मते वि-
शेषः। पाद उत्पन्नमात्रे तु द्वौ पादौ दृढतां गते। पादोनं व्रतमुद्दिष्टं
हत्वा गर्भमचेतनं। अंगप्रत्यंगपूर्णे तु गर्भे चेतःसमन्विते। द्विगुणं गो-
व्रतं कुर्यादेषा गोघ्नस्य निष्कृतिरिति। उत्पन्नमात्रे गर्भग्रहणमात्रे
यत्र यद्व्रतमुपदिष्टं तस्य चतुर्थांशः पादः। यत्र यदुपदिष्टं तत् द्विगु-
णं। एवमुत्तरत्रापि। आपस्तंबः। एका चेद्बहुभिः काचिद्दैवाद्व्या-
पादिता क्वचित्। पादं पादं तु हत्यायाश्चरेयुस्ते पृथक् पृथक् इति
एतच्चाकामकारे कामकारे तु द्विगुणं संपूर्णप्रायश्चित्तं वा। एवं
द्वयोर्बहूनां च व्यापादने कामकारे पादद्वयं पादोनं क्रमेण। का-
मकारे तु तत् द्विगुणं वेदितव्यं। एकेनैव रोधनादिना बहूनां ग-
वां व्यापादने॥ संवर्तः॥ व्यापन्नानां बहूनां तु रोधने बंधनेपि वा।
भिषग्मिथ्योपचारे च द्विगुणं गोव्रतं चरेदिति। अत्र वचनाद्बहुव्या-
पादनेपि न प्रतिनिमित्तं नैमित्तिकावृत्तिः किंतु द्विगुणमेव। भिषजै-
कस्यापि मिथ्योपचारव्यापादने द्विगुणं। भिषग्व्यतिरिक्तस्य तु
व्यासः। औषधं लवणं चैव पुण्यार्थमपि भोजनं। अतिरिक्तं न दात-
व्यं काले स्वल्पं तु दापयेत। अतिरिक्ते विपत्तिश्चेत्कृच्छ्रपादो विधीयत इति
आपस्तंबः। पादमेकं चरेद्रोधे द्वौ पादौ बंधने चरेत्। योजने पाद-

हीनं स्याच्चरेत्सर्वं निष्पन्न इति। पादव्रतादिकमशक्त-
विषयं निमित्तकर्तृविषयं वा। तथा। अतिदाहात्तिवाह-
ग्यां नासिकाछेदने तथा। नदीपर्वतसंरोधे मृते पादोनमा-
चरेदिति॥ पराशरः॥ अन्यत्रांकनलक्षाभ्यां वाहने मो-
चने पि वा। सायं संगोपनार्थं च न दुष्येद्रोधबंधन इति। स्थिर
चिह्नकरणमंकनं। तद्विपरीतं लक्षं॥ व्यासः॥ न नालिकेरे-
ण न शाणवालैर्न चापि मौंजेन न वध्यशृंखलैः। एतैस्तु गावो
न निबंधनीया बध्वा तु तिष्ठेत्परशुं गृहीत्वा। कुशैः काशैश्च ब-
ध्नीयात्स्थाने दोषविवर्जिते। घंटाभरणदोषेण विपत्तिर्यत्र
गोर्भवेत्। कृच्छ्रार्द्धं तु भवेत्तत्र भूषणार्थं तु तत्स्मृतं। अति-
दोहातिदमनसंघाते चैव योजने। बध्वा शृंखलपाशैश्च मृ-
ते पादोनमाचरेत्। जलौघपल्वले मग्ना मेघविद्युद्धतापि
वा। श्वभ्रे वा पतिता कस्माच्छ्वापदेनापि भक्षिता। प्राजा-
पत्यं चरेत्कृच्छ्रं गोस्वामी व्रतमुत्तमं। यदा गोस्वामिनोपरा-
धेन मृता तदा गोस्वामिनः। यदा गोपालदोषेण नष्टा तस्य
शीतवाताहता वा स्याद्दुर्बंधनमृतापि वा। शून्यागारउपे-
क्षायां प्राजापत्यं विनिर्दिशेदिति। कार्यांतरानुबंधेनैव य-
त्नाभावे सत्युपेक्षायामेतत्प्रायश्चित्तं कार्यांतरव्यग्रत्वोत्व-
र्ष॥ तथा च विष्णुः॥ श्वभ्रप्रपातसर्पाद्यैर्मृते कृच्छ्रार्द्ध-
माचरेदिति। क्वचिद्दोषाभावोपि प्रतिपादितः संवर्त्तेन यंत्रणे
गोश्चिकित्सार्थे मूढगर्भविमोचने। यत्ने कृते विपत्तिः स्याच्

स पापेन लिप्यत इति। तथा। दाहच्छेदशिराभेदप्रयोगैरुपकुर्व-
तां। द्विजानां गोहितार्थाय प्रायश्चित्तं न विद्यते। औषधं स्नेह-
माहारं ददद्गोब्राह्मणो द्विजः। दीयमाने विपत्तिश्चेन्न स पापेन
लिप्यते। **पराशरः**। ग्रामघाते शरौघेण वेश्मभंगान्निपा-
तने। अतिवृष्टिहतानां च प्रायश्चित्तं न विद्यते। एतच्च बंधनर-
हितस्य पशोर्मरणे। बद्धस्य मरणे त्वापस्तंबोक्तं द्रष्टव्यं। कां-
तारेष्वथ दुर्गेषु गृहदाहे खलेषु च। यदि तत्र विपत्तिः स्यात्पा-
द एको विधीयते इति॥ **यमः**॥ निशि बद्धनिरुद्धेषु व्याघ्रसर्प-
हतेषु च। अग्निविद्युद्विपन्नेषु प्रायश्चित्तं न विद्यते॥ अस्थिभं-
गं गवां कृत्वा कटिभंगं तथैव च। यदि जीवति षण्मासान्प्राय-
श्चित्तं न विद्यते। अस्थिभंगादिप्रयुक्तं त्वस्त्येव॥ **आपस्तंबः**।
अस्थिभंगं गवां कृत्वा लांगूलच्छेदनं तथा। पातनं दंतशृंगाणां
मासार्द्धं तु यवान्पिबेदिति। अत्राशक्तं प्रत्यंगिराः। शृंगभंगेऽस्थि-
भंगे वा चर्मनिर्मोचने पि वा। दशरात्रं पिबेन्मूत्रं स्वस्थापि यदि गौ-
र्भवेत्। वस्त्रं क्षीरं दधि घृतानि॥ **अंगिराः**॥ अंगुष्ठमात्रः स्थौ-
ल्येन बाहुमात्रः प्रमाणतः। सार्द्रश्च सपलाशश्च दंड इत्यभि-
धीयते। तस्माद्दंडप्रहारेण यदि गां विनिपातयेत्। द्विगुणं तु
चरेत्तत्र प्रायश्चित्तमिति स्थितिरिति। पूर्वोक्तान्युपपातकप्रा-
यश्चित्तानि वक्ष्यमाणानि चोपपादकादिप्रायश्चित्तानि क्षत्रि-
यादीनां ब्राह्मणापेक्षया पादोनादीनि भवंति॥ अत एव
बृहद्विष्णुः॥ विप्रे तु सकलं देयं पादोनं क्षत्रिये स्मृतं।

वैश्येऽर्द्धं पादस्य कस्तु शूद्रजातिषु शस्यत इति ॥ यत्त्वांगिरोवचनं ॥ पर्षद्याज्ञाक्षराणां तु सा राज्ञां द्विगुणा मतेति । तन्महापातकविषयमिति प्रागभिहितं । अनुग्राहकाणां पादोनादि । स्त्रीबालवृद्धानां त्वर्द्धं अनुपनीतबालस्य पादः । अनयैव दिशा स्मृत्यंतरोक्तगुरुलघुप्रायश्चित्तानि जातिशक्त्याद्यपेक्षया अनुग्राहकप्रयोजकाद्यपेक्षया च व्यवस्थापनीयानि । पुरुषं प्रति वपनविषये विशेषो दर्शितः संवर्तेन । पादेंगरोमवपनं द्विपादे श्मश्रुणोऽपि च । त्रिपादे तु शिखावर्जं सशिखं तु निपातन इति । स्त्रियं प्रति पराशरः । वपनं नैव नारीणां नानुव्रज्या जपादिकं । न गोष्ठे शयनं तासां न वसीत गवाजिनं । सर्वान् केशान्समुद्धृत्य छेदयेदंगुलद्वयं । सर्वत्रैवं हि नारीणां शिरसो मुंडनं स्मृतमिति । विधवायास्तु मुंडनमस्त्येवेति प्राग्निरूपितं ॥ **अथ व्रात्यतायामुपपातकेषु पूर्वोक्तातिदेशः क्वचन विशेषप्रायश्चित्तं चाभिधीयते ॥** तत्र यत्र शृंगग्राहिकया स्वल्पमधिकं वा प्रायश्चित्तं विहितं तत्र तदेव ग्राह्यं । याज्ञवल्क्यः । उपपातकशुद्धिः स्यादेवं चांद्रायणेन वा । पयसा वापि मासेन पाराकेणाथवा पुनः । एवं पूर्वोक्तगोवधप्रायश्चित्तेन चांद्रायणेन मासं पयोवर्तनेन मासं पराकेण वा । अकामकारे शक्त्यपेक्षया व्रतचतुष्टयं योजनीयम् । कामकारे तु मनूक्तं त्रैमासिकम् । व्रात्यतायां यमः ॥ सावित्रीपतिता यस्य दश वर्षाणि पंच च । सशिखं वपनं कृत्वा व्रतं कुर्यात्समाहितः । एकविंशति

गत्रं च पिबेत्प्रसृति पावकं । हविष्यं भोजयेच्चैव ब्राह्मणान्सप्त पंच-
वा । ततो पावकशुद्धस्य तस्योपनयनं स्मृतं ॥ मनुः ॥ येष्वं द्विजा-
नां सावित्री नानूच्येत यथाविधि । तांश्चारयित्वा त्रीन्कृच्छ्रान्यथा-
विध्युपनाययेत् । उपनेत्रभावेन कालातिक्रमे यास्यमानवया-
ज्ञवल्कीयानि प्रान्त्यपेक्षया द्रष्टव्यानि । अनापद्यतिक्रमे गोवधप्रक-
रणे प्रदर्शितं मनूक्तं त्रैमासिकं । अनापदि उक्तकालादूर्ध्वमपि किय-
त्कालातिक्रमे वशिष्ठोक्तं द्रष्टव्यं ॥ पतितसावित्रीक उद्दाल-
कव्रतं चरेद्द्वौ मासौ यावकेन वर्त्तयेन्मासं पयसा पक्षमामिक्षयाष्टरा-
त्रं घृतेन षड्रात्रमयाचितेन त्रिरात्रमब्भक्षो होरात्रमुपवसेदश्वमेधाव-
भृथं गच्छेद्व्रात्यस्तोमेन वा यजेतेति । उद्दालकव्रतस्वरूपमेव दर्श-
यति द्वौ मासावित्यादिना ॥ यस्य पित्रादयोप्यनुपनीतास्तत्र
विशेषमाहापस्तंबः ॥ अतिक्रांते सावित्र्याः कालमृतुं त्रैविद्य-
कं ब्रह्मचर्यं चरेदथोपनयनं ततः संवत्सरमुदकोपस्पर्शनमध्या-
ध्याप्यः ॥ अथ यस्य पिता पितामह इत्यनुपनीतौ स्यातां ते ब्रह्मह-
संस्तुतास्तेषां गमनं भोजनं । विवाहमिति वर्जयेत्तेषामिच्छतां प्रा-
यश्चित्तं यथा प्रथमेतिक्रमऋतुमेवं संवत्सरं अथोपनयनं तत उद-
कोपस्पर्शनं प्रति पुरुषं संख्याय संवत्सरान्यावंतोनुपनीताः स्युः
सप्तभिः पावमानीभिर्यदंति यच्च दूरक इत्येताभिर्यजुःपवित्रेण
सामपवित्रेणांगिरसेनेत्यपि व्याहृतिभिरेव वा सोध्याप्यो य-
स्य प्रपितामहादीनां न स्मर्यत उपनयनं ते स्मशानसंस्तुता-
स्तेषामभ्यागमनं भोजनं विवाहमिति वर्जयेत्तेषामिच्छतां प्रा-

यश्चित्तं द्वादशवर्षाणि त्रैनिष्ठकं ब्रह्मचर्यं चरेदथोपनयनं तत उदकोपस्पर्शनं पात्रमान्यादिभिरथ गृहमेधोपदेशनं नाध्यापनं ततो योनिर्वर्तते तस्य संस्कारो यथा प्रथमेति क्रमेतत ऊर्ध्वं प्रकृतिवदिति। अथ समर्थः। विप्रादीनां षोडशद्वाविंशतिचतुर्विंशतिवर्षात्मके सावित्र्या उपनयनस्य काल अतिक्रांते कृतं मासद्वयं यावत्त्रैविद्यकं ब्रह्मचर्यं वेदत्रयसंबंधिभैक्षाशनगुरुशुश्रूषणादिकं चरेत्। वेदत्रयार्थमृतुत्रयं ब्रह्मचर्यं चरेदित्यर्थः। अथवा ऋतुत्रयब्रह्मचर्यानंतरं उपनयनं कार्यं तत उपनयनानंतरं संवत्सरं यावदुदकोपस्पर्शनं प्रत्यहं प्रायश्चित्तरूपं स्नानं कुर्यात्।

अथ यासावध्यापनीयः। एतदुद्दालकव्रताशक्तस्य यस्यात्यस्य पिता पितामहाद्यप्युपनयनरहितौ स्यातां ते त्रयोपि ब्रह्मघ्नसंस्तवाव्याः। तेषामागमनं नात्प्रभृति स्वकार्यार्थं गमनं तत्संधिभोजनादि च वर्जयेत्। तेषां शुद्धिमिच्छतामिदं वक्ष्यमाणप्रायश्चित्तं। ऋतोः स्थाने वत्सरस्तत्र प्रतिपुरुषं वत्सरत्रितयं ब्रह्मचर्यं कार्यं अथोपनयनं। ततो यावंतोऽनुपनीताः पुरुषास्तत्संख्यया यदि द्वावनुपनीतौ तर्हि द्वौ वत्सरौ यदि त्रयस्तदा त्रीनिति प्रत्यहं स्नानं कुर्यात्केचन संवत्सरं उदकोपस्पर्शनमिति व्याचक्षते। तत्र मंत्राः। यदंति यच्च दूरके भयं वदंति यामिहे त्येनाभिः सप्तभिः याचमानीभिः अद्भिर्मार्जनमर्षणं च यथाशक्ति कुर्यात्। येन देवाः पवित्रेणेति यज्ञपवित्रं। कयानश्चित्र आभुवदिति सामपवित्रं। हंसः शुचिषदित्यांगिरसं। व्याहृतयो वा स्नानमंत्रा भवंति। प्रायश्चित्तार्थमेते मंत्रा

अध्याप्याः। एवं कृतप्रायश्चित्तः पौ ध्याप्यः। यस्य प्रपितामहा-
देरुपनयनं नास्मिस्तित थानाचामपि पुरुषाणामुपनयनाभावः
ते सर्वे स्मशानशब्दवाच्याः। अशुचय इत्यर्थः। तेषामागते त्वभ्यु-
त्थानं भोजनादि चापत्स्वपि न कुर्यात्। तेषां त्वयमेव शुद्धिमि-
च्छतां प्रायश्चित्तं द्वादश वर्षाणीत्यादिस्पष्टार्थं। उदकोपस्प-
र्शनमपि पुरुषसंख्यावत्सरानभिव्याप्य संवत्सरं चोदकस्प-
र्शनं। तत्र मंत्राः पूर्वोक्ता एव। ततोऽध्यापनं नास्ति किंतु गृहस्था-
श्रमस्वीकारः। ततउपदिष्टगार्हस्थ्यात्पुरुषात्संततिर्वर्त्तते।
तस्मादुत्पन्नस्योपनयनसंस्कारः प्रथमातिक्रमे यथा। अति-
क्रांते सावित्र्याः कालऋतुं त्रैविद्यकं ब्रह्मचर्यमिति तद्भवति।
तत ऊर्ध्वं प्रकृतिवत्। ततउत्पन्नस्यानतिक्रांतसावित्रीकालोप-
नयनवदिति॥ अथ स्तेये॥ धान्यादिद्रव्यविशेषापहारे सामा-
न्यप्रायश्चित्तापवादकत्वेन प्रायश्चित्तांतरमाह मनुः॥ धा-
न्यान्नधनचौर्याणि कृत्वा कामाद्द्विजोत्तमः। स्वजातीयगृहा-
देव कृच्छ्राब्देन विशुद्ध्यति। धनं सुवर्णादन्यत्सारद्रव्यं
द्विजोत्तमो विप्रः तस्य स्वजातिर्विप्र एव। एतच्च ब्राह्मणपरिगृ-
हीतधान्याद्यपहर्तुर्ब्राह्मणस्यैव। क्षत्रियादीनां स्वस्वजातीयसं-
बंधिधान्याद्यपहरणे यथाक्रमेण पादोनमर्द्धं पादश्चेति क-
ल्प्यं ब्राह्मणेन क्षत्रियादिपरिगृहीतधान्याद्यपहारे क्रमेण
षाण्मासिकं। मनूक्तं त्रैमासिकं गोवधव्रतं वा कल्पनीयं।
धान्यं दशभ्यः कुंभेभ्यो हरतोऽभ्यधिके वध इति दशकुंभावि-

कहरणे याज्ञवल्क्येन वधदर्शनात् दशकुंभपरिमितधान्यहरणे एतत्प्रायश्चित्तं कल्पनीयं। धान्यसाहचर्याद्दत्तस्य तंदुलादेरप्येवमेव। कुंभपरिमितधान्यमूल्यलभ्ये रजतादिधनेप्येवमेव। कुंभश्च पंचसहस्रपलपरिमाणः। अल्पसाराणां त्रपुसीसादीनां हरणे मनुः। द्रव्याणामल्पसाराणां स्तेयं कृत्वान्यवेश्मतः। चरेत्सांतपनं कृच्छ्रं तन्निर्याप्यात्मशुद्धय इति। सप्तपंचविंशतिपणमूल्यलाभ्यत्रपुसीसाद्यपहारे॥ तथा॥ भक्ष्यभोज्यापहरणे यानशय्यासनस्य च। पुष्पमूलफलानां च पंचगव्यं विशोधनं। एककालभोजनपर्याप्तभक्ष्यभोज्यापहारे एतत्। द्विवारभोजनपर्याप्तहरणे तु पैठीनस्युक्तं। त्रिरात्रं भक्ष्यभोज्यान्नस्योदरपूरणमात्रस्य हरणे। त्रिरात्रमेकरात्रं पंचगव्याहारं चेति। एकरात्रं पंचगव्याहारस्य पूर्वोक्तो विषयः। भक्ष्यादिसाहचर्याद्यानादीनामपि तावन्मूल्यलभ्यानामेव हरणे एकरात्रादिकं। एकवारभोजनपर्याप्तभक्ष्यादिद्विगुणमूल्यलभ्यतृणकाष्ठादिहरणे त्रिरात्रं। अनेनाभिप्रायेण मनुः। तृणकाष्ठद्रुमाणां च शुष्कान्नस्य गुडस्य च। चैलचर्मामिषाणां च त्रिरात्रस्यापि भोजनं। तथा द्वादशगुणभक्ष्यमूल्यार्हमणिमुक्ताद्यपहारे स एव। मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च। अयःकांस्योपलानां च द्वादशाहं कणान्नता। भक्ष्यादित्रिगुणमूल्यकार्पासादिहरणेपि स एव। कार्पासकीटजोर्णानां द्विशफैकशफस्य च। पक्षिगंधौषधीनां च रज्ज्वाश्चैव त्र्यहं पय

इति। एवमन्यत्रापि कल्पनीयं॥ तथा॥ मनुष्याणांतु हरणे स्त्री-
णां क्षेत्रगृहस्य च। वापीकूपजलानांच शुद्धिश्चांद्रायणेन च।
एतच्च क्षत्रियादिमनुष्याद्यपहारे। निक्षेपस्यापहरणेन स्वर्णरज-
तस्यतु। भूमिवज्रमणीनांच रुक्मास्तेयसमं स्मृतमिति। अत्र ब्रा-
ह्मणसंबंधिमनुष्याद्यपहरणस्य सुवर्णस्तेयसत्वेनोक्तत्वात्।
कूपवापीजलानांचेत्यत्र कूपवापीभ्यां जलविशेषणं घटादिज-
लव्यावृत्त्यर्थं। तेन जलवापीकूपापहारे प्रायश्चित्तमिदमित्य-
परार्कः। सार्द्धशतद्वयपणाल्लभ्यजलापहार इदं चांद्रायणं नि-
यम्य इति मिताक्षरायां। एतच्च प्रायश्चित्तं जातमपहृतं स्वामिने
दत्त्वैव कर्त्तव्यं॥ यदाह विष्णुः॥ दत्त्वैवापहृतं द्रव्यं स्वामिने
व्रतमाचरेदिति। स्त्रीबालादिषु पूर्वोक्तरीत्या कल्प्यं॥ ऋणानां
चानपक्रियेत्यत्र गोवधप्रायश्चित्तानि यथाशक्ति यो-
ज्यानि॥ अनाहिताग्नितायां। तत्र वत्सरादूर्द्ध्वमापदि शक्त्यपेक्ष-
या याज्ञवल्क्योक्तव्रतं चतुष्टयं योज्यं। अनापदि तु वत्सरादूर्द्ध्वमे-
वमनूक्तं त्रैमासिकं। अपूर्णे संवत्सरे कार्ष्णाजिनिर्विशेषमाह
कालेत्वाधायकर्माणि कुर्याद्विप्रो विधानतः। तदकुर्वंस्त्रिरात्रे-
ण मासिमासि विशुद्ध्यति॥ आवसथ्याधानेपि समएव॥
कृतदारो गृहे ज्येष्ठो योनादध्याद्धुताशनं। चांद्रायणं चरेद्वर्षं
प्रतिमासमहोपि वेति। वर्षातिक्रमे चांद्रायणं मासातिक्रमे त्र्य-
हमुपवासः। श्रौतस्मार्त्ताग्न्याधानाभावे इदं प्रायश्चित्तं। गृही-
तस्य नास्तिक्यादिवशात्परित्यागे धर्म्मविवृत्यादिषु विशेषो

भिहितः॥ व्याघ्रपादः॥ मासद्वयं तु यो वह्निं त्यजेद्देवं समाचरे-
त्॥ नास्ति क्याकृच्छ्रमेकं तु होमद्रव्यं ददाति चेत॥ तथा॥
योग्निं त्यजति नास्तिक्यात्प्राजापत्यं चरेद्द्विजः। अन्यत्र पुनराधा-
नमुपदिष्टं मनीषिभिः। मासचतुष्टयमभिव्याप्याग्निपरित्यागे-
ऽतिकृच्छ्रः। तथा च स एव। चतुष्टये तु संपूर्णे मासानां तु हु-
ताशनं। त्यक्त्वातिकृच्छ्रं कुर्वीत ततः पापात्प्रमुच्यते। परमा-
सपर्यंतं पराकः। अत ऊर्द्ध्वमब्दपर्यंतं पयोव्रतं॥ यथाहोशनाः।
परमासांस्त्यजते यो वै पराकं तु समाचरेत। ऊर्द्ध्वं पयोव्रतं कुर्यान्मा-
समेकं समाहितः। वर्षपर्यंतमेवाहुर्मुनयः शंसितव्रताः। संवत्स-
रादूर्द्ध्वं तु स्कंदपुराणे। ऊर्द्ध्वं संवत्सराद्ग्निं यस्त्यजेत्स पयोव्र-
तं द्वैमासिकं ततः कुर्याच्चैमासिकमथापि वा। कालाल्पत्वस-
हत्वापेक्षया विकल्पः। प्रमादान्मासमग्निपरित्यागेपि स्कं-
दपुराणे॥ हुताशनं हि यो विप्रः प्रमादात्त्यजति प्रभो। प्राणा-
यामशतं कुर्यादुपवासमथापि वा। प्राणायामशतं त्रिरात्रप-
रित्यागे कूर्मपुराणे॥ षड्रात्रं त्यजेदग्निं प्रमादात्स्मरणुमे
प्रभो। उपवासं तथा कुर्यात्प्राजापत्यमथापि वा। तयेत्यनेन
तत्र प्रकृतं त्रिरात्रं परामन्पते। मासद्वयपरित्यागे त्रिरात्रं। अत
ऊर्द्ध्वं वत्सरपर्यंतं मासं प्राजापत्यमत ऊर्द्ध्वं कालबहुत्वे प्रा-
यश्चित्तबहुत्वं॥ तथा च भारद्वाजगृह्ये॥ प्राणायामशत
मात्रिरात्रादुपवासः स्याद्दाविंशतिरात्रादत ऊर्द्ध्वं मासषड्रात्रा
त्तिस्रो रात्रीरुपवसेत। अत ऊर्द्ध्वं मासं वत्सरात्प्राजापत्यं चरेदत

ऊर्द्धं कालबहुत्वे षड्बहुत्वमिति। उपवासश्चात्रिंशद्दिनात्यपि-
पाठः। आलस्येन परित्यागे स्मृत्यंतरे। आलस्येन यश्च वह्निं द्वा-
दशाहं त्यजेत्प्रभो। त्रिरात्रमुपवासं संचरेत्पापविशुद्धये॥ भारद्वाज
गृह्ये॥ द्वादशातिक्रमे त्र्यहमुपवसेन्मासातिक्रमे द्वादशाहमुप-
वासः। संवत्सरातिक्रमे मासोपवासः। पयोभक्षणं वा कूष्मांडीभि-
र्होमः क्रमेणोभयं वेति। उपवासासमर्थस्य मासं पयोभक्षणं। संव-
त्सरानंतरमधिककालातिक्रम उभयं। एतच्च गृह्याग्निविषयं॥ हा-
रीतः॥ संवत्सरोत्सन्नेऽग्निहोत्रे चांद्रायणं कृत्वा पुनरादध्यात् द्विवर्षो-
त्सन्ने चांद्रायणं सोमायनं कुर्यात्। त्रिवर्षोत्सन्ने संवत्सरं कृच्छ्रम-
भ्यस्य पुनरादध्यादिति॥ शंखः॥ अग्न्युत्सादी संवत्सरं प्राजापत्यं
चरेद्गां च दद्यादिति। एतदकामतोऽग्नौ नाग्न्युत्सादे। कामतस्तु म-
नूक्तं। अग्निहोत्र्यपविध्याग्नीन्ब्राह्मणः कामकारतः। चांद्रा-
यणं चरेन्मासं वीरहत्यासमं हि तत्। मासमग्नीनपविध्ये स्वल-
यः। केचनालस्यादिना मासमग्निपरित्यागे प्रथममासे कृच्छ्रद्वयं
ततो माससंख्यया कृच्छ्रसंख्येति। एवमादयो गुरुलघुकल्पाः श-
क्त्याद्यपेक्षयाऽव्यवस्थापनीयाः। एवं प्रायश्चित्तानंतरं प्राप्ते शुभे स्थले
पुनराधानं कृत्वा नित्यकर्म कुर्यात्। प्रायश्चित्तं च होमद्रव्यं दत्त्वा॥
तथा च भारद्वाजगृह्ये यावत्कालमहोमी तावद्द्रव्यमशे-
षतः। तद्दानं चैव विप्रेभ्यो यथा होमस्तथैव चेति॥ अथापरायवि-
क्रये॥ यत्र स्मृतिषु प्रायश्चित्तं नोक्तं तत्र द्रव्यानुबंधाद्यपेक्षयाऽना-
पदि मानवं त्रैमासिकं। आपदि तु गोवधे याज्ञवल्क्योक्तं चतुष्टयं

शक्त्यपेक्षया योजनीयं। कृच्छ्रविशेषो हारीतेनोक्तः। गुडति-
लपुष्पमूलफलपक्वान्नविक्रये सोमायनं लाक्षालवणमधु-
मांसतैलदधिघृततक्रगंधचर्मरक्तवाससामेकतमविक्रये चांद्रा-
यणं तयोर्गोकेशाकेसरिस्वधेनुवेश्मशास्त्रविक्षेपे च। भस्मां-
सलाद्यस्थिशृंगनखशुक्तिविक्रये तप्तकृच्छ्रः। हिंगुगुग्गुलुहरिता-
लमनःशिलांजनगैरिकक्षारलवणमणिमुक्ताप्रवालवैणव-
वेणुमृन्मयेषु च। आरामतडागोदपानपुष्कविशीसुकृतविक्रये-
षु त्रिषवणस्नाय्यधःशायी चतुर्थकालाहारो दशसहस्रं जपन्संव-
त्सरेण पूतो भवति। हीनमानोन्मानसंकीर्णविक्रये चेति। दशस-
हस्रं जपन् गायत्रीमिति शेषः। संवत्सरव्रतमेव हीनमानादिविक्र-
येपि संकीर्णं मिश्रितं। एकतमविक्रय इति सर्वशेषः॥ शंखलि-
खितौ॥ अविक्रीणीयानि तिलतैलदधिक्षौद्रलवणद्राक्षामद्य-
मांसकृतान्नस्त्रीपुरुषहस्त्यश्वगोवृषभगंधरसक्षौमकृष्णाजि-
नसोमोदकनीलीविक्रयात्पतति ब्राह्मणः। तत्र प्रायश्चित्तमका-
मावाप्तौ कामकृतेप्येके पतितो ह्यात्मानमुद्धरेत्संवत्सरं तप्तकृच्छ्र-
माचरेत्। कृतवापनः शुचिरपोभ्युपेयात्त्रिरेकार्द्रवासा गोष्ठे मौनी
वीरासनमासीत रात्रौ दिवा तिष्ठेद्युक्तोग्निकार्यपरः सावित्रीं सवनानु-
गां जपेत्। स्वयं व्रतमभ्युपगम्य कुशचीरवासा मौंजीमेखली दंडप-
वित्रपाणिर्हविष्यं वा शायेच्चरन् भैक्ष्यमदुष्टं वा वायुवन्मश्नीयात् द्वा-
दशरात्रं चोपवासो ब्राह्मणान् पर्णां गत्वा हिरण्यमित्येवं व्यवहार्योन्य-
था पतितः शिष्टैरसंभाष्य इति॥ विष्णुः॥ मांसलवणलाक्षीर-

विक्रयी चांद्रायणं कुर्यात् तं च भूयश्चोपनयेदिति। चतुर्विंशतिमते
सुराया विक्रयं कृत्वा चरेत्सौम्य चतुष्टयं। पयःपायसयूपानां चरेच्चां-
द्रायणत्रयं। दध्यश्चेक्षुरसस्यैव गुडखंडादिविषये। सर्वेषां स्नेहपक्वा-
नां पराकं तु समाचरेत्। कदलं नालिकेरं वा नारंगं बीजपूरकं। एते-
षां पादकृच्छ्रं स्यात्क्षीरादेस्तथैव च। कस्तूरिकादिगंधानां विक्रये-
कृच्छ्रमिज्यानां स्वयज्ञार्थं विक्रयं नयेत्। रक्तपीतादिवस्त्राणि कृ-
ष्णादीनि तथैव च। विक्रये त्र्यहमेतेषां गर्गस्य वचनं यथा। गोविक्र-
यं नरः कृत्वा लाभार्थं धनमोहितः। प्राजापत्यं प्रकुर्वीत गजानामे-
वं स्मृतं। खराश्वाश्वतराणां च करभाणां च विक्रये। पराकं तत्र-
कुर्वीत स्तनानां द्विगुणं चरेत्। नारीणां विक्रयं कृत्वा चरेच्चांद्रायणं
व्रतं। द्विगुणं पुरुषस्यैव व्रतमाहुर्मनीषिणः इति। चांद्रायणं प्रकु-
र्वीत एकाहाद्वेद विक्रये। छागानां तु पराकः स्यात्सप्ततीनां कृच्छ्र-
माचरेत्। इति हासपुराणानां चरेत्सांतपनं द्विजः। रत्नस्य पंच-
रात्राणां कृच्छ्रमेव समाचरेत्। भंगा विक्रये एकाहादिस्त्वनुवर्तते।
एवमन्यान्यपि गुरुलघुप्रायश्चित्तान्यविक्रयकामाकामत्वा-
द्यपेक्षया योज्यानि॥ अथ परिवेदने पारिवित्त्ये च॥ तत्र व-
सिष्ठः॥ परिवित्तिः कृच्छ्रं द्वादशरात्रं चरित्वा निविशेत तां चै-
वोपयच्छेदिति। परिवेत्तानुजोऽनूढे ज्येष्ठे दारपरिग्रहात्। परिवि-
त्तिस्तु तज्ज्याया नित्यमरकोशे। असौ परिवित्तिर्ज्येष्ठस्तां परि-
त्यज्य प्राजापत्यं चरित्वा निविशेत्। उद्वहेत। कामित्यां कांक्षामाह
तां चैवोपयच्छेदिति। तामेव स्वेन पूर्वं परिणीतामेव। तथा परिविंदा

नः कृच्छ्रातिकृच्छ्रौ कृत्वा तस्मै दत्त्वा पुनर्निविशेत् तामेवोपयच्छे-
नेति। परिविंदानः परिवेत्ता कनीयान्। तस्मै ज्येष्ठाय स्वोढां दत्त्वा
द्वयं च दीयेत्युपचारार्थमिदं दत्त्वा ब्रह्मचार्याहृतमैक्षवन्निवेद्य
कृच्छ्रातिकृच्छ्रौ कृत्वा पुनस्तामेव तेनानुज्ञातामुद्वहेदित्यर्थः
एतच्च देशान्तरव्यवस्थिते ज्येष्ठे कृतविवाह इति भ्रान्त्या कनीय-
सि कृतविवाहे निर्गुणे वा ज्येष्ठे द्रष्टव्यं। प्रायश्चित्तस्याल्पत्वात्।
ज्येष्ठे गुणवति कन्यापित्राद्यनुज्ञानमंतरेणाकामतः करणे हारी
ताद्युक्तं द्रष्टव्यं ज्येष्ठेऽनिविष्टे कनीयान्निविशमानः परिभाप
वित्तो ज्येष्ठः। परिवेदनी कन्या परिदायी दाता परियष्टा याजकः
सर्वे ते पतिताः संवत्सरं प्राजापत्येन कृच्छ्रेण पावयेयुरिति। अत्रा-
पि परिवेत्त्रादीनां सर्वेषां कामतः प्रवृत्तौ प्रत्येकं संवत्सरकृच्छ्रे-
णाते शुद्ध्येरन्। अज्ञानतः प्रवृत्तौ तु याज्ञवल्क्योक्तगोवधव्रत-
चतुर्थांशत्याद्यपेक्षया योजनीयं। अत्रैव विशेषमाह यमः॥
द्वे कृच्छ्रे परिवित्तेस्तु कन्यायाः कृच्छ्रमेव च। अतिकृच्छ्रं चरेद्दाता
होता चांद्रायणं चरेदिति। ज्येष्ठायां यद्यनूढायां कन्यायामुह्य-
तेनुजा। या साग्रेदिधिषूपतिः कृच्छ्रं द्वादशरात्रं चरित्वा निवि-
शेत् तां चैवोपयच्छेत्। अग्रेदिधिषूपतिकृच्छ्राविति। सर्वप्राय-
श्चित्तविकल्पः। प्रथमपाठे त्वयमर्थः। अग्रेदिधिषूपतिः कनि-
ष्ठायाः पतिः तां परित्यज्य प्राजापत्यं चरित्वा निविशेत् उद्वहे-
त्। कामित्याकांक्षायां तां चैवेति॥ तांस्तेन पूर्वं परिणीतां दिधि-
षूपतिर्ज्येष्ठायाः पतिस्तां तस्मै कनिष्ठापतये पूर्ववद्दत्त्वा कृच्छ्रा

तिकृच्छ्रौ चरित्वा पुनः पूर्वपरिणीतामेवोद्वहेत् ॥ द्वितीयपाठे त्वय-
मर्थः। तस्मै दिधिषूपतये दत्त्वा पुनः स्वोढां तामेवाग्रेदिधिषूपति-
रुद्वहेत्। अत्रानुक्तस्थले कन्यायाः प्रौढायाः अप्रौढायाः पाद
इति कल्प्यं। प्रायश्चित्तानंतरं तु ज्येष्ठानुक्रमेणैव पूर्ववरायैव
पूर्वदत्तां कन्यां दत्त्वा विवाहसंस्कारः कार्यः। यत्र सोदरकनिष्ठ-
भ्राता सोदरज्येष्ठकन्या प्रथमं विवाहिता ततो ज्येष्ठभ्रात्रा कनी-
यसी विवाहिता अथवा ज्येष्ठभ्राता प्रथमं कनीयसी कनिष्ठे-
न पश्चात् ज्येष्ठा तत्र परित्याग एव। परिवित्तिपरिवेत्तृकन्यादातृ-
याजकानां द्वादशरात्रं कृच्छ्रं प्राप्तं ब्राह्मणतर्प्पणं च तां पुन-
र्भवमित्याचक्षते। न भूयश्चैनामभिगच्छेदिति सुमंतुस्मर-
णान्नाभिगच्छेन्न चाप्नुयात् परित्यजेदिति यावत्। अस्य व-
चनस्य विषयांतरापेक्षया यमेव विषयो ज्यायान्॥ केचन कनिष्ठः
परिवेत्ता स्वोढां कन्यां ज्येष्ठाय दद्यात्॥ ज्येष्ठोपि कनिष्ठविवाहि-
तामेवोद्वहेत्। एवमग्रेदिधिषूदिध्वपि व्युत्क्रमविवाहेन सं-
स्कारस्यानिष्पन्नत्वादिति कथयंति॥ तच्चिंत्यं अत्यंतलोकवि-
रुद्धत्वात्॥ अथ भृतकाध्यापनादेः॥ तत्र ब्रह्मसुवर्चलां पि-
बेदित्यनुवृत्तौ विष्णुः॥ भृतकाध्यापनं कृत्वा भृतकाध्या-
पितस्तथा। अनुयोगप्रदाने च त्रीन् पक्षान्नियतः पिबेत्। अ-
नुयोगः प्रश्नसेधनाय वा सम्यगधीवानस्य त्वयान सम्यगधी-
तइत्याक्षेपः। तथा च स्मर्यते॥ दत्त्वानुयोगानध्येतुः पतिता-
ननुरब्रवीत् इति। इदमपि प्रायश्चित्तं सामान्यगोवधप्राय-

श्चित्तैः शक्त्याद्यपेक्षया विकल्पितं ॥ अथ महापातक तत्
समत इति दिष्टव्यतिरिक्तपारदार्ये । ऋतुकाले कामकारेण
जातिमात्रब्राह्मणीगमने वार्षिकं ब्रह्महत्याप्रायश्चित्तं । तथा
च वार्षिकप्राकृतब्रह्मचर्यानुवृत्तौ गौतमः । उपपातके चैव
मिति । ऋतुकाले अग्निहोत्रादिसाधनत्वगुणयुक्तब्राह्मणी
गमने वर्षद्वयं ब्रह्महत्याव्रतं । तादृग्विधश्रोत्रियपत्नीगम-
ने त्रैवार्षिकं । यदाह सम्वर्तः परदारे त्रीणि श्रोत्रियस्य द्रव्यला-
भे चोत्सर्गो यथास्थानं गमयेदिति । द्वे वर्षे । तथा दत्तं द्रव्यसु-
त्सृष्टव्यं यदीयं द्रव्यं तत्र वा गमयितव्यमित्यर्थः । अथवा
श्रोत्रियपत्न्यां गुणवत्यां वैश्यायां गमने वार्षिकं । तादृ-
श्यामेव क्षत्रियायां द्विवार्षिकं । तादृश्यामेव ब्राह्मण्यां त्रै
वार्षिकमिति कल्प्यं ॥ तथा च शंखः ॥ वैश्यायामव-
कीर्णः संवत्सरं ब्रह्मचर्यं त्रिषवणं चानुतिष्ठेत् क्षत्रियायां
द्वे वर्षे त्रीणि ब्राह्मण्यां वैश्यावच्च शूद्रायां ब्राह्मणपरिणी-
तायामिति । अत्र ब्रह्मचर्यं द्वादशवार्षिकव्रतं वैश्यावदित्य
तिदेशात्पादेन वार्षिकं षाण्मासिकं वा कल्प्यं । एतच्च ब्रा-
ह्मणस्यैव । एतद्दिगवलम्बनेन क्षत्रियस्य क्षत्रियादिस्त्री
षु पूर्वोक्तगुणशालिनीषु गमने क्रमेण द्विवार्षिकवार्षि-
कषाण्मासिकानि । एवं वैश्यस्य वैश्याशूद्र्योर्गमने वार्षि-
कं षाण्मासिकमिति कल्प्यं । शूद्रस्य शूद्रापरभार्यायां षाण्मा-
सिकं । यत्त्वापस्तंबेनोक्तं ॥ सवर्णायामनन्यपूर्वायां सकृ-

संनिपाते पादः पततीत्युपदिष्टमत्येवमभ्यासे पादपादश्चतुर्थे सर्व-
मिति। एतच्चाग्निहोत्रादिसाधनत्वगुणशालिनीष्वपि पत्नीग-
मने वेदितव्यं। अनन्यपूर्वायामिति विशेषोपादानादेकवैवगमना-
भ्यासे द्वितीयवारादिगमने अनन्यपूर्वकत्वरूपप्रथमोपभोगा-
भावान्नूतनानन्यपूर्विकाभ्यासद्ववनप्रत्यभ्यासं पादपादाधि-
कं अपि तु पुनर्निगमनं पादपादन्यूनं कल्प्यं। एतदखिलमपि।
कामकारे तु पूर्वोक्तविषये सु पूर्वोक्तप्रायश्चित्तान्येवार्द्धवृद्ध्या
योज्यानि॥ अनृतौ तु काले कामतो जातिब्राह्मण्यामव्यभिचारिण्या
गमने मनूक्तं त्रैमासिकं। तथा क्षत्रियागमने मनूक्तमेव द्वैमासिकं।
तथा वैश्यागमने चांद्रायणं। शूद्रागमने मासं यावकव्रतं। एतद्ब्राह्मण-
स्य क्षत्रियस्य क्षत्रियादिस्त्रीगमने द्वैमासिकं चांद्रायणं मासिकयाव-
कव्रतं च क्रमेण। एवं वैश्यस्य वैश्यशूद्र्योर्गमने चांद्रायणं मासि-
कयावकव्रतं च। शूद्रस्य शूद्रीगमने मासिकयावकव्रतं। अकामत-
स्तु ब्राह्मण्यादिद्विजातिस्त्रीगमने क्रमेण याज्ञवल्क्योक्तमृषभै-
कादशगोदानं मासं पंचगव्याशनं मासं प्राजापत्यचरणं च द्रष्टव्यं
क्षत्रियस्य क्षत्रियादिद्विजातिस्त्रीगमने क्रमेण मासं पंचगव्याश-
नं। मासं प्राजापत्याचरणं वा द्रष्टव्यं। वैश्यस्य वैश्यागमने प्राजाप-
त्यं शूद्रागमने तु मासं वर्त्तेः। शूद्रां तु ब्राह्मणो गत्वा मासं मासार्द्धमे-
व वा। गोमूत्रयावकाहारस्तिष्ठेत्तस्यापमोचकइति। कामतो मा-
सम कामतोर्द्धं। क्षत्रियादीनामपि शूद्रागमने पूर्वोक्तमासार्द्धमेव।
यत्तु स्मृत्यंतरं॥ ब्राह्मणवेदप्रेक्षापूर्वकं वा क्षणदारानभिग-

च्छेत् निवृत्तधर्मकर्मणः कृच्छ्रं। निवृत्तधर्मकर्मणोऽतिकृच्छ्र
इति। तद्ब्राह्मणापत्न्यां शूद्रायां सप्रेक्षापूर्वकमबुद्धिपूर्वकं। नि-
वृत्तधर्मकर्मणोऽप्युक्ताचारस्य। द्विस्त्रिर्व्यभिचरितब्राह्मणस्त्रीवि-
षयं वा। कामकारे तु द्विगुणं। एतच्च सकृद्गमने वारचतुष्टयं व्यभि-
रितायामकामतो गमने शंखोक्तं द्रष्टव्यं। सचैलस्नात उदकुंभं द-
द्याद्ब्राह्मणाय वैश्यायां चतुर्थकालाहारो ब्राह्मणान् भोजयेत्
क्षत्रियायां त्रिरात्रोपोषितो यवाढकं दद्याद्ब्राह्मण्यां त्र्यहमुपोष्य-
घृतपात्रं दद्यादिति। चतुर्थे स्वैरिणी प्रोक्ता पंचमे बंधकी मतेति
स्मरणाच्चतुर्थव्यभिचारे जाते स्वैरिणीत्युच्यते। षड्त्रिंशन्मते। ब्रा-
ह्मणीं बंधकीं गत्वा किंचिद्दद्याद् द्विजातये। राजन्यां तु धनुर्दद्याद्वै-
श्यां गत्वा तु चैलकं। अष्टमुष्टि भवेत्किंचित्। अत्रैव यमः॥
ब्राह्मणो ब्राह्मणीं गत्वा द्विजे दद्यान्मृगाजिनं। क्षत्रियायां धनु-
र्दद्याद्वैश्यायामायसीं शिलां। शूद्रां गते न विप्रेण उदकुंभः।
प्रदीयते। त्रिरात्रोपोषितः स्नात्वा दद्यात्संमार्जनीं तथा। अत्र शक्तवि-
षये त्रिरात्रोपवाससहितानि दानानि। अत्राप्यशक्तस्य दानमात्र-
मिति व्यवस्था। एतच्च गर्भानुत्पत्तौ तदुत्पत्तौ तु तद्द्विगुणं तथा चो-
शनाः। गमने तु व्रतं यत्तु गर्भे तद्द्विगुणं भवेदिति। शूद्र्यां गर्भाधाने
चतुर्विंशतिमते। वृषल्यामभिजातस्तु त्रीणि वर्षाणि चतुर्थका-
लसमयेन नक्तं भुंजीतेति। वृषल्यां जनितापत्यो वृषल्यामभिजातः
वृषली शूद्रा। स्वभार्याभ्रांत्या प्रातिलोम्येन गच्छतः शूद्रादेः प्रचे-
तसोक्तं द्रष्टव्यं। शूद्रस्य ब्राह्मणीमानागच्छतः शुद्धिमिच्छतः॥

पूर्णमेतद्व्रतं देयं मातायस्माद्धि तस्य सा पापादहान्यान्यवर्णमुगच्छतः सार्ववर्णिकमिति। कामतस्तु वधः। प्रातिलोम्ये वधः पुंसां नार्याः कर्णादिकर्त्तनमिति स्मरणात्। महापातकप्रकरणेपि शूद्रस्य गोघ्नस्येत्यादि वसिष्ठवचनं दर्शितं॥ अत्यन्तव्यभिचारिणी ब्राह्मणीगमने तु संवर्त्तोक्तं। कथंचिद्ब्राह्मणीं गच्छेत्क्षत्रियो वैश्य एव वा। कृच्छ्रार्द्धं नपनं वा स्यात्प्रायश्चित्तं विशुद्धये। शूद्रस्तु ब्राह्मणीं न कथंचित्कामोदितः। गोमूत्रयावकाहारो मासेनैकेन शुध्यतीति। स्त्रीणामप्यनुलोमव्यवाये पुरुषस्य यत्प्रायश्चित्तं तदेव संपूर्णं प्रायश्चित्तं योजनीयं॥ मनुः॥ यत्पुंसः॥ परदारेषु तच्चैतां चारयेद्व्रतमिति। अत्र प्रायश्चित्तार्धमर्हति स्त्रियो रोगिणश्चेति न प्रवर्त्तते। यत्पुंसः परदारेषु समानेषु स्तंव्रतं। व्यभिचाराच्च भर्तुः स्त्री तदशेषं समाचरेदिति बृहस्पतिस्मरणात्। समानेषु सवर्णेषु। एतच्चोपपत्तस्य स्यादुपलक्षणं वलात्सवर्णोत्कृष्टोपभुक्तायाः संवर्त्तोक्तं। बलात्प्रमथ्या भुक्ता चेद्दह्यमानेन चेतसा। प्राजापत्येन शुद्धिः स्यात्तत्स्याः पावनं परं। अत्राप्यृष्यशृंगोक्तं। बलेन कामिता नारी सवर्णेन कथंचन। प्रायश्चित्तं त्रिरात्रं वै तस्याः शुध्यर्थमादिशेदिति। प्रातिलोम्यव्यवाये तु स्त्रीणां पृथक्प्रायश्चित्तं। तत्र महापातकप्रकरणे वाशिष्ठं दर्शितं। संवर्त्तेन प्रायश्चित्तान्तरमभिहितं। ब्राह्मण्यकामात् गच्छेच्च क्षत्रियं वैश्यमेव वा। गोमूत्रयावकैर्मासमर्द्धाच्च विशुध्यति। कामतो द्विगुणं षड्भिरान्मते। ब्राह्मणीक्ष-

त्रियवैश्यसेवायामतिकृच्छ्रं कृच्छ्रातिकृच्छ्रौ चरेत्। क्षत्रिययोषितां ब्राह्मणराजन्यवैश्यसेवायां कृच्छ्रार्द्धं प्राजापत्यमतिकृच्छ्रं वैश्ययोषितां ब्राह्मणराजन्यवैश्यसेवायां कृच्छ्रपादं कृच्छ्रार्द्धं प्राजापत्यं शूद्रायाः शूद्रसेवने प्राजापत्यं ब्राह्मणराजन्यवैश्यसेवायां त्वहोरात्रं कृच्छ्रार्द्धमिति ॥ बृहत्प्रचेताः ॥ विप्रा शूद्रेण संयुक्ता न चेत्तस्मात्प्रसूयते। प्रायश्चित्तं स्मृतं तस्याः कृच्छ्रं चांद्रायणत्रयं। चांद्रायणे द्वे कृच्छ्रश्च विप्राया वैश्यसंगमे। कृच्छ्रचांद्रायणे स्यातां तस्याः क्षत्रियसंगमे। क्षत्रिया शूद्रसंपर्के कृच्छ्रं चांद्रायणद्वयं। चांद्रायणं सकृच्छ्रं तु चरेद्वैश्येन संगता। शूद्रं गत्वा चरेद्वैश्या कृच्छ्रं चांद्रायणोत्तरं। आनुलोम्येन कुर्वीत कृच्छ्रं पादावरोपितमिति। गर्भधारणतो नु चतुर्विप्रा तिमन्ते। विप्रगर्भे पराकः स्यात्क्षत्रियस्य तथैंदवं। ऐंदवश्च पराकश्च वैश्यस्याकामकारतः। शूद्रगर्भे भवेत्त्यागश्चांडालो जायते यतः। गर्भस्रावे धातुशोषे चरेच्चांद्रायणत्रयमिति। कामकारे द्विगुणं। गर्भस्रावे चांद्रायणत्रयं शूद्रगर्भस्रावएव। यदा तु शूद्रगर्भप्रसवस्तदा प्रायश्चित्ताभावएव ॥ तथा च वसिष्ठः ॥ ब्राह्मणक्षत्रियविशां भार्याः शूद्रेण संगताः। अप्रजाता विशुद्ध्यंति प्रायश्चित्तेन नेतरा इति। यदा सशूद्रगर्भैव व्यभिचरति तदा प्रसवोत्तरकालं प्रायश्चित्तं। अंतर्वत्नी तु या नारी समेताकम्यकायिना। प्रायश्चित्तं न कुर्यात्सा यावद्गर्भो न निःसृतः। जाते गर्भे व्रतं पश्चात्कुर्यान्मासं तु यावकं। न गर्भदोषस्तत्रास्ति संस्कार्यः स यथाविधि-

तिस्मरणात्। आक्रम्य बलात्। इच्छापूर्वं वे यत्र यदुक्तं तद्द्विगुणं
यदा तु प्रायश्चित्तं न चिकीर्षेति दर्पादिना तदा नार्याः कर्णादि-
कर्त्तनमित्यं गच्छेदः। अन्त्यजगमने तु स्त्रीणां प्रायश्चित्तविशे-
षाः स्मृत्यन्तरे। रजकव्याधशैलूषवेणुचर्मोपजीविनः। ब्रा-
ह्मण्येतान्यदा गच्छेदकामादैन्दवद्वयं। चंडालं पुल्कसं म्लेच्छं
श्वपाकं पतितं तथा। ब्राह्मणाय कामतो गत्वा चांद्रायणचतुष्टयं
कामतो द्विगुणं कल्प्यं। अकामतः प्रायश्चित्तान्तरमपि स्मर्य-
ते। चंडालेन तु संपर्कं यदि गच्छेत्कथंचन। सशिखं वपनं कु-
र्याद्भुंजीयाद्यावकौदनं। त्रिरात्रमुपवासः स्यादेकरात्रं जले-
वसेत्। आत्मनासंमिते कूपे गोमयोदककर्दमे। तत्र स्थित्वा
निराहारा सा त्रिरात्रं ततः क्षिपेत्। शंखपुष्पीलतामूलं पत्रं वा
कुसुमं फलं। क्षीरं सुवर्णसंमिश्रं क्वाथयित्वा ततः पिवेत्। एक-
भक्तं चरेत्पश्चाद्यावत्पुष्पवती भवेत्। वहिस्तावच्च निवसेत्-
यावच्चरति तद्व्रतं। प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोज-
नं। गोद्वयं दक्षिणां दद्यात् शुद्धोन्स्वायंभुवोऽब्रवीदिति। एत-
च्चाकामतः सकृद्गमने। कामतः सकृद्गमने तु ऋष्यशृंगः।
संपृक्ता स्यात्तथा तैर्या सा कृच्छ्राब्दं समाचरेत्। अंतर्वत्नी
तु युवतिः संपृक्ता चांत्ययोनिना। प्रायश्चित्तं न सा कुर्याद्या-
वद्गर्भो न निःसृतः। न पश्चाद्गृहे कुर्यान्न चांगेषु प्रसाधनं।
न शयीत समं भर्त्रा न चाभुंजीत बांधवैः। प्रायश्चित्तं गते
गर्भे विधिं कृच्छ्राब्दिकं चरेत्। हिरण्यमथवा धेनुं दद्याद्वि-

प्रायद्दक्षिणामिति। कामतोंत्यजसंसर्गाभ्यासे उशनाः। अंत्य-
जेन तु संपर्के भोजने मैथुने कृते। प्रविशेत्संप्रदीप्तेऽग्नौ मृत्युना स-
विशुद्ध्यतीति। यदातु प्रायश्चित्तं न करोतीत्यादि नानदा पुल्लिं-
गेनांकनीया वध्या वा। अत एव पराशरः॥ हीनवर्णोपभुक्ता
या सा त्याज्या वध्या भवेदिति। वधोऽत्र नासिकादिकर्त्तनमित्यपरार्के
प्रकृष्टस्यांत्यजागमने त्वेतत् संवर्त्तः॥ रजकव्याधशैलूषवेणु
चर्मोपजीविनीः। एतास्तु ब्राह्मणो गत्वा चरेच्चांद्रायणद्वयं।
म्लेछीं नटीं चर्मकारीं रजकीं बुरुडीं तथा। एतासु गमनं कृत्वा
चरेच्चांद्रायणद्वयं। रजकश्चर्मकारश्च नटो बुरुड एव च। कैवर्तमे-
दभिल्लाश्च सप्तैते त्वंत्यजाः स्मृता इति। चांडाल्यादिगमने
गुरुतरप्रायश्चित्तत्वाद्गुरुतल्पप्रकरणेऽस्माभिर्दर्शितं। उशनाः
बहूनामेकधर्माणामेकस्यापि यदुच्यते। सर्वेषां तद्भवेत्कार्य-
मेकरूपा हि ते स्मृताः। यत्र पुल्कसादिगमने प्रायश्चित्तविशे-
षो नाम्नातस्तत्र चांडाल्यादिगमने यत्प्रायश्चित्तं तदेव तत्-
सदृशीष्वपि कर्त्तव्यमित्यर्थः। पूर्वोक्तं चांद्रायणद्वयं। ब्राह्म-
णस्य कामतो रजक्यादिगमने क्षत्रियादीनां तु पादपादोनं
कल्पनीयं। अकामतस्तु ब्राह्मणस्य संवर्त्तोक्तं। रजकव्याध-
शैलूषवेणुचर्मोपजीविनां स्त्रियो विप्रो यदा गच्छेत्तदा चांद्रायणं
चरेदिति। अत्राप्यशक्तस्यापस्तंबोक्तं। अकामतः स्त्रियो गत्वा
पराकव्रतमाचरेदिति। अतः सेकादर्वाग्निवृत्तौ तु शातातपोक्तं
कैवर्तीं रजकीं चैव वेणुचर्मोपजीविनीं। प्राजापत्यविधानेन

कृच्छ्रे रौकेन शुद्ध्यतीति। कापालिनीकैवर्त्यादिष्वज्ञानाद-
ज्ञानाच्चाभ्यासे उशनसोक्तं। कापालिकान्नभोक्तॄणां तन्नारी-
गामिनां तथा। ज्ञानात्कृच्छ्राब्दमुद्दिष्टमज्ञानादैंदवद्वयमि-
ति। अज्ञानाच्चांडाल्यादिषु गर्भाधाने द्वादशवार्षिकं नैवोक्तं
द्रष्टव्यं। चंडाल्यां गर्भमारोप्य गुरुतल्पव्रतं चरेदिति। ज्ञा-
नात्त्वापस्तंबोक्तं ॥ अंत्यजायां प्रसूतस्य निःकृतिर्न विधीय-
ते। निर्वासनं कृतीकस्य तस्य कार्यमसंशयमिति। एवमन्या-
न्यपि वचनानि विषयविशेषेषु योज्यानि। पारदार्यप्रसंगाद-
न्यदपि किंचिदुच्यते॥ याज्ञवल्क्यः॥ अनियुक्तो भ्रातृजा-
यां गच्छंश्चांद्रायणं चरेत्। घृताभ्यक्ततावि पादित्यादि।
नियोगप्रकारमंतरेण भ्रातुर्ज्येष्ठस्य कनिष्ठस्य वा जायां ग-
च्छन्नित्यर्थः। एतत्सकृदकामकारविषयं। कामकारे तु शं-
खोक्तं। परिवित्तिः परिवेत्ता च संवत्सरं ब्राह्मणगृहेषु भैक्षं
चरेत्। ज्येष्ठभार्यामनियुक्तो गच्छंस्तदेव कनिष्ठभार्यां चेति।
अकामतः सकृत्स्वभार्यायामपि रजस्वलायां गमने याज्ञव-
ल्क्योक्तं॥ त्रिरात्रांते घृतं प्राश्य गत्वोदक्यां विशुद्ध्यतीति।
त्रिरात्रांते। त्रिरात्रोपवासांते। अकामतो कामतः सकृद्गम-
ने च शातातपोक्तम्। रजस्वलागमने तु सप्तरात्रमिति।
कामतोऽभ्यासे तु हत्संवर्तोक्तिं। रजस्वलां तु यो गच्छेद्गर्भिणीं
पतितां तथा। तस्य पापविशुद्ध्यर्थमतिकृच्छ्रं विशोधनमिति
कामतोऽत्यंताभ्यासे शंखोक्तं त्रैवार्षिकं। पादस्तु शूद्रहत्या

यामुदक्यामनलेतथेति। रजस्वलासु परदारेषु गमने रजस्वलागम-
न प्रायश्चित्तं पारदार्यनिमित्तं च भवति। रजस्वलागमनप्रायश्चि-
त्तप्रसंगाद्रजस्वलानामन्योन्यस्पर्शे प्रायश्चित्तमुच्यते॥ वृद्ध-
वशिष्ठः॥ स्पृष्टे रजस्वलेन्योन्यं सगोत्रे त्वेकभर्तृके। कामादका-
मतो वापि सद्यः स्नानेन शुद्ध्यतीति। सवर्णासु सपत्नीविषये तु
मार्कंडेयः॥ उदक्या तु सवर्णा या स्पृष्टा चेत्स्यादुदक्यया। त-
स्मिन्नेवाहनि स्नाता शुद्धिमाप्नोत्यसंशय इति। एतच्चाकामतः
कामतस्तु कश्यपोक्तं। रजस्वला तु संस्पृष्टा ब्राह्मण्या ब्राह्मणी
यदि। एकरात्रं निराहारा पंचगव्येन शुद्ध्यति। एवं क्षत्रियादीना-
मपि। एतच्च प्रायश्चित्तं चतुर्थेहनि स्नानानंतरं कर्त्तव्यं। तथा-
चाग्रे वक्ष्यते। यत्तु चतुर्थेहन्यप्यशुद्धिवचनं तद्दैविकपैत्रक-
कर्म्मविषयविषयं॥ वृद्धवशिष्ठः॥ स्पृष्ट्वा रजस्वलान्योन्यं
ब्राह्मणी शूद्रजापि च। कृच्छ्रेण शुद्ध्यते पूर्वा शूद्री दानेन शु-
द्ध्यति। दानेन पादकृच्छ्रप्रत्याम्नायभूपनिष्कचतुर्थांशदानेन
तथा स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी वैश्यजापि वा। पादहीनं
चरेत्पूर्वा कृच्छ्रपादं तथोत्तरा। स्पृष्ट्वा रजस्वलान्योन्यं ब्रा-
ह्मणी क्षत्रिया तथा। कृच्छ्रार्द्धान्शुद्ध्यते पूर्वा तूत्तरा च त-
दर्द्धतः। स्पृष्ट्वा रजस्वलान्योन्यं क्षत्रिया शूद्रजापि च। उपवा-
सैस्त्रिभिः पूर्वा चाहोरात्रेण चोत्तरा। स्पृष्ट्वा रजस्वलान्योन्यं क्ष-
त्रिया वैश्यजापि च॥ त्रिरात्रान्शुद्ध्यते पूर्वा त्वहोरात्रेण चोत्त-
रा। स्पृष्ट्वा रजस्वलान्योन्यं वैश्या शूद्री तथैव च। त्रिरात्रान्

शुद्ध्यते पूर्वानुत्तरा च दिनवृद्ध्यात्। वर्णानां कामतः स्पर्शे शु-
द्धिरेषा पुरातनीति। अकामतो वृद्धहारीतोक्ते द्रष्टव्यं। रज-
स्वलां हीनवर्णां रजस्वलां स्पृष्ट्वा न तावदश्नीयाद्यावत् शु-
द्धा स्यात् स्ववर्णामधिकवर्णां वा स्पृष्ट्वा सद्यः स्नात्वा शुद्ध्य-
तीति॥ वृद्धवसिष्ठः॥ पतितान्त्यश्वपाकेन संस्पृष्टा चेद्रज-
स्वला। तान्यहान्यतिक्रम्य प्रायश्चित्तं समाचरेत्। उपवा-
सेन रजोघदिनानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत्। उप-
वासेन रजोदोषदिनानि व्यतिक्रम्य नीत्वेत्यर्थः। एवं सर्व-
त्रापि दिनव्यतिक्रमो यत्र प्रायश्चित्तमाम्नातं। तथा प्रथमे-
ऽह्नि त्रिरात्रं स्याद्द्वितीये त्र्यहमेव तु। अहोरात्रं तृतीयेऽह्नि परतो
नक्तमाचरेत्। शूद्रयोच्छिष्टया स्पृष्टा शुना च त्र्यहमाचरेत्।
एतत्कामतः स्पर्शे। अकामतो बौधायनोक्तं। रजस्वला तु
संस्पृष्टा चण्डालान्त्यश्ववायसैः। तावत्तिष्ठेन्निराहारा याव-
त्कालेन शुद्ध्यतीति। रजोदर्शननिमित्तत्रिरात्ररूपकाले-
नेत्यर्थः। अत्राशक्तायास्तेनैवोक्तं ग्राह्यं। यथा रजस्वला तु-
संस्पृष्टा ग्रामकुक्कुटशूकरैः श्वभिः स्नात्वा क्षिपेत्तावद्याव-
च्चन्द्रस्य दर्शनमिति॥ तथा॥ रजस्वला तु भुंजाना श्वांत्य-
जादीन स्पृशेद्यदि। गोमूत्रयावकाहारा षड्रात्रेणैव शुद्ध्य-
ति। अशक्तौ कांचनं दद्याद्विप्रेभ्यो वापि भोजनं। उच्छिष्टयोः
परस्परस्पर्शनेऽत्रिः। उच्छिष्टोच्छिष्टसंस्पृष्टा कदाचित्
स्त्री रजस्वला। कृच्छ्रेण शुद्ध्यते पूर्वा शूद्रा दानेरुपोषितेति

पूर्वाऽच्छुस्या॥ मार्कंडेयः। द्विजान् कथंचिदुच्छिष्टान् द्विज-
स्त्री यदि संस्पृशेत्। स्नातोच्छिष्टे त्वहोरात्रं शूद्रोच्छिष्टे त्र्यहं
क्षिपेत्। स्नातोच्छिष्टं मूत्रपुरीषादिना। तथा मृतसूतकसंप-
र्केऽन्नं तु दृष्ट्वा कथं भवेत्। नास्नानकालमश्नीयाद्भुक्त्वा चां-
द्रायणं चरेत्। अस्नानकालं चतुर्थदिनपर्यंतं॥ मनुः॥ अ-
प्रायत्ते समुत्पन्ने मलवद्वाससी यदि। अभिषेके तु भुक्तिः स्या-
द्दिनत्रयमभोजनं। अप्रायत्ने सूतकाद्याशौचे मलवद्रजस्व-
ला। अभिषेके तु भुक्तिः स्यात्सद्यः स्नानेन भोजनं।
एतच्च बालापत्याविषयं। अशक्तविषयं वा। अबालापत्या-
यास्तु दिनत्रयं भोजनाभावः। दिनत्रयमित्यवशिष्टकालो-
पलक्षणं। स्नानप्रकारस्त्वाह्निके नैमित्तिकस्नानप्रकरणे-
ऽभिहितः। परिवित्तिप्रायश्चित्तानि परिवेदनप्रकरणेऽभिहि-
तानि। वार्द्धुष्यलवणक्रिययोस्तु मनुयोगीश्वरोक्तगोवध-
प्रायश्चित्तानि नातिशक्त्याद्यपेक्षया योज्यानि॥ अथ स्त्री-
शूद्रविट्क्षत्रवधे। तत्र कर्म्मसाधनाद्विगुणशाल्यव्यभि-
चारिब्राह्मण्यादिस्त्रीवधे हारीतोक्तं द्रष्टव्यं। षड्वर्षाणि राजन्ये
प्राकृतं ब्रह्मचर्यं त्रीणि वैश्ये सार्द्धं शूद्रे क्षत्रियवद्ब्राह्मणीषु वैश्य-
वत्क्षत्रियायां शूद्रवच्च वैश्यायां शूद्रां हत्वा नव मासानिति।
प्राकृतं ब्रह्मचर्यं ब्रह्महत्याप्रायश्चित्तं। एतच्च कामतो वधे।
अकामतस्त्वर्द्धमीषद्व्यभिचारादिदोषदुष्टब्राह्मण्यादिवधे
प्रचेतसोक्तं। अनृतुमतीं ब्राह्मणीं हत्वा कृच्छ्राब्दं षण्मासा-

त्वा क्षत्रियां हत्वा षण्मासान् मासत्रयं। वा वैश्यां हत्वा मासत्रयं सार्द्धमासं वा शूद्रां हत्वा मासार्द्धं मासं सार्द्धं द्वाविंशत्यहानि वेति अत्र सर्वविकल्पेषु पूर्वः पूर्वः पक्षः कामकारविषयः। उत्तरोत्तरः अकामकारविषयः। प्रातिलोम्येन क्षत्रियादिभिर्व्यभिचरितानां ब्राह्मण्यादीनां वधे मनुयाज्ञवल्क्योक्तगोवधप्रायश्चित्तानि शक्त्याद्यपेक्षया योज्यानि। अंत्यजातिप्रसूतानां ब्राह्मण्यादीनां कामतो वधे ब्रह्मगर्भोक्तं। प्रतिलोमप्रसूतानां स्त्रीणां मासावधिः स्मृतः। अंतरप्रभवानां तु सूतादीनां चतुर्द्विषट्। अस्यार्थः। प्रतिलोमप्रसूतानां स्त्रीणां वधे चतुर्द्विषण्मासाः स्मृताः। अंतरप्रभवप्रसूतादिवधे विषयव्यवस्थोक्त एव वक्ष्यते। ब्राह्मणीहनने षण्मासाः। क्षत्रियायाहनने चत्वारः। वैश्याया द्वाविति। शूद्राया हनने मासिकव्रतं कल्प्यं। अकामतः पूर्वोक्तविषये याज्ञवल्क्योक्तं। दुर्वृत्तनृपविट्शूद्रयोषाः प्रमाप्य तु दृतिं धनुर्वस्तमविक्रमाद्दद्याद्विशुद्धय इति। दृतिश्चर्ममयं जलभांडं। वस्तश्छागः। अविर्मेषः। इदं चात्यंतदरिद्रस्य तपस्यसमर्थस्य। एतद्विपरीतस्य तु शक्त्यपेक्षया च दानतपसी कल्प्ये। वैश्याहनने किंचिद्देयं वैशिकेन किंचिदिति गौतमस्य स्मरणात्। अष्टमुष्टि भवेत्किंचित्। अथवा स्वल्पजन्मं वैश्यां हत्वा जलं स्पृशेदित्यंगिरः स्मरणात्। निर्द्धनस्य मनुभूमिस्थितस्य वा अष्टमुष्टिदानं जलदानं च। इतरस्य किंचिदधिकं कल्प्यं एवमन्यान्यपि विषयविशेषेषु

योज्यानि॥ अथ क्षत्रियादिवधे॥ तत्राकामतो जातिमात्रक्षत्रि-
यादिवधे याज्ञवल्क्योक्तं। वृषभैकसहस्रा गा दद्यात्क्षत्रवधेऽ-
मान्। ब्रह्महत्याव्रतं वापि वत्सरत्रितयं चरेत्। वैश्यहाब्दं चरेदेत-
द्दद्याद्वैकशतं गवां। षण्मासान्शूद्रहाप्येतद्धेनूर्दद्याद्दशाथवा
एकवृषभाधिकसहस्रगोदानं वाब्दत्रयव्रतं वा क्षत्रवधे। अत्यंत
धनाढ्यस्य हंतुर्वृषभैकसहस्रदानं। इतरस्य त्र्यब्दं। एवं वैश्यह-
ननेपि व्यवस्था। एतत् ब्रह्महत्याव्रतं। धेनूरचिरप्रसूताः सव-
त्साः॥ मनुः॥ अकामतस्तु राजन्यं विनिपात्य द्विजोत्तमः। वृष-
भैकसहस्रा गा दद्यात्सुशुद्ध्यर्थमात्मनः। त्र्यब्दं चरेद्वा नियतो ज-
टी ब्रह्महणो व्रतं। अकामत ईषद्वृत्तस्य विट्शूद्रवधे मनुः। वै-
श्येष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडशांश इति। द्वादशवार्षिका-
पेक्षयाष्टमांशः। सार्द्धवर्षः षोडशांशो नव मासाः। एतद्दिगवलं-
बनेन सार्द्धवर्षचतुष्टयमीषद्वृत्तस्य क्षत्रहनने कल्प्यं। वृत्तल-
क्षणं च स्मृत्यंतरे दर्शितं। गुरुपूज्या घृणा शौचं सत्यमिंद्रिय-
निग्रहः। प्रवर्त्तनं हितानां च तत्सर्वं व्रतमुच्यत इति। कामत-
स्तु जातिमात्रक्षत्रियादिवधे वृद्धहारीतोक्तं। ब्राह्मणः क्षत्रियं
हत्वा षड्वर्षाणि व्रतं चरेत्। वैश्यं हत्वा चरेदेवं व्रतं त्रैवार्षिकं द्वि-
जः। शूद्रं हत्वा चरेद्वर्षं वृषभैकादशाश्च गा इति। कामतः श्रो-
त्रियक्षत्रियादिवधे स एवातुरीयोनं क्षत्रियस्य वधे ब्रह्महणो व्र-
तं। सार्द्धं वैश्यवधे कुर्यात्तुरीयं वृषलस्य त्विति॥ यत्तु वशि-
ष्ठः॥ ब्राह्मणो राजन्यं हत्वा षड्वर्षाणि व्रतं चरेदिति तत्किं-

चितन्न्यूनगुणहनने। नव वार्षिकासमर्थस्य वा। एतच्च क्षत्रियादि-
हन्तुर्ब्राह्मणस्य। क्षत्रियादिहन्तॄणां क्षत्रियादिवधे गौतमोक्त-
दानतपसोः समुच्चयः। ब्राह्मणस्य राजन्यवधे षड्वार्षिकं प्रा-
कृतं ब्रह्मचर्यमृषभैकसहस्राश्च गा दद्यात्। वैश्यस्य वधे त्रैवार्षि-
कमृषभैकशताश्च गा दद्यात्। शूद्रवधे सांवत्सरिकमृषभैकाद-
शाश्च गा दद्यादिति। शूद्रस्य श्रोत्रियत्वं द्विजशुश्रूषा पंचमहाय-
ज्ञमंत्रपाठश्च। यामास्थत्वं पंचमहायज्ञादिकरणं। अत्रैव किं-
चिन्न्यूनगुणक्षत्रियवधे गुणाधिकयोर्वैश्यशूद्रयोश्च वधे शंखो-
क्तं। पूर्ववद्वृत्तमिति पूर्वं चतुर्षु वर्णेषु प्रमाप्य द्वादशषट्त्रीन्
संवत्सरं च व्रतान्यादिशेन्मेषामंते गोसहस्रं तदर्द्धं तस्यार्द्धम-
र्द्धं चिच्च दद्यात्सर्वेषामानुपूर्व्येणेति। मूर्द्धावसिक्तादिहनने
तु ब्राह्मणापेक्षया न्यूनं क्षत्रि[illegible]क्षयाधिकमित्येवं प्रकारेण
कल्पनीयं। मूर्द्धावसिक्तादिस्वरूपं च याज्ञवल्क्येन दर्शि-
तं। विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां विशः स्त्रियां। अंबष्ठः
शूद्रायां निषादो जातः पारशवोपि वा। वैश्याशूद्र्योस्तु राजन्या-
न्माहिष्योग्रौ सुतौ स्मृतौ। वैश्यात्तु करणः शूद्रायां विन्नास्वेष वि-
धिः स्मृतः। विन्नासु। विवाहितासु। अथ वधप्रायश्चित्तप्रसं-
गात्प्रतिलोमवधप्रायश्चित्तं तत्र कामतः सुतादिवधे प्रचेताः।
सर्वेषामेव कृष्णानां वधे प्रत्येकं चांद्रायणमिति। अत्र यद्यपि
प्रत्येकं चांद्रायणमिति सामान्येनाभिहितं। तथापि सूतापे-
क्षया वैदेहकादीनां न्यूनत्वात्पादोनादि चांद्रायणं कल्प्यं।

अत एव निबंधांतरेषु सूतवधे संपूर्णं चांद्रायणं वैदेहकस्यव-
धे पादोनं चांडालस्य वधे द्वं मागधस्य पादोनं क्षत्तरि पादद्वयं
आयोगवधेप्यर्द्धमित्युक्तं। अकामतो वधे अंगिरसोक्तं। सर्वा-
त्यजानां गमने भोजने संप्रमापणे। पराकेण विशुद्धिः स्यादि-
त्यांगिरसभाषितमिति। अत्रापि सूतादिषु पूर्ववदेव व्यवस्था।
आहृत्या सूतादिवधे ब्रह्मगर्भोक्तं। अंतरप्रभवानां तु सूता-
दीनां चतुर्द्धिपडिति। अत्र मासा इत्यनुवर्त्तते। आहृत्या सूत-
स्य वधे षण्मासाः। वैदेहकस्य वधे चत्वारः। चांडालस्य वधे
द्वौ मागधवधे चत्वारः क्षत्तरि मासद्वयं। आयोगवधेपि मासद्व-
यमेव। सूतादिस्वरूपमाह याज्ञवल्क्यः। ब्राह्मण्यां क्षत्रिया-
त्सूतो वैश्याद्वैदेहकस्तथा। शूद्राज्जातस्तु चंडालः सर्वधर्मब-
हिःकृतः। क्षत्रिया मागधं वैश्यात् शूद्रात् क्षत्तारमेव च। शूद्रा-
दायोगवं वैश्या जनयामास वै सुतं। माहिष्येण करण्यां तु
रथकारः प्रजायते। असत्संतस्तु विज्ञेयाः प्रतिलोमानुलोम-
जाः। निंदितार्थोपजीवने मनुयोगीश्वराद्युक्तोपपातकसामा-
न्यप्रायश्चित्तानि जातिशक्त्याद्यपेक्षया योज्यानि॥ तथा ना-
स्तिके च॥ नास्तिक्ये योजनाप्रकारः। अत्यंतानि निवेशेन बहु-
कालं नास्तिक्याभ्यासे शंखोक्तं। नास्तिको नास्तिकवृत्तिः कृ-
तघ्नः कूटव्यवहारी मिथ्याभिशंसी त्येते पंचसंवत्सरं ब्राह्मण-
गृहे भैक्षं चरेयुरिति। अस्मिन्नेव विषये हारीतोक्तमपि। तच्च
स्वस्वं तत्रैवावगंतव्या। अभ्यासेनुपपातकसामान्यप्रायश्चि-

त्तानि। सकृत्करणेनुवाशिष्ठं। नास्तिकः कृच्छ्रं द्वादशरात्रं च-
रित्वा विरमेन्नास्तिक्यात्। नास्तिकवृत्तिस्त्वतिकृच्छ्रमिति।
नास्तिकवृत्तिर्वेदनिंदनजीवी॥ अथ व्रतलोपे॥ अथ व्रत-
लोपो नाम अवकीर्णित्वं। अवकीर्णिस्वरूपं प्रायश्चित्तं चाह।
याज्ञवल्क्यः॥ अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितं।
गर्दभं पशुमालभ्य नैर्ऋतं स विशुध्यतीति। निर्ऋतिदेवताकं गा-
र्दभमालभ्य यागः कर्तव्य इत्यर्थः। पशुयागे यथा वपादिहोमः
क्रियते तद्वदत्रापि कर्तव्यं। अत्र विशेषमाह वशिष्ठः॥ ब्रह्म-
चारी चेत् स्त्रियमुपेयादरण्ये चतुष्पथे लौकिकाग्नौ रक्षोदैवतं
गर्दभं पशुमालभेत नैर्ऋतं वा चरुं निर्वपेत्तस्य जुहुयात्कामा-
हा कामकामाय स्वाहा निर्ऋत्यै स्वाहा रक्षोदेवताभ्यः स्वाहेति
पशोरभावे चरुः॥ मनुः॥ अवकीर्णी तु काणेन गर्दभेन चतु-
ष्पथे। पाकयज्ञविधानेन यजेत निर्ऋतिं निशि। हुत्वाग्नौ वि-
विवद्धोमानंततश्च समित्यृच। वातेंद्रगुरुवह्नीनां जुहुयात्स-
र्पिषाहुतीः। कामतोरेतसः सेकं व्रतस्थस्य द्विजन्मनः। अति-
क्रमं व्रतस्याहुर्धर्मज्ञा ब्रह्मवादिनः। पाकयज्ञविधानेन यजे-
त निर्ऋतिं निशि। हुत्वाग्नौ विविवद्धोमानंततश्च समित्यृच।
वातेंद्रगुरुवह्नीनां जुहुयात्सर्पिषाहुतीः। कामतोरेतसः सेकं
व्रतस्थस्य द्विजन्मनः। अतिक्रमं व्रतस्याहुर्धर्मज्ञा ब्रह्मवा-
दिनः। पाकयज्ञविधानेन परिसमूहनपर्युक्षणादीति कर्त-
व्यतया। प्रधानाहुतिभ्यः पूर्वं वातायस्वाहेत्याद्य आवह

येत्स्वाहेत्यंतं चतुर्भिर्मंत्रैराज्यहोमाः। प्रधानहोमांते संमासिंच-
त्वित्यृचा होमः इत्यपरार्के। स्मृतिमंजर्यां तु प्रधानहोमानंतरं
संमासिंचत्विति तानर्वाचीनां सर्पिषाहुतीर्जुहुयादिति।
अतश्च विकल्पः। रात्रिश्चामावास्यायाः कालः। तथा तैत्तिरीय-
के। यो ब्रह्मचार्यवकिरेदमावास्यायां रात्र्यामग्निं प्रणीयेत्यादि।
इदं चाशक्तस्य। शक्तस्य पुनः श्रोत्रियब्राह्मणभार्यायां श्रोत्रि-
यपत्न्यां वैश्यायां वावकीर्णित्वे गौतमोक्तः तपः समुच्चितो ग-
र्दभपशुश्चरुर्वा गर्दभेनावकीर्णी निर्ऋतिं चतुष्पथे यजेत त-
स्याजिनमूर्ध्ववालं परिधाय लोहितपात्रः सप्त गृहान् भैक्षं च-
रेत्कर्माचक्षाणः संवत्सरेण शुद्ध्येदिति। अत्र त्रिषवणस्नान-
मेककालभोजनं च मनूक्तं द्रष्टव्यं। गौतमोक्तेति कर्तव्यतानु-
ष्ठानं शंखलिखितौ॥ गुप्तायां वैश्यायामवकीर्णः संवत्सरं
त्रिषवणमनुतिष्ठेत्क्षत्रियायां द्वे वर्षे ब्राह्मण्यां त्रीणि वर्षाणि
इति। एतच्चागुणवत् श्रोत्रियपत्नीगमनविषयं। शूद्रायां तु षा-
ण्मासिकं कल्प्यं ईषद्व्यभिचारिणीविषयं गिरोक्तं। अवकीर्णि-
निमित्तं तु ब्रह्महत्याव्रतं चरेत्। चीरवासा तु षण्मासानिति।
चीरं वस्त्रखंडः। अत्यंतव्यभिचरितासु शंखलिखितोक्तं॥
वृषल्यामवकीर्णः सचैलस्नानमुदकुंभं दद्याद्ब्राह्मणाय वै-
श्यायां चतुर्थकालाहारो ब्राह्मणान् भोजयेद्यवसभारं च गो-
भ्यो दद्यात्क्षत्रियायां त्रिरात्रमुपोषितो घृतपात्रं दद्याद्ब्राह्म-
ण्यां षड्रात्रमुपोषितो गां दद्यादिति गव्यवकीर्णः प्राजापत्यं चरे-

त्खंडायामवकीर्णः पलालभारं सीसमाषकं च दद्यादिति।
एतच्च प्रायश्चित्तं द्विजातिमात्रविषयं॥ यदाह शांडिल्यः
अवकीर्णी द्विजो राजा वैश्यश्चापि खरेण तु। इष्ट्वा भैक्षाशिनो
नित्यं शुद्ध्यंत्यब्दात्समाहिता इति। यः स्त्रीसंभोगमंतरेण काम-
तो रेतो विसृजति दिवास्वापे वा प्रायश्चित्ताद्यंगभूतब्रह्मचर्य-
वानकीर्णिलस्य गार्दभपश्वालंभस्तुर्वा॥ यदाह वसिष्ठः
एतदेव रेतसः। प्रयत्नोत्सर्गे दिवास्वप्ने च व्रतारंभे चैवमिति।
एतदेव यागमात्रमेव। रात्रिस्वप्ने स्खलने तु मनुः। स्वप्ने सि-
क्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः। स्नात्वार्कमर्चयित्वा त्रिः
पुनर्मामित्यृचं जपेत्। वानप्रस्थादिषु विशेषमाह शांडि-
ल्यः॥ वानप्रस्थो यतिश्चैव खंडने सति कामतः। पराकत्रयसं-
युक्तमवकीर्णिव्रतं चरेदिति। खंडने ब्रह्मचर्यखंडने। अ-
वकीर्णिप्रसंगादन्यदपि किंचिदुच्यते॥ संवर्त्तः॥ संन्यस्य
दुर्मतिः कश्चित्प्रत्यापत्तिं व्रजेद्यदि। स कुर्यात्कृच्छ्रमश्रांतः ष-
ण्मासान्प्रत्यनंतरमिति। प्रत्यापत्तिर्गार्हस्थ्यपरिग्रहः॥
पराशरः॥ यः प्रत्यवसितो विप्रः प्रव्रज्यातो विनिर्गतः। अना-
शननिवृत्तश्च गार्हस्थ्यं चेच्चिकीर्षति। स चरेत्त्रीणि कृच्छ्रा-
णि त्रीणि चांद्रायणानि चेति। षण्मासिकाशक्तौ चांद्रायणा-
नि। तदशक्तौ कृच्छ्राणि। यस्तु मरणसंन्यासी परमहंसा-
ख्यः। तथा च प्रजापतिः। तत्र परमहंसो नाम नदीपुलिने
श्मशानदेशे तृणहरितशाद्वलेषु शयानः समकुसुमश्री-

रकौपीनकषायवानस्तु प्राणान्परित्यजति स परमहंसो नामेति।
अस्य मरणांतिकत्वमनस्य यमोक्तं। जलाग्न्युद्बंधनभ्रष्टाः प्रव्र-
ज्यानाशकच्युताः। विषप्रपतनप्रायशस्त्रघातहताश्च ये।
नवैते प्रत्यवसिताः सर्वलोकबहिष्कृताः। चांद्रायणेन शुद्ध्यंति
तप्तकृच्छ्रद्वयेन चेति। शक्त्यपेक्षया चांद्रायणं तप्तकृच्छ्रद्वयं
वा। शस्त्रपातेति। यः शास्त्रेणात्मानं व्यापादयति स चेन्मृत-
स्तदा तत्पुत्रादिभिः यदि जीवति तदा स्वेनैव कर्त्तव्यमित्यर्थः
एतच्च तन्मज्जात्युचितप्रायश्चित्तेन समुधीयते जातिशक्त्याद्य-
पेक्षया एवं शास्त्राविहितमार्गेणात्मत्यागो द्रष्टव्यं। अत्राशौ-
वशिष्ठोक्तं द्वादशरात्रं आत्महननाध्यवसाये त्रिरात्रं। जीवन्ना-
त्मत्यागी कृच्छ्रं द्वादशरात्रं चरेत् त्रिरात्रं वोपवसेदिति॥ आ-
पस्तंबः॥ चितिभ्रष्टा तु या नारी मोहाद्विचलिता ततः। प्राजा-
पत्येन शुद्ध्येत्तु तस्माद्धि पापकर्मणः। भर्त्रनुगमने चितिभ्रष्टे-
त्यर्थः। प्रासंगिकं परिसमाप्य ब्रह्मचारिविषये किंचिदुच्यते।
गुरुतरकार्यव्यग्रतया भैक्ष्याग्निकार्ययोः प्रत्येकं सप्तरात्रमक-
रणे याज्ञवल्क्योक्तं। भैक्ष्याग्निकार्ये त्यक्त्वा तु सप्तरात्रमना-
तुरः। कामावकीर्ण इत्याभ्यां जुहुयादाहुतिद्वयं। उपस्थानं
ततः कुर्यात्संमासिंचत्वनेन च। कामावकीर्णोऽस्म्यवकीर्णो-
ऽस्मि कामकामाय स्वाहा कामावपन्नोऽस्म्यवपन्नोऽस्मि काम-
कामाय स्वाहेति होमद्रव्यमाज्यं। संमासिंचतु मरुतः स-
मिंद्रः सं बृहस्पतिः। संमायमग्निः सिंचतु यशसा ब्रह्मवर्चसे-

नेत्युपस्थानमंत्रः। यदा तु कार्यवैयग्र्याभावेऽपि भिक्षाचरणमग्निकार्यं वा त्यजति तदा मनूक्तं। अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत्। यदीत्येककालमेकाहो वा त्यजति तदा हारीतोक्तं ब्रह्मचारी संध्यामनुपास्योपस्थितः सावित्र्या सहस्रेणादित्यमुपतिष्ठेत। उपक्रम्याग्निकार्यमात पत्या हुत्वातीतं संपाद्योपस्थितं कुर्यादहन्यतीते पुनर्मनो व्रातयती स्यामिति। उपस्थितः सावित्र्या सहस्रेणादित्यमुपतिष्ठेत। उपक्रम्याग्निकार्यमानयस्याहुत्वातीतं संपाद्योपस्थितं कुर्यादहन्यतीते पुनर्मनो व्रातयती स्यामिति। उपस्थितः स्थितः अथवा कृतसूर्योपस्थानः। अग्ने व्रतंपते व्रतं चरिष्यामीति व्रातयती अतीतमग्निकार्यादिकमुपस्थितं कमग्रा ह्यथवा सूर्योपस्थानं। अहन्यतीते एकदिनात्यये। पुनर्मतः पुनरायुर्म आगादित्यादिमंत्रः दिनद्वयादिपरित्यागे त्वेतदेव द्विगुणं त्रिगुणं च सप्तरात्रपर्यंतं कल्प्यं। सप्तरात्रानंतरमवकीर्णिव्रतान्येव जातिशक्त्याद्यपेक्षया कल्प्यानि। तानि गुरुलघूनि च पूर्वं दर्शितानि यज्ञोपवीतादिनाशेऽपि हारीतः। मनोव्रतपती निःश्वमेखला दंडाजिनयज्ञोपवीतानामपातनाशेषु च तत्सम्भाज्याहुतीर्हुत्वा पुनर्यथार्थं प्रतीपाद सकृत् भैक्ष्यभोजनेभ्यादिते मि निर्मुक्ते वांते दिवास्वप्ने स्कंदनेन ग्रस्ती दर्शने नग्नस्त्रापे श्मशानमाक्रम्य हयां दीश्चारुह्य पूज्यातिक्रमे चैतानि एव जुहुयाद्ध्य समिंधनेस्यावरमही सपादीनां वधे यद्देवादेव हेडनमिति कू-

ष्मांडीभिराज्यं जुहुयान्मतिवासोगवादीनां प्रतिग्रहे सावि-
त्र्यष्टसहस्रं जपेदिति। मनोव्रतपतीभिरिति मनोज्योतिरि-
त्यादिमनोलिंगाभिस्त्वमग्ने व्रतपाअसीत्यादिव्रतलिंगा-
भिः यथार्षिसमंत्रिकं। अभ्युदितेभिनिर्मुक्तो सुप्ते यस्मिन्न-
स्तमेति सुप्ते यस्मिन्नुदेतिच। अंशुमानभिनिर्मुक्ताभ्युदितौ
तौ यथाक्रममित्यमरः। अग्न्यसमिंधने एककालाग्न्यसमिं-
धने याज्ञवल्क्यः। यन्मेद्यरेत इत्याभ्यां स्कन्नरेतोभिमं-
त्रयेत्। स्तनांतरं भ्रुवोर्मध्यं तेनानामिकयास्पृशेत्। यन्मे-
द्यरेतः पृथिवीपुनर्मामैत्विंद्रियम्मिति द्वौ मंत्रौ तेन रेतसा-
नामिकयारेतः स्पृष्ट्वा स्तनांतरादिकं स्पृशेदित्यर्थः। केचन
तेनेत्यंगुष्ठेनेति कथयंति। अंगुष्ठानामिकाभ्यां स्तनांतरं स्पृ-
शेदिति॥ मरीचिः॥ ब्रह्मसूत्रं विनाभुंक्ते विण्मूत्रं कुरुतेथ-
वा। गायत्र्यष्टसहस्रेण प्राणायामेन शुद्ध्यति। अत्र यज्ञोपवी-
तादिनाशे यानि प्रायश्चित्तानि तान्यपिनिषिद्धानिग्रहस्था-
दीनामपि भवंति। शशादिमांसभक्षणे वशिष्ठः॥ ब्रह्म-
चारी चेन्मांसमश्नीयाच्छिष्टभोजनीयं कृच्छ्रं द्वादशरात्रं
चरित्वा व्रतशेषं समापयेत्। सचेद्व्याधीयीत कामं गुरोरु-
च्छिष्टं भेषजार्थं सर्वं प्राश्नीयादिति। मांसग्रहणं मधुनोप्यु-
पलक्षणार्थं। तथाच याज्ञवल्क्यः॥ मधुमांसाशने का-
र्यः कृच्छ्रः शेषव्रतानि च। प्रतिकूलं गुरोः कृत्वा प्रसाद्यैव
विशुद्ध्यति। कृच्छ्रत्रयं गुरुःकुर्यान्म्रियते प्रहितेयदीति। प्राय-

श्चित्तानंतरं ब्रह्मचर्यव्रतान्यवशिष्टानि समापयेदित्यर्थः । चौरादिकृतदेशोपद्रहितः यस्त्वरूपनोभक्ष्यमत्ति देवगुरोरुच्छिष्टं कृत्वा औषधार्थं भक्षयेदित्यर्थः । सर्वं प्राश्नीयादिति सर्वग्रहणमभक्ष्यलशुनाद्युपसंग्रहार्थं । एवंविधस्य लेलशुनादिभक्षणानंतरं बौधायनः ॥ येनेक्षुरुच्चिकित्सितुं स यदा गदी भवति गदोच्छायादित्यमुपतिष्ठेत हंसः शुचिषदिति वशिष्ठः ॥ अकामोपनतं मधु वाजसनेयके न दुष्यतीति ॥

अथ सुतविक्रये ॥ य एकपुत्रस्तं पुत्रमनापदि कामतो विक्रीणीते तदा पैठीनस्युक्तं । आरामतडागोदपानपुष्करिणीसुकृतसुतविक्रये त्रिषवणस्नातायी अधःशायी चतुर्थकालाहारः संवत्सरेण पूतो भवतीति । अकामतस्त्वर्द्धं कल्प्यं । अनापद्येनेकपुत्रस्य चतुर्विंशतिमतोक्तं । नारीणां विक्रयं कृत्वा चरेच्चांद्रायणव्रतं हि परायं पुरुषस्यैवं व्रतमाहुर्मनीषिणः ॥ एतत् कामकारे । अकामकारे तु पराशरोक्तं । विक्रीय कन्यकां गांच कृच्छ्रं सांतपनं चरेदिति । अस्मिन्नेव विषये ॥ शंखः ॥ देवगृहप्रतिअयोद्यानारामसभाप्रपातडागपुण्यसेतुविक्रयं कृत्वा तप्तकृच्छ्रं चरेदिति । मनुयोगीश्वराद्युक्तान्युपपातकसामान्यप्रायश्चित्तानि च जातिशक्त्याद्यपेक्षया योज्यानि । धान्यकुप्यवस्तुस्तेयस्य स्तेयप्रकरणेभिहितं ॥ अथायाज्ययाजने मनुः ॥ व्रात्यानां याजनं कृत्वा परेषामंत्यकर्म च । अभि-

चारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहति। अंत्यकर्म्म श्मशानिकं।
पराऽसपिंडः शूद्रो वाऽसपिंडेऽत्यंताभ्यासे शूद्रे सकृत्करणेऽपि।
अनभिचरणीयस्याभिचारः। अहीनो यागविशेषस्तस्य य-
जने। यत्तु पतितसावित्रीकान्नोपनयेन्नाध्यापयेद्यस्तानुपनये-
दध्यापयेद्याजयेद्वा उद्दालकव्रतं चरेदिति। आपस्तंबोक्तं तत्का-
मकारविषयं। शूद्रायाज्ययाजने तु कामतो मनूक्तं त्रैमासिकमका-
मतो योगीश्वरोक्तं मासव्रतादि शक्त्याद्यपेक्षया योज्यं। कामतः शू-
द्रयाजनाभ्यासे प्राचेतसं। एते पंच। तपोऽभ्रावकाशजलशयना-
न्यनुतिष्ठेयुः क्रमेण ग्रीष्मवर्षाहेमंतेषु मासं गोमूत्रयावकमश्नी-
युरिति। एते शूद्रयाजकाः। कामतोऽनभ्यासे गौतमोक्तं। प्रतिषिद्ध-
मंत्रप्रयोगे सहस्रवाकभ्यस्येदिति। अत्र संवत्सरं प्राकृतब्रह्मचर्यमुक-
तं। प्रतिषिद्धः शूद्रः। अहन्ता प्रशस्तद्विजातिर्वा तस्य मंत्रप्रयोगो-
ऽध्यापनं याजनं वा सर्वेऽमंत्रप्रयोगाः सहस्रवाकः अत्यंतमधिको ब-
हुर्भवतीत्यर्थः। सहस्रशब्दो बह्वर्थः। यानि लघूनि प्रायश्चित्ता-
नि कृत्स्नद्रव्यपरित्यागपूर्वकप्राणायामसहस्रं चेत्यादीनि ता-
न्यशक्तविषये योज्यानि॥ मनुः॥ शरणागतं परित्यज्य वेदं
विप्लाव्य च द्विजः। संवत्सरं यवाहारस्तत्पापमपसेधति। भयत्रा-
णार्थं प्रायश्चित्तार्थं वा समागतः शरणागतस्तं शक्तश्चेत्परित्य-
जति वेदविप्लवनं चंडालादिषु निषिद्धेऽनध्यायेषु च पाठः। न-
दपि गौतमीयेन समानविषयं। कामतः सकृत्यभितादिश्रावणे
वशिष्ठोक्तं। पतितचंडालशावश्रवणे त्रिरात्रं वाग्यता अनश्नंत आ-

सीरतसहस्रपरमं चातरभ्यस्यंतः। पूता भवंतीति। शवस्रावणांत-
त्संनिधि पाठः। अकामतः षड्विंशान्मतोक्तं। चंडालघोतावकाशेस्मृ-
तिस्मृति पाठे एकरात्रमभोजनमिति। तथा। सर्पस्य नकुलस्यापिच्छ-
जमार्जारयोस्तथा। मूषकस्य तथो वृस्य मंडूकस्य च योषितः। पु-
रुषस्यैडकस्यापि शुनोश्वस्य खरस्य च। अंतरागमने सद्यः प्रायश्चि-
त्तमिदं शृणु। त्रिरात्रमुपवासश्च त्रिरात्रश्चाभिषेचनं। ग्रामांतरं वागं-
तव्यं आनुभ्यां नात्र संशय इति। पितृमातृसुतत्यागतडागारामविक्रये
षूपपातकसाधारणप्रायश्चित्तानि जातिशक्त्याद्यपेक्षया योज्यानि।
अथ कन्यादूषणे॥ तत्र सवर्णाविषये त्रैमासिकद्वैमासिकचांद्रा-
यणानि जात्याद्यपेक्षया योज्यानि। आनुलोम्येन मासिकपयोव्र-
तं प्राजापत्यं वा पूर्ववद्योज्यं। क्षत्रियवैश्ययोः प्रातिलोम्येन कन्या-
दूषणे हारीतोक्तं। कन्यादूषी सोमविक्रयी वृषलीपतिः कौमारदा-
रत्यागी असुरामद्यपः शूद्रयाजको गुरोः प्रतिहंता नास्तिकवृत्तिः। कृ-
कृतघ्नः कूटव्यवहारी ब्राह्मणवृत्तिघ्नो मिथ्याभिशंसी पतितसंव्य-
वहारी मित्रध्रुक् शरणागतघातीं प्रतिरूपकवृत्तिरित्येते पंचतपो-
ध्यावकाशजलशयनान्यनुतिष्ठेयुर्ग्रीष्मवर्षाहेमंतेषु मासं गोमूत्र-
यावकमश्नीयुरिति। शंखोक्ताब्दकृच्छ्रमथास्मिन्नेव विषये प्रा-
तिलोम्येन दूषणे शूद्रस्य वध एव। परिविंदकयाजनं। कन्याप्र-
दानं तस्यैव कौटिल्यं व्रतलोपनं। आत्मनोर्थे क्रियारंभो मद्य-
पस्त्रीनिषेवणं। स्वाध्यायाग्निसुतत्यागो बांधवत्याग एव च इत्या-
दिषु मनुयाज्ञवल्क्याद्युक्तोपपातकसाधारणप्रायश्चित्तानि पू-

वैवयोज्यानि। अत्र स्वाध्यायत्यागः सच्छास्त्रश्रवणकुटुंबपोषणव्यग्रतया अकारांतरेण त्यागो ब्रह्मत्यागसमत्वं अग्नित्यागेऽनाहिताग्निता अभक्षकरणोभिहितं अयद्रुमच्छेदे॥ मनुः॥ फलदानां तु वृक्षाणां छेदने जप्यमृक्शतं। गुल्मवल्लीलतानां च पुष्पितानां च वीरुधां। आहवनीयपंचमहायज्ञाद्यदृष्टार्थे त्वेतु न दोषो दृष्टार्थे स्वापि कचिदस्यनुज्ञां दर्शयति वसिष्ठः। फलपुष्पोपगान् पादपान्न हिंस्यात्कर्षणकरणार्थे चोपहन्यादिति। शूद्रादीनां तु जपानधिकोराद्विराणादिकं कल्पनीयं अभ्यासापेक्षयोपपातकसाधारणप्रायश्चित्तान्यपि योज्यानि। स्त्रीहिंसौषधिजीवनं। हिंस्रयंत्रविधानं च व्यसनानोभ्येतेषु पूर्ववदुपपातकसाधारणप्रायश्चित्तानि योज्यानि। व्यसनाभ्यासे बौधायनोक्तं। अथाशुचिकराणि द्यूतमभिचारो अनाहिताग्नेरुंछवृत्तिः समावृत्तस्य भैक्षचर्या तस्य गुरुकुले वास ऊर्द्धं चतुर्भ्यो मासेभ्यो यश्चतमध्यापयति नक्षत्रनिर्देशनं चेति द्वादशमासान् द्वादशार्धमासान् द्वादश द्वादशाहान् द्वादशषडहान् द्वादशत्र्यहान् अहमेकाहमिति। अशुचिकरनिर्देश इति। आत्मविक्रयश्शूद्रसेवयोः साधारणप्रायश्चित्तानि पूर्ववद्योज्यानि। बहुकालशूद्रसेवायां तु बौधायनोक्तं। समुद्रयानं ब्राह्मणस्य न्यासापहरणं सर्वापण्यैर्व्यवहरणं भूम्यनृतं। शूद्रसेवा यच्च शूद्रायामभिजायते तदपत्यं च भवति तेषां तु निर्देशः चतुर्थकालमितभोजिनः स्युरपोभ्युपेयुः सवनानुकल्पं स्थानासनाभ्यां विहरंत एते त्रिभिर्वर्षैस्तदपघ्नंति पापमिति। हीन-

सख्येपि सामान्यप्रायश्चित्तानि योज्यानि। हीनयोनिनिषेवणं द्विविधं। अनूढसवर्णदारस्य केवलहीनवर्णोपयमः साधारणस्त्रीगमनं च। तत्र प्रथमे ऽज्ञानकृते शातातपोक्तं। ब्राह्मणो राजन्यापूर्वी कृच्छ्रं द्वादशरात्रं चरित्वा निविशेत्तां चोपयच्छेद्वैश्यापूर्वी तप्तकृच्छ्रं शूद्रापूर्वी त्वतिकृच्छ्रं द्वादशरात्रं चरित्वोपयच्छेदिति। राजन्यापूर्वी स्ववर्णस्त्रीपरिणयनमंतरेण क्षत्रियजातीयकन्यकापरिणायनवानित्यर्थः। प्रायश्चित्तानंतरं स्ववर्णां व्यूढा पश्चादनुलोमेन विवाहः कर्त्तव्य इत्यर्थः। कामतस्तूपपातकसामान्यप्रायश्चित्तानि पूर्ववद्योज्यानि। वेश्यागमने च कामतो यमोक्तं द्रष्टव्यं। वेश्यागमनजं पापं व्यपोहंति द्विजातयः पीत्वा सकृत्सकृत्तप्तं सप्तरात्रं कुशोदकमिति। अकामतः संवर्त्तोक्तं। पशुवेश्याभिगमने प्राजापत्यं विधीयत इति। साधारणप्रायश्चित्तान्यपि ज्ञानाभ्यासापेक्षया योज्यानि॥ अत्र विशेषमाह लौगाक्षिः॥ अभ्यासेहर्गुणा वृद्धिर्मासादर्वाग्विधीयते। ततो मासगुणा वृद्धिर्यावत्संवत्सरं भवेत्। ततः संवत्सरगुणा यावत्पापं समाचरेदिति। एतद्बुद्धिपूर्वाभ्यासविषयं। चतुर्विंशतिमते। सकृत्कृते तु यत्प्रोक्तं त्रिगुणं भवेत्त्रिभिर्दिनैः। मासात्पंचगुणं प्रोक्तं षण्मासाद्दशधा भवेत्। संवत्सरात्पंचदशाब्दाद्विंशगुणं भवेत्। ततोप्येवं विकल्प्यं स्याच्छातातपवचो यथेति। एतदमतिपूर्वाभ्यासे एव यत्रयत्रोपपातकादिष्वनुक्तप्रायश्चित्तेषु अभ्यासस्थले योज्यानि। जन्मप्रभृति साधारण-

स्त्रीषु दुष्टासु अनवच्छिन्नाभ्यासे यमोक्तं गुरुतल्पव्रतं कुर्यात्। आश्रम-
स्वीकारसंभवे सत्यनाश्रमवासे तूपपातकसाधारणप्रायश्चित्ता-
नि पूर्ववद्योज्यानि। असंभवे तु हारीतोक्तं। अनाश्रमी संवत्सरे प्रा-
जापत्यं कृच्छ्रं चरित्वा आश्रममुपेयात् द्वितीयेऽतिकृच्छ्रं तृतीये कृ-
च्छ्रातिकृच्छ्रमत ऊर्द्ध्वं चांद्रायणमिति। परान्नपरिपुष्टता। अस-
च्छास्त्राधिगमनमाकरेष्वधिकारिता। भार्याया विक्रयश्चैषामित्ये-
तेषु साधारणप्रायश्चित्तानि पूर्ववद्योज्यानि॥ इत्युपपातकप्राय-
श्चित्तानि॥ अथ भार्याया विक्रयश्चैषामित्यत्र चशब्दोपात्तानाम-
सत्प्रतिग्रहादीनां जातिभ्रंशकरादीनां च प्रायश्चित्तानि। जाति-
भ्रंशकरादिस्वरूपाणि च मनूक्तानि। ब्राह्मणस्य रुजः कृत्या
घ्रातिरघ्रेयमद्ययोः। जैह्वं पुंसि मैथुन्यं जातिभ्रंशकरं स्मृतं।
खराश्वोष्ट्रमृगेभानामाजाविकवधस्तथा। संकरीकरणं ज्ञेयं
मीनाहिमहिषस्य च। निंदितेभ्यो धनादानं वाणिज्यं शूद्रसेव-
नं। अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणं। कृमिकीटवयोह-
त्या मद्यानुगमभोजनं। फलैधःकुसुमस्तेयमधैर्यं च मलावह-
मिति॥ वृहद्विष्णुः॥ अतोऽन्यत्प्रकीर्णकमिति। अतोऽन्यन्म-
हापातकादिमलावहान्तादन्यत्। तत्रासत्प्रतिग्रहे प्रायश्चित्त-
मभिधीयते। प्रतिग्रहस्यासत्त्वं त्रेधा दातृवशाद्देशकालवशा-
त् द्रव्यवशाच्च। तत्र यथा। म्लेच्छचांडालपतितादेः प्रतिग्रहे। कुरु-
क्षेत्रादिदेशे। उपरागादिकाले। द्रव्यस्य सुराजामेषमृतश-
य्योभयमुख्यादेः। संख्याभेदाद्द्रव्यभेदादपि वैविध्यं॥ तथा

चदेवलः ॥ नवोत्तमानि चत्वारि मध्यमानि विधानतः। अधमा-
नीति शेषाणि त्रिविधत्वमिदं विदुः। अन्नं दधि मधु त्राणं गो-
भूरुक्माश्वहस्तिनः। दानान्युत्तमदानानि उत्तमद्रव्यदानतः।
विद्याच्छादनावासपरिभोगोपधानानि च। दानानि मध्यमानी-
ति मध्यमद्रव्यदानतः। उपानत्प्रेंखयानानि छत्रपात्रासनानि च।
दीपकाष्ठफलादीनि चमरं बहुवार्षिकं। बहुत्वादर्थजातानां सं-
ख्या देशोनुनेष्यते। अधमान्यवशिष्टानि सर्वदानान्यतो विदुः।
अति दानं क्कां दो ग्येभिहितं। त्रीण्याहुरतिदानानि गावः पृथ्वी
सरस्वतीति॥ मनुः॥ तस्योत्सर्गेणाशुद्ध्यंति जप्योनतपसैव च।
जपित्वा त्रीणि सावित्र्याः सहस्राणीति॥ याज्ञवल्क्यः॥ गो-
ष्ठे वसन्ब्रह्मचारी मासमेकं पयोव्रतः। गायत्रीजप्यनिरतः शुद्ध्य-
तेऽसत्प्रतिग्रहात्। प्रतिदिनं सहस्रतु जपं गायत्र्याः कर्त्तव्यमित्य-
र्थः। एतच्च निंदितदातुर्निंदितद्रव्यस्य प्रतिग्रहे। प्रायश्चित्त-
स्य गुरुत्वात्। चतुर्विंशतिमते। भिक्षामात्रे गृहीते तु पुण्यं मं-
त्रमुदीरयेत्। प्रतिग्रहेषु सर्वेषु षष्ठांशं परिकल्पयेत्। जपहो-
मादिकं कुर्याज्ज्ञात्वा यज्ञप्रतिग्रहे। परिकल्पयेद्द्विजेभ्यो दद्या-
त्। यदा त्वनिंदितेभ्यो निंदितं द्रव्यं गृह्णाति निंदितेभ्यो वानिं-
दितं भूम्यादिकं तत्र चतुर्विंशतिमतोक्तं। पवित्रेष्ट्या विशुद्ध्यं-
ति सर्वे घोराः प्रतिग्रहाः। ऐंद्रवेन मृगारेष्ट्या कदाचिन्मित्रविंद-
या। देव्या लक्षजपेनैव शुद्ध्यंते दुःप्रतिग्रहाः इति देवी गायत्री
अवेदाभ्यासे चंडालादेः कुरुक्षेत्रे उपरागादौ कृष्णाजिनादि

प्रतिग्रहे च वृद्धहारीतोक्तं। राज्ञः प्रतिग्रहं कृत्वा मासमप्सु सदी व-
सेत्। षष्ठे काले पयोभक्षः पूर्णे मासे प्रमुच्यते। तर्पयित्वा द्विजा-
न् कामैः सततं नियतव्रत इति॥ हारीतः॥ मणिवासोगवादी-
नि प्रतिग्रहे सावित्र्याः सहस्रं जपेत् पंच मध्यमे दशोत्तमे द्वादश-
रात्रं पयोव्रतं शतसहस्रमतिप्रतिग्रहेष्विति। प्रतिग्राह्यद्रव्यम-
ध्यमत्वेन प्रतिग्रहस्य मध्यमत्वं। एवमुत्तमत्वं च। मध्यमे प्रतिग्र-
हे पंचसहस्राणि उत्तमे दश। एवमन्यान्यपि जातिशक्तिदेश-
कालद्रव्याद्यपेक्षया योज्यानि। अथ जातिदुष्टछत्राकादिभक्ष-
णे॥ तत्र मनुः॥ छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटं पलांडुं
गृंजनं चैव मत्या जग्ध्वा पतेद्द्विज इति। अमत्यैतानि षट् जग्ध्वा
कृच्छ्रं सांतपनं चरेत्। यतिचांद्रायणं वापि शेषेषूपवसेदहः
कामतोभ्यासे पातित्यं सुरापानसमत्वं। अनभ्यासे चांद्रायण-
मत एव चांद्रायणानुवृत्तौ विष्णुः। लशुनपलांडुगृंजनवि-
ड्वराहग्रामकुक्कुटवानरगोमांसभक्षणे च सर्वेष्वेतेषु द्विजाती-
नां प्रायश्चित्तांते पुनः संस्कारं कुर्यादिति। अत्रापि ब्राह्मणापे-
क्षया क्षत्रियादिषु पादोनं कल्प्यं शेषेषु छत्राकादिषड्व्यति-
रिक्तेषु वार्त्ताकादिषु एतच्चाकामतः सकृद्भक्षणे अभ्यासे तु
द्विरात्रादि कल्प्यं कामतः सकृद्भक्षणे। मत्स्यांश्च कामतो ज-
ग्ध्वा सोपवासस्त्र्यहं वसेदिति योगीश्वरोक्तं त्रिरात्रं। अत्रैवाभ्या-
से कृच्छ्रमोक्तं। खड्गी वार्त्ताकं कुंभीकं अश्मन्तप्रभवांस्तथा। भूस्तृ-
णं शिग्रुकं चैव कुरंडं कवकानि च। एतेषां भक्षणं कृत्वा प्राजाप-

त्यं चरेद्द्विज इति। खंड्डी पक्षिविशेषः। शाकविशेषो वा। वार्त्ताकं
श्वेतकंडूरं श्वेतवृंताकमिति देवलेन विशेषस्मरणात्। अश्वन-
प्रभवा लोहिताः। लोहितान् वृक्षनिर्यासानिति स्मरणात्।
तथा शिग्रिति केचन। कवकं कृष्णसर्षपशाकं। तद्विशेषः क्रु-
खंडं यमः। तंदुलीयं तु कुंभीकं अश्वनप्रभवांस्तथा। नालिकां ना-
लिकेरीं च श्लेष्मांतकफलानि च। एतेषां भक्षणं कृत्वा प्राजाप-
त्यं चरेद्द्विज इति। एतदपि पूर्वोक्तविषये। नालिका नालिकेरी
च शाके नीली भक्षणे त्वापस्तंबः। भक्षयेद्यदि नीलीं तु प्रमादा-
द्ब्राह्मणः क्वचित्। चांद्रायणेन शुद्धिः स्यादापस्तंबोऽब्रवीन्मुनि-
रिति। कामतः अभ्यासे च द्विगुणादिकं कल्प्यं। बलात्कारेण।
भक्षणे सुमंतूक्तं लशुनपलांडुगृंजनकभक्षणे सावित्र्यष्टस-
हस्रेण मूर्ध्नि संपातान्नयेदुपवासश्चेति। संपात उदबिंदुः कुशैः
संमार्जनं कुर्यादित्यर्थः। एवमन्येष्वथ भक्ष्येषु एकाहद्विरात्रा-
दीनि यथायोग्यं योज्यानि। अथ संधिन्यादिक्षीरपाने। अका-
मतः सकृत्पाने सुमंतूक्त एकाहोपवासः। अनिर्दशाहा गोः क्षीर
मौष्ट्रमेकशफं तथा। आविकं संधिनीक्षीरं विवत्सायाश्च गोः पयः
आरण्यानां च सर्वेषां मृगाणां महिषीं विना। स्त्रीक्षीरं चैव वर्ज्या-
नि सर्वशुक्तानि चैव हि। दधिभक्ष्यं च शुक्तेषु सर्वं च दधिसंभव।
मित्यादि पठित्वा शेषेषूपवसेदहः इत्युक्तत्वात्। कामतस्त्रिरा-
त्रं याज्ञवल्क्येनोक्तं। कामतोऽभ्यासे पैठीनस्युक्तं षड्रात्रं शंखो-
क्तं सप्तरात्रं वा शक्त्यपेक्षया कामतोऽत्यंताभ्यासे शंखोक्तमेव-

पक्षव्रतं। यानि च क्षत्रियस्य त्वंत्यस्यो वैश्यः शूद्रोथवा पुनः
यः पिबेत् कपिलाक्षीरं न ततोन्यो स्त्यधमाधमः इत्यादीनि
तत्राप्येकाहादीनि यथायोग्यं योज्यानि। शूद्रस्य तु कपि-
लादुग्धपानं महापातकमध्ये परिगणितमिति तत्प्रायश्चि-
त्तानि शक्त्याद्यपेक्षया योज्यानि॥ अथ मांसभक्षणे त-
त्र मांसं द्विविधमभक्ष्यं॥ स्वभावदुष्टमसंस्कारदुष्टं च।
तत्र स्वभावदुष्टं विट्सूकरादेः विट्सूकरादीनां स्वभावदुष्ट-
त्वमपि वचननियमेनैव गम्यते। असंस्कारदुष्टमनुपाकृ-
तछागादेः। अभक्ष्याणि द्विजातीनामित्युपक्रम्य अनुपा-
कृतमांसानि देवान्नानीति मनुनानुपाकृतछागादिमांस-
स्याभक्ष्यत्वमुक्तं। एवंविधस्याकामतः सकृद्भक्षणे शेषे-
मुपवसेदिति मनूक्तं। कामतस्तु सोपवासस्त्र्यहं वसेदिति।
योगीश्वरोक्तमनैवाभ्यासेपि। जग्ध्वा मांसभक्ष्यं न तु सप्तरात्रं
यवान् पिबेदिति तेनैवोक्तं द्रष्टव्यं। तद्वद्यमः॥ वराहैकश-
फानां च काककुक्कुटयोस्तथा। क्रव्यादानां च सर्वेषामभक्ष्या
य च कीर्त्तिताः। मांसमूत्रपुरीषाणि प्राश्य गोमांसमेव च।
श्वगोमायुकपीनां च तप्तकृच्छ्रं विधीयते। उपोष्य वा द्वादशा-
हं कूष्मांडैर्जुहुयाद्घृतमिति। कामतस्तप्तकृच्छ्रः। अभ्यासे कू-
ष्मांडसहितः पराकः। कूष्मांडमंत्राः कूष्मांडा इत्यभिधीयं-
ते। अथवा अकामतस्तप्तकृच्छ्रः कामतः कूष्मांडसहितः
पराकः। यत्तु प्रागातातपेन गोमांसभक्षणे चांद्रायणमित्य-

क्तं तच्छुक्रविषयं। एवमुच्चावचानि विषयविशेषे योज्यानि।
कामतोऽभ्यासेऽङ्गिरसोक्तं। नरकाकखराश्वानां जग्ध्वा मांसं
गजस्य च। एषां मूत्रपुरीषाणि द्विजश्चान्द्रायणं चरेदिति। मूत्र-
पुरीषग्रहणं वसासृग्मज्जामध्वपलक्षणं। मूत्रपुरीषे गोमूत्रपु-
रीषव्यतिरिक्ते कामतोऽत्यंताभ्यासे शंखोक्तं। भुक्त्वा चोभयतोदं-
तांस्तथा चैकशफानि च। उष्ट्रं गव्यं तथा भुक्त्वा षण्मासान्व्रत-
माचरेदिति उष्ट्रं गव्यं च मांसं। कामतोऽत्यंतानवच्छिन्नाभ्यासे-
ऽत्यंतरोक्तं। जग्ध्वा मांसं नराणां च विड्वराहं खरं तथा। गवाश्व-
कुंजरोष्ट्राणां सर्वेषां च नखं तथा। क्रव्यादः कुक्कुटं ग्राम्यं कुर्यात्सं-
वत्सरव्रतमिति। एवं मूत्रपुरीषवसासृक्शुक्रमांसमज्जास्थिपू-
र्वोक्तविषयेषु पूर्वोक्तप्रायश्चित्तानि योज्यानि। नखरोमादिमलभ-
क्षणे त्वर्द्धं कल्प्यं। अकामतः सकृन्नखादिभक्षणे प्राचेतसं।
नखकेशासृग्लोमवसाभक्षणेऽहोरात्रमभोजनाच्छुद्धिरिति
अकामतः कल्प्यं मुखमात्रप्रवेशे तु केशकीटनखं प्राश्य मत्स्य-
कंटकमेव च। हेमतप्तं घृतं पीत्वा तत्क्षणादेव शुद्ध्यतीति स्मृ-
त्यंतरोक्तं॥ हारीतः॥ कृमिकीटपिपीलिकाजलौकापतंगा-
स्थिप्राशने। गोमूत्रगोमयाहारस्त्रिरात्रेणैव शुद्ध्यतीति अथ
विडालाद्युच्छिष्टभक्षणे॥ अकामतो विडालाद्युच्छिष्टभ-
क्षणे सकरात्रं ब्राह्मीं सुवर्चलां पिबेत्॥ तथा च मनुः॥
विडालकाकाद्युच्छिष्टं जग्ध्वा श्वनकुलस्य च। केशकीटा-
वपन्नं च पिबेद्ब्राह्मीं सुवर्चलामिति। अकामतोऽभ्यासे खका

काद्यबली वशूद्रोच्छेषणाभोजने त्वतिकृच्छ्र इति शातातपो-
क्तं द्रष्टव्यं। कामतः सकृद्भक्षणे विष्णूक्तं। पक्षिश्वापदजग्धस्य र-
सस्यान्नस्य भूयसः। संस्काररहितस्यापि भोजने कृच्छ्रपादकमि-
ति। अनाभ्यासे शंखोक्तं। शुनामुच्छिष्टं भुक्त्वा मासमेकं व्रती
भवेत्। काकोच्छिष्टं गवाघ्रातं भुक्त्वा पक्षं व्रती भवेदिति। अन्नया-
वकव्रतं प्रकृतं। वृद्धविष्णुः। ब्राह्मणः शूद्रोच्छिष्टाशने सप्त-
रात्रं पंचगव्यं पिबेद्वैश्योच्छिष्टाशने पंचरात्रं राजन्योच्छिष्टाश-
ने त्रिरात्रं ब्राह्मणोच्छिष्टाशने त्वेकाहमिति। एतच्च कामतः सकृ-
द्भक्षणे पंचगव्यप्राशनमाहारांतरमिति वृत्त्यर्थं। तपसः क्लेशरूप-
त्वात्। यत्त्वैवाभ्यासे यमोक्तं। भुक्त्वा सह ब्राह्मणेन प्राजापत्येन शु-
द्ध्यति। भूभुजा सह भुक्त्वान्नं तप्तकृच्छ्रेण शुद्ध्यति। वैश्येन सह भु-
क्त्वान्नमतिकृच्छ्रेण शुद्ध्यति। शूद्रेण सह भुक्त्वा च चांद्रायणमथा-
चरेदिति। अकामतः शंखोक्तं॥ ब्राह्मणोच्छिष्टाशने महाव्याहृति-
भिरभिमंत्र्यापः पिबेत्क्षत्रियोच्छिष्टाशने। ब्राह्मीरसविपक्वेन त्र्य-
हं क्षीरेण वर्तयेत्। वैश्योच्छिष्टभोजने त्रिरात्रोपोषितो ब्राह्मीसु-
वर्चलां पिबेत्। शूद्रोच्छिष्टभोजने षड्रात्रमभोजनमिति। अत्रा-
भ्यासे द्वैगुण्यादिकं कल्प्यं। क्वचिदुच्छिष्टभोजनस्याभ्यनुज्ञा
दर्शिताऽपस्तंबेन। पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोज्यमित्यंगि-
राः॥ चंडालपतितादीनामुच्छिष्टान्नस्य भक्षणे। चांद्रायणं च-
रेद्विप्रः क्षत्रः सांतपनं चरेत्। षड्रात्रं च त्रिरात्रं च वर्णयोरनुपू-
र्वशः इति। अत्र सांतपनं महासांतपनं। एतच्च कामतः। अका-

मतस्त्वर्द्धं कल्प्यं पराशरः॥ आपत्काले तु विप्रेण भुक्तं शूद्र-
गृहे यदि। मनस्तापेन शुध्येत्तु द्रुपदानां शतं जपेदिति॥ वह्नि-
पुराणमते। दीपोच्छिष्टं तु यत्तैलं रात्रौ रथ्याहृतं च यत्। अभ्यं-
गाच्चैव यच्छिष्टं भुक्त्वा नक्तेन शुध्यतीति॥ वृद्धशातातपः
पीतोच्छिष्टं तु पानीयं पीत्वा तु ब्राह्मणः क्वचित्। त्रिरात्रं तु व्रतं कु-
र्याद्वामहस्तेन वा पुनरिति। एतच्च कामतः। अकामतस्त्वर्द्धं।
शंखः। अमेध्यपतितचंडालपुल्कसरजस्वलावधूनकुणा-
कुष्ठिकुनखिसंस्पृष्टानि भुक्त्वा कृच्छ्रं चरेदिति। कुणिहस्त-
विकल्पः। एतच्च कामत अकामतस्त्वर्द्धं। रजकाद्यस्पृश्यस्पर्शे
विष्णूक्तं। भुक्त्वा स्पृश्यैस्तथा शौचि केशकीटैश्च दूषितं। कुशो-
दुंबरबिल्वाद्यैः पनसांबुजपत्रकैः। शंखपुष्पी सुवर्चलादि क्वाथं
पीत्वा विशुध्यतीति॥ हारीतः॥ शूद्रेणोपहृतमभोज्यं कीटैर्वामे-
ध्यसेवि निर्भुंजानेषु वा यत्र शूद्रस्पृशोदनहृत्वा तत्पंक्तौ भुंजाने-
षु वा यत्रोच्छायोच्छिष्टं प्रयच्छेद्दावा मेहाकुत्सित्वा वा यत्रान्नं दृषु-
स्तत्र घाय श्चित्तमहोरात्रमिति। क्रतुः। यस्तु भुंक्ते द्विजः पंक्त्यामु-
च्छिष्टायां कथंचन। अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यतीति।
एतदकामतः॥ कामतस्तु पराशरोक्तं॥ एकपंक्त्युपविष्टानां
विप्राणां सहभोजने। यद्येकोपि त्यजेत्पात्रं शेषमन्नं न भोजयेत्
मोहाद्भुंजीत यस्तत्र पंक्त्यामुच्छिष्टभोजनः। प्रायश्चित्तं चरेद्विप्रः
कृच्छ्रं सांतपनं चरेदिति। त्यजेत्पात्रं अमृतापिधानमसीत्यन-
मीकरणादकपानं कृत्वा त्यजेदित्यर्थः। श्वादिसंयुक्तकूपा-

शुद्धकपाने विष्णूक्तं। मृतपंचनखात्कूपादत्यंतोपहतादुदकं पी-
त्वा ब्राह्मणस्त्र्यहमुपवसेद्‌द्व्यहं राजन्य एकाहं वैश्यः शूद्रो नक्तं
सर्वे चान्ते पंचगव्यं पिबेयुरिति। अत्यंतोपकता मूत्रपुरीषादि-
भिः। कामतो मानुषशवोपहतकूपजलपाने हारीतः। क्लिन्ने भि-
न्ने शवे तोयं तत्रस्थं यदि तत्पिबेत्। शुद्धौ चांद्रायणं कुर्यात्तप्त-
कृच्छ्रमथापि वा। यदि कश्चित्ततः स्नायात्प्रमादेन द्विजोत्तमः।
जपं त्रिषवणस्नायी अहोरात्रेण शुध्यतीति। अकामतो दे-
वलोक्तं॥ क्लिन्नं भिन्नं शवं चैव कूपस्थं यदि दृश्यते। पयः पिबे-
त्त्रिरात्रेण मानुषे द्विगुणं स्मृतमिति॥ आपस्तंबः॥ चांडाल-
कूपभांडस्थं नरः कामाज्जलं पिबेत्। प्रायश्चित्तं कथं तत्र वर्णे
वर्णे विनिर्दिशेत्। चरेत्सांतपनं विप्रः प्राजापत्यं तु भूमिपः
तदर्द्धं तु चरेद्वैश्यः शूद्रे पादं विनिर्दिशेत्॥ देवलः॥ यस्तु
चंडालभांडस्थमज्ञानादुदकं पिबेत्। सत्र्यहेण शुद्ध्येत्तु शूद्र-
स्त्वेकेन शुध्यतीति॥ आपस्तंबः॥ म्लेच्छादीनां जलं पीत्वा
पुष्करिण्यां ह्रदे पि वा। जानुदघ्नं शुचि ज्ञेयमधस्तादशुचिस्मृतं
तत्तोयं यः पिबेद्विप्रः कामतोकामतोपि वा। अकामान्नक्तभो-
जी स्यादहोरात्रं तु कामत इति। अत्रैवाभ्यासे प्राजापत्यमेषु स्ना-
त्वा च पीत्वा च प्राजापत्येन शुध्यतीत्यापस्तंबस्मरणात्। ए-
ष्वंत्यजादिकूपादिषु॥ पराशरः। भांडस्थमंत्यजानां तु जलं
दधि पयः पिबेत्। ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव प्रमादतः।
ब्रह्मकूर्चोपवासेन द्विजातीनां तु निःकृतिः। शूद्रस्य चोपवासे-

न तथा दानेन शाम्यति इति। एतदकामतः। कामतो द्विगुणं ॥
आपस्तंबः ॥ सूत्रोच्चारं द्विजः कृत्वा ह्यकृत्वा शौचमात्मनः।
मोहाद्भुक्त्वा त्रिरात्रं तु यवान् पीत्वा विशुध्यति। मूत्रं कृत्वा द्विजो
मार्गे स्मृतिभ्रंशाज्जलं पिबेत्। अहोरात्रोषितो भूत्वा पंचगव्येन
शुध्यति। कामतो द्विगुणं ॥ संवर्त्तः ॥ समुत्पन्ने तु यः स्नाने भुं-
जीताथ पिबेत्तु वा। गायत्र्यष्टसहस्रं तु जपेत्स्नात्वा समाहित
इति। एतदकामतः। स्नानार्हस्तु यदा भुंक्ते द्विजो वै ज्ञानदुर्बलः।
प्राजापत्येन शुद्धो त्तु षड्विंशन्मतेभिधानात्। अथवा स्पृष्टादि
भक्षणे ॥ पराशरः ॥ वाग्दुष्टं भावदुष्टं च भाजने भावदूषिते
भुक्त्वान्नं ब्राह्मणः पश्चात्त्रिरात्रेण विशुध्यतीति। एतच्च कामतः
क्षत्रियादीनां कल्प्यं ॥ अकामतो गौतमोक्तं छर्दनं घृतप्राशनं
च ॥ वशिष्ठः ॥ शंकास्थाने समुत्पन्ने अभोज्याभक्ष्यसंज्ञि-
ते। आहारशुद्धिं वक्ष्यामि तन्मे निगदतः शृणु। अक्षारलव-
णां रूक्षां पिबेद्ब्राह्मीं सुवर्चलां। त्रिरात्रं शंखपुष्पीं वा ब्राह्म-
णः पयसा सह। पलाशबिल्वपत्राणि कुशान्पद्ममुदुंबरं।
अपः पिबेत् क्वाथयित्वा त्रिरात्रेणैव शुध्यतीति। पलाशादि
सहिता अपः क्वाथयित्वेत्यर्थः। कालदुष्टशुक्तादिभोजने ग्र-
हणकालादिभोजने चैकरात्रत्रिरात्रादिकं कामादिभेदेन क-
ल्प्यं। अथाहुताद्यन्नभोजने। लिखितः। यस्य चाग्नौ न क्रिय-
ते यस्य चान्नं न दीयते। न तद्भोज्यं द्विजातीनां भुक्त्वा तूपवसे-
दहः। वृथाकृशरसंयावपायसापूपशष्कुलीः ॥ आह्निता-

ग्निर्द्विजो भुक्त्वा प्राजापत्यं समाचरेत्। अनाहिताग्नेरेकाहः शे-
षेषूपवसेदहरिति मनुनोक्तत्वात्। तथा। घृतहीनं तु यो भुंक्ते
नरस्त्वाहुतिपंचकं। पश्चाद्धुतेन यो भुंक्ते भुक्त्वा चांद्रायणं च-
रेत्॥ संवर्त्तः॥ शूद्राणां भाजने भुक्त्वा भुक्त्वा वा भिन्नभाज-
ने। अहोरात्रोषितो भूत्वा पंचगव्येन शुद्ध्यति। तथा। वटार्का-
श्वत्थपत्रेषु कुंभीतिंदुकपत्रयोः। कोविदारकदंबेषु भुक्त्वा चांद्रा-
यणं चरेत्। पलाशपद्मपत्रेषु गृही भुक्त्वैंदवं चरेत्। वानप्र-
स्थो यतिश्चैव लभते चांद्रिकं फलमिति। पलाशपत्राणि वल्ली
पलाशपत्राणीति केचन॥ अथ हस्तदानादिक्रियादुष्ट-
भक्षणे॥ पराशरः॥ माक्षिकं फाणितं शाकं गोरसं लव-
णं घृतं। हस्तदत्तानि भुक्त्वा तु दिनमेकमभोजनमिति॥ ए-
तदकामतः। कामतो हारीतोक्तं त्रिरात्रं। वृद्धयाज्ञवल्क्यः। ब्रा-
ह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत्। द्वयमेतदभोज्यं स्याद्
भुक्त्वा तूपवसेदहरिति॥ क्रतुः॥ शूद्रहस्तेन यो भुंक्ते पानीयं
वा पिबेत् क्वचित्॥ अहोरात्रोषितो भूत्वा पंचगव्येन शुद्ध्यति।
आसनारूढपादो वा वस्त्रार्द्धप्रावृतोऽपि वा। मुखेन धमितं भुक्त्वा
कृच्छ्रं सांतपनं चरेत्॥ आपस्तंबः॥ नाप्रसवितृकन्याया
अग्नौ यान्नं जुहेपि वा। अथ भुंक्ते तु यो मोहात्कृच्छ्रं सांतपनं च-
रेत्। अप्रसवितृकन्या अप्रसूता कन्या। पार्वणश्राद्धादिभो-
जने॥ भारद्वाजः॥ भुंक्ते चेत्पार्वणश्राद्धे प्राणायामान् ष-
डाचरेत्। उपवासस्त्रिमासादिवत्सरांतं प्रकीर्त्तितः। प्राणाया-

मन्वयं वृद्धा वहोरात्रं सपिंडने। असरूपेस्त्वंतनकं व्रतपारणा-
के तथा। असरूपेणाशौचादिभिरसमाने। तथा। द्विगुणं क्ष-
त्रियस्यैव त्रिगुणं वैश्यभोजने। साक्षाच्चतुर्गुणं ह्येतत्स्मृतं शू-
द्रस्य भोजने इति। एतदापद्विषयमामश्राद्धविषयमाकाम-
विषयं वा। एवमुत्तरत्रापि अल्पप्रायश्चित्तानि योजनीयानि।
अधिकप्रायश्चित्तानि कामकारे अनापद्विषये वा योज्या-
नि। आपदि नवश्राद्धादिभोजने विष्णूक्तं॥ प्राजापत्यं नवश्रा-
द्धे पादोनं चाद्यमासिके। त्रैपक्षिके तदर्द्धं तु पंचगव्यं द्विमासि-
क इति। अत्राशक्तस्य हारीतोक्तं॥ एकादशाहे त्र्यहं तु भु-
क्त्वा संचयने तथा। उपोष्य विधिवद्भुक्त्वा कूष्मांडैर्जुहुयाद्घृत-
मिति। अनापद्यपि सप्त वा चांद्रायणं नवश्राद्धे प्राजापत्यं तु मि-
श्रके। एकाहस्तु पुराणेषु प्राजापत्यं विधीयते। मिश्रकं प्रथम-
संवत्सर नवश्राद्धमिति केचन। पुराणेषु संवत्सरानंतरभावि-
श्राद्धेषु। केचन मिश्रकं प्रथमतो दीयमानमाद्यश्राद्धमिति॥
आद्यश्राद्धस्य द्विगुणवृत्तिः। श्राद्धस्तवकेभिहिता। चांद्रायणं
नवश्राद्धे इत्येतत्प्रथमनवश्राद्धादिविषयं। अथवा नवश्राद्धे
चांद्रायणं क्षत्रियनवश्राद्धविषयं वा। द्वितीयनवश्राद्धादिषु
षड्विंशन्मतोक्तं। प्राजापत्यं नवश्राद्धे पादोनं चाद्यमासिके।
त्रैपक्षिके तदर्द्धं स्यात्पादो द्वैमासिके तथा॥ पादोनं कृच्छ्र-
मुद्दिष्टं षाण्मासे च तथाब्दिके। त्रिरात्रं चान्यमासेषु प्रत्यब्दं या-
दहः स्मृतमिति। त्रैपक्षिके तदर्द्धं स्यादित्यादि कामकारविषयं

षण्मासे च तथाब्दिक इत्येतत्प्रथमाब्दिकविषयं। प्रत्यब्दं तदह-
निस्येतद्द्वितीयाब्दिकविषयं। एतच्च ब्राह्मणविषयं। क्षत्रियादि
श्राद्धभोजने तु तत्रैव। चांद्रायणं नवश्राद्धे पराको मासिके स्मृतः।
त्रैपक्षिके सांतपनं कृच्छ्रं मासद्वये स्मृतं। क्षत्रियस्य नवश्राद्धे व्र-
तमेतदुदाहृतं। वैश्यस्यार्द्धाब्दिकं प्रोक्तं क्षत्रियात्तु मनीषिभिः।
शूद्रस्य तु नवश्राद्धे चरेच्चांद्रायणं नवश्राद्धे पराको मासिके स्मृ-
तः। पक्षत्रयेऽति कृच्छ्रः स्यात् षण्मासे कृच्छ्रमेव तु। आब्दिके
पादकृच्छ्रः स्यादेकाहः पुनराब्दिके। अत ऊर्द्ध्वं न दोषः स्या-
च्छंखस्य वचनं यथेति। एवं विधान्यन्यान्यपि गुरुलघुप्राय-
श्चित्तानि कामाकामजातिशक्तिस्तेनपतितक्लीबाद्यपांक्तेयश्रा-
द्धभोजनसर्पहतादिश्राद्धभोजनविषयविशेषापेक्षया योज्या-
नि॥ **तथा च भारद्वाजः**॥ चांडालादुदकात्सर्पात् ब्राह्मणा-
द्वैद्युतादपि। दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मिणां। पत-
नानाशके चैव विषोद्बंधोदकैस्तथा। भुक्त्वैषां षोडशश्राद्धे कु-
र्यादिंदुव्रतं द्विजः॥ **तथा**॥ अपांक्तेयात् यदुद्दिश्य श्राद्धमेका-
दशेऽहनि। ब्राह्मणस्तत्र भुक्त्वान्नं त्रिषु चांद्रायणं चरेत्। आ-
मश्राद्धे तथा भुक्त्वा तप्तकृच्छ्रेण शुध्यति। संकल्पिते तथा भु-
क्त्वा त्रिरात्रं क्षपणं भवेदिति। कामतो ब्रह्मचारिणा नवश्राद्धा-
दिभोजने बृहद्यमोक्तं। मधुमांसं च योऽश्नीयाच्छ्राद्धं सूतकमे-
व च। प्राजापत्यं चरेत्कृच्छ्रं व्रतशेषं समापयेदिति। अकाम-
तोऽपि तेनैवोक्तं। मासिकादिषु योऽश्नीयादसमाप्तव्रतो द्विजः॥

त्रिरात्रमुपवासोऽस्य प्रायश्चित्तं विधीयते। प्राणायामत्रयं कृत्वा घृतं प्राश्य विशुद्ध्यतीति। आमश्राद्धे त्वर्द्धं सर्वत्र। आमश्राद्धे भवेदर्द्धं प्राजापत्यं तु सर्वदेति षट्त्रिंशन्मतस्मरणात्। अनुक्तप्रायश्चित्ताभावात् स्यादिति श्राद्धभोजनेषु **विशेषमाहोशनाः**। दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुग्द्विजः। ततः संध्यामुपासीत शुद्ध्येत्तु तदनंतरं। **तथा**। निर्वृत्ते चूडहोमे तु प्राङ्नामकरणात्तथा। चरेत्सांतपनं भुक्त्वा जातकर्मणि चैव हि। अतोऽन्येष्वनुभुक्तान्नं संस्कारेषु द्विजोत्तमः। नियोगादुपवासेन शुद्ध्यते निंद्यभोजने। **धौम्यः**॥ ब्रह्मौदने च सोमे च सीमंतोन्नयने तथा। जातश्राद्धे नवश्राद्धे द्विजश्चांद्रायणं चरेदिति। सोमसाहचर्याद्ब्रह्मौदनारब्धकर्माधानांगभूतमिति कथयंति। अत्र तत्कर्मांगभूतश्राद्धभोजन एवैतत्प्रायश्चित्तं शक्त्याद्यपेक्षया योजनीयं॥

अथाभोज्यान्नभोजने॥ अभोज्यान्नाश्च मनुना दर्शिताः। नाश्रोत्रियतते यज्ञे ग्रामयाजकृते तथा। स्त्रिया क्लीवेन तु हुते भुंजीत ब्राह्मणः क्वचित्। मत्तक्रुद्धातुराणां तु न भुंजीत कदाचन। गणान्नं गणिकान्नं च विदुषा च जुगुप्सितं। स्तेनगायनयोश्चान्नं तक्ष्णो वार्द्धुषिकस्य च। दीक्षितस्य कदर्यस्य बद्धस्य निगडस्य च। अभिशस्तस्य षंडस्य पुंश्चल्या दांभिकस्य तु। चिकित्सकस्य मृगयोः क्रूरस्योच्छिष्टभोजिनः। उग्रान्नं सूतिकान्नं च पर्याचान्तमनिर्दशं। अनर्चितं वृथामांसमवीरायाश्च योषितः। द्विषदन्नं नगर्यन्नं पतितान्नमवक्षुतं॥

भिक्षुमाल्यतमोक्षैव क्रतुविक्रयकस्य च । शैलूषतंतुवायान्नं
कृतघ्नस्यान्नमेव च । कर्मारस्य निषादस्य रंगावतरणस्य
च । सुवर्णकर्तुर्वेनस्य वा स्तु विक्रयिणस्तथा । श्ववतां शौ-
ण्डिकानां च चैलनिर्णेजकस्य तु । रजकस्य नृशंसस्य यस्य
चोपपतिर्गृहे । मृष्यंति ये चोपपतिं स्त्रीजितानां तु सर्वश इति
एव मादयोऽन्येऽपि स्मृत्यंतरतो वगंतव्याः । अत्र प्रायश्चित्तं ।
भुक्त्वातोऽन्यतमस्यान्नममत्या क्षपणं त्र्यहं । मत्या भुक्त्वा
चरेत्कृच्छ्रं रेतोविण्मूत्रमेव वेति । अत्राभ्यासे प्राग्वोक्तं चां-
द्रायणं । गौतमोक्तं छर्दनं घृतप्राशनमापद्विषयं ॥ आप-
स्तंबः ॥ बलाद्दासीकृता ये तु म्लेच्छचंडालदस्युभिः । अशु-
भं कारिताः कर्म गवादिप्राणिहिंसनं । उच्छिष्टमार्जनं चैव
तथा तस्यैव भोजनं । खरोष्ट्रविड्वराहाणामामिषस्य च भक्ष-
णं । तत्स्त्रीणां च तथा संगस्ताभिश्च सहभोजनं । मासोषि-
ते द्विजातौ तु प्राजापत्यं विशोधनं । चांद्रायणं त्वाहिताग्नेः पा-
राकस्त्वथवा भवेत् । चांद्रायणं पराकं च चरेत्संवत्सरोषितः
संवत्सरोषितः शूद्रो मासार्द्धं यावकं पिबेत् । मासमात्रोषितः
शूद्रः कृच्छ्रपादेन शुद्ध्यति । ऊर्द्ध्वं संवत्सरात्कल्प्यं प्राय-
श्चित्तं द्विजोत्तमैः । संवत्सरैस्त्रिभिश्चैव तद्भावं स नियच्छ-
तीति ॥ लिखितः ॥ परपाकनिवृत्तस्य परपाकरतस्य
च । अपचस्य च भुक्त्वान्नं द्विजश्चांद्रायणं चरेत् । एतच्चा-
कामतोऽभ्यासविषयं । अनभ्यासे त्वर्द्धं । अकामतस्त्रिरात्रं ।

मिति कल्प्यं तथा गृहीत्वाग्नीन् समारोप्य पंचयज्ञान्न निर्व-
पेत्। परपाकनिवृत्तोसौ मुनिभिः परिकीर्त्तितः। पंचयज्ञान्
स्वयं कृत्वा परान्नमुपजीवति। सततं प्रातरुत्थाय परपाक-
रतस्तु तः। गृहस्थधर्मप्रवृत्तो यो दानेन परिवर्जितः। ऋषिभि-
र्धर्मतत्त्वज्ञैरपचः परिकीर्त्तितः॥ अथाशौच्यन्नभोजने
॥ विष्णुः॥ ब्राह्मणादीनामाशौचे यः सकृदेवान्नमश्ना-
ति तस्य तावदाशौचं यावत्तेषामाशौचं। व्यपगमे प्रायश्चि-
त्तं कुर्यादिति॥ कामकारे मार्कंडेयः भुक्त्वा तु ब्राह्मणा-
शौचे चरेत्सांतपनं द्विजः। भुक्त्वा तु क्षत्रियाशौचे तथा कृच्छ्रो
विधीयते। वैश्याशौचे तथा भुक्त्वा महासांतपनं चरेत्। शूद्र-
स्यैव तथा भुक्त्वा द्विजश्चांद्रायणं चरेत्। अत्राभ्यासे शंखो-
क्तं॥ शूद्रस्य सूतके भुक्त्वा षण्मासान् कृच्छ्रमाचरेत् वैश्य-
स्य तु तथा भुक्त्वा त्रीन्मासान् व्रतमाचरेत्। क्षत्रियस्य तथा
भुक्त्वा द्वौ मासौ व्रतमाचरेत्। ब्राह्मणस्य तथाशौचे भुक्त्वा
मासव्रती भवेदिति। अकामतस्तु छागलेयोक्तं अज्ञानाद्भुज-
तो विप्राः सूतके मृतके तथा। प्राणायामशतं कृत्वा शुद्ध्य-
ते शूद्रसूतके। वैश्ये षष्टिर्भवेद्राज्ञि विंशतिर्ब्राह्मणे दश।
एकाहं च त्र्यहं पंच सप्तरात्रमभोजनं। ततः शुचिर्भवेद्विप्रः
पंचगव्यं पिबेत्ततः इति। एकाद्यहादयः क्रमेण ब्राह्मणाद्याशौ-
चान्नभोजने विज्ञेयाः॥ अथ जातिभ्रंशकरादिषु॥
एतत्स्वरूपं प्रागेव दर्शितं। ब्राह्मणस्य रुजः कृत्वा घ्राति।

रघ्रे यमत्वयो रित्यादिभिर्मनुवचनैः रुजः कृत्वा गोभोन्याटना-
दि। अघ्रेयं पूतिगंधि। अत्र प्रायश्चित्तमाह सएव। जातिभ्रंश-
करं कर्म्म कृत्वान्यतममिच्छया। चरेत्सांतपनं कृच्छ्रं प्राजा-
पत्यमनिच्छया। संकरापात्र कृत्वा तु मासः शोधनमैंदवः।
मलिनीकरणीयेषु तप्तः स्याद्यावकं त्र्यहं॥ बृहस्पतिः
ब्राह्मणस्य रुजः कृत्वा रासभादिप्रमापनं। निंदितेभ्यो ध-
नादानं कृच्छ्रार्द्धव्रतमाचरेत्॥ यमः॥ संकरीकरणं कृ-
त्वा मासमश्नीत पावकं। कृच्छ्रातिकृच्छ्रमथवा प्रायश्चि-
त्तं समाचरेत्। अपात्रीकरणं कृत्वा तप्तकृच्छ्रेण शुद्ध्यति।
शीतकृच्छ्रेण वा शुद्धिर्महासांतपनेन वा। मलिनीकर-
णीयेषु तप्तकृच्छ्रो विशोधनमिति। जातिभ्रंशकरादिष्व-
न्यतमकरणे मन्वाद्युक्तप्रायश्चित्तानि जातिशक्ति कामा-
कामसकृदभ्यासापेक्षया योज्यानि। कृमिकीटवयोहत्या-
मद्यानुगतभोजनं। फलैधकुसुमस्तेयमधैर्यं च मलावहमि-
त्यत्र कृमयस्थविष्ठा अस्थिरहिता घुणादिजंतवः। इतोपि
सोदिष्टानस्थिजंतुहनने॥ याज्ञवल्क्यः॥ अस्थन्व-
तां सहस्रं तु तथानस्थिमतामन इति। अत्र शूद्रहत्याव्रतं
चरेदित्यनुवर्त्तते। तच्च पराभासव्रतं। अस्थिमतः अनुक्त-
निःकृतयः कुक्कुटप्रभृतयः। अनस्थिमंतो यूकामशकप्र-
भृतयः। अनः शकटं तत्परिपूर्णमित्यर्थः। अत्रोक्तसंख्या
परिमाणापेक्षया न्यूनाधिकहनने प्रायश्चित्तमपि तथैव

कल्पनीयं तथा। मार्जारगोधानकुलमंडूकश्वपतत्रिणः। हत्वा त्र्यहं पि-
बेत् क्षीरं कृच्छ्रं वा पादिकं चरेत्॥ **मनुः**॥ पयः पिबेत्त्रिरात्रं वा योज-
नं वाध्वनो व्रजेत्। उपस्पृशेत् स्रवन्त्यां वा सूक्तं वाब्दैवतं जपेत्। उप-
स्पर्शनं स्नानं॥ एतच्चाकामतः कामतो द्विगुणं। कामतोऽभ्यासे वा-
ऽपि ज्ञेयं। श्वमार्जारमंडूकनकुलसर्पदहरमूषकान् हत्वा कृच्छ्रं द्वा-
दशरात्रं चरेत्। किंचिद्दद्यादिति। दहरः छुछुंदरिरल्पमूषिका
वा। एतच्च प्रत्येकवधे मुदितानेकवधे मनूक्तं षाण्मासिकं॥ **मनुः**
॥ हत्वा हंसं बलाकां च बकं बर्हिणमेव वा। वानरं श्येनभासौ च स्पर्श-
येद्ब्राह्मणाय गां। क्रव्यादस्तु मृगान्हत्वा धेनुं दद्यात्पयस्विनीं।
अक्रव्यादो वत्सतरीमुष्ट्रं हत्वा तु कृष्णलं॥ **याज्ञवल्क्यः**
गजे नीलवृषाः पंच शुके वत्सो द्विहायनः। खराजमेषेषु वृषो दे-
यः क्रौंचे त्रिहायनः। उरगेऽप्यायसो दंडः पंडके त्रपुसीसकं। को-
ले घृतघटो देय उष्ट्रे गुंजा हये शुकं। पंडको नपुंसकः। स च मृ-
गपक्षिरूपश्चवनगोचराश्रयादिरूपः। त्रपुसीसकं वा माषपरि-
मितं॥ **तथा च मनुः**॥ अभ्रिं कार्ष्णायसीं दद्यात्सर्पं हत्वा द्वि-
जोत्तमः। पलालभारकं षंढे सीसकं चैव माषकमिति। पलाल-
भारसीसकमाषयोर्विकल्पः॥ **याज्ञवल्क्यः**॥ विभिरौ तु।
तिलद्रोणं गजादीनामशक्तौ वा। दानं दातुं चरेत्कृच्छ्रमेकैकस्य
विशुद्धये। कृच्छ्रमित्युपलक्षणमतः शक्त्यापेक्षया कृच्छ्रा-
धिक्यं कल्पनीयं। अष्टमुष्टिर्भवेत्किंचित्किंचिदष्टौ तु पुष्कलं।
पुष्कलानि तु चत्वारि आढकः परिकीर्तितः। चतुराढको भवे-

द्रोण इत्येतन्मानलक्षणम्॥ याज्ञवल्क्यः॥ फलपुष्पा-
न्नरसजसत्त्वघाते घृताशनं। किंचित्सास्थिवधे दंडः प्राणायाम-
स्त्वनस्थिके। घृताशनमाहारांतरपरित्यागेन। यत्र प्रायश्चित्त-
विशेषो नाम्नातस्तत्र किंचित्सास्थिमत इत्येतद्द्रष्टव्यं॥ परा-
शरः॥ हंससारसचक्राह्वक्रौंचकुक्कुटघातकः। मयूरमेषो-
ष्ट्राश्च एकनक्तेन शुध्यति। मद्गुं च टिट्टिभं चैव शुकं पारावतं
तथा। आडिं चैव बकं हत्वा शुद्धो द्वैनक्तभोजने। चाषकाकक-
पोतानां सारीतित्तिरिघातकः। अंतर्जले उभे संध्ये प्राणा-
यामेन शुध्यति। गृध्रश्येनविहंगानामुलूकस्य च घातकः॥
अपक्वाशी दिनं तिष्ठेत्त्रीन्कालान्मारुताशनः। हत्वा मूषकमा-
र्जारसर्पाजगरडुंडुभान्। कृशरं भोजयेद्विप्रान् लोहदंडश्च
दक्षिणा। सेधकच्छपगोधानां शशशाबकघातकः। वृंताकफ-
लगृंजाशी अहोरात्रेण शुध्यति। मृगरोहिवराहाणामवि-
कावस्तघातने। वृकजंबूकऋक्षाणां तरक्षूणां च घातकः
तिलप्रस्थं त्वसौ दद्याद्वायुभक्षो दिनत्रयं। गजमोवतुरंगो-
ष्ट्रगवयानां निपातने। प्रायश्चित्तमहोरात्रं त्रिसंध्यं चावगा-
हनं। खरवानरसिंहानां चित्रकव्याघ्रघातकः। शुद्धिमेति
त्रिरात्रेण ब्राह्मणानां च भोजनैरिति॥ याज्ञवल्क्यः॥
उष्ट्रलीवानरखरैर्दष्टश्चोपोष्य दिवा यमैः। प्राणायामं जले
कृत्वा घृतं प्राश्य विशुध्यतीति। घृतप्राशनं भोजनप्रत्याम्ना-
यः॥ मनुः॥ श्वसृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च॥

नरोऽश्वोष्ट्रवराहैश्च प्राणायामेन शुद्ध्यतीति। एतदशक्तविषयं।
शक्तस्य कल्प्यं यत्तु सुमन्तुवचनं श्वशृगालमृगमहिषाजावि-
कखरकरभनकुलमार्जारमूषिकाप्लवकाकपुरुषदंष्ट्राना-
माप्येहि ष्टीयाभिः स्नानं प्राणायामत्रयं चेति। तन्नाभेरध ईष-
दृष्टविषयं। मध्यदष्टविषये तु अंगिरसोक्तं। ब्रह्मचारी शुना-
दष्टस्त्र्यहं सायं पिबेत्पयः। गृहस्थस्त्वेद्विरात्रं तु एकाहं योऽग्नि-
होत्रवान्। नाभेरूर्ध्वं तु दष्टस्य तदेव द्विगुणं भवेत्। स्यादेत-
त्त्रिगुणं वक्त्रे मस्तके तु चतुर्गुणमिति। क्षत्रियादिषु पादपादो-
नं कल्पनीयं। स्त्रीविषये तु पराशरोक्तं। ब्राह्मणी तु शुना दष्टा
जंबुकेन वृकेण वा। उदितं ग्रहनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेदि-
ति। ब्राह्मणीत्युपलक्षणं। व्रतस्थितायां विशेषस्तेनैवोक्तः
त्रिरात्रमेवोपवसेच्छुना दष्टा तु सव्रता। घृतं तु यावकं भुक्त्वा व्रतशे-
षं समापयेदिति। सव्रतेत्यत्र लिंगमविवक्षितं अनुपादेयग-
तत्वात्॥ **पुलस्त्यः**॥ रजस्वला पदष्टा शृगालजंबुकरा-
सभैः पंचरात्रं निराहारा पंचगव्येन शुद्ध्यति। ऊर्ध्वं तु द्विगुणं
नाभेर्वक्त्रे तु त्रिगुणं तथा। चतुर्गुणं स्मृतं मूर्ध्नि दष्टे त्वत्र निष्कृ-
तिर्भवेत्। अन्यत्र अरजस्वलावस्थायां॥ **शातातपः**॥
शुना घ्रातावलीढस्य नखैर्विलिखितस्य च। अद्भिः प्रक्षाल-
नं शौचमग्निना चोपचूलनमिति। उपचूलनं तापनं॥ **म-
नुः**॥ ब्राह्मणस्य व्रणद्वारे पूयशोणितसंभवे। कृमिरुत्प-
द्यते यस्य प्रायश्चित्तं कथं भवेत्। गवां मूत्रपुरीषेण त्रिसंध्यं-

स्नानमाचरेत्। त्रिरात्रं पंचगव्याशी त्वधोनाभ्या विशुध्यति। नाभि-
कण्ठान्तरोद्भूते व्रणे चोत्पद्यते कृमिः। षड्रात्रं तु तदा प्रोक्तं प्राजापत्यं
शिरोव्रणादिति। क्षत्रियादिषु पादपादोनं कल्प्यं। श्वादिदंशनिमि-
त्तव्रणे पूयादिभिः स्पर्शो श्वादिदंशनिमित्तव्रणप्रायश्चित्तं पूया-
दिभिः स्पर्शप्रायश्चित्तं च॥ अथ प्रकीर्णकप्रायश्चित्तानि
॥ तत्र याज्ञवल्क्यवचनानि प्रधानीकृत्याभिधीयते। प्रा-
णायामी जले स्नात्वा खरयानोष्ट्रयानगः। नग्नः स्नात्वा च भु-
क्त्वा च गत्वा चैव दिवा स्त्रियं। खरयुक्तं यानं रथाद्येवमुष्ट्रयानं।
स्त्रियं स्वस्त्रियं। इदं च कामकृते। उष्ट्रयानं समारुह्य खरयानं-
च कामत इति मनुस्मरणात्। अकामतः स्नानमात्रं। उभयत्रा-
भ्यासे कल्प्यं। साक्षात्खरोष्ट्रारोहणेऽपि द्विगुणा वृत्तिः कल्प-
नीया। तथा। गुरुं त्वंकृत्य हुंकृत्य विप्रं निर्जित्य वादतः। बध्वा वा
वाससा क्षिप्रं प्रसाद्योपवसेद्दिनं। अभ्यासे यमोक्तं। पादेन ब्रा-
ह्मणं जित्वा प्रायश्चित्तविधित्सया। त्रिरात्रोपोषितः स्नात्वा प्रणि-
पत्य प्रसादयेदिति। तथा। विप्रदंडोद्यमे कृच्छ्रस्त्वतिकृच्छ्रो निपा-
तने। कृच्छ्रातिकृच्छ्रौ सृक्पाते कृच्छ्रोऽभ्यन्तरशोणिते वि-
प्रदंडोद्यमे विप्रजिघांसया दंडाद्युद्यमे। बृहस्पतिः। काष्ठादि-
ना ताडयित्वा त्वग्भेदे तु कृच्छ्रमाचरेत्। अस्थिभेदेऽतिकृच्छ्रः
स्यात्पराकस्त्वंगकर्तने। यमः। पादेन ब्राह्मणं स्पृष्ट्वा प्राय-
श्चित्तविधित्सया। दिवसोपोषितः स्नात्वा प्रणिपत्य प्रसादये-
त्। एतच्च याज्ञवल्क्योक्तं [illegible] मादनमात्रमेव। असंनिहितास्वपु

उदके वा अकामतो मूत्रपुरीषोत्सर्गे मनुः ॥ विनाद्भिरप्सु वा-
प्यार्त्तः शारीरं संनिषेव्य तु ॥ सचैलो बहिराप्लुत्य गामालभ्य
विशुद्ध्यति । गामालभ्य स्पृष्ट्वा । कामतस्तु यमोक्तं । आपद्गतो
विना तोयं शारीरं यो निषेवते । एकाहं क्षपणं कृत्वा सचैलं
स्नानमाचरेत् । अनापदि तु सुमंतूक्तं ॥ अप्स्वग्नौ वा मेह-
तस्तप्तकृच्छ्रमिति ॥ मनुः ॥ वेदोदितानां नित्यानां कर्मणां
समतिक्रमे । स्नातकव्रतलोपे च प्रायश्चित्तमभोजनं ।
यत्तु श्रौतेषु स्मार्तेषु चानित्यहोमादिषु लोपे सति प्रा-
यश्चित्तविशेषेण । अतस्तत्रोपवासः प्रायश्चित्तं । अभोजनश्चे-
नेन सहाभोजनं समुच्चीयते । स्नातकव्रतादिकारेऽक्रतुः । एषा-
माचाराणामेकैकस्य व्यतिक्रमे गायत्र्यष्टशतं जप्यं कृत्वा पू-
तो भवतीति ॥ बृहस्पतिः ॥ अनिर्वर्त्य महायज्ञान्यो भुंक्ते प्र-
त्यहं गृही । अनातुरः सति धने कृच्छ्रार्द्धेन स शुध्यति । महाय-
ज्ञाः पंचमहायज्ञाः । एतच्च विशेषानुपादानादनापद्यकाम-
कृते । कामकृते द्विगुणं । आपद्यकामतः कृच्छ्रपादः । काम-
तः कृच्छ्रार्द्धमेवेति कल्प्यं । एतच्च सकृत्करणे । अभ्यासे तु क-
ल्प्यं ॥ तथा ॥ ऋतौ न गच्छेद्भार्यां वा सोपि कृच्छ्रार्द्धमाचरे-
त् ॥ देवलः ॥ स्वभार्यां तु यदा क्रोधादगम्येति नरो वदेत् ।
प्राजापत्यं चरेद्विप्रः क्षत्रियो दिवसान्नव । षड्रात्रं तु चरेद्वै-
श्य स्त्रिरात्रं शूद्र आचरेत् ॥ हारीतः ॥ वहतकमंडलुरि-
क्तमस्नातो ग्राम्यभोजनं । अहोरात्रेण शुद्धिः स्याद्दिनजप्ये

न चैव हीति । उपवासदिनजपयोः समुच्चयः ॥ यमः ॥
नपं स्त्री विषमं दद्यान्न्यायाचे तन्न दापयेत् । प्राजापत्येन कृ-
च्छ्रेण मुच्यते कर्मणस्ततः । नदीसंक्रमहंतुश्च कन्यावि-
घ्नकरस्य च । समे विषयकर्त्तुश्च निःकृतिर्नोपपद्यते । त्रया-
णामपि चैतेषां प्रत्यापत्तिं तु मार्गतां । भैक्ष्यलब्धेन चान्नेन
द्विजश्चांद्रायणं चरेत् । संक्रमउदकावतरणवर्त्मसमे
विषमकर्त्ता पूजादौ द्विजस्य चांद्रायणं क्षत्रियादीनां तु पा-
दह्रान्या कल्पनीयं ॥ ऋष्यशृंगः ॥ इंद्रचापं पलाशाग्निं
यद्यन्यस्य प्रदर्शयेत् । प्रायश्चित्तमहोरात्रं धनुर्दंडश्च दक्षि-
णा । क्रमेण धनुर्दंडौ दक्षिणा ॥ गौतमः ॥ न म्लेच्छाशु-
च्यधार्म्मिकैः सह संभाषेत । संभाष्य पुण्यकृतो मनसा
ध्यायेत् ब्राह्मणेन वा सह संभाषेत । तल्ल्याम्न्यधनला-
भवधे पृथग्वर्णाणीति । तल्यं भार्या तल्पादीनां च लाभ-
स्य वधे विघ्नकरणे पृथक् प्रत्येकं संवत्सरं प्राकृतब्रह्म-
चर्यमित्यर्थः ॥ हारीतः ॥ चंडालश्वपचानां तु संकरे
समुपस्थिते । अहोरात्रे त्रिरात्रं स्यात् द्विरात्रे षडहः स्मृतः
अविज्ञातस्तु चंडालः सप्ताहं निवसेद्यदि । तस्याज्ञातो
पसन्नस्य विप्राः कुर्युरनुग्रहं । दधिक्षीरघृतैर्युक्तं कृच्छ्रं
गोमूत्रयावकं । प्राश्नीयात्सह भृत्यैस्तु मासमेकं निरंतरं ।
तथा । यश्चत्तिपुत्यनाचांतो भुक्तवानासनात्ततः । सद्यः
स्नानं प्रकुर्वीत योन्यथा प्रयतो भवेत् । वसिष्ठः दंडोत्त-

र्णराजैकरात्रमुपवसेत्त्रिरात्रं च पुरोहितः। कृच्छ्रमदंड्यदंडने पु-
रोहितस्त्रिरात्रं राजा कुनखी श्यावदन्तस्तु कृच्छ्रं द्वादशरात्रं च-
रित्वोद्धरेयातामिति। दंतान्नखांश्च दुष्टानुत्पाटयेदित्यर्थः॥
शंखः॥ अध्यास्य शयनं यानमासनं पादुके तथा। द्विजः पला-
शवृक्षस्य त्रिरात्रं तु व्रती भवेत्। क्षत्रियस्तु रणे पृष्ठं दत्वा प्राण-
परायणः। संवत्सरं व्रतं कुर्याच्छित्वा वृक्षं फलप्रदं। द्वौ विप्रौ ब्रा-
ह्मणाग्नी वा दंपत्यौ गो द्विजोत्तमौ। अंतरेण यदा गच्छेद्द्विजश्चां-
द्रायणं चरेत्। होमकाले तथा दोहे स्वाध्याये दारसंग्रहे। अंतरे-
ण यदा गच्छेद्द्विजश्चांद्रायणं चरेत्। दोहे या गां गमूतदोहे। ए-
तच्चाभ्यासे अनभ्यासे त्वहं। मच्छिद्रादित्याद्यरिष्टदर्शनाद्दा-
वपि यएव। दुःस्वप्नारिष्टदर्शनादौ घृतं हिरण्यं च दद्यादिति। त-
था। पादप्रतापनं कृत्वा कृत्वा वह्निमधस्तथा। कुशैः प्रमृज्य पादौ तु
दिनमेकं व्रती भवेत्। देवलः। सिंधुसौवीरसौराष्ट्रांस्तथा प्रत्यंत-
वासिनः। अंगवंगकलिंगौड्रान्गत्वा संस्कारमर्हति। एतच्च द्वि-
तीयाद्यव्यतिरेकेण। यमः। प्रत्यादित्यं न मेहेत न पश्येच्चात्मनः
शकृत्। दृष्ट्वा सूर्यं निरीक्षेत ब्राह्मणं गाममथापि वा। हारीतः। क्षत्रि-
याभिवादने होरात्रमुपवसेद्वैश्यस्यापि शूद्रस्याभिवादने त्रिरात्र-
मुपवासः। तथा। शय्यारूढपादुकोपानद्वारोपितपादोच्छिष्टांध-
कारस्थश्राद्धकृज्जपदेवपूजादिरताभिवादने त्रिरात्रमुपवासः स्या-
दन्यत्र निमंत्रितेनान्यत्र भोजनेपि त्रिरात्रमिति। आपस्तंबः। समित्पु-
ष्पकुशाज्यांबुमृदन्नाक्षतपाणिकं जपहोमं च कुर्वाणं नाभिवादेत वै

द्विजः। अत्रापितपहोमसाहचर्याद्धारीतोक्तं त्रिरात्रमेव। शंखः
नोदकुंभहस्तोभिवासेन्नभैक्ष्यहस्तेनचाज्यहस्तोनाशुचि-
र्नानपक्षदेवपितृकार्यं कुर्वन्नशयानइति। अत्रापित्रिरात्रमेव।
याज्ञवल्क्यः॥ देशं कालं वयः शक्तिं पापं चावेक्ष्य यत्नतः।
प्रायश्चित्तं प्रकल्प्यं स्याद्यत्र चोक्ता न निष्कृतिः॥ यथास्मृत्यं-
तरे॥ हसितजृंभितास्फोटनानि नाकस्मात्कुर्यात्॥ तथा॥
नोदन्वतोंभसि स्नायान्नव श्मश्र्वादि कर्तयेत्। अंतर्वत्न्याः पतिः
कुर्वन्नप्रजा भवति ध्रुवमित्यादिषु प्रायश्चित्तं नाभिहितं एवंविध-
स्थलेषु देशाद्यपेक्षया कल्पनीयमित्यर्थः। इति प्रकीर्णकप्राय-
श्चित्तं॥ **अथ मिथ्याभिशंसन प्रायश्चित्तं**॥ याज्ञ-
वल्क्यः॥ महापापोपपापाभ्यां योभिशंसेन्मृषापरं। अब्भ-
क्षो मासमासीत स जापी नियतेंद्रियः। जपश्च शुद्धवतीनां॥ त-
था च वशिष्ठः॥ ब्राह्मणमनृतेनाभिशंस्य पतनीयेन वा मा-
समब्भक्षः शुद्धवतीरावर्तयेदश्वमेधावभृथं वा गच्छेदिति॥
शुद्धवतीः शुद्धपदोपेताः। एतच्च सवर्णविषये। आनुलोम्येन
वा प्रातिलोम्येन वा मिथ्याभिशंसने दंडानुसारेण कल्प्यं। दंड-
श्च याज्ञवल्क्येनोक्तः प्रातिलोम्यापवादेषु द्विगुणा त्रिगुणा द-
माः। वर्णानामानुलोम्येन तस्मादर्धार्धहानितः इति। सत्य-
दोषाभिशंसने तु मिथ्याभिशंसनप्रायश्चित्तार्द्धं॥ तथा॥
महापातकाभिशंसने मासमब्भक्षप्रायश्चित्तं। तत्समतदतिदि-
शाभिशंसने त्वर्द्धं। उपपातकाभिशंसने पाद इत्येवं कल्पनीयं।

सर्वप्रकीर्णकाभिशंसनेपि कल्पनीयं॥ यत्तु शंखलिखि-
तोक्तं॥ नास्तिकः कृतघ्नः कूटव्यवहारी ब्राह्मणवृत्तिघ्नो मि-
थ्याभिशंसी चेत्येते षड्वर्षाणि ब्राह्मणगृहेषु भैक्षं चरेयुः। संव-
त्सरं धौतं भैक्षमश्नीयुः षण्मासान्वा गाश्चानुगच्छेयुरिति। तद-
भ्यासतारतम्यापेक्षया योजनीयं॥ याज्ञवल्क्यः॥ अ-
भिशस्तो मृषा कृच्छ्रं चरेदाग्नेयमेव वा। निर्वपेत्तु पुरोडाशं वाय-
व्यं पशुमेव वा। प्राजापत्यकृच्छ्र आग्नेयपुरोडाशवायुदेवत्य-
पशूनां मध्ये न्यतमः कृच्छ्रत्वाद्यपेक्षया योजनीयं। यत्वेतेनैवा-
भिशस्तो व्याख्यात इति वशिष्ठेन मासमब्भक्षत्वमुक्तं। तन्मि-
थ्याभिशापानंतरं किंचित्कालमकृतप्रायश्चित्तस्य॥ याज्ञ-
वल्क्यः॥ यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः। तत्र तत्र
तिलैर्होमो गायत्र्या वाचनं तथा। अथोद्धृत्यादिना महापात-
कादिपतनीयप्रायश्चित्तान्यकुर्वतो निष्काशनप्रकारः॥
याज्ञवल्क्यः॥ दासी कुंभं वहिर्ग्रामान्निनयेरन्स्वबांधवाः
पतितस्य वहिः कुर्युः सर्वकार्येषु चैवतं। ॐ इत्यादिना अकृत-
प्रायश्चित्तस्य पतितस्य कृते बांधवाः सपिंडादिप्रेषितया दास्या-
नुनीतमुदकपूर्णं घटं ग्रामात् बहिर्निनयेयुः। पर्यस्येयुः॥
अथवा सपिंडादियुक्ता दास्येव पर्यस्येत्॥ तथा च मनुः
॥ दासीघटमपां पूर्णं पर्यस्येत्प्रेतवत्पदा। अहोरात्रमुपासीर-
न्नाशौचं बांधवैः सहेति। प्रेतवदिति प्राचीनावीतित्वादिप्रा-
प्त्यर्थं। अत्रापरं विशेषमाहसरल। पतितस्योदकं कार्यं सपिंडै-

बांधवैः सह। निंदितेहनि सायाह्ने कृत्वर्त्विग्गुरुसंनिधौ। निंदि-
तेहनि रिक्तानिमिष्यादिषु॥ गौतमः॥ तस्य विद्यागुरून्योनि-
संबद्धांश्च संनिपात्य सर्वाण्युदकादीनि प्रेतकार्याणि कुर्युः पात्रं
चास्य विपर्यस्येयुः। दासः कर्मकरो वावकरात्पात्रमानीय
घटात्पूरयित्वा दक्षिणामुखः पदा विपर्यस्येदमुमनुदकं करोमी-
ति नाम ग्राहं तं सर्वेन्वारभेरन्प्राचीनावीतिनो मुक्तशिखा विद्या-
गुरवो योनिसंबंधाश्च वीक्षेरन्नुपस्पृश्य ग्रामं प्रविशंति अत
ऊर्ध्वं तेन संभाष्य तिष्ठेदेकरात्रं जपेत्सावित्रीं ज्ञानपूर्वं वा त्रिरात्र-
मिति॥ अयमर्थः॥ यः पतितत्वादिना हेतुना त्याज्यत्वेनोक्तः तं
विद्यागुरूनाचार्यादीन् योनिसंबद्धान्मातामहमातुलादींश्च पु-
त्रादयः संनिपात्य मेलयित्वा गकारणाभावेप्यतैरनुमताः पुत्रा-
दयः सपिंडाः सर्वाणि पिंडोदकश्राद्धादीनि प्रेतकार्याणि जीवं-
तमेव तमुद्दिश्य कृत्वा पात्रं चास्य त्याज्यस्य कृते विपर्यस्येयुः
कथमित्यपेक्षायामाह दास इत्यादि। तयोर्मध्ये एकः अवक-
रात्पुरीषादिस्थानादशुचिपात्रमानीय दास्यानीतोदकघट-
दाच्चसुदकेन पूरयित्वा तदनंतरं दक्षिणामुखो मुंकं देवदत्तम-
नुदकं करोमीत्यभिधाय यदा विपर्यस्येत्तं विपर्यस्यंतं त्याज्यस-
पिंडाः पुत्रादयः प्राचीनावीतिनो मुक्तशिखा अन्वारभेरन्। वि-
द्यागुरवो योनिसंबद्धाश्च वीक्षेरन्। ततः स्नात्वा ग्रामं प्रविशंति।
अत ऊर्ध्वमज्ञानात्तेन संभाष्य सावित्रीं जपन्नहोरात्रं तिष्ठेत्। ज्ञा-
नात्तु त्रिरात्रमिति जपन्तिष्ठेत्॥ अथ महापातकादिप-

तृतीयकर्म्मप्रायश्चित्तानंतरं कर्त्तव्यं॥ याज्ञवल्क्यः
चरितव्रत आयाते निनयेरन्नवं घटं। जुगुप्सेरन्न चाप्येनं संपिबेयुश्च
सर्वशः। कृतप्रायश्चित्ते समागते नवमनुपहतमुदकपूर्णं कुंभं शुभे
जलाशये निनयेयुः प्रक्षिपेयुः। सर्वशः सर्वकार्येषु संपिबेयुः। सं-
व्यवहरेयुः। मनुः। प्रायश्चित्ते तु चरिते पूर्णं कुंभमपां नवं। तेनैव
सार्द्धं प्रास्येयुः स्नात्वा पुण्ये जलाशये इति। प्रास्येयुः प्रक्षिपेयुः। गौ-
तमः। यस्तु प्रायश्चित्तेन शुद्ध्येत्तस्मिन् शुद्धे शातकुंभमयं पात्रं पु-
ण्यतमान् ह्रदात्पूरयित्वा स्रवंतीभ्यो वा तत एनमप उपस्पर्शयेयु-
रथास्मै तत्पात्रं दद्युस्तत्संप्रतिगृह्य जपेच्छंता द्यौः शंता पृथिवी शं-
तं शिवमंतरिक्षं यो रोचने तमिव गृह्णामीत्येतैर्यजुर्भिस्तरत्समंदीभिः
पावमानीभिः कूष्मांडीभिश्चाज्यं जुहुयाद्धिरण्यं ब्राह्मणाय दद्या-
द्गां चाचार्याय यस्य तु प्राणांतिकं प्रायश्चित्तं स मृतः शुध्येदेव।
शांत्युदकं सर्वेषूपपातकेष्विति। वशिष्ठः। तथाभिषिक्तस्य प्रत्यु-
द्धारः पुत्रजन्मना व्याख्यात इति। अभिषिक्तस्य पूर्वोक्तरीत्या कृत-
स्नानस्य प्रत्युद्धारो भवति स च पुत्रजन्मना व्याख्यातः। पूर्वोक्त-
रीत्या प्रत्युद्धारानंतरं जातकर्मादिसंस्कारैः संस्कुर्यादित्यर्थः
। याज्ञवल्क्यः। घटेपवर्जिते ज्ञातिमध्यस्थो यवसं गवां।
दद्यात्प्रथमं गोभिः सत्कृतस्य हि सत्क्रिया। घटेपवर्जिते पू-
र्वोक्तरीत्या पुण्यह्रदादिषु घटे निक्षिप्ते यवसं तृणं। गोभिः स-
त्कारस्तद्दत्ततृणभक्षणं। हारीतः। स्वशिरसा यवं तमादा-
य गोभ्यो दद्यात्तदिताः प्रतिगृह्णीयुरथैनं प्रवर्त्तयेयुरिति ॥

गोभिरस्वीकरणे पुनः प्रायश्चित्तं कर्त्तव्यमित्यर्थो दुक्तं भवति। **अथ स्त्रीणां विशेषपतनहेतवः॥ वशिष्ठः** चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या। पतिघ्नी च विशेषेण जुंगितोपगता च या। जुंगितः प्रतिलोमजः। **याज्ञवल्क्यः** नीचाभिगमनं गर्भपातनं भर्तृहिंसनं। विशेषपतनीयानि स्त्रीणामेतान्यपि ध्रुवं। अपिशब्दाद्ब्रह्महत्यादिपुरुषपतननिमित्तान्यपि। नीचो हीनवर्णः शूद्रः॥ **तथा**॥ पतितानामेष एव विधिः स्त्रीणां प्रकीर्त्तितः। वासो गृहांतिके देयमन्नं वासः सरक्षणं। एष एव। यः पुरुषाणामकृतप्रायश्चित्तानां परित्यागविधिः। यश्च कृतप्रायश्चित्तानां परिग्रहविधिः सः तत्र विशेषः। वासो गृहांतिके देयमिति। अन्योपि विशेषस्तेनैवोक्तः शरणागतबालस्त्रीहिंसकान् संपिबेन्नतु चीर्णव्रतानपि सतः कृतघ्नसहितानिमान्। चीर्णव्रतान् कृतप्रायश्चित्तान्। संपिबेन्न व्यवहरेदित्यर्थः॥ इति प्रकाश प्रायश्चित्तानि॥ अथ रहस्यकृतपापप्रायश्चित्तानि। कर्तृव्यतिरिक्तैरविज्ञातं पापं रहस्यमित्युच्यते। अतश्च परस्त्रीसंभोगादिषु द्वादिभिः कर्तृभिर्विज्ञातमपि पापं रहस्यमेव। कर्तृव्यतिरिक्तैरनभिज्ञातत्वात्। इदं वक्ष्यमाणं प्रायश्चित्तं यदि कर्त्ता धर्मशास्त्रनिपुणस्तर्हि अन्यस्मा अनिवेद्यैव यथोचितं कुर्यात्॥ यदि स्वयमज्ञस्तदा केनापि रहस्यमहापातकादिकं कृतं। तत्र कस्य पातकस्य का वा निःकृतिरिति विदुषः पृष्ट्वा तदुक्त

मनुतिष्ठेत्। तच्च व्रतं द्विविधं। वक्ष्यमाणाघमर्षणजपादिदा-
नादि च। जपे विदुषोऽधिकारः। स्त्रीशूद्राणां दानादिषु। दाना-
नि च स्मृत्यन्तरेषूक्तानि॥ **तथा च वृद्धवशिष्ठबृहस्प-
ती॥** यत्किंचित्कुरुते पापं जन्मप्रभृति मानवः। अपि गो-
चर्ममात्रं तु प्राहुर्वेदविदो जनाः। दशहस्तेन वंशेन दश वंशा-
न् समं ततः। पंच वाप्यधिकं दद्यादेतद्गोचर्म कथ्यते॥ **वशि-
ष्ठः॥** सुवर्णनाभं कृत्वा तु सखुरं कृष्णमार्गकं। तिलैः प्रच्छा-
द्य यो दद्यात्तस्य पुण्यफलं शृणु। कृष्णाजिने तिलान्कृ-
त्वा हिरण्यं मधुसर्पिषी। ददाति यस्तु विप्राय सर्वं तरति
दुःष्कृतं। तथा वैशाख्यां पौर्णमास्यां तु ब्राह्मणान्सप्त पंच च।
तिलान्क्षौद्रेण संमिश्रान्कृष्णान्वा यदि वेतरान्। प्रीयतां
धर्मराजो मे यद्वा मनसि वर्त्तते। यावज्जीवं कृतं पापं तत्क्षणा-
देव नश्यति। एवं माघस्नानादीन्यपि पुराणेष्ववगंतव्या-
नि। अतश्च स्त्रीशूद्राणामपि रहस्यप्रायश्चित्ताधिकारोस्ति
॥ **याज्ञवल्क्यः॥** अनभिख्यातदोषस्तु रहस्यं व्रतमा-
चरेत्। त्रिरात्रोपोषितो जप्त्वा ब्रह्महा त्वघमर्षणं। अंतर्जले
विशुद्ध्येत गां दत्वा तु पयस्विनीं। त्रिरात्रं यावत्कृतोपवासश्चतु-
र्थदिवसे अघमर्षणेन दृष्टमानुष्टुभं भाववृत्तदेवताकं ऋ-
तं च सत्यं चेति सूक्तं जलमध्ये निमग्नसकलशरीरस्त्रिर्जपे-
त्। अनंतरं पयस्विनीं गां ब्राह्मणाय दत्वा विशुद्ध्यति। तथा
लोमभ्यः स्वाहेति हि वा दिवसं मारुताशनः। जले सुखमि-

 مدن پارجات- ۵۵۱

जुहुयाच्चचत्वारिंशद्घृताहुतीः। अहोरात्रोषितस्तत्रवराचावुदवासंकला
प्रातरुदकादुत्तीर्य लोमभ्यः स्वाहेत्याद्यैरष्टभिर्मन्त्रैरेकैकेन पं-
च पंचाहुतीर्जुहुयात्। एतत्प्राणांतिकप्रायश्चित्तनिमित्ते ब्र-
ह्मवध इत्यपरार्के॥ **सुमन्तुः**॥ देवद्विजगुरून् हत्वाप्सुनि-
मग्नोऽघमर्षणं सूक्तं त्रिरावर्त्तयेन्मातरं भगिनीं गत्वा मातृष्व-
सारं स्नुषां सखीं चान्यद्वागम्यागमनं कृत्वाघमर्षणमेवांत-
र्जले त्रिरावर्त्त्य तदेतस्मात्पूतो भवतीति। एतच्चाकामकृते।
अस्मिन्नेव विषये गोदानाशक्तस्य मनूक्तं। सव्याहृतिप्रणव-
काः प्राणायामास्तु षोडश। अपि भ्रूणहनं मासात्पुनंत्यह-
रहः कृता इति। अकामतोऽभ्यासे गौतमोक्तं तद्भूत एव ब्रह्म-
हत्यासुरापानसुवर्णस्तेयगुरुतल्पेषु प्राणायामैः श्रांतो-
ऽघमर्षणं जप्त्वा इति। तद्भूत एवश्रांतः। अत्र त्रिंशद्रात्रव्रतं प्रकृ-
तं। कामकारे तु बौधायनोक्तं। ग्रामात्प्राचीं वोदीचीं वा दिश-
मुपनिःक्रम्य स्नातः शुचिवासा उदकांते स्थंडिलमुपलिप्य-
मक्लिन्नवासाः सकृत्पूतेन पाणिनादित्याभिमुखोऽघमर्षणं
स्वाध्यायमधीयीत प्रातः शतं मध्याह्ने शतमपराह्णे शतमपरिमितं वोदि-
तेषु नक्षत्रेषु प्रसृतयावकं प्राश्नीयात् ज्ञानकृतेभ्यो ज्ञानकृते-
भ्यश्चोपपातकेभ्यश्च सप्तरात्रात्प्रमुच्यते द्वादशरात्रात्म-
हापातकेभ्योऽन्यो ब्रह्महत्यासुवर्णस्तेयसुरापानमिति वर्ज्ज-
यित्वा एकविंशतिरात्रेण तान्यपि तरतीति। एतदेव काम-
तः श्रोत्रियाचार्यसवनस्थवधेऽपि योज्यं। कामतः सकृत्।

श्रोत्रियादिवधे अकामतः अश्रोत्रियाभ्यासे च मनूक्तं। अ-
रण्ये वा त्रिरभ्यस्य प्रयतो वेदसंहितां। मुच्यते पातकैः सर्वैः
पराकैः शोधितस्त्रिभिरिति। निमित्तकर्तृविषये च हारीतो-
क्तं द्रष्टव्यं। महापातकातिपातकपातकोपपातकानामेक-
तमे सन्निपाते वाघमर्षणमेव त्रिर्जपेदिति। निर्गुणवधविष-
ये अनुग्राहकविषये च विष्णूक्तं। ब्रह्महत्यां कृत्वा ग्रामात्प्रा-
चीमुदीचीं वा दिशमुपनिः क्रम्य प्रभूतेंधनेनाग्निं प्रज्वाल्या-
घमर्षणेनाष्टसहस्रमाहुतीर्जुहुयात्तदेतस्मात्पूतो भवती-
ति। हंतुर्गुणवतो निर्गुणवधविषये प्रयोजकानुमंतृविषये
च मनूक्तं। त्र्यहं तूपवसेद्युक्तस्त्रिरह्नोऽभ्युपयन्नपः। मुच्यते
पातकैः सर्वैस्त्रिर्जपित्वाघमर्षणमिति॥ अथ सुरापाना-
प्रायश्चित्तं॥ नवचत्वारिंशद्घृताहुतीरित्यनुवर्त्तमाने।
याज्ञवल्क्यः॥ त्रिरात्रोपोषितो हुत्वा कूष्मांडीभिर्घृतं शु-
चिः। कूष्मांडीभिर्यद्देवा देवहेडनमित्याद्याभिर्नवचत्वारिं-
शताज्याहुतीर्जुहुयादिति। एतच्चाकामतः पैष्ट्याः सकृत्पाने
गौडीमाध्व्योः पानाभ्यासे च द्रष्टव्यं। अत्र कामतोऽपि गोदानं क-
र्त्तव्यं। एतच्चाग्रे दर्शयिष्यते। अत्रैव विषये त्रिरात्रोपवासयु-
कूष्मांडहोमाशक्तस्य मनूक्तं। कौत्सं जप्त्वाप इत्येतद्वासिष्ठं
च प्रतीत्यृचं। माहित्रं शुद्धवत्यश्च सुरापोऽपि विशुद्ध्यतीति।
अत्र षोडशेति मासमिति चानुवर्त्तते। अतः प्रतिदिनं षोडशकृ-
त्वो मासपर्यंतं नियताहार उक्तमंत्रजपः कार्यः। अपइत्येतत्त्वौ

त्सं। अप नः शोशुचदघं इत्येतत्सूक्तं कुत्सदृष्टं॥ वासिष्ठं
प्रतित्र्यृचं प्रतिस्तोमेभिरुषसं वसिष्ठा इत्येतत्। माहित्रं महि-
त्रीणामवोऽस्त्वित्येतत्। शुद्धवत्यः एतोन्विन्द्रं स्तवामेत्या-
द्याः। एतेषां मध्ये अन्यतमजपः। कामकारेऽपि तैरेवोक्तं द्र-
ष्टव्यं। मंत्रैः शाकलहोमीयैरब्दं हुत्वा घृतं द्विजः। सुगुर्वप्यप
हन्त्येनो जप्त्वा वा नम इत्यृचमिति। होमजपयोर्विकल्पः। एत-
च्च संवत्सरं यावत्प्रत्यहं कार्यं। शाकलमंत्राः। देवकृतस्यैन
सोऽवयजनमसीत्यादयोऽष्टौ। नम इत्यृक्। नम इद्युग्रं नम आविवा-
स इति। कामतो महापातकसमुच्चये प्रत्येकस्याभ्यासे वापि
तदुक्तमेव। महापातकसंयुक्तोऽनुगच्छेद्गाः समाहितः। अभ्य-
स्याब्दं पावमानीर्भैक्ष्याहारो विशुध्यतीति। पावमान्यः स्वा-
दिष्ठया मदिष्ठयेत्याद्याः॥ अथ सुवर्णस्तेयप्रायश्चि-
त्तं॥ तत्र त्रिरात्रोपोषित इत्यनुवृत्तौ याज्ञवल्क्यः॥ ब्रा-
ह्मणस्वर्णहारी तु रुद्रजापी जले स्थित इति। त्रिरात्रोपवासा-
नंतरं जलमध्ये स्थित्वा एकादशकृत्वो नमस्ते रुद्रमन्यव
इति। त्रिरात्रोपवासानंतरं जलमध्ये स्थित्वा एकादशकृ-
त्वो नमस्ते रुद्रमन्यव इति शतरुद्रीयजपं कृत्वा शुध्ये-
दित्यर्थः॥ तथा चात्रिः॥ एकादशगुणान्वापि रुद्रा-
नावर्त्य धर्मवित्। महापापैरपि स्पृष्टो मुच्यते नात्र संशयः।
इति शातातपेन विशेष उक्तः। मद्यं पीत्वा गुरुदारांश्च ग-
त्वा स्तेयं कृत्वा ब्राह्मणहत्यां च कृत्वा भस्मच्छन्नो भस्मश-

र्थ्यां प्रायानो रुद्राध्यायी मुच्यते सर्वपापैरिति। अत्रापि कर्म्मणोंते ब्राह्मणाय गौर्देयेति एतच्चोत्तरत्र प्रकरणे स्फुटीभविष्यति। एतच्चाकामतः। अत्रैवाभ्यासे द्विगुणं कल्प्यं। कामतस्तु पूर्वप्रकरणे दर्शितं मंत्रैः शाकलहोमीयैरिति मनूक्तं द्रष्टव्यं। कामतोभ्यासे तु मनूक्तं। महापातकसंयुक्तोनुगच्छेद्गाः समाहित इति पूर्वप्रकरणोक्तं द्रष्टव्यं। गुरुणादत्तोपहर्त्तुर्निर्गुणस्वामिकस्वर्णहरणे सुवर्णपरिमाणान्न्यूनपरिमाणेरणे। अनुग्राहकप्रयोजकविषये च मनूक्तं द्रष्टव्यं। सकृज्जप्त्वास्यवामीयं शिवसंकल्पमेव च। सुवर्णमपहृत्यापि क्षणाद्भवति निर्मल इति। अस्यवामीयं अस्य वामस्य पलितस्य होतुरिति सूक्तं द्विपंचाशदृक्संख्याकं। शिवसंकल्पं शिवसंकल्पदृष्टं यजुः। अथ गुरुतल्पप्रायश्चित्तं॥ तत्र चत्वारिंशच्छताहुतीरित्यतश्चत्वारिंशत्पदानुवृत्तौ याज्ञवल्क्यः॥ सहस्रशीर्षाजापी तु मुच्यते गुरुतल्पगः। गौर्देया कर्म्मणोस्यांते पृथग्गोभिः पयस्विनीति। सहस्रशीर्षाजापीति नाध्येत्येणिनिः। अतएव जपावृत्तिर्गम्यते। आवृत्तिसंख्या च चत्वारिंशत्पदेन नियम्यते॥ हारीतः॥ त्रिरात्रोपोषितः पुरुषसूक्तजपहोमाभ्यां गुरुतल्पगः शुद्ध्येदिति। होमेपि चत्वारिंशत्संख्या न्वेति पृथग्गोभिः पयस्विनीति। एभिः सुरापसुवर्णस्तेयगुरुतल्पगैस्त्रिभिरपि पृथक्पृथक् त्रिरात्रव्रतस्यांते गौर्देयेत्यर्थः। एतच्चाकामकारे। अत्रैव विषये त्रिरात्रोपवाससहितगोदानाश-

त्तस्य मनूक्तं द्रष्टव्यं। हविष्यांतीयमभ्यस्य नतमंह इतीति च।
जप्त्वा च पौरुषं सूक्तं मुच्यते गुरुतल्पग इति। अत्र मासमित्य-
नुवर्त्तते। षोडशेति च। मासं नियताहारः सन्उक्तसूक्तानां-
मन्यतमसूक्तस्य जपः षोडशसंख्याकः कार्यः। हविष्यांती-
यं हविष्पांतमजरं स्वर्विदीत्येतदानतमंहः। न तमंहो न दुरि-
तं कुतश्चनेति। इतीति च। इति वा इति मे मन इति। पौरुषं सूक्तं
सहस्रशीर्षेति। अकामतोभ्यासे द्विगुणं कल्प्यं। कामतस्तु
सुरापानप्रकरणे दर्शितैर्मंत्रैः शाकलहोमीयैरिति मनूक्तं द्र-
ष्टव्यं। कामतअभ्यासे षड्गुणमित्युक्तं। महाव्याहृतिभि-
र्होमः तिलैः कार्यो द्विजन्मना। उपपातकशुद्ध्यर्थं सहस्रप-
रिसंख्यया। महापातकसंयुक्तो लक्षहोमेन शुद्ध्यतीति।
व्यभिचारिणीगमने तु यमोक्तं द्रष्टव्यं। जपेत वास्यवामीयं
पावमानीरथापि वा। कुंतापं वालखिल्यांश्च निवित्प्रैषान्-
वृषाकपिं। होतॄन्रुद्रान्सकृज्जप्त्वा मुच्यते सर्वपातकैरिति।
गुरुतल्पातिदेशविषयेषु तत्समेषु च क्रमेण पादपादोनमर्द्धं
च कल्पनीयं॥ अथ संसर्गिप्रायश्चित्तं॥ तत्र येन महापा-
तकेनोपसृष्टेन सह संसर्गः पूर्वोक्तकालावधिको येन कृतः स त-
त्कृत्याय प्रायश्चित्तमेव कुर्यात्। ननु रहस्यपातकिसंसर्गिणः
संसर्ग एव दुर्ज्ञेय इति कथं संसर्गप्रायश्चित्तप्राप्तिः उच्यते। प-
रदारगमनवत्समग्राकर्तृपुरुषव्यतिरिक्तपुरुषांतरानव-
गमादस्त्येव संसर्गप्रायश्चित्तप्राप्तिः अथ संसर्गकर्त्ता पापकर्त्तुः सप

युक्तत्वपरिज्ञानेरहस्यमेव न भवतीतिचेत्। मानाम भूत्साक्षाद्ब्रह्महत्यादिकर्तृरहस्यपापयुक्तत्वं। तत्संसर्गिणस्तुपापंरहस्यमेवेतितस्यप्रायश्चित्तमस्त्येव। संसर्गश्च द्विनिष्ठइतिसंसर्गपरिज्ञानेपिरहस्यमेव। एवमतिपातक्यादिसंसर्गिणोपितदीयमेवप्रायश्चित्तंविज्ञेयं॥ अथोपपातकादिप्रायश्चित्तं॥ याज्ञवल्क्यः॥ प्राणायामशतंकार्यंसर्वपापापनुत्तये। उपपातकजातानामनादिष्टस्यचैवहि। अनादिष्टस्यप्रकीर्णकस्य। उपपातकेष्वज्ञानतःसकृत्कृतेषुशतंप्राणायामाः। अभ्यासे कामतश्च द्विगुणंकल्प्यं। जातिध्वंशकरादिषु किंचिन्न्यूनंकल्पनीयं॥ बौधायनः॥ अपिवाक्चक्षुःश्रोत्रघ्राणमनोव्यतिक्रमेषुत्रिभिःप्राणायामैःशुद्ध्यति। एतत्प्रकीर्णकाभिप्रायं। तथाशूद्रस्त्रीगमनान्नभोजनेषुपृथक्पृथक्सप्ताहं सप्तसप्तप्राणायामान्धारयेत्। एतदुपपातकविशेषाभिप्रायं। तथा। अभक्ष्याभोजनामेध्यप्राशनेषुतथाचापण्यविक्रयेषुमधुमांसघृततैललाक्षालवणरसान्नवर्जेषु यच्चान्यदप्येवंयुक्तं स्यात् द्वादशाहात् द्वादशद्वादशप्राणायामान्धारयेत्। एतदप्युपपातकविशेषाभिप्रायं॥ तथा॥ अथपातकोपपातकवर्जंयच्चान्यदप्येवंयुक्तंस्यादर्द्धमासं द्वादशद्वादशप्राणायामान्धारयेत्॥ एतच्च जातिध्वंशकराद्यभिप्रायं। अथपातनीयवर्जंयच्चान्यदप्येवंयुक्तंमासंद्वादशप्राणायामान्धारयेत्। एतच्च

 مدن پارجات--۴۲۸

गोवधाद्युपपातकविषयं॥ तथा॥ अथपातकवर्जं यच्चा-
न्यदप्येवंयुक्तं द्वादशाहं मासात् द्वादशप्राणायामान् धा-
रयेत्। एतच्चोपपातकमहापातकमध्यवर्त्यतिदिष्टत-
त्समविषयं॥ तथा॥ अथपातकेषु संवत्सरं द्वादशाद्वादश
प्राणायामान् धारयेदिति। एतच्च महापातकविषयं॥ अ-
भक्ष्याभोज्येत्युपक्रम्योक्तं प्रायश्चित्तपंचकमत्यंताभ्यासे
समुच्चयेवा वेदितव्यं॥ मनुः॥ एनसां स्थूलसूक्ष्मानां चि-
कीर्षन्नपनोदनं। अवेत्यर्चं जपेदब्दं यत्किंचेदमितीति च। अ-
वेति अवते हेलो वरुणनमोभिरित्येषा यत्किंचेदं वरुणदै-
व्यइत्येषा च। संख्यायाअनुक्तत्वादावश्यककर्माविरो-
धिकालेषु जपः कार्यः। एतदभ्यासविषये योज्यं। अका-
मतो रेतोविण्मूत्रप्राशने याज्ञवल्क्योक्तं द्रष्टव्यं। ॐकारा-
भिष्टुतं सोमसलिलं पावनं पिबेत्। कृत्वा तु रेतोविण्मूत्रप्रा-
शनं हि द्विजोत्तमः। सोमसलिलं सोमलतारसं ॐकारेणा-
भिमंत्रितं पिबेत्। कामतस्तु सुमंतूक्तं। रेतोविण्मूत्रप्राशनं
कृत्वा लशुनपलांडुगृंजनकुंभीकादीनामन्येषां चाभ-
क्ष्याणां भक्षणं कृत्वा हंसग्रामकुक्कुटश्वशृगालादिमां-
सभक्षणं च कृत्वा ततः कंठमात्रमुदकमवतीर्य शुद्धवती-
भिः प्राणायामं कृत्वा ब्रह्मव्याहृति। मेरुरोगमुदकं पीत्वा
तदेतस्मात्पूतो भवतीति। ब्राह्मणा ॐकारेण व्याहृति-
भिश्चाभिमंत्रितं पिबेदित्यर्थः॥ मनुः॥ प्रतिगृह्याप्रति-

ग्राह्यं भुक्त्वा चान्नं विगर्हितं। जपंस्त्रन्तसमंत्रीयं पूयते मान-
वस्त्र्यहात्। मानसिकउपपातके ऽज्ञानकृतेप्रकीर्णके
चयाज्ञवल्क्योक्तं। निशायां वा दिवा वापि यदज्ञानकृ-
तं भवेत्। त्रैकाल्यसंध्याकरणात्तत्सर्वं विप्रणश्यति॥
शातातपोपि। अनृतंमद्यगंधवालोअंमैथुनमेवच। पुना-
ति वृषलान्नं च बहिःसंध्या ह्युपासिता। आचारप्रविवेचना
य विदुषां प्राचां प्रपंचाधिकाः श्रौतस्मार्त्तपथेष्टगुम्फम-
जुषां ग्रंथान संनीतिन। तेषां मत्कृतेरत्र कश्चन गुणो यद्य-
स्ति संभाव्यतां कर्त्ता वेद चिरंतनः किमियताडीये नवः सं-
जना ये केचिदत्र सगुणान पि दूषयंति सक्तोभ्यथंत इति
तेन विचारणीया। येतुप्रगल्लप्रशयः सुजनयश्चयेषांलो-
केप्रमे कृतिमिमामवधारयंतु॥ इह मदनपारिजाते मदन
क्षितिपालदानजलहृष्टेन दमस्लबकोयमभूदामोदाकृ
ष्ण पंडितस्त्वमरः ॥ भतिर्येषां शास्त्रे प्रकृतिरमणीया व्य-
वहृतिः परा प्रीत्यं श्लाघ्यं जगति कृजवस्ते कतिपये। चिरं-
चितेतेषां मुकुरक ल भूते स्थितिमियादियं व्यासारण्य
प्रवरमुनिशिष्यस्य भणितिः॥ इति पंडितपारिजा-
तकहारमल्लेत्यादि विरुदराजी विराजमान-
स्य श्रीमदनपालस्य निबंधे मदनपारिजाता-
भिधेनवमस्तवकः॥ ९॥ शुभमस्तु॥

इति

नाम किताब	नाम किताब	नाम किताब
मनुस्मृति	सत्यनामविहार वृन्दावन	रामायण तुलसीकृत मय
विष्णुहारीत स्मृति	समरविहार वृन्दावन	तसवीर व क्षेपक
लघुजातक	केनोपनिषद्	तथा मय क्षेपक मुजल्लिद
मार्कण्डेय पुराण	मुण्डक उपनिषद	तथा मय तसवीर सटीक
	ईशावास्य उपनिषद	तथा मुजल्लिद
ज्योतिष भाषा	बीजक कबीरदास	तथा जली क़लम मय क्षेप०
दैवज्ञ भरण	पारसभाग	तथा मय क्षेपक खुर्द
ज्ञान स्वरोदय	आनन्दाऽमृतवर्षिणी	रामायण तु० कृ० टी० सुख-
रमलसार		देवलाल कृत
रमल नवरत्न	**पुराण भाषा**	रामायण तु० कृ० टी० राम-
पञ्चा बापूदेवशास्त्री	लिङ्ग-पुराण	चरणदास कृत
ज्योतिष चन्द्रिका यानी	भविष्य पुराण	वाल्मीकीय रामायण भाषा
भूगोलसार	स्कन्दपुराण कासीखंड भाषा	१- बालकाण्ड
जातक चन्द्रिका	वाराह पुराण	२- अयोध्या काण्ड
जातकालंकार	विष्णु पुराण	३- आरण्य काण्ड
लग्न चन्द्रिका	ब्रह्मोत्तर खण्ड	४- किष्किन्धा काण्ड
वेदान्त	कर्मविपाक संस्कृत	५- सुन्दरकाण्ड
	मिश्रित माहात्म्य	६- लंकाकाण्ड
अपरोक्षानुभव	गरुड़ पुराण भा० टी० स०	७- उत्तरकाण्ड
योगवाशिष्ठ	मार्कण्डेय पुराण	रामचन्द्रिका सटीक
सांख्य तत्त्व कौमुदी	**भाषा इतिहास**	रामायण राम विलास
कैवल्य कल्पद्रुम		रामायण तु० कृ० अलेहदा भी
वेदस्तुति	महाभारत काशिराज कृत	छपी हैं कांड २
ज्ञानतरङ्ग	महाभारत सबलसिंह चौ-	१- बालकाण्ड
ज्ञान भूषण	हानकृत पद्य में है-	२- अयोध्याकाण्ड

नाम किताब	नाम किताब	नाम किताब
३ - आरण्यकाण्ड	**काव्य**	पीयूष लहरी
४ - किष्किन्धाकाण्ड	सूरसागर सूरदासकृत	जगद्विनोद
५ - सुन्दरकाण्ड	कृष्णसागर	**राग**
६ - लंकाकाण्ड	विश्रामसागर	
७ - उत्तरकाण्ड	प्रेमसागर	राग प्रकाश
अद्भुतरामायण	ब्रजविलास बड़ा	लावनी बनारसी कृ
उमापति दिग्विजय	तथा छोटा	राग संग्रह कृष्णकवि
रामायण का इतिहास	विजयमुक्तावली खुलासा	भजनमाला
रामायण मानसदीपिका	महाभारत -	भजनावली
रामायण कवित्तावलीतु-	छन्दोर्णव पिङ्गल	सांगीत प्रह्लाद
लसी कृत सटीक	कविकुल कल्पतरु	बीणाप्रकाश यानी का
रामायण गीतावली सटीक	रसराज	न सितार
रामकलेवा	सतसई सटीक बिहा० ला० कृ	कृष्णगीतावली
महारामायण	सभाविलास	रायलरीडर नम्बर १,२,
विनयपत्रिका मय तिलक	तुलसी शब्दार्थ प्रकाश	**वैद्यक भाषा**
अवतार कथामृत	प्रेमरत्न	
श्रीरामविवाहोत्सव	भुवनेश भूषण	निघण्ट
सुखसागर (टैप)	भुवनेश विलास	अमरविनोद
सुखसागर (लैथूग्राफ़)	नवीनसंग्रह	वैद्यजीवन
सुदामाचरित्र	भक्तमाल बड़ी	औषधसंग्रह कल्पवल्ली
रामविनय शतक	तथा सटीक	अमृतसागर
विजय चन्द्रिका	युगलविलास	वैद्यमनोत्सव
उपदेश चन्द्रिका	चित्रचन्द्रिका	इलाजुलगुर्बा
सुन्दरविलास	गंगा लहरी	दिल्लगान
विजय दोहावली	यमुना लहरी	माधवनिदान संस्कृत